आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ ५ ॥

मि० धर्म॰॰॰॰समयाचारविरु॰ेन मार्गेण परैराधर्षितोऽभिभूतो यदू राज्ञे ॰॰॰॰॰॰॰॰ वा आवे॰य-

ति वि ापयति चेत् यदि, तद् आवश्यम नं व्यवहारपदं प्रतिज्ञोत्तरसंशयहे परामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यव ारः तस्य पदं विषयः। तस्य चेदं सामान्यलक्षणम्।

स च द्विविधः शङ्काभियोगस्तत्त्वाभियोगश्चेति।

यथाह नारदः, (अ० १ श्लो० २७)

द्व्याभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः।
शङ्काऽसतां तु संसर्गात्तत्त्वं होढाभिदर्शना ि ति॥

होढा लोप्त्रं लिङ्गमिति यावत्। तेन दर्शनं साक्षाद्वा दर्शनं होढाभिदर्शनं तस्मात्। तत्त्वाभियोगोऽपि द्विविधः। प्रतिषेधात्मको विध्यात्मकश्चेति। यथा मत्तो ि रण्यादिकं गृहीत्वा न प्रयच्छति, क्षेत्रादि ं ममायमप रतीति च।

उक्तंच कात्यायनेन,

न्याय्यं स्वं नेच्छते कर्तुमन्याय्यं वा करोति यः। इति।

स पुनश्चाष्टादशधा भिद्यते॥

यथाह मनुः। (अ. ८ श्लो. ४. ५. ६. ७.)

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः।
संभूय च समुत्थानं दत्तस्यानपकर्म च॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः।
क्रयाविक्रया ुशयो विवादः वामिपालयोः॥
सीमाविवा धर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्र णमेव च॥
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह॥ इति।

एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि ।
यथाह नारदः, (अ० १ श्लो० २०)
एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं भवेत् ।
क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते ॥ इति ।
आवेदयति चेद्राज्ञे इत्यनेन स्वयमेवागत्यावेदयति न राजप्रेरितस्तत्पुरुषप्रेरितो वेति दर्शयति ।
यथाह मनुः, (अ० ८ श्लो० ४३)
नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः ।
न च प्रापितमन्येन ग्रसेतार्थं कथञ्चन ॥ इति ।
परैरिति परेण पराभ्यां परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति ।
यत्पुनः, (ना० स्मृ० नोपलब्धम्)
एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च ।
अनादेयो भवेद्वादो न्यायविद्भिरुदाहृतः ॥
इति नारदवचनं, तद् भिन्नसाध्यविषयम् । आवेदयति राज्ञे इत्यनेनैव राज्ञा पृष्टो विनीतवेष आवेदयेत्, आवेदितं च युक्तं चेन्मुद्रादिना प्रत्यर्थ्याह्वानम्, अकल्पादीनां चानाह्वानमित्याद्यर्थसिद्धमिति नोक्तम् । स्मृत्यन्तरे तु स्पष्टार्थमुक्तम् ।
यथा,
काले कार्यार्थिनं पृच्छेद्भूणन्तं पुरतः स्थितम् ।
किं कार्यं का च ते पीडा माभैषीर्ब्रूहि मानव ॥
केन कस्मिन्कदा कस्मात्पृच्छेदेवं सभागतम् ।
एवं पृष्टः स यद् ब्रूयात्स सभ्यैर्ब्राह्मणैः सह ॥
विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परम् ।

मुद्रां वा निक्षिपेत्तस्मिन् पुरुषं वा समादिशेत् ॥
उत्कल्पबालस्थविराविषमस्थक्रियाकुलान् ।
कार्यातिपातिव्यसनेनृपकार्योत्सवाकुलान् ॥
मत्तोन्मत्तप्रमत्तार्तान्भृत्यांश्चाह्वानयेन्नृपः ।
न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम् ॥
सर्ववर्णोत्तमां कन्यां ता ज्ञातिप्रभुकाः स्मृताः ।
तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः ।
निष्कुला याश्च पतिता तासामाह्वानमिष्यते ॥
कालं देशं च विज्ञाय कार्याणां च बलाबले ।
अकल्पादीनपि शनैर्यानैराह्वानयेन्नृपः ॥
ज्ञात्वाऽभियोगं येऽपि स्युर्वने प्रव्रजितादयः ।
तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन् ॥ इति ।
आसेधव्यवस्थाऽप्यर्थसिद्धैव—

नारदेनोक्ता, (अ० १)

वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः ।
आसेधयेद्विवादार्थी यावदाह्वानदर्शनम् ॥ (४७)
स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा ।
चतुर्विधः स्यादासेधो नासिद्धस्तं विलङ्घयेत् ॥ (४८)
आसेधकालआसिद्ध आसेधं योऽतिवर्तते ।
स विनेयोऽन्यथाकुर्वन्, आसेद्धा दण्डभाग्भवेत्॥(५१)
नदीसन्तारकान्तारदुर्देशोपप्लवादिषु ।
आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥ (४९)
निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः ।
अभियुक्तस्तथाऽन्येन राजकार्योद्यतस्तथा ॥ (५२)
गवां प्रचारे गोपालाः सस्यावापे कृषीवलाः ।

शिल्पिनश्चापि तत्कालमा धायाश्च विग्रहे ॥(५३) इति ।

आसेधो राजा ...याऽवरोधः । अकल्पा यः पुत्रा-
...कमन्यं वा सुहृदं प्रेषयिष्यन्ति, न च ते परार्थवादिनः ।

यो न भ्राता न च पिता न पुत्रो न नियोग...त् ।
परार्थवादी दण्ड्यः स्याद्व्यवहारे ... विब्रुव... ॥

इति नारदवचनात् ॥ ५ ॥ (अ० २ श्लो० २३)

बा० १ । *व्यव...रविषयमिति । प्रत्यर्थ्यादिमति...लतया नृपादिषु कथनं व्यवहार इत्युक्तम् अतः कथ्यमानं तद्विषयः तमित्यर्थः । व्य-पेतेन रहितेन । *राज्ञे इति । इदं तदधिकृतादेरप्युपलक्षण... । स्मृत्येत्यस्यार्थमाह *धर्मेति । तदो ऽन्वयाया... *यादिति । उप-लक्षणत्वादेवाह *भ्रादिति । चेदर्थो यदीति । पद्ये हिर्निश्चये । व्यवहारपदमित्यस्यार्थमाह *प्रतिज्ञोत्तरेति । एतत्षडात्मक इत्य-र्थः । तस्य विषयस्य ।

२ । अत एव तस्य विषयस्य द्वैविध्यमाह *स चेति । *शङ्के-ति । शङ्कारूपो ऽभियोगो यस्मिन् विषये तत्त्वरूपो ऽभियोगो-यस्मिन्विषये इत्यर्थः । अभियोग इति सुजर्थान्तर्भावेण बहुव्री-हिः । विषयोऽन्यपदार्थः । तदेव विशिष्याह *शङ्केति । *अस-तान्त्विति । असतां चौरादीनां संसर्गाच्चौरत्वादिसम्भावना भ-वतीत्यर्थः । *होढा लोप्त्रमिति । लुप्यते इति लोप्त्रम्, उणादिः, चौर्यधनम् ।

चौरिका स्तैन्यचौर्ये च स्तेयं लोप्त्रं तु तद्धनम् ।

इत्यमरः । *लिङ्गमिति । अव्यभिचरितं चिह्नमित्यर्थः । इद-मुपलक्षणमित्याह *साक्षाद्वा दर्शनमिति । अपहरतीति वेति वापाठेऽपि स समुच्चये ।

३ । विषय...य भेदान्तरमाह *पुनश्चेति । *द्यूतमा...य इति ।

भूतस्यैवोपाधिभेदेन भेद आ. याख्यः । पुनर्भेदमाह *एतान्य-पीति । *साध्येति । अवान्तरसाध्यभेदेनेत्यर्थः । एषाम् ऋणा-दानादीनाम् । तस्य पुनर्भेदान्तरमाह *क्रियेति । क्रिया साध्य-म् । शतशब्दो ऽनन्तव नः । चेदित्यतःसूचितमाह *चेदिति । अन्यथा तत्प्रेरणोल्लङ्घने दण्डापत्त्या चेदित्यस्य ऐच्छिकावेदनबोध-कस्यासङ्गतिः स्पष्टैव । अस्य राज्ञः । *न च प्रापितमिति । कथ-ञ्चन अन्यायेनान्येन प्रापितमर्थं न गृह्णीयादित्यर्थः । यद्वा अन्ये-न प्रापितं निवेदितम् अर्थम् कार्यं कथञ्चन अविचार्य न ग्रसेत नोपेक्षेतेत्यर्थः । न चाप्रापितमिति पाठे तु अन्येन विवद.... तत्सम्बन्धिना वा अप्रापितमनिवेदितं कथञ्चिदवगम्य रागादि-ना न ग्रसेत न ग्राहयेदित्यर्थः ।

४ । मूले परैरित्यत्र "स्वरितात्संहितायामनुदात्तानाम्" इति सूत्रभाष्योक्त रीत्या परश्च परौ च परे चेत्येकशेष इत्याशयेन । *परैरितीति । परेणेत्याद्यर्थकं परैरिति बहुवचनान्तं पदम् इति दर्शयतीत्यर्थः । बहुवचनाविवक्षया योजनं तु परेणेत्यादिग्रन्थस्व-रसविरुद्धम् । एकस्येत्यस्य सर्वत्रान्वयः ।

५ । एवं सति प्राप्तविरोधं परिहरति *यत् पुनरिति । यस्त्वि-त्यर्थः । *न्यायेति । धर्मेति पाठान्तरम् । *तद्भिन्नेति । पृथग्व्य-वहारविषयमित्यर्थः । यदा एकेनैको ऽभियुक्तो मह्यमसौ धारय-तीति, तदा तस्मिन्व्यवहारे ऽनिष्पन्ने ऽन्येनान्येन चान्यथा ना-भियोक्तव्यः । निष्पन्ने तु क्रमेण तथेत्येवम् एकस्य बहुभिर्विवादा-भावो, न त्वेते मह्यं धारयन्ति शतमित्येवम् एकस्य बहुभिर्विवादा-भाव इति भावः । इदं च मत्तोन्मत्तेति व्याख्यानावसरे सबीजं सकलैतत्पद्यव्याख्यानं स्फुटीभविष्यति ।

६ । न्यूनतां परिहरति *आवेदेति । तृतीयान्तरार्थसिद्ध-

मित्यत्रान्वयः । द्वितीयमाह *आवेदितं चेति । तृतीयमाह *अकल्पेति। आधिव्याधिसहितादीनामित्यर्थः।*अर्थसि..मिति। अन्यथाऽविनीतस्यावेद.. न घटेत। ..तत्वेन राजसमीपे गन्तुमशक्यत्वा.. । अ.......ं च तस्य युक्तत्वेऽपि यदि प्रत्यर्थिनो नाह्वानं त.......... निष्फलमिति न कोऽप्यावेदयेत् । तथा च प्रजापरिपालनस्यैवासि..रिति तेषामर्थसि..त्वमित्यर्थः।

७। इदं प्रमाणयति *स्मृत्यन्तरे त्विति । नारदीये त्वित्यर्थः। (ना० स्मृ० नोपलब्धानि) किं कार्यं का चेति। अर्थकृतो मन्युकृतश्च प्रश्नभेदः। केन कर्त्रा कस्मिन् देशे कदा काले कस्मात्कारणात्। तयोर्भेदस्योक्तत्वादाह *ससभ्यैर्ब्राह्मणैरिति। मुद्राग्रहणं लेख्यस्याप्युपलक्षणम् ।

८। एवं ..त्यर्थि.. आह्वाने निषेधमाह *अकल्पेत्यादि। अकल्पः व्याध्याद्यभिभूतः। विषमस्थः उत्पन्नसङ्कटः। क्रियाऽऽकुलः नित्यनैमित्तिकादिक्रियाव्य..ः। *कार्यातिपातीति। यस्यागच्छतो गुरुतरकार्यहानिः सः। व्यसनी इष्टवियोगादिदुःखवान्। द्वन्द्वान्ताकुलशब्दस्य प्रत्येकं सम्बन्धात् नृपकार्यासक्तः उत्सवासक्तः। मत्तो मादकद्रव्येण। उन्मत्तः उन्मादेन पञ्चविधेन वातपित्तश्लेष्मसन्निपातग्रहसम्भवेनोपसृष्टः। प्रमत्तः सर्वदाऽवधानहीनः। आर्तो विपदादिना पीडितः।

९। स्त्रीणां तन्निषेधमाह *न हीनेति। अनाथां सर्वजनशोच्यामिति यावत्। *सर्वेति। ब्राह्मणीम्। तत्र हेतुमाह *ता इति। ताः हीनपक्षादयः ज्ञातिस्वामिका इत्यर्थः।

१०। एवं स्त्रीणामाह्वाने निषिद्धे प्रतिप्रसवमाह *तदधीनेति। तस्या अधीनं तादृशं यत्कुटुम्बं तद् यासामस्तीति इनिः। एक-

---

१ ननु न ....न्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर

देशीतिवत्प्रयोगः । स्वैरिण्यो व्यभिचारताः । गणिकाः वेश्याः । निष्कुला हीनकुलाः ।

११ । एतत्प्रसङ्गादकल्पाद्याह्वाने पूर्वनिषिद्धेऽपि प्रतिप्रसवमाह *कालमिति । तत्र प्रकारद्वयं *स्नैर्यानैरिति ।

१२ । एतत्प्रसङ्गादाह *ज्ञात्वेति । गुरुकार्येषु तथा नेत्याह *गुर्विति । वेषमात्रम्यावत्तत्रापि विशेषमाह *अकोपेति ।

१३ । इत्यादीत्यादेर्प्रकारमेवाह । *आसेधेति । निरोधेत्यर्थः । आसेधयेदिति । विवादार्थी वादी आह्वानदर्शनपर्यन्तं तादृशं प्रत्यर्थिनं निरोधयेदित्यर्थः ।

१४ । तच्चातुर्विध्यमाह । स्थानेति । कृतः आसेधः । तद्विषयत्वाचत्तत्त्वम् । एवमग्रेऽपि । अग्रे उभयत्र कृत इति शेषः । आसेध इति प्रकृते अस्मात्प्रदेशान्न गन्तव्यमिति स्थानासेधः । आसन्ध्यं न गन्तव्यमिति कालासेधः । देशान्तरं प्रति न गन्तव्यमिति प्रवासासेधः । असौ व्यापारो न कर्त्तव्य इति कर्मासेधः । आसिद्धः निरुद्धः । तम् आसेधम् । विनेयः शिक्षणीयः । अन्यथा दण्ड्यमिति ।अनासेधकाले आसेधं कुर्वन्नासेधकर्ता दण्ड्यो भवेदित्यर्थः । यद्वा आसेद्धा आसिद्धं तं लोभादिना मुञ्चन्निति त्याद्यर्थः ।

१५ । नासिद्धस्तं विलङ्घयेदित्यस्य प्रतिप्रसवमाह *नदीति । नदीसन्तारादि निमित्तचतुष्टयम् । तदतिक्रमणे दोषाभावमन्यत्राप्याह । निर्वेष्टुकाम इति । आश्रमान्तरं गन्तुकामः विवाहा-

---

इति निषेधात्कथमत्र कर्मधारयादिनिप्रत्यय इत्याशङ्क्याह । एकदेशीति । व्याख्यानतो विशेषप्रतिपत्तिः एकदेशीत्यादिभाष्याद्युदाहरणेषु कर्मधारयादपि तद्दर्शनात् अपाणिनीयस्य तु मतस्य अप्रामाणिकत्वमिति भावः ।

१ इत्याद्यर्थासिद्धमित्यनेनेत्यादिपदग्राह्यमित्यर्थः ।

दावुद्यत इति यावत् । यियत्सु योद्धुमिच्छुः । तत्काले तस्मिन्काले । आयुधीयाः आयुधजीविनो योद्धारः । विग्रहे संग्रामे । निरुद्धागमादयोऽपि तदुल्लङ्घनेनापराधिनो नेत्यर्थः । सामान्यनिरोधस्यातत्त्वादाह *राजेति ।

१६ । ननु ... शनैर्यानैरपि आगमनं दुर्घटं तत्र किंकार्यमत आह *अन्... इति । ते पुत्रादयः । नियोगकृत् आज्ञाकारी । एतदन्यः परार्थवादी । स व्यवहारेषु विरुद्धं विविधं विशेषेण वा ब्रुवन् दण्ड्य इत्यर्थः ॥ ५ ॥

या० प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।

समामासतदर्धाहर्नामजात्यादिचिह्नितम् ॥ ६ ॥

मि० अर्थ्यते इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी । तत्प्रतिपक्षः प्रत्यर्थी । तस्याग्रतः पुरतो लेख्यं लेखनीयम् । यथा येन प्रकारेण पूर्वम् आवेदनकाले आवेदितं तथा । न पुनरन्यथा । अन्यथावादित्वेन व्यवहारस्य भङ्गप्रसङ्गात् ।

अन्यवादी क्रियाद्वेषी नोपस्थाता निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥ इति ।

आवेदनकाले एवार्थिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह *समामासेत्यादि । संवत्सरमासपक्षतिथिवारादिनार्थिप्रत्यर्थिनामब्राह्मणजात्यादिचिह्नितम् । आदिशब्देन द्रव्य... वेलाक्षमालिङ्गादीनि गृह्यन्ते ।

यथोक्तम्,

---

१ ना० अ० २ श्लो० ३३ ।

अर्थवद्धर्मसंयुक्तं परिपूर्णमनाकुलम् ।
साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च ॥
प्रसिद्धमविरुद्धं च निश्चितं साधनक्षमम् ।
संक्षिप्तं निखिलार्थं च देशकालाविरोधि च ॥
वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत् ।
स्थानावसथसाध्याख्याजात्याकारवयोयुतम् ॥
साध्यप्रमाणद्रव्याङ्कवत् आत्मप्रत्यर्थिनामवत् ।
परात्मपूर्वजानेकराजनामभिरङ्कितम् ॥
क्षमालिङ्गात्मपीडावत् कथिताहर्तृदायकम् ।
यदावेद्यते राज्ञे तद्भाषेत्यभिधीयते ॥ इति ।

भाषा प्रतिज्ञा पक्ष इति नार्थान्तरम् । आवेदनसमये कार्यमात्रं लिखितं, प्रत्यर्थिनोऽग्रतः समामासादिविशिष्टं लिख्यते इति विशेषः । संवत्सरविशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते ।

आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ।

इति स्मरणात् । (या० व्य० अ० २ श्लो० ३३) अर्थव्यवहारेऽपि, एकस्मिन्संवत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितं च, पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमाने यदि ब्रूयात् सत्यं गृहीतं प्रत्यर्पितं चेति, वत्सरान्तरे गृहीतं प्रत्यर्पितं, नास्मिन्वत्सरे इत्युपयुज्यते । एवं मासाद्यपि योज्यम् । देशस्थानादयः पुनः स्थावरेष्वेवोपयुज्यन्ते ।

देशश्चैव तथा स्थानं संनिवेशस्तथैव च ।

जातिः संज्ञाधिवासश्च प्रमाणं क्षेत्रनाम च ॥
पितृपितामहं चैव पूर्वराजानुकीर्तनम् ।
स्थावरेषु विवादेषु शतानि निवेशयेत् ॥

इति स्मरणात् । देशो मध्यदेशादिः । स्थानं वाराणस्यादि । संनिवेशः तत्रैव पूर्वापरदिग्विभागपरिच्छिन्नः सम्यङ्निवेष्टो गृहक्षेत्रादिः । जातिरर्थिप्रत्यर्थिनोर्ब्राह्मणत्वादिः । संज्ञा च देवदत्तादिः । अधिवासः समीपदेशे निवासी जनः । प्रमाणं निवर्तनादि भूपरिमाणम् । क्षेत्रनाम शालिक्षेत्रं क्रमुकक्षेत्रम् कृष्णभूमः पाण्डुभूमः इति । पितुः पितामहस्य च नाम अर्थिप्रत्यर्थिनोः । पूर्वेषां त्रयाणां राज्ञां नमकीर्तनं चेति । समामासादीनां यस्मिन्व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनीयमिति तात्पर्यार्थः । एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदवभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृथक्पक्षाभासा उक्ताः । अन्यैस्तु विस्पष्टार्थमुक्ताः ।

अप्रसिद्धं निराबाधं निरर्थं निष्प्रयोजनम् ।
असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत् ॥

अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि । निराबाधं अस्मदीयप्रदीपप्रकाशेनायं स्वगृहे व्यवहरतीत्यादि । निरर्थम् अभिधेयरहितं कचटतपगजडदबेत्यादि । निष्प्रयोजनं यथा अयं देवदत्तोऽस्मद्गृहसंनिधौ सुस्वरमधीते इत्यादि । असाध्यं यथा अहं देवदत्तेन सभ्रूभङ्गमुपहसित इत्यादि । एतत् साधनासम्भवादसाध्यम् । अल्पकालत्वान्न साक्षिसम्भवो,

लिखितं दूरतः, अल्पत्वान्न दिव्यामिति । विरुद्धं यथा अहं मूकेन शप्त इत्यादि । पुरराष्ट्रादिविरुद्धं वा ।

राज्ञा विवर्जितो यश्च यश्च पौरविरोधकृत् ।

राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥

अन्ये वा ये पुरग्राममहाजनविरोधकाः ।

अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः ॥ इति ।

यत्तु,

अनेकपदसङ्कीर्णः पूर्वपक्षो न सिद्ध्यति ।

इति, तत्र यद्यनेकवस्तुसङ्कीर्ण इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वा अपहृतमित्येवंविधस्यादुष्टत्वात् । ऋणादानादिपदसङ्करे पक्षाभास इति चेत् । तदपि न । मदीया रूपका अनेन वृद्ध्या गृहीताः, सुवर्णं चास्य हस्ते निक्षिप्तम्, मदीयं क्षेत्रमयमपहरतीत्यादीनां पक्षत्वमिष्यत एव । किंतु क्रियाभेदात्क्रमेण व्यवहारो न युगपदित्येतावत् ।

यथाह कात्यायनः,

बहुप्रतिज्ञं यत्कार्यं व्यवहारे सुनिश्चितम् ।

कामं तदपि गृह्णीयाद्राजा तत्त्वबुभुत्सया ॥ इति ।

तस्मादनेकपदसङ्कीर्णः पूर्वपक्षो युगपन्न सिद्ध्यतीति तस्यार्थः । अर्थिग्रहणात्पुत्रपित्रादिग्रहणं, तेषामेकार्थत्वात् । नियुक्तस्यापि नियोगेनैव तदेकार्थत्वाक्षेपात् ।

अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा ।

यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥

इति स्मरणात् । (ना० अ० २ श्लो० २२) नि-

…क्तजयपराजयौ …लस्वामिनोरेव । एवञ्च भूमौ फलके वा पाण्डुलेखेन लिखित्वा आवापोद्धारेण विशोधितं पश्चात् पत्रे निवेशयेत् ।

पूर्वपक्षं स्वभावोक्तं प्राड्विवाकोऽभिलेखयेत् ।
पाण्डुलेखेन फलके ततः पत्रे विशोधितम् ॥

इति कात्यायनस्मरणात् । शोधनं च यावदुत्तरदर्शनं कर्तव्यं नातः परम् । अनवस्थाप्रसंगात् । अत एव नारदेनोक्तम् (ना० स्मृ० नोपलब्धम्)

शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनम् ।
अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत् ॥ इति ।

पूर्वपक्षमशोधयित्वैव यदोत्तरं दापयन्ति सभ्याः तदा रागाल्लोभादित्युक्तदण्डेन सभ्यान् दण्डयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारः प्रवर्तनीयो राज्ञेति ॥ ६ ॥

बा० १ । अर्थशब्दस्याभिधेयपरत्वनिरासद्वारा प्रयोजनपरत्वमा० *अर्थ्यते इति । भूतनिष्ठालब्धमर्थमाह *पूर्वमावेदनेति । क्रिया कार्यम् । नोपस्थाता समीपे न तिष्ठन् । अपलायी अपलायनं अपलायः सो ऽस्यास्तीति अपलायी । *स्मृत इतीति । वचनादिति शेषः । इतिशब्दो हेत्वर्थो वा । अतो हेतोरित्यर्थः ।

२ । पूर्वावतारितैतद्वचनोत्तरार्द्धमेव शङ्कान्तरनिरासपरमित्याशयेन शङ्कते *आवेदनेति । समाशब्दार्थः संवत्सरेति । तदर्धशब्दार्थः पक्षेति । अहर्ग्रहणमुपलक्षणमित्याह *तिथीति । प्रतिपदादिरित्यर्थः । अहःपदार्थो दिनेति । न तु रात्रिरित्यर्थः । नाम्नः साकाङ्क्षत्वेन प्रकृतत्वादाह *अर्थीति । *वेलेति । दिनमध्येऽपि प्रातरादिर्मुहूर्त्तरूपो वा कालविशेष इत्यर्थः ।

३ । *क्षमेति । प्रत्यर्थिविषये आसेधाद्यकरणं क्षमा सहिष्णु-

ता तत्र यानि लिङ्गानि कारणानि बाल्यजडत्वादीनीत्यर्थः । ४। तत्र मानमाह *यथोक्तमिति । तथोक्तमिति पाठान्तरम् । नारदेनेत्यर्थः । (ना० स्मृ० नोपलब्धाः) अर्थवत् प्रयोजनवत् । धर्मसंयुक्तं धर्मो गुणः अल्पाक्षरत्वम् तार्थवत्त्वादिकः तेन संयुक्तम् । परिपूर्णम् अध्याहारानपेक्षः । अनाकुलम् असन्दिग्धाक्षरम् । साध्यवत् सिषाधयिषितार्थसहितम् । सहितम् बहुव्रीहिः, गौणलाक्षणिकादिपदरहितम् । प्रकृतार्थानुबन्धि पूर्वापरार्थाविरोधि । प्रसिद्धं लोकप्रसिद्धवस्तुविषयम् । अविरुद्धं पुरराष्ट्राद्यविरुद्धं पूर्वापराविरुद्धं प्रत्यक्षादिप्रमाणाविरुद्धं व्यावहारिकधर्माविरुद्धं च । निश्चितम् अर्थान्तरसंशयरहितम् । साधनक्षमं साधनार्हम् । संक्षिप्तम् अनतिविस्तृतम् । निखिलार्थम् अनवशेषितवक्तव्यम् । देशकालाविरोधि मध्यदेशीयक्रमुकक्षेत्रं शरत्कालीनाम्रफलं गृहस्थं मदीयमपहृतमित्येवमादिशून्यम् । वर्षेत्याद्येकपदम् । प्रदेशपर्यन्तद्वन्द्वान्तम्.पू । अहः प्रतिपदादिः वारो दिनं च । वेला प्रातरादिः मुहूर्तरूपा च । देशो मध्यदेशादिः । प्रदेशः क्षेत्रादेः स्थलविशेषः । स्थानेत्याद्यपि एकं पदम् । वयःशब्दान्तद्वन्द्वस्य तृतीयातत्पुरुषः । स्थानं वाराणस्यादि । आवसथो ग्रामादिः, हट्टादिरूपस्थलविशेषो वा । साध्याख्या विवादास्पदीभूतवस्तुनाम । जातिः ब्राह्मणत्वादिः । आकारो गवाश्वादिगतो वर्णादिविशेषः, गृहक्षेत्रादेः संस्थानविशेषश्च । वयः गवादेर्वयःपरिमाणं बाल्याद्यवस्थाविशेषः । *साध्यप्रमाणसंख्यावत् । प्राग्वत् । साध्यस्य प्रमाणं क्षेत्रादेर्निवर्तनादिकम्, संख्या रूपकादीनाम् । *आत्मप्रत्यर्थिनामवत् । स्पष्टम् । *परेति । प्राग्वत् । परः प्रतिवादी आत्मा वादी तयोर्ये पूर्वजाः पित्रादयः ते च अनेकराजाश्च अनेके

राजानो .त्कालिकाः तेषां नामभिरङ्कितम् । *समा.. त्म-पीडावत् । समभि.. नि व्याख्यातानि आत्मपीडा स्वदुःखं तद्व-त् । *कथितेति । मतिग्रहा.. नाऽधिगन्ता आहर्त्ता दाता दायकः, काथितौ आहर्तृदायकौ यस्मिन्वचने तत् । काथितमत्यार्थिसम्बन्धक-मिति वा । एतादृशं यद्वाक्ये कथ्यते तादृ.. ः ।

५ । भापापदार्थमा.. *भाषाप्रतीति । उत्तर.. तात्पर्यमाह *आवे.नेति । .. वर्षादिव्यवच्छेदः । अत एवाह *सर्वे-ति । .. *संवत्सरत्वादिना । संवत्सररूपविशेष-णमित्यर्थः । *आधाविति । तत्र पूर्वत्वादिज्ञानाय तदावश्यक-त्वमिति भावः । इदमग्रे स्फुटीभविष्यत्यस.. रणव्यवहारमा.. कामक.. ण । अन्यत्रापि तस्य फलमाह *अयव्यव..रेऽपीति । उपयुज्यते .त्यत्रान्वयः । .. आह *वत्सरान्तरे इति । इति एवमर्थम् । एवं संवत्सरविशेषणव.. ।

६ । ..नस्त्वर्थे । तत्रैव वाराणस्यादावेव निविष्टः निष्पा-दितः । *संज्ञा चेति । अर्थिमत्यर्थिनोरेवेति भावः । अधिवस-तीत्यधिवासः । बा.लका.त्कर्तरि घञ् अर्शआद्यजन्तं वा । अधिः समीपे इत्याह *समीपेति । तत्रा.मान्तरमा.. *कृष्णभूम इति । कृष्णोदक्पाण्डुत्यचूमत्ययो बहुव्रीहेः । पित्रिति लुप्तष-.चन्तमित्याह *पि.रिति । एवमेव तत्र पाठो वा । नामेत्यस्य सम्बन्धः । पित्रादेः साक्.त्वादाह *अर्थीति । गुणत.कार्य-ना.पयोगात्मकत्वाच्चाह *नामेति । इतिरर्थसमाप्तौ । अनु-.. *समेति । निर्धारणे षष्ठी । एवम् अथवा.त्या-दिना उक्तमका.ण ।

७ । *उक्तमिति । पक्षाभासल.णमित्यर्थः । *निराबाधमिति स्वपाडा.रावामित्यर्थः । तदाह *अस्मादि.. । निष्फलत्व य

पृथ...त्वादाह *अभिधेयेति। तत्र मा... ...सम्भवमादा-
वाह *अल्पेति। अयमुभयत्र हेतुः। भुक्तेस्तु सम्भव एव नेति
भावः। अत एव दिव्याभावमाह *अल्पेति। विनिगमनाभावा-
दाह *पुरेति।

८। तत्राद्ये स्पष्टत्वात् द्वितीये मानमाह *राज्ञेति। यत्प-
दार्थो व्यवहारः। ...तां जनानां नगरस्थानाम्। उपसंह-
रति *अन्ये इति। इतीति प्राग्वत् व्याख्येयम्।

९। अप्रसिद्धादीनां पक्षाभासत्वमिवानेकपदसङ्कीर्णपूर्वपक्ष-
स्यापि तत्त्वमेव। अनेकैः पदैः सङ्कीर्णो यः पूर्वपक्षः प्रतिज्ञा सा
न सिध्यति आभासरूपा भवतीति तदर्थप्रतीतेः। तन्निराकरोति
*यत्त्वित्यादिना। तत्र पदशब्दः पद्यते ज्ञायते इति व्युत्प-
त्त्या किं वस्तुपरः उत ऋणादानादिरूपव्यवहारविषयप...ः। तत्र
न तावदाद्ये पक्षाभासत्वमित्याह *तत्रेति। उक्तवचने इत्यर्थः।
द्वितीयेऽपि तदभावमाह *ऋणादानादीति। निक्षिप्तं, मयेति शेषः।
यत इति शेषोऽन्ते बोध्यः। वचनानर्थक्यपरिहाराय तस्याभि-
मतार्थमाह *किं त्विति। *क्रियेति। साध्येत्यर्थः। एतावत्, त-
त्रोच्यते इति शेषः।

१०। अत्र मानमाह *यथाहेति। ...प्रतिज्ञं बहुपूर्वपक्षकम्।
अन्यथैतस्य वैयर्थ्यं स्पष्टमेव। तस्मादुक्तैव वचनयोर्व्यवस्था।
तदेव द्रढय...पसंहारव्याजेनाह *तस्मादिति। *तस्यार्थ इति।
उक्तवचनस्यार्थ इत्यर्थः।

११। यथावेदितमार्थेनेत्यत्रार्थिपदस्वारस्येन लब्धमर्थमाह
*अर्थीति। आर्थिनः पुत्रोऽप्यर्थी तत्पिताऽप्यर्थी आदिशब्दादर्थि-
नि...दथाऽप्यर्थिन इत्यर्थः। अत एव तेषामन्यथावादित्वं नि-
रस्तं प्राक् "यो न भ्राते" त्यनेन वचनेन। ननु तत्पुत्रादेस्तदे-

कार्यत्वाच्चत्वं युक्तं तन्नियुक्तस्य तु तद्भावात्कथं तत्त्वमत आह *नियुक्तस्यापीति । तत्र मानमाह *अर्थिनेति । तस्येति वाच्ये तयोरित्यस्य तात्पर्यार्थमाह *नियुक्तेति ।

१२ । प्रागुक्तं विशेषमाह *एतच्चेति । अर्थिवादिनावित्यर्थः । *पाण्डुलेखेति । खडीति भाषाप्रसिद्धः । *आवापेति । न्यूनाधिक्यपरिहाराय प्रक्षेपनिष्कासनाभ्यामित्यर्थः । युक्तं चैतत् । अन्यथा पत्राप्रामाण्यप्रसङ्गापत्तेः । तत्र मानमाह *पूर्वेति । स्वभावेनोक्तं न तु छलादिना । ततः तदनन्तरम् । तथा विशोधितं पत्रे ऽभिलखयेदित्यर्थः । शोधने विशेषमाह *शोधनमिति । अवेति । उत्तरेणावष्टब्धस्य प्रतिबद्धस्य पूर्ववादस्य शोधनं निवृत्तं भवेदित्यर्थः । शोधयेदितिविधिसूचितमर्थमाह *पूर्वपक्षमिति । *प्रमादादिति । प्रागुक्तमिदम् । इतीत्यस्य बोध्यमिति शेषः ॥ ६ ॥

मि० एवं शोधितपत्रारूढे पूर्वपक्षे किं कर्तव्यमित्यत आह ।

या० श्रुतार्थस्योत्तरं लेख्यं पूर्वावेदकसन्निधौ ।

मि० श्रुतो भाषार्थो येन प्रत्यर्थिनाऽसौ श्रुतार्थः। तस्योत्तरं पूर्वपक्षादुत्तरत्र भवतीत्युत्तरं लेख्यं लेखनीयम् पूर्वावेदकस्यार्थिनः संनिधौ समीपे । उत्तरं च यत् पूर्वोक्तस्य निराकरणं तदुच्यते ।

यथाह,

पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः॥ इति।

पक्षस्य व्यापकं निराकरणसमर्थम् । सारं न्याय्यं न्यायादनपेतम् । असंदिग्धं सन्देहरहितम् । अ-

नाकुलं पूर्वापराविरुद्धम् । अव्याख्यागम्यः अप्र-
सिद्धपदप्रयोगेण अश्लिष्टाविभक्तिसमाससाध्या ।-
राभिधानेन वा अदेशभाषाभिधानेन वा यत् व्य व्य-
यार्थे न भवति तत् ... । तच्च चतुर्विधम् ।
संप्रतिपत्तिः मिथ्या प्रत्यवस्कन्दनं पूर्वन्यायश्चेति ।

यथाह कात्यायनः,

सत्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा ।

पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधम् ॥ इति ।

तत्र सत्योत्तरं यथा, रूपकशतं मह्यं धारयतो-
स्युक्ते सत्यं धारयामीति ।

यथाह,

साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता । इति ।

मिथ्योत्तरं तु नाहं धारयामीति ।

तथाच कात्यायनः,

अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम् ।

मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥ इति ।

तच्च मिथ्योत्तरं चतुर्विधम् । (ना. स्मृ. २।५)

मिथ्यैतद् नाभिजानामि तदा तत्र न संनिधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतुर्विधम् ॥ इति ।

प्रत्यवस्कन्दनं नाम, सत्यं गृहीतं प्रतिदत्तं प्रति-
ग्रहेण लब्धमिति वा ।

यथाह नारदः, (ना. स्मृ. नोपलब्धम्)

आर्थिना लेखितो योऽर्थः प्रत्यर्थी यदि तं तथा ।
प्रपद्य कारणं ब्रूयात्प्रत्यवस्कन्दनं स्मृतम् ॥ इति ।

प्राङ्न्यायोत्तरं तु, यत्राभियुक्त एवं ब्रूयादस्मिन्न-

र्थं अनेनाहमभियुक्त तत्र चायं व्यवहारमार्गेण पराजित इति।

उक्तं च कात्यायनेन,

आचारेणावसन्नोऽपि पुनर्लेखयते यदि।
सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते॥ इति।

एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धम्।

स्पष्टोक्तं च स्मृत्यन्तरे,

संदिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च।
पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत्॥
यद्व्यस्तपदमव्यापि निगूढार्थं तथाऽऽकुलम्।
व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये॥ इति।

तत्र सन्दिग्धम्, सुवर्णशतमनेन गृहीतमित्युक्ते, सत्यं गृहीतं, सुवर्णशतं माषशतं वेति। प्रकृतादन्यत्, यथा सुवर्णशताभियोगे पणशतं धारयामीति। अत्यल्पं, सुवर्णशताभियोगे पञ्चाशतं धारयामीति। अतिभूरि, सुवर्णशताभियोगे द्विशतं धारयामीति। पक्षैकदेशव्यापि, हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतं नान्यदिति। व्यस्तपदम्, ऋणादानाभियोगे पदान्तरेणोत्तरम्। यथा, सुवर्णशताभियोगे अनेनाहं ताडित इति। अव्यापि देशस्थानादिविशेषणाव्यापि। यथा, मध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखिते क्षेत्रमपहृतमिति। निगूढार्थं, यथा सुवर्णशताभियोगे किमहमेवास्मै धारयामीति। अत्र ध्वनिना प्राड्विवाकः सभ्यो वा अर्थी वा अन्यस्मै

वा यतीति स्वयतीति निगूढार्थम् । आकुलं पूर्वापराविरुद्धम् । यथा, सुवर्णशताभियोगे कृते सत्यं गृहीतं न धारयामीति । व्याख्यागम्यं दुःश्लिष्टाविभक्तिसमाससाध्याहाराभिधानेन व्याख्यागम्यम् । अदेशभाषाभिधानेन वा । यथा सुवर्णशतविषये पितृकृणाभियोगे गृहीतशतवचनात् सुवर्णानां पितृजानामिति । अत्र गृहीतशतस्य पितुर्वचनात् सुवर्णानां शतं गृहीतमिति न जानामीति । असारं न्यायविरुद्धम् । यथा सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्याभियोगे न सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति । उत्तरमित्येकवचननिर्देशादुत्तराणां संकरो निरस्तः ।

यथाह कात्यायनः,

पक्षैकदेशे यत्सत्यमेकदेशे च कारणम् ।
मिथ्या चैवैकदेशे च संकरात्तदनुत्तरम् ॥ इति ।

अनुत्तरत्वे च कारणं तेनवोक्तम्,

न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः ।
न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयम् ॥ इति ।

मिथ्याकारणोत्तरयोः संकरे अर्थिप्रत्यर्थिनोर्द्वयोरपि क्रिया प्राप्नोति ।

मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि ।

इति स्मरणात् । तदुभयमेकस्मिन्व्यवहारे विरुद्धम् । यथा सुवर्णं रूपकशतं चानेन गृहीतमित्यभियोगे सुवर्णं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति । कारणप्राङ्न्यायसंकरे तु प्रत्यर्थिन एव क्रियाद्वयम् ।

प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्।

इति।

यथा सुवर्णं गृहीतं प्रतिदत्तं रूपके व्यव .ारमार्गेण प ।ाजित इति। अत्र प्रा न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा भावयितव्यम्, कारणोत्ते तु सा .लेख्यादिभिर्भावयितव्यमिति विरोधः। एवमुत्त त्रयसंकरेऽपि द्र ष्टव्यम्। यथा अनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रतिदत्तं रूपकशतं न गृहीतं वस्त्रविषये तु पूर्वन्यायेन पराजित इति। एवं चतुःसंकरेऽपि। एतेषां चा. त्तरत्वं यं गपदेन। तस्य तस्यांशस्य तेन तेन विनाऽसिद्धेः। क्रमेणोत्तरत्वमेव। क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानां चेच्छया भवति। यत्र पुनरुभयोः संकरः तत्र यस्य प्रभूतार्थविषयत्वं तात्क्रियोपादानेन पूर्वं व्यवहारः प्रवर्तनीयः। पश्चादल्पविषयोत्तरोपादानेन च व्यवहारो द्रष्टव्यः। यत्र संप्रतिपत्तेः उत्तरान्तरस्य च संकरस्तत्रोत्तरान्त ोपादानेन व्यव ा-रो द्रष्टव्यः। संप्रतिपत्तौ क्रियाऽभावात्।

यथा हारीतेन,

मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे।
सत्यं वापि सहान्येन तत्र ग्राह्यं किमुत्तर ॥

इत्युक्तोक्तम्,

यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफलम्।
उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा॥

संकीर्णं भवतीति शेषः। शेषापेक्षया ऐच्छिकक्रमः

अपेक्षाक्रमं भवतीत्यर्थः।तत्र प्रस्तावं यथा,अनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्याभियोगे सत्यं सुवर्णं गृहीतं रूपकशतं च न गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति । अत्र मिथ्योत्तरस्य प्रभूतविषयत्वात् अर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्तयितव्यः । पश्चात्कारणविषयो व्यवहारः । एवं मिथ्याप्राङ्न्यायसंकरे कारणप्राङ्न्यायसंकरे च योजनीयम् । तथा, तस्मिन्नेवाभियोगे सत्यं सुवर्णं रूपकशतं च गृहीतं,प्रतिदास्यामि,वस्त्राणि तु न गृहीतानि,गृहीतानि प्रतिदत्तानीति वा, वस्त्रविषये पूर्वं पराजित इति वोत्तरे संप्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाऽभावान्मिथ्योत्तरक्रियामादाय व्यवहारः प्रवर्तयितव्यः । यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वम् , यथा शृङ्गग्राहिकया कश्चिद्वदति इयं गौर्मदीया अमुकस्मिन्काले नष्टा अद्यास्य गृहे दृष्टेति, अन्यस्तु मिथ्यैतत् एतत्प्रदर्शितकालात्पूर्वमेवास्मद्गृहे स्थिता मम गृहे जाता वेति वदति । इदं तावत् पक्षनिराकरणसमर्थत्वान्नानुत्तरम् । नापि मिथ्यैव । कारणोपन्यासात् । नापि कारणम् । एकदेशस्याभ्युपगमाभावात् । तस्मात्सकारणं मिथ्योत्तरामिदम् । अत्र च प्रतिवादिनः क्रिया । कारणे प्रतिवादिनीति वचनात् । ननु मिथ्या क्रिया पूर्ववादे इति पूर्ववादिनः कस्मात्क्रिया न भवति । तस्य शुद्धमिथ्याविषयत्वात् । कारणे प्रतिवादिनीत्यपि कस्माच्छुद्धकारणविषयं न भवति । नैतत् । सर्वस्यापि कारणोत्तरस्य

मिथ्यासहचरितरूपत्वात् ... कारणोत्तरस्याभावा-
त्। प्र... कारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्युपग-
मे ... मिथ्यात्वम्। यथा, सत्यं ... रूपकशतं
गृहीतं न धारयामि प्रति... दत्त्वादिति। प्र... तोदाहर-
णे तु प्रतिज्ञातार्थैकदेशस्याभ्युपगमो नास्तीति विशेषः।

एतच्च ... रेतेन स्पष्टमुक्तम्,

मिथ्याकारणयोर्वापि ग्राह्यं कारणमुत्तरम्। इति।

यत्र मिथ्याकारणयोः पक्षव्यापित्वम्, यथा
रूपकशतं ... भियोगे मिथ्यैतत् अस्मिन्नर्थे पूर्व-
मयं पराजित इति। अत्रापि प्रतिवादिन एव क्रिया।

प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्।

इति वचनात्। ... स्य प्राङ्न्यायस्याभावाद-
नुत्तरत्वप्रसङ्गात्। संप्रतिपत्तेरपि साध्यत्वेनोपदिष्ट-
स्य पक्षस्य सिद्धत्वोपन्यासेन साध्यत्वा... करणा-
देवोत्तरत्वम्। यदा तु कारणप्राङ्न्यायसंकरः, यथा
शतमनेन गृहीतमित्यभियुक्तः प्रतिवदति, सत्यं
गृहीतं प्रतिदत्तं चेति अस्मिन्नेवार्थे प्राङ्न्यायेनायं परा-
जित इति, तत्र प्रतिवादिनो यथारुचीति न क्वचि-
द्वादिप्रतिवादिनोरेकस्मिन्व्यवहारे क्रियाद्वयप्रसङ्ग
इति निर्णयः।

एवमुत्तरे पत्रे निवेशिते साध्यसिद्धेः साधन-
यत्तत्वात् साधननिर्देशं
कः कुर्यादित्यपेक्षिते आह।

या० ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्॥ ७॥

मि० तत उत्तरानन्तरम् अर्थी साध्यवान् सद्य एवान-

न्त मेव लेखयेत्। प्रति ज्ञातः साध्यः। स च। ज्ञावर्थश्चेति प्रतिज्ञातार्थः। तस्य साधनं, साध्यतेऽनेनेति साधनं प्रमाणम्। अत्र सद्यो लेखयेदिति वदता उत्तराभिधाने कालविलम्बनमप्यङ्गीकृतमिति गम्यते। तच्चोत्तरत्र विवेचयिष्यते। अर्थी प्रतिज्ञातार्थसाधनं लेखयेदिति वदता यस्य साध्यमस्ति स प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तम्। अतश्च प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यत्वात्प्रत्यर्थ्येवार्थी ज्ञात इति स एव साधनं लेखयेत्। कारणोत्तरेऽपि कारणस्यैव साध्यत्वात्कारणवाद्येवार्थीति स एव लेखयेत्। मिथ्योत्तरे तु पूर्ववाद्येवार्थी स एव साधनं निर्दिशेत्। ततोऽर्थी लेखयेदिति वदता अर्थ्येव लेखयेन्नान्य इत्युक्तम्। अतश्च संप्रतिपत्त्युत्तरे साध्याभावेन भाषोत्तरवादिनोर्द्वयोरप्यर्थित्वाभावात्साधननिर्देश एव नास्तीति तावतैव व्यवहारः परिसमाप्यते इति गम्यते।

एतदेव हारीतेन स्पष्टमुक्तम्,

प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्।
मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्॥ इति॥७॥

बा० १। प्रत्यार्थिनो वचनस्य उत्तरत्वे बीजमाह *पूर्वेति। उत्तरत्र अग्रे। तदीययथाकथञ्चिद्वचनस्योत्तरत्वाय विशेषमाह *उत्तरं चेति। तद्विदः व्यवहारविदः। सारमित्यस्यार्थो न्याय्यम्। तदर्थो न्यायादिति। [illegible] त्रयाणां यथाख्येयार्थमित्यन्वयः। *आश्लिष्टेति। दुःश्लिष्टेति पाठान्तरम्। श्लिष्टं सम्बन्धयुक्तम् अश्लिष्टमिति यावत्। न श्लिष्टमश्लिष्टं असम्बद्धं दुष्टमिति यावत्। विभक्तिश्च समासश्च विभक्तिसमासौ, अश्लिष्टौ दुष्टौ च तौ

विभक्ति[illegible] च तौ, अध्याहारेण सह वर्त्तत इति साध्याहारं, तौ च तच्च तानि। तैरभिधानं तेनेत्यर्थः। दुःश्लिष्टेति पाठेऽप्येवम्। दुःश्लिष्टौ दुःखेन सम्बद्धौ यौ तौ ता[illegible] दुष्टत्वे पर्यवसाना[illegible]। *अदेशेति। अन्यदेशेति पाठान्तरम्। उत्तरपदार्थमाह। तत्सदुत्तरमिति।

२। *प्रत्यवस्कन्देति। कारणोत्तरमित्यर्थः। *मह्यमिति। धारेरुत्तमर्ण इति सम्प्रदानत्वम्। *सत्येति। सत्यत्वोक्तिरित्यर्थः। *प्रतिपत्तिरिति। प्रतिपत्तिः सम्प्रतिपत्तिः सत्योत्तरमित्यनर्थान्तरम्। *नाहमिति। वाद्युक्तिः पूर्ववत्। *एवमग्रेऽपि।

३। द्वितीयभेदानाह *तच्चेति। *मिथ्यैतत् नाहं धा[illegible]त्येकं, *नाभिजानामि नैव जानामीति द्वितीयम्। *तदेति। तस्मिन्काले तस्मिन्देशे मम सान्निध्यमेव न स्थितमिति तृतीयम्। *अजात इति। तत्काले ममोत्पत्तिरेव न स्थितेति चतुर्थम्। एवंप्रकारेण मिथ्योत्तरं चतुर्विधमित्यर्थः। अत्र स्पष्टत्वा[illegible]तिरेवोक्ता पृथक् सङ्कीर्त्तनं न कृतमिति बोध्यम्।

४। नाम त्वर्थे। विनिगमनाविरहादाह *प्रतिग्रहेणेति। *लेखितः, ण्यन्तस्य रूपम्। प्रत्यर्थी यदि तं पत्रारूढीकृतमर्थं तथा प्रपद्य तथैवा[illegible]कृत्येत्याद्यर्थः। *आचारेणेति। व्यव[illegible]रेण पराजितोऽपीत्यर्थः। *जितः पूर्वमिति। एवं स वाच्य इत्यर्थः। सः तथो[illegible]रूपः।

५। [illegible]त्यन्तरमाह *य[illegible]। *तत्र एकादशानां मध्ये। *पञ्चाशतमिति। अर्द्धन्यूनतया ऽत्यल्पत्वम्। अत एव द्वैगुण्येनातिभूरित्वमाह *द्विशतमिति। समाहारे द्विगुः। पात्रादित्वात्स्त्रीत्वाभावः। *पक्षैकेति। श्लोके तथाशब्दश्चार्थे। अन्यत् पक्षै[illegible] चेत्यन्वयः। पक्षैकदे[illegible]र्थः। *व्य-

स्तेति । असम्बद्धपदकमित्यर्थः । पक्षैकदेशव्यापिनोऽनुत्तरत्वे सकलपक्षाव्यापिनोऽनुत्तरत्वमर्थसिद्धमेवेत्यव्यापीत्यन्यथा व्याचष्टे *देशेति।*मध्येति।विन्ध्यहिमाचलयोमध्येत्यर्थः। *लिखिते इति। अन्तर्भावितण्यर्थमिदम्। गुह्यार्थमाह *अत्रेति। ध्वनिना किमादिबोध्येन। तथाकुलमिति पाठो न तु निराकुलमित्याभिप्रेत्याह *आकुलमिति। *दुःश्लिष्टेति। प्राग्वत्। उभयोरुदाहरणमाह *पित्रिति। पितुर्य ऋणाभियोगस्तत्रेत्यर्थः। उत्तरमाह *गृहीतेत्यादिना गृहीतमित्यन्तेन। अस्य तात्पर्यार्थमाह *अत्रेति। *गृहीतेति। बहुव्रीहिः। तथा च गृहीतशतवचनादित्यत्र दुःश्लिष्टः समासः। सुवर्णानामित्यत्र शतं गृहीतामित्यस्याध्याहार इत्युभयोरेकमेवोदाहरणम्। इतीत्यस्य विवक्षितमिति शेषः। *गृहीतमिति। तत्रेति शेषः। ईदृशं यदुत्तरं तत् स्वार्थसिद्धये नेति द्वितीयश्लोकार्थः। तथा च तस्य सदुत्तरत्वमेव नेति पूर्वश्लोकैकवाक्यतेति बोध्यम्।

६। अभिमतार्थस्यैव न्यूनतेत्याह *उत्तरमिति। श्रुतार्थस्योत्तरं लेख्यमित्यत्र तथा निर्देशात्संकीर्णोत्तरस्यानुत्तरत्वमित्यर्थः। ननु त्रिभिर्मिलित्वा पक्षस्य निराकरणेन तत्समर्थत्वात्कुतोऽनुत्तरत्वमत आह *अनुत्तरत्वेचेति। तेनैव कात्यायनेनैव। न चेति।*न हीत्यर्थः।*स्यादिति।सम्भावनायां लिङ्। वादिनोः अर्थिप्रत्यर्थिनोः। एकत्र व्यवहारसिद्धिः, सम्भवतीति शेषः।संकरस्यानेकविधत्वादाद्यद्वयोः सङ्करे आद्योदाहरणमाह। *मिथ्येति। वादिनोरित्यस्यार्थमाह *अर्थीति। न वादिद्वयपरत्वमिति सूचयितुम्। *मिथ्येति।अव्ययमिदं, मिथ्योत्तरे इत्यर्थः। पूर्ववादे कर्मण्यण्, वाग्मिनीत्यर्थः। कारणे कारणोत्तरे।*विरुद्धमिति। तथा च कर्तुमशक्यत्वादुभयोर्नार्थसिद्धिरि-

ति भावः । न चार्येति चोक्त एवेत्यर्थे । न चैकत्रैत्यस्य तत्रैवो- दाहरणमाह *क्र ण्वेति । तयोर्मिथः सङ्करे त्वित्यर्थः । एवेना- र्थिव्यवच्छेदः । *प्रा ग्न्यायाति । तयोः ृ ावित्यर्थः । नेदं प्रत्ये- कपरम् । कारणांशे "कारणे प्रतिवादिनि" इति सिद्धत्वा । तस्मात्तत्सांकर्यपरमेवेद । अत एव समासनिर्देश तिरपि । इतिः प्राग्वत् । नन्वत्रैकस्यैव क्रिया न द्वयोरिति न प्राग्वद्विरो- धो ऽत आह *अत्र चेति । द्वितीयसङ्करे त्वित्यर्थः । *भावेति । साधयितव्यमिति कृत्वेत्यर्थः । आदिना दिव्यपरिग्रहः । *उत्तरत्रयेति । मिथ्याकारणप्रा न्यायरूपेत्यर्थः । *एवं चतुरिति । यथा अनेन सुवर्णं रूपकशतं वस्त्राणि धान्यं च गृही- तमित्यभियोगे सुवर्णं धारयामि रूपकशतं न गृहीतं वस्त्राणि प्रतिग्रहेण लब्धानि धान्यविषये पूर्वन्यायेन पराजित इति । एवं मिथ्याप्राङ्न्यायमात्रस रे ऽपि द्रष्टव्यम् ।

७ । नन्वत्र सर्वत्र क्रमेण क्रियाद्वयस्य सुकरत्वात्कात्यायनो- क्तमसम्भवरूपं तत्कारणकथनम क्तमतस्तदाशयमाह *एतेषां चेति । असि रिति छेदः । अत एवैतत्फलितमा *क्रमेणे- ति । क्रमेणत्वित्यर्थः । तत्र नियामकाभावादाह *क्रमश्चेति । चेन प्रा विवाकादेः समुच्चयः । एवं प्राप्ते कचिन्नियामकमाह *यत्रेति । यत्र त्वित्यर्थः । *उभयोरिति । मिथ्याकारणोत्तरयोरित्य- र्थः । इदमुपलक्षणं त्र्यादेरपि । यस्य उत्तरस्य । *तत्क्रियोपेति । तत्साधकक्रियाग्र णेनेत्यर्थः । *पश्चादिति । अल्पविषयको त्त - साधकक्रियाग्र णेनेत्यर्थः । सत्योत्तरसङ्करस्य पूर्वमनुपन्यासे बीजं ध्वनयन् तत्र नियामकान्तरमा *यत्र चेति । फलाभावे- न पश्चादपि तदभावादत्र पूर्वमिति नोक्तम् । तदाह *सम्प्रेति । उक्तानियामकद्वये मानमाह *यथेति । उक्तामित्यत्रान्वयः । द्विती-

यमाह *सत्यं वापीति । यद् उत्तरम् । द्वितीये आह *यत्र वेति । उत्तरे इत्यर्थः । तत्र तदुत्तरमसङ्कीर्णं ज्ञेयमित्यर्थः । *अतोऽन्यथेति । यत्प्रभूतार्थीविषयकमुत्तरं न भवति अपि तु समार्थविषयकं, यत्र चोत्तरे क्रियाफलमुभयत्र न भवति तत् । अतः पूर्वोक्तात् । अन्यथा प्रकारान्तरमित्यर्थः । तत्त्वमेव कथयन् तदर्थमाह *सङ्कीर्णमिति । वाक्य...र्थे आह *भवतीति शेष इति । अत्रापि सङ्कीर्णत्वाद...त्त्वमेव सर्वथा नाभिमतं किंतु यौगपद्येन तत्त्वम् । अर्थ्यादीच्छाक्रमेण तु तत्त्वमेवेति प्रागुक्तमेवाह *ऐच्छिकक्रममिति । तदर्थमाह *अपेक्षाक्रममिति । अर्थ्याद्यपेक्षाक्रमकं भवतीत्यर्थः । ...पाठे तत्पुरुषः । तत्रेति शेषः । *तत्र तयोर्मध्ये । द्वितीयोदाहरणमाह *तथेति । *तस्मिन्नेवेति । अनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीति पूर्वोक्ते एवाभियोगे इत्यर्थः । तानीति शेषः । दास्यामीत्यस्य इत्युत्तरस्येति शेषः । * इति वोत्तरे इत्यन...ण साङ्कर्ये । तथा चात्र दास्यामीत्यन्तस्य सत्योत्तरस्य यथाक्रमं मिथ्योत्तरेण कारणोत्तरेण प्राङ्न्यायोत्तरेण च सङ्करो बोध्यः । सङ्कीर्णोत्तरे विषयसाम्ये ऐच्छिकः क्रमस्तद्वैषम्येऽप्यधिकविषयोपादानेन प्राग्व्यवहार इत्युक्तम् । तत्र द्वितीयस्यापवादमपि प्रसङ्गात्सूचयन् प्रकृतमाह *सम्प्रेति । एतदर्थमेव तस्मिन्नेवाभियोगे इत्युक्तम् । अन्यथाऽभियोगान्तरमेव वदेत् । मिथ्याद्युत्तरेति । मिथ्याद्यन्यतमोत्तरेत्यर्थः ।

८ । एवं तादृशसङ्कीर्णोत्तरस्य यौगपद्येन सर्वथाऽनुत्तरत्वे प्राप्ते क्वचित्प्रतिप्रसवमाह *यत्र त्विति । शृङ्गग्राहिकयेति । तन्न्यायेनेत्यर्थः । *कश्चित् वादी । *अन्यः प्रतिवादी । उत्तरमिदम् । ...उत्तरं साधयति *इदमिति । *तावत् आदौ ।

तत्त्वस्यैवोत्तरत्वस्य प्रा॰ कत्वादाह *पक्षेति । साङ्कर्यं प्रतिपादयति *नापीति । वेनान्यव्यवच्छेदः । तथा चा साङ्कर्यम् । *कारणं कारणमेव । *एकदेशस्य ग्रहणस्य । साङ्कर्यमुपसंहरति *तस्मादिति *सकारणमिति । अत्र कारणस्याप्राधान्यं मिथ्योत्तरस्य प्राधान्यं तस्य तदुपपादकत्वस्यापि सम्भवात् । अत एव तत्र सहयोगे तृतीया कृता । प्रागुक्तबाधकस्यात्राभावमाह *अत्र चेति ।

९ । प्रधानन्यायादरेण शङ्कते *नन्विति । परिहरति *नेति । तत्र हेतुमाह *तस्येति । वचनस्येत्यर्थः । तुल्ययुक्त्या शङ्कते *कारणे इति । एवं चानुत्त[illegible]येति भावः । ननु शुद्धकारणोत्तरं प्रागुदाहृतं प्रसिद्धमेवेति तदभावोक्तिरयुक्ता ऽत आह *प्रसिद्धेति । सत्यं गृहीतं प्रतिदत्तं चेत्येवं रूपे प्रागुक्तेऽपीत्यर्थः *प्रतिज्ञातार्थैकेति । ग्रहणस्येत्यर्थः । *नैकेति । धारणस्येत्यर्थः । उदाहरणेनेदं विशदयति *यथेति । *प्रकृतोदेति । अन्यस्तु मिथ्यैतत् एतत्प्रदर्शितकालादित्यादिपूर्वोक्ते इत्यर्थः *एकदेशस्येति । तस्यापीत्यर्थः । क्वचित्तथा पाठ एव । *विशेष इति । मिथ्यासहचारितरूपत्वं तूभयत्र समानमिति भावः । एवं सिद्धेऽर्थे मानमप्याह *एतच्चेति । *वापीति । अनेन त्रिसांकर्येऽपि का[illegible] ग्राह्यमिति दर्शितम् । प्रतिप्रसवान्तरमाह *यत्रेति । यत्र चेत्यर्थः । एवमुत्तरत्वे साधिते तन्निर्वाहोपायमाह । अत्रापीति । मिथ्याक्रियेत्यस्य शुद्धमिथ्याविषयत्वादाह *प्रतीति । एवेन वादि॰[illegible]दः । अत एवाह *प्राङ्न्यायेति । नन्विदं कारणप्रा[illegible]संकरविषयतय पूर्वमुक्तमिति कथमत्र प्रवृत्तिरत आह *शुद्धेति । अन्यथेति शेषः । तथा च संकीर्णत्वात्तर प्रसंगो, न च तद्युक्तं पक्षव्यापित्वा[illegible]ति

भावः। यद्वा शुद्धस्य भा[illegible]न्यायस्याभावा[illegible] वने क्रियाबोधके ऽपा-
ठात्तत्र कस्यापि क्रियाया अलाभेन सर्वस्यापि भाङ्न्यायस्या[illegible]-
त्तरत्वप्रसङ्गो, न च तद्युक्तं, तत्र तस्य गणनात्। तथा च यथा तयो-
स्तस्य भ[illegible]पिस्तया क[illegible]णस्य मिथ्यासहचरितरूपत्वा[illegible] सांकर्ये
भ[illegible]रिति भावः। शुद्धभाङ्न्याये तु वक्ष्यति व्याख्याकृत्
"भाङ्न्यायविधिसिद्धौ तु" इति।

१०। ननु पक्षनिराकरणसमर्थस्यैवोत्तरत्वे संप्रतिपत्तेरनु-
त्तरत्वप्रसङ्गस्तदभावादत आह *संप्रतिपत्तेरपीति। उत्तरत्वमित्य-
त्रान्वयः। *सा[illegible]नोपेति। प्रत्यर्थिनेति भावः। एवं प्रतिवा[illegible]-
न[illegible]क्रियास्थले उक्ता तस्यैव [illegible]संगो यत्र भा[illegible]कस्तत्र
विशेषं प्रतिपा[illegible]प्रतिप्रसवान्तरमाह *यदा त्विति। यदा ऽपी-
त्यर्थः। तत्र तत्रापि। *यथारुचीति। तस्यैव। तयोर्मध्ये ऽन्यतर-
[illegible] । [illegible] युगपद[illegible]त्तरत्वमुक्त[illegible]पसंहरति।
*इति न क्वचिदिति।

११। निवेशिते लेखिते। भा[illegible]व्युत्पत्तेराह *साध्यवानि-
ति। स्पष्टायमा[illegible] *प्रतीति। भावेऽर्थासङ्गतेरिष्टासि[illegible]आह
*साध्यतइति। प्रमाणं [illegible]दि वक्ष्यमाण[illegible]। पूर्वत्र न्यूनतां
निराच[illegible] *अत्रेति। अपिना सद्यः। मिथ्याक्रियेत्यादिप्रागु-
क्तार्थस्य [illegible]त्वं [illegible]चयप्रार्थश[illegible]स्यात्र [illegible] न योग-
[illegible] न्यूनत्वाभावं प्रतिपा[illegible]यति *अर्थीति।
[illegible]मानसत्तोपा[illegible]व्युत्पत्तेराह *अस्तीति। अपिः पूर्व-
समुच्चये। तेन साम्यम्। तुर्वैलक्षण्ये। निर्दिशेत् लेखयेत्। ण्य-

१ [illegible]लम्बनमपि इति मिताक्षरास्थेन अपिशब्देन सद्य इत्य-
र्थो बोध्यः। उत्तराभिधाने कालविलम्बनमङ्गीकृतं न तु शीघ्रमुत्तर-
दानस्याङ्गीकार इति भावः।

र्थान्तर्भावः प्राग्वत् । अन्य व्याह *तथेति । * ति । आ-
क्षेपादेव कर्तृलाभे त क्तिर्नियमार्थेति भावः । * अतश्चेति । गम्यते
इत्यत्रान्वयः । * तावतैव तादृशोत्तरदानेनैव । अत्र सर्वत्र मान-
माह *एतदेवेति । अर्थीत्यादिनोक्तमेवेत्यर्थः *मा न्यायेति । अ
स्याशय उक्तः । पूर्ववादी तु, क्रियां निर्दिशेत् । सा क्रिया ॥७॥

मि० ततः किमित्यत आह ।

या० तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ।

मि० तस्य साधनस्य प्रमाण य व यमाणलिखि-
तसाक्ष्यादिलक्षणस्य सिद्धौ निर्वृत्तौ सिद्धिं सा-
ध्यस्य जयलक्षणां प्राप्नोति । अतोऽस्मात्प्रकारा -
न्यथा प्रकारान्तरे साधनासि विप तं ाध्यस्या-
सिद्धिं पराजयल णामाप्नोतीति संबन्धः ।

मि० एवं व्यवहारस्वरूपमभिधायोपसं रति ।

या० चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥ ८ ॥

मि० व्यव ारान्नृपः पश्येदित्युक्तो व्यव ारः सोऽय-
मित्थं च ष्पाच्चतुरंशकल्पनया विवादे ऋणा ना-
दि पदर्शितो वर्णितः । तत्र प्रत्यर्थिनोऽग्रतो लेख्य
इति भाषापादः प्रथमः । श्रुतार्थस्योत्तं लेख्यमित्यु-
त्तरपादो द्वितीयः । ततोऽर्थी लेखयेत्सद्य इति क्रि-
यापादस्तृतीयः । तत्सिद्धौ सि माप्नोतीति साध्य-
सिद्धिपादश्चतुर्थः ।

यथोक्तम्,

परस्परं म ष्याणां स्वार्थविप्रतिपत्ति ।

वाक्यन्यायाद्व्यव स्थानं व्यव ार उ ाहृतः ॥

भयोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः ।
आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते ॥ इति ।
संप्रतिपत्त्युत्तरे तु साधनाभिधानस्याप्रकाशार्थस्यासाध्यत्वाच्च न साध्यसिद्धिलक्षणः पादोऽस्तीति त्रिपात्त्वमेव । उत्तराभिधानानन्तरं सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानात् व्यवहर्तुः संबन्धाभावाच्च न व्यहारपादत्वमिति स्थितम् ॥ ८ ॥

बा० १ । ततः साधनलेखनोत्तरम् । प्रकारान्तरे इत्यस्य व्याख्या साध्यसिद्ध्यावित । *एवं व्यवहारस्वरूपयादिकथनप्रकारेण । रूपं स्वरूपम् । व्यवहारपदार्थं स्पष्टार्थमाह *व्यवेति । *सोऽयं व्यवहारोऽयम् । इत्थम् उक्तप्रकारेण । मुख्यपादत्वासम्भवादाह *चतुरंशेति । चतुष्पादादिषु वक्ष्यमाणेषु विषये ।

२ । त्रीनवांशान् विभज्य दर्शयति *तत्रेति । तेषां मध्ये इत्यर्थः । विप्रतिपत्तिषु सतीषु । अस्य न सार्वत्रिकत्वमित्याह *संप्रतीति । अनिर्देशे हेतुमाह *भाषार्थेति । चः लक्षण इत्यग्रेयोज्यः । तेन क्रियापादसमुच्चयः । यद्वा चो हेतुसमुच्चये एव । लक्षणः लक्षणोऽपि । क्वचित्तथा पाठ एव । अत एवाह *त्रिपात्त्वमेवेति ।

३ । न्यूनतां निराचष्टे *उत्तरेति । अर्थिप्रत्यर्थिनोः, मध्ये इति शेषः । *प्रत्याकलितेति । पौनःपुन्येन विचारणस्येत्यर्थः । अस्य व्यभिचरितत्वादाह *व्यवेति । अर्थ्यादिसम्बन्धिन एव तत्त्वमिति भावः ॥ ८ ॥

इति साधारणव्यवहारमातृकाप्रकरणम् ॥

असाधारणव्यवहारमातृकाप्रकरणम् ॥ २ ॥

मि० एवं सर्वव्यव ।रोपयोगिनीं व्यव ।रमातृका-
मभिधायाधुना

क्वचिद्व्यव ।रविशेषे कञ्चिद्विशेषं दर्शयि माह ।

या० अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।

मि० अभि ज्यतइति अभियोगोऽपराधः तम-भियोगमनिस्तीर्य अपरिहृत्य एनमभियोक्तारं न प्रत्यभियोजयेत् अपराधेन न संयोजये । यद्यपि प्रत्यवस्कन्दनं प्रत्याभियोगरूपं तथापि स्वापराधपरि-हारात्मकत्वा नास्य प्रतिषेधविषयत्व । अतः स्वाभियोगा पमर्दनरूपस्य प्रत्यभियोगस्यायं निषे-धः । इदं प्रत्यर्थिनमधिकृत्योक्तम् ।

मि० अथ अर्थिनं प्रत्याह ।

या० अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ॥ ९ ॥

मि० *अभियुक्तं च नान्येनेति । अन्येनाभियुक्त-मनिस्तीर्णाभियोगमन्योऽर्थी नाभियोजये । किञ्च । उक्तम् आवेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धभावं न नयेत् न प्रापयेत् । एतदुक्तं भवति । यद्वस्तु येन रूपेणावेदनसमये निवेदितं तद्वस्तु तथैव भाषाकाले-ऽपि लेखनीयं नान्यथेति । ननु

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ।(या.अ.२।६)

त्यत्रैवेदमुक्तं किमर्थं पुनरुच्यते, नोक्तं विप्र-कृतिं नयेदिति । उच्यते । यथावे तमर्थिनेत्यनेन -

पूर्वपक्षः यद्वस्तु निवेदितं तदेव भाषान्तरेऽपि तथैव लेखनीयः एकस्मिन्नपि पदे न वस्त्वन्तरमित्यु-क्तम्। यथाऽनेन रूपकशतं वृद्ध्या गृहीतमित्यावेदन-समये प्रतिपाद्य प्रत्यर्थिसन्निधौ भाषासमये वस्त्रशतं वृद्ध्या गृहीतामिति न वक्तव्यः। तथा सति पदान्तरगमनेऽपि वस्त्वन्तरगमनाद्धीनवादी दण्ड्यः स्या-दिति। नोक्तं विभावितं नयेदित्यनेनकवस्तुत्वेऽपि पदान्तरगमनं निषिद्ध्यते। यथा रूपकशतं वृद्ध्या गृहीत्वाऽयं न प्रयच्छतीत्यावेदनकालेऽभिधाय भाषा-काले रूपकशतं बलादपहृतवानिति वदतीति। तत्र वस्त्वन्तरगमनं निषिद्धः इह तु पदान्तरगमनं नि-षिद्ध्यत इति न पौनरुक्त्यः। एतदेव स्पष्टीकृतम्—

नारदेन, (ना. स्मृ. अ. २। २४)

पूर्वपादं परित्यज्य योऽन्यमालम्बते पुनः।

पदसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः॥ इति।

हीनवादी दण्ड्यो भवति न प्रकृतादर्थाद्धीयते। अतः प्रत्यर्थिनोऽर्थिनश्च प्रमादपरिहारार्थमेवायमनियमोपदेशो न प्रकृतार्थासिद्ध्यसिद्धिविषयः। अत एव वक्ष्यति, (या. अ. २। १९)

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः। इति।

एतच्चार्थव्यवहारे द्रष्टव्यः। मनुकृते तु व्यव-हारे प्रमाणाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव। यथाह नारदः, (ना. स्मृ. अ. २। २५)

सर्वेष्वर्थविवादेषु वाक्छले नावसीदति।

पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते॥ इति।

अस्यार्थः । सर्वेष्वर्थविवा ः न मन्ुकृतेषु वाक्छले प्रमा ाभिधानेऽपि नावसी ति न प जीयत । न प्र तादर्थाद्धीयते इत्यर्थः । अत्रोदा रणं प स्या- स्यादि । प आभूष णादाने प्रमा ाभिधानेन दण्ड्यो- ऽपि यथा प्र तादर्थान्न हीयते एवं र्वेष्वर्थविवा े- ष्विति । अर्थविवादग्रहणान्मन्ुकृतविवादेषु प्रमा- दाभिधानेन प्रकृतादप्यर्थाद्धीयत ति गम्यते । यथाऽह- मनेन शिरसि पादेन त डित स्थाभिवदनसमये अभि- धाय भाषाकाले हस्तेन पादेन वा ताडित इति वदन् न केवलं दण्ड्यः, पराजीयते च ॥ ९ ॥

बा० १ । प्रकृते योगरूढत्वमर्थान्तरनिरासाय । *अभियुज्यते इति । ाषाविषयीक्रियते इत्यर्थः । येनेति शेषः । करणे घञः सौलभ्यात् । यथाश्रुतं वा । सम्बध्यते इति तदर्थात् । एनमि- त्यत्र कथिता कथनसत्त्वेनान्वादेशविषयत्वादेनादेशः । अपरा- धेनेत्य य विशेषपरत्वाय शङ्कते *यद्यपीति । सत्यं गृहीतं प्रति- दत्तं चेति कारणोत्तरस्य अनेन दत्तं स्थितं मया नदत्तमित्येवं प्रत्य ियोगरूपत्वमित्यर्थः । *विषयत्वमिति । तथा चाभियोगनि- वारकमेव प्रत्यभियोगं कुर्यादेव न तदनिवारकम् । अन्यथा सत्यं मिथ्योत्तरमित्यादिना चातुर्विध्यकथनस्यैवास तत्वापत्तेः, एतन्निषेधवैयर्थ्यापत्तेश्च । तदाह *अत इति । * पमदूनोति । करणे ल्युट् । *निषेध इति । नैनं प्रत्यभीति निषेध इत्यर्थः । तथैव सम्भवादाह *इदमिति ।

२ । भूते कर्मणि निष्ठायां त िस्तारे जाते तस्यष्टत्वेनास ्ति परिहरति *आनिस्तीर्णेति । भावनि ान्तान्मत्वर्थीयाऽजिति भावः । अन्येनेत्यस्य पूर्वाभियोगे सम्बन्धा योग्यतया शेषमा-

ह *अन्योऽर्थीति । प्रतीत्यस्य सम्बन्धायाग्यत्वात्तमप याह *नाभीति ।

३ । गोक्तमित्याशुक्तिरव्यावत्यादर्थिनं प्रत्येवेत्य । *किं चेति । प्रकृतिशब्दः स्वभावार्थको दुस्त्यजा प्रकृतिरित्यादा दृष्टः । शङ्कितुमेतत्तात्पर्यार्थमाह *एतदिति ।*तथैवेति । अन्यथा ज्ञापकादित्वेन भङ्गप्रसङ्गादिति भावः । इदं प्रतिपादितमध-स्तात् । अपिः तस्यैव समुच्चये । एवमग्रेऽपि । अत एवाह *नन्विति ।*तदेवेति । तथा च वस्त्वन्तरकथननिवृत्तिस्तेन क्रियते ।* एकस्मिन्नपि पदे । ऋणादानादिव्यवहारविषये इत्यर्थः । व्यवच्छेद्यमेवाह । *न वस्त्वन्तरामिति । तदेवोदाहरणकथनेन विशदयति *यथेति । यद्यपि ऋणादाने रूपकमेव व्यवहारविषयो भवति तथापि रूपकशतस्थाने वस्त्रशतोक्त्या वस्त्वन्तरोपादानमिति तन्निषेधस्तेन क्रियते इति भावः । एतेन शतरूपस्य विषयस्यैकत्वादयुक्तमिदमित्यपास्तम् । प्रागुक्तं दार्ढ्याय स्मारयति *तथा सतीति ।*पदान्तरागमेति । विषयान्तरं प्रत्यगमनेऽपीत्यर्थः । अत्र प्रकरणे पदशब्दो विषयवाची । *इत्यनेन । इत्यनेन तु ।*यथेति । अत्र रूपकशतरूपवस्तुन एकत्वेऽपि ऋणादानपदरूपयोर्व्यवहारविषययोर्भिन्नत्वेन तद्गमनमनेन नोक्तमित्यनेन निषिध्यते इत्यर्थः । उक्तमेव स्पष्टार्थमुपसंहरति *तत्रेति । प्रत्यर्थिन इत्यत्रेत्यर्थः । वैपरीत्याशङ्का तु न । 'यथावेदितं, 'नोक्तं विप्रकृतिः' इत्येतत्स्वारस्यात् ।

४ । तत्राद्ये मानस्योक्तत्वात् द्वितीये तदाह *एतदेवेति । द्वितीयमुक्तमेवेत्यर्थः । पदसंक्रेति । पदान्तरं प्रति गमनाद् वस्त्वन्तरगमनाच्चेत्यर्थः । वादेति पाठान्तरम् । तत्र साधारण्यमस्य बोध्यम् । आद्ये तु प्रकृतपरत्वमेवेति तत्त्वम् । हीनवादी

दण्ड्यः स्या।दे कं सविशेषं विशदयति *हीनेति। दण्ड्य एवेत्यर्थः। अत एवाह *न प्रेति। वचनस्थक्रमेणाह *प्रत्यर्थीति। *सिद्ध्यसि ीति। हीनवादित्वे प्रकृतार्थासि रतयात्वे तात्सि रित्यर्थः। अत्र मानमाह *अत एवेति। लक्ष्यादिति शेषः। अस्यार्थोऽग्रे एव स्फुटः। इदमपि न सार्वत्रिकमित्याह *एतच्चेति। हीनवादी दण्ड्य एव, न प्रकृतार्थाद्धीयते इत्येतादित्यर्थः। *अर्थेति। उक्तविषयव्यव रे एवेत्यर्थः। *मन्युकृते त्विति। वाक्पारुष्यदण्डपारुष्यादिव्यवहारे इत्यर्थः। अपिना दण्डसमुच्चयः। तथा चैवं विधे वाक्छले व्यवहारहानिर्दण्डश्चेति भावः। उक्तार्थस्य स्पष्टतया ऽभासादाह *अस्यार्थ इति। अर्थपदव्यावर्त्यमाह *न मन्युकृतेष्विति। अन्यत्र तस्य स्प त्वाद्वाह *प्रमादेति। नावसीदतीत्यस्य व्याख्या न पराजीयते इति। तद्व्याख्या न प्रकृतादिति। उत्तरा स्यासंबद्धत्वं पुनरुक्तत्वं च परिहरति *अत्रोदेति। सामान्योक्तौ वि ादि-दृष्टान्त इति भावः। तत्त्वं योजयति *प्रमादेति। शास्यपदार्थो *दण्ड्योऽपीति। उदाहरणत्वाद्दना *यथेति। शेष रणमनयोरिति भवः। अत एव वाक्छले इति सप्तम्यन्तच्छेदो न तृतीयान्त इति बोध्यम्। अत एव च वैपरीत्यश ा नेति गूढाकूतः। एवं शाब्दमाद्यार्थमुक्त्वा द्वितीयमर्थपदध्वनितमाह *अर्थेति। प्रमादाभिधानेनेति तृ ीयान्तं, न प्राग्वत्सप्तम्यन्तः। सूचितस्योदाहरणमाह *यथाऽहमितिति॥ ९॥

मि० अभियोगमनिस्तीर्य नैनं प्रत्याभियोजयेत्-इत्यस्यापवादमा ।

या० कुर्यात्प्रत्याभियोगं च कलहे साहसेषु च।

मि० कलहे वाग्दण्डपारुष्य त्मके साहसे विष-

शस्त्रादिनिमित्तप्राणिव्यापादनादि प्रत्यभियोगसंभवे स्वाभियोगमनिस्तीर्याप्यभियोक्ता प्रत्यभियोजयेत् । ननु तत्रापि पूर्वपक्षानुपमर्दनरूपत्वेनाऽनुत्तरत्वात्प्रत्याभियोगस्य प्रति युगपत्त्वे युगपद्व्यवहारासम्भवः समानः । सत्यम् । नात्र युगपद्व्यवहाराय प्रत्यभियोगोपदेशः अपितु न्यूनदण्डप्राप्तय अधिकदण्डनिवृत्तय वा । तथा हि । अनेनाहं ताडितः शप्तो वेत्याभियोगे पूर्वमहमनेन ताडितः शप्तो वेति प्रत्यभियोगे दण्डाल्पत्वम् ।

यथाह नारदः, (ना. व्य. प. १५ । ९)

पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक् ।
पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः ॥ इति ।

यदा पुनर्द्वयोर्युगपत्ताडनादिप्रवृत्तिस्तत्राधिकदण्डनिवृत्तिः । (ना. व्य. प. १५ । ८)

पारुष्ये साहसे वापि युगपत्संप्रवृत्तयोः ।
विशेषश्चेन्न लभ्येत विनयः स्यात्समस्तयोः ॥ इति ।

एवं युगपद्व्यवहारप्रवृत्त्यसम्भवेऽपि कलहादौ प्रत्यभियोगोऽर्थवान्, ऋणादानादिषु तु निरर्थक एव ।

मि० अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा ससभ्यस्य सभापतेः कर्तव्यमाह ।

या० उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ १० ॥

मि० उभयोरर्थिप्रत्यर्थिनोः । सर्वेषु विवादेषु । निर्णयस्य कार्यं कार्यनिर्णयः । आहिताग्न्यादेः पाठात्कार्यशब्दस्य पूर्वनिपातः । निर्णयस्य कार्यं च साधितधनदानं दण्डदानं च । तत्र समर्थः, प्रतिभूः प्रति-

भवति तत्कथं ... प्रतिभूः प्राप्यः ... सम्पन्न ... भापातेना । तस्यासम्भवेऽर्थिप्रत्यर्थिनो रक्षणे पुरुषा नियोक्तव्याः । तेभ्यश्च ताभ्यां प्रति... नं वेतनं देयम् ।

तथाह कात्यायनः,

अथ ... कार्ययोग्यस्तु वादिनः ।
स रक्षितो ... नस्यान्ते दद्याद् भृत्याय वेतनम् ॥ इति ॥ १० ॥

वा॰ १ । सङ्गतिमाह *अभीति । *इत्यस्य ... स्य । तथा च प्रत्यर्थिविषये ... वायमपीति भावः । *निमित्तेति । बहुव्रीहिः । ननु ... प्रत्यभियोगासम्भवे ऽभियुक्तस्य कथं तत्करणविधिरत आह *प्रत्यभीति । तथा च तदसम्भवे नैव कुर्यादिति सम्भवाभिप्रायकमेवतद्व...मिति भावः । *स्वाभीति । स्वयमाभियुक्त इत्यादिः । तथा चेदं साहसादावेवेति, तदन्यविषयकं तदिति भावः ।

२ । नन्वेवंविधस्थले प्रत्यभियोगः किमुत्तरं सत्सार्थकः उत प्रति...न्तरं सत् । नाद्यः । ...र्वपक्षनिराकरणासमर्थत्वेन...त्तरत्वात् । नान्त्यः । अभियोग एका प्रतिज्ञा प्रत्यभियोगश्चान्या । ततश्च सङ्कीर्णोत्तरे यथा युगपद्व्यवहारासम्भवादु...त्तरत्वमेवं प्रतिज्ञान्तरेऽपि तदसम्भवस्य तुल्यत्वात् । अप्रति...त्वेन प्रत्यभियोगविधेरेव वैयर्थ्यात् । एवं च वचनार्थो दुर्वच ...त्याशयेन शङ्कते *नन्वत्रापीति । ...त्य समाधत्ते *नात्रेति । तत्राद्य...हरणमाह *अनेनेति । *दण्डेति । प्रत्यभियो...रिति भावः । एव...क्ततात्पर्यं मानमाह *यथाहेति । *आक्षारयेत्, कायेन वाचा वा क्षीणं कुर्यात् । नियतं निश्चयेन । नयो दण्डः । द्वितीयो...हरणमाह *यदा पुनरिति । यदा त्वित्यर्थः । *पा-

रुध्ये इति । वा॰ ब्रित्यादिः । अत एव सामान्यादिः । इदमेव तत्र कलहपदेनोक्तम् । एवं [illegible] तस्योक्त एवाशयः । तदेतदभिप्रेत्य भा॰ क्रमुपसंहरति *एवमिति । उक्तप्रकारेणे-नेत्यर्थः । एवं सतीति पाठान्तरम् । उक्तवचनस्यैवंतात्पर्यक-त्वे सतीति तदर्थः ।

३ । अन्यवाहितस[illegible]स्यभावादाह *अर्थीति । शेषं विशेषा-भावादाह *[illegible]िति । कार्यस्य निर्णय इत्यर्थेऽर्थासङ्गतेराह *[illegible]येति । *तस्मिन् समर्थ इति । द्विविधदाने समर्थ इत्यर्थः । मालजामिन् इति भाषाप्रसिद्धोऽयम् । अनेनाताद्दशस्यातत्त्व-मुक्तम् । प्रतिभूशब्दो योगरूढ इत्याह *प्रतीति । प्रतिः प्रति-निध्यर्थक इत्याह *तद्वदिति । प्रकृतत्वादाह *ससभ्येनेति । शेषोऽयं, [illegible]थानुपपत्तेः । अनुक्तं विशेषद्वयमाह *त-स्येति । प्रतिभुव इत्यर्थः । उभयत्र मानमाह *यथाहेति । अ-थेति पक्षान्तरे । तत्र समर्थ इत्यर्थमाह *कार्येति । वादिन इति [illegible]योरेकशेषः । जातावार्षं वा एकवचनम् । तेन वादित्वेनार्थिप्र-त्यर्थिनोः समासेन ग्रहणम् । एवमग्रेऽपि । *रक्षितः भृत्येन । इदमुपलक्षणं तस्यापि इति केचित् । वादित्व[illegible]भयो [illegible] प्रत्ये-काभिप्रायमेकवचनमित्यपरे । तुश्चार्थे व्युत्क्रमे च । वादिनश्चे-त्यर्थः । चेन तत्संग्रह इति परे ॥ १० ॥

मि॰ अर्थिप्रत्यर्थिनोर्निर्णयकार्ये ससभ्येन सभा-पतिना प्रतिभूर्ग्राह्य इत्युक्तम् । किं तन्निर्णयकार्यं यस्मिन्प्रतिभूर्ग्राह्यत इत्यपेक्षिते आह ।

या॰ निह्नवे भावितो दद्याद्धनं राज्ञे च तत्समम् ।
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत् ॥११॥

मि० अर्थिना निवे[illegible] तस्या[illegible]भियोग[illegible]च [illegible]त्यार्थिना-ऽपह्नवे कृते यदाऽर्थिना साक्ष्यादिभिर्भावितोऽङ्गीकारितः प्रत्यर्थी तदा दद्याद्धनं प्रकृतमर्थिने, राज्ञे च तत्सममपलापदण्ड[illegible] । अथार्थी भावयि[illegible] न [illegible]क्नोति तदा स एव मिथ्याभियोगी जात इति अभियोगात् अभि[illegible]क्तधनाद् द्विगुणं धनं [illegible]द्याद्राज्ञे । प्रा[illegible]न्याय प्रत्यवस्कन्दने चेदमेव योजनीयम् । तत्रार्थ्येवाप[illegible]व-वादी प्रत्यर्थिना भावितो राज्ञे प्रकृतधनसमं दण्डं दद्यात् । अथ प्रत्यर्थी प्राङ्न्यायं कारणं वा भावयितुं न शक्नोति तदा स एव मिथ्याभियोगीति राज्ञे द्विगुणं धनं दद्यात्, अर्थिनं च प्रकृतं धनम् । [illegible]प्रतिप[illegible]त्तरे तु दण्डाभाव एव । एतच्च ऋणा[illegible]नविषयमेव । पदान्तरेषु तत्र तत्र [illegible] अधनव्यव-[illegible]रेष्वस्यासम्भवाच्च न सर्वविषयत्व[illegible] । राज्ञाऽधमर्णिको दाप्य इत्यस्य ऋणादानविषयत्वेऽपि तत्रैव विशेषं वक्ष्यामः । यद्वा सर्वव्यव[illegible]रविषयत्वेनापि योजनीय[illegible] । कथम्? अभियोग[illegible]च निह्नवेऽभि[illegible]क्तेन कृते यद्यभिय[illegible]क्त्रा साक्ष्यादिभिर्भावितोऽभि[illegible]क्तस्तदा तत्समं तत्र तत्र प्रतिपदोक्तमेव । चशब्दोऽवधा[illegible]णे । धनं दण्डं दद्याद्राज्ञे इत्यनुवादः । अथाभियोक्ता अभियोगं वक्तुं न [illegible]क्नोति तदा मिथ्याभियोगीति प्रतिपदोक्तं धनं दण्डं द्विगुणं दद्यादिति विधीय[illegible] । अत्रापि प्राङ्न्याये प्रत्यवस्कन्दने च [illegible]व योजनीयम् ॥ ११ ॥

बा० १ । निर्णयकार्यमुक्तरूपं स्वय[illegible]क्तं स[illegible]लयति *अर्थीति ।

*किमिति । त[illegible]त्यादिः । योग्यतयोपस्थितत्वाच्च । *अ[illegible]तमर्थिन इति । *तत्सममिति । प्रकृतधनसमपलापनिमित्तकदण्डमित्यर्थः । *जात इतीति । स इति शेषः । अभियोगादित्यत्र कर्मणि घञित्याः । *आभियुक्तेति । [illegible]र्थः दद्यादिति । योग्यतया तदनुषङ्गेणाह *राज्ञे इति । मिथ्योत्तरविषये उक्तन्यायम् अन्यथा [illegible]तिदिशति *म[illegible]न्याये इति । तत्प्रकारमा[illegible] *तत्राथ्र्येवेति । अस्मिन्नर्थेऽयं पूर्वं पराजित इति प्राङ्न्यायोत्त[illegible], गृहीतं प्रतिदत्तमिति कारणोत्तरे च दत्ते पूर्वन्यायं प्रतिदानं च प्र[illegible]त[illegible]वाद्ये[illegible]पल[illegible]ती ति स एवापलापवाद[illegible]र्थः । *भावित इति । पराजयरूपप्र[illegible]न्यायस्य प्रतिदानस्य च साधनाद[illegible] वादीत्यर्थः । *दण्डं दण्डमेव । अन्यस्य देयस्याभावात् । *मिथ्याभियोगीति । मिथ्यावादीत्यर्थः । इतिर्हेतौ । मिथ्यावादित्वेनेत्यर्थः । *द्विगुणमिति । प्रकृतधनेत्यादिः । *धनं दण्डरूप[illegible] । अवशिष्ट[illegible]योत्तरे तु नैवमतिदेश इत्याह *संप्रतिपत्तीति । *दण्डाभाव एवेति । निह्नवाभावात् । तदीयं तु देयत्वेनाभ्युपगतमेवेति भावः ।

२ । विशेषमाह *एतच्चेति । निह्नवे भावितो दद्यादित्येतदित्यर्थः । पदान्तराणि द्विविधानि सधनानि अधनानि च । तत्र सधनेष्वाह *पदान्तेति । सधनेष्वित्यर्थः *तत्र तत्रेति । एवं च विशिष्य विधानादेतस्य सामान्यस्य तत्र बाधादप्रवृत्तिरिति भावः । अधनेष्वाह *अधनेति । वाग्दण्डपारुष्यादिव्यवहारे प्रकृतधनसमदण्डदानस्य तद्द्विगुणदानस्य चासम्भवाच्चेत्यर्थः । उपसंहरति *न सर्वेति । अत इत्यादिः । यद्वा एवव्यवच्छेद्यमा[illegible] *न सर्वेति । ननूक्तदण्डस्य ऋणादानमात्रविषयत्वमपि न । तत्रापि "राज्ञाऽधमर्णिक" इत्यनेन विशिष्य दण्डस्य वक्ष्यमाणत्वात् । अन्यथा तस्य वैयर्थ्यापत्तेः । वचनद्वयप्रामाण्या[illegible] कल्पा-

ङ्गीकारे तु तद्व...विषय... ऽपि अस्य स्यादिति इदं व्यवस्थापनम... क्तमत आह *राज्ञेति । तत् प्रकरणात्प्रतिप...र्थसाधनविषयम्, इदं तु तदभावादप्रतिपन्नार्थसाधन...षयमिति न कोऽपि दोष इत्यर्थः ।

३ । ननु अन्यत्र दण्डस्याभिधानेऽपि द्वै...ण्यस्यानभिहितत्वादुत्तरार्धोक्तस्य विधानं सम्भवतीत्येतत्प्रवृत्तेरावश्यकतया पूर्वार्धस्यानुवादपरतया एकवाक्यतया योजनसम्भवादृणादानमात्रविषयतया व्यवस्थापनमयुक्तमत आह *यद्वेति । शब्द...दया तथा प्रतीत्यभावादाह *कथमिति । अत एव सामान्यशब्देन व्याचष्टे *अभियोगस्येति । *तत्सममिति । व्यवहारतुल्यमित्यर्थः । यत्र यत्र व्यवहारे यो य उक्तः स तत्तुल्यो भवति अन्यस्तु विरु...त्वाद्विसदृश इति भावः । तदाह *तत्र तत्र प्रतीति । धनामित्याग्रिमेणास्यान्वयः । एवः कुतो लब्ध इत्यत आह *चशब्द इति । ...लवचनस्थ इत्यर्थः । अत्र पक्षे पूर्वार्धे एकस्यैव वाक्यार्थस्य सत्त्वेन वाक्यार्थद्वयाभावेन समुच्चयाभावात्तदर्थकत्वासम्भवेन निपातानामनेकार्थत्वात् तदर्थकत्वमिति भावः ।

४ । योग्यतया धनशब्दार्थमाह *दण्डमिति । *इत्यनुवाद इति । २ अप्राह्निकया तद्व्यवहारे दण्डस्य विशिष्य विहितत्वेन प्राप्तत्वाद्विध्यसंभवेन पूर्वार्धेन तस्य सर्वस्य सामान्येना...वाद इत्यर्थः । वैयर्थ्यं तु अस्य न, तत्रैवोत्तरार्धेन विशेषस्य विधीयमानत्वादिति भावः । तदेव तथैवाह *अथेति । तत्सममित्यस्यानुषङ्गेणानुवादमाह *प्रतीति । प्राग्वदाह *दण्डमिति । विधेयमाह *द्विगुणमिति । द्विगुणदण्डस्याप्राप्तत्वादिति भावः ।

...वदाह *अत्रापीति ॥ ११ ॥

मि० ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्—
इति वदतोत्तरपादलेखने
कालप्रतीक्षणं दर्शितं, तत्रापवादमाह ।

या० साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम् ।
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः ॥ १२ ॥

मि० साहसं विषशस्त्रादिनिमित्तं प्राणव्यापादनादि । स्तेयं चौर्यम् । पारुष्यं वाग्दण्डपारुष्यं वक्ष्यमाणलक्षणम् । गौर्दोग्ध्री । अभिशापः पातकाभियोगः । अत्ययः प्राणधनातिपातः । तस्मिन् । द्वन्द्वैकवद्भावादेकवचनम् । स्त्रियां कुलस्त्रियां चारित्रविवादास्यां स्वत्वविवादे । विवादयेत् उत्तरं दापयेत् । सद्य एव न कालप्रतीक्षणं कुर्यात् । अन्यत्र विवादान्तरे काल उत्तरदानकालः इच्छयाऽर्थिप्रत्यर्थिसभ्यसभापतीनां स्मृत उक्तः ॥ १२ ॥

बा० प्रागुक्तं प्रतिज्ञासाधनं च तत्रेत्यादिना वक्ष्यमव्यहितसङ्गत्यभावाद् व्यवहितसङ्गतिमाह *ततो ऽर्थीति । स्तेयपारुष्ययोर्गवादेश्च द्वन्द्वं कृत्वा पुनः साहसेन समाहारद्वन्द्वः । अत एवार्थमात्रमाह *साहसमित्यादि । बहुव्रीहिः । प्राग्वदाह *वाग्दण्डेति । प्रागुक्तत्वादाह *वक्ष्यमाणेति । तदभावेऽन्यत्र बाधाभावादाह *दोग्ध्रीति । विनिगमनाविरहादाह *प्राणेति । प्रागुक्तनिमित्तान्यनिमित्तकोऽत्र प्राणनाशो ग्राह्यः । अत एव सामान्येनाह *द्वन्द्वैकेति । विनिगमकाभावादाह *कुलेति । उभयत्र निमित्ते आह *चारित्रेति । विरुद्धभाषणं नार्थ इत्याह *उत्तरमिति । प्राग्वदाह *अर्थीति । पूर्वान्वयीदम् । स्मृत इत्यस्यार्थः

उक्त इति । अतोऽन्यथेत्यनेन नार ीयेनाक्त इत्यर्थः ॥ १२ ॥

मि० ः ष्टलक्षणमाह ।

या० देशाद्देशान्तरं याति सृक्किणी परिलेढि च ।
ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥ १३ ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ।
वाक्चक्षुः पूजयति नो तथौष्ठौ निर्भुजत्यपि ॥ १४॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः ।
अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः ॥१५॥

मि० मनोवा ायकर्मभिर्यः स्वभावा व न भयादिनिमित्ता विकृतिं विकारं याति गच्छति असावभियोगे साक्ष्ये वा दुष्टः प कीतितः । तां विकृतिं विभज्य शयति । देशाद्देशान्तरं याति न क्वचि वतिष्ठते, ृक्किणी ओष्ठपर्यन्तौ परिलेढि जि ाग्रेण पशयति घट्टयतीति कर्मणो वि ृतिः । अस्य ललाटं विद्यते स्वेदबिन्द्वङ्कितं भवति, मुखं च वैवर्ण्यं विवर्णत्वं ाण्डुत्वं ृष्णत्वं वा एति गच्छत ति काय य विकृतिः । पारि ुष्यत्स्खलद्वाक्यः पारेशुष्यत् सगद्गदं स्खलद् व्यत्यस्तं वाक्यं यस्य स तथोक्तः, विरुद्धं ूर्वापरविरुद्धं बहु भाषते इति वाचो विकृतिः । परोक्तां वाचं प्रतिवचनदानेन न पूजयति चक्षुर्वा प्रतिवीक्षणेन न ूजयतीति मनसो विकृतेर्लिङ्गम् । तथा ओष्ठौ निर्भुजति वक्रयतीत्यपि कायस्य विकृतिः । एतच्च ोषसम्भावनामात्र च्यते न दोष-

निश्चयाय । स्वाभाविकनैमित्तिकविकारयोर्विवेकस्य दुर्ज्ञेयत्वात् । अथ कश्चिन्निपुणमतिर्विवेकं प्रतिपद्येत तथापि न पराजयनिमित्तं कार्यं भवति । न हि मरिष्यतो लिङ्गदर्शनेन मृतकार्यं भवन्ति । एवमस्य पराजयो भविष्यतीति लिङ्गादवगतेऽपि न पराजयनिमित्तककार्यप्रसङ्गः ॥ १३ ॥ १४ ॥ १५ ॥

बा० १ । अथाप्रिमापरक्रमाह *दुष्टेति । हीनवादिप्रसङ्गात् पूर्वारम्भेऽवतरणे उक्तस्य तन्मात्रस्येत्यर्थः । स पापी कीर्तित इत्यन्तेनेति भावः । विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वात् पाठक्रमाद् [illegible] बलीयानिति न्यायेन व्युत्क्रमेण व्याचष्टे *मनो वागिति । यद्धि मनसेति श्रौतक्रमेण मनसः पूर्वनिपातः । सर्वं वाक्यमिति न्यायेनोक्तिसामर्थ्येन चाह *स्वभावादेवेति । दोषस्वभावादेवेत्यर्थः । तेन आजन्मस्वभावनिरासः । तद्व्यावर्त्यमाह *न भयादीति । आदिना क्रोधादिपरिग्रहः । भावे क्तिन्नित्याह *विकारमिति । लिङर्थो न विवक्षित इत्याह *याति गच्छतीति । गच्छति यातीत्यर्थः । अत एव स इत्युक्तम् । तस्यार्थमाह *असाविति । वा चार्थे । तथा च श्लोकेऽथवेत्यन्वयेनाथचेत्यर्थो बोध्यः । एकदेशसंग्रहाय तत्तात्पर्यार्थमाह *न क्वचिदिति । ननु मनोवाक्कायकर्मभिरित्यपदेशाद्देशान्तरमित्यादिना व्युत्क्रमेण कर्मादिविकारप्रदर्शनमयुक्तम् । न च सान्निध्यात् व्युत्क्रमेणान्वयो ऽभिमतः एतदर्थमेव तथोक्तमिति वाच्यम् । तथौष्ठावित्यनेन कायविकारेण व्यवहितत्वात्तस्यैवान्ते उक्तेः । अत एव व्याख्याने [illegible] व्याख्यातामिति चेन्न । तदुद्देशक्रमेणोत्तरोत्तरस्य पूर्वपूर्ववाच्यत्वेनान्त्यस्यात्यन्तस्थूलत्वेन स्थूलतमक्रमेण विकारदर्शने तात्पर्यात् । एवं सति तथौष्ठावि-

त्य चापि वैवर्ण्ययेति चेत्यत्रैव वक्तव्यत्वेन, अन्ते भेदेन तदु-
क्तिस्तु [illegible] सार्वत्रिकत्वेन प्राधान्यसूचनार्थेति बोध्यम्।
पर्यन्तौ प्रान्तौ। योग्यतया आह *जिह्वेति। *इतीति। उभय-
मित्यर्थः। अत एव स[illegible]चायकश्चो मूले। एवमग्रेऽपि बोध्यम्।
तृतीयश्चः परि[illegible]व्यादिति वाक्ये योज्यः। अविनिगमकत्वादाह
*कृष्णेति। एतीत्यस्य व्याख्या गच्छतीति। वाक्यस्य [illegible]
षणासम्भवादाह *सगद्गदेति। अत एव स्वल[illegible]दित्यन्यथा व्याचष्टे
*व्यत्यस्तमिति। *पूर्वापरेति। इदमुपलक्षणं दशादिवि[illegible]स्यापि।
असकृदुक्तौ तथात्वनि[illegible]याह *बहिति। *भाषते भाषते च।
वाक्चक्षुरिति समाहारद्वन्द्वः। तमर्थमाह *पर[illegible]मिति। पूजा-
प्रकारभेदमाह *प्रतिवचनेत्यादि। अस्य स्वतो वि[illegible]तित्वाभावा-
दाह *[illegible]मिति। तथा चारोपितं तत्त्वमिति न प्रागु-
क्तासङ्गतिः। उक्तहेतोरेवान्ते व्याचष्टे *तथेति। वैवर्ण्यादिवदि-
त्यर्थः। अस्य वचनस्य तात्पर्यार्थं [illegible] विशेषमाह *एतच्चेति।
*स्वा[illegible]विकृति। जन्मस्वभावकृतेत्यर्थः। विवेकस्य भेदस्य। *नि
मित्तमिति। बहुव्रीहिः। एवमग्रेऽपि। अत्र हेतुं सूचयन् सदृष्टा-
न्तमिदं विशदयति *न हीति। लिङ्गात् यत्किंचिद्विकार[illegible]।
*न परेति। तथा च तत्संभावनामात्रप्रतिपादने तात्पर्यम[illegible] वच-
नस्य, न प्रागुक्तवक्ष्यमाणदण्डादिप्रतिपादने। तद्रीत्या ईदृश-
स्थलेऽपि तथा प्रसङ्गो ऽन्यथा स्यादिति तन्निवारणतात्पर्य[illegible]-
मिदं वचनम्। एवं च दुष्टः संभावितदोष एवेत्येवं व्या[illegible]य-
मिति बोध्यम्॥ १३॥ १४॥ १५॥

या० संदिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत्।
न चाहूतो वदेत् किंचिद्धीनो दण्ड्यश्च स स्मृतः १६

मि० किञ्च । सं॰ ॰धमर्णमधमर्णेनानद्भ्री ॰तमेव यः स्वतन्त्रः ॰धननिरपक्षः साधयत्यासध्या॰ ॰ना स ही॰नो दण्ड्यश्च भवति । यश्च स्वयं ॰प्रतिपन्नं ॰धनत्व वा ॰षितं याच्यमानो निष्पतेत्पलायत, यश्चाभियुक्तो राज्ञा चाहूतः सदासि न किञ्चि॰ ॰ति , सोऽपि हीनो ॰दण्ड्यश्च स्मृत इति ॰बध्यते ।

अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्तितः ।

इति प्र॰ ॰तत्वाद्धीनपरिज्ञानमात्रमेव मा भूदिति ॰दण्ड्यग्रहणम् । ॰दण्ड्यश्चापि "शास्योऽप्यर्थान्न हीयते" इति अर्थाद् ॰ीनत्वदर्शनादत्र तन्मा भूदिति हीनग्र॰णम् ॥ १६ ॥

बा० १ ।अत एवाग्रे पुनः प्राग्वदेव सविशेष॰ ॰मित्याह *किं चेति । साधकस्य सन्देहाभावाद्यथाश्रुतार्थानुपपत्तेः प्रपन्नस्थले ॰षाभावस्य "प्रपन्नं साधयन्नर्थं" इत्यनेन वक्ष्यमाणत्वात्ता॰ ॰पर्यमाह *अधमर्णेति । स्वतन्त्र इत्यस्य व्याख्या साधनेति । लेख्यादीत्यर्थः । अत एव तत्र उपायमा॰ *आसेधादीति । आद्यपादोक्तं प्रासङ्गिकं न तु प्रकृतस॰ ॰तमिति सूचयितुं भवतीति शेषेण भेदेन व्याख्याया॰ ॰मं द्वयं प्रकृतस॰ ॰तं सह व्याचष्टे *यश्चेत्यादि ।अप्रतिपन्नाद् दोषाभावादाह *संप्रतीति । अर्थमिति शेषः । उभयत्र ॰ ॰ आह *पलायते इति । एवमग्रेऽपि । अभियोगं विना आह्वानासंभवादाह *अभियुक्त इति । अन्यत्र दोषाभावादाह *सदसीति । ॰पदस्य सर्वत्र सम्बन्ध इत्याह *सोऽपीति । द्विविधोऽपीत्यर्थः । अत एवाह *स्मृत इति । उभयत्रेति भावः । *सम्बध्यते इति।एते त्रयो न केवलं दुष्टा अपि तु ॰ ॰ हीना॰ ॰ध्याश्चेति स॰ ॰दायार्थः ।

२ । इदमेव आचारराधेनाग्रेऽपि उभयोक्तिस्वारस्येन विशदयति *अभीति । यदि हीनत्वमुक्तदुष्टत्वरूपं भवेत्तर्हि तदन्त्यस्यैव सिद्धे हीनपदोक्तिरनर्थिकाऽतस्तद्बलात् अर्थात् हीनत्वपरिज्ञानेत्यर्थः । मात्रेत्यनेन दण्डव्यवच्छेदः । एवेन दुष्टत्वव्यवच्छेदः । तथा च संगत्यैकरूप्ये वैरूप्यस्यान्याय्यत्वात् तदुत्तरमस्य कथनेन दुष्टस्यापि अनुषङ्गात्तस्यापि समुच्चयो बोध्यः ॥ १६ ॥

मि॰ अथ यत्र द्वावपि युगपद्धर्माधिकरणं प्राप्तौ भाषावादिनौ । तद्यथा । कश्चित्प्रतिग्रहेण क्षेत्रं लब्ध्वा कश्चित्कालमुपभुज्य देशान्तरं गतः । अन्योऽपि तदेव क्षेत्रं प्रतिग्रहेण लब्ध्वा कश्चित्कालमुपभुज्य देशान्तरं गतः । ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्माधिकरणं प्राप्तौ । तत्र कस्य क्रियेत्याकाङ्क्षिते आह ।

या॰ साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥ १७ ॥

मि॰ उभयतः उभयोरपि वादिनोः साक्षिषु संभवत्सु साक्षिणः पूर्ववादिनः । पूर्वस्मिन्काले मया प्रतिगृहीतमुपभुक्तं चेति यो वदत्यसौ पूर्ववादी । न पुनर्यः पूर्वं निवेदयति तस्य साक्षिणः प्रष्टव्याः । यदा त्वन्य एवं वदति "सत्यमनेन पूर्वं प्रतिगृहीतमुपभुक्तं च किन्तु राज्ञेदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा मह्यं दत्तमिति अनेन वा प्रतिग्रहेण लब्ध्वा मह्यं दत्तम्" इति,

तत्र पूर्वपक्षोऽसाध्यतयाऽधरीकृतस्तस्मिन् पूर्वपक्षेऽधरीभूते उत्तरकाले प्रतिगृहीतं पश्चुक्तं चेति वादिनः साक्षिणः प्रष्टव्या भवन्ति। इदमेव व्याख्यानं युक्ततरम्। मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवन्ति, प्राङ्न्यायकारणोक्तौ तु पूर्वपक्षेऽधरीभूते उत्तरवादिनः साक्षिणो भवन्तीति व्याख्यानं न युक्तम्। अस्यार्थस्य—

ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्।

इत्यनेनैवोक्तत्वात्पुनरुक्तिप्रसङ्गात्। पूर्वव्याख्यानमेव स्पष्टीकृतम्—

नारदेन, (ना० स्मृ० नोपलब्धम्)

मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि।

प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेत्॥

इत्युक्त्वा— (ना० स्मृ० व्य० प० १। १६३)

द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु।

पूर्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः॥

इति वदता। एतस्य च पूर्वव्यवहारविलक्षणत्वाद्भेदेनोपन्यासः॥ १७॥

बा० १। उत्तरसङ्कीर्तिं व्यवहितेन कथयन् तदवतरणमाह *अथेति। द्वितीयः प्रत्यर्थीतिभ्रमनिरासायाह *भाषेति। तयोरुभयपत्संभवमुपपादयति *तद्यथत्यादि मासावित्यन्तेन। *देशान्तरमिति।

---

१ अभियुक्तोऽभियोगस्य यदि कुर्यादपह्नवम्।
अभियोक्ता दिशेद्देश्यं प्रत्यवस्कन्दितो न चेत्॥
इति वचनम् एतदर्थकमुपलब्धम्। अ० २। श्लो० २६

कार्यवशात् सक्तुभ्य इत्यादिः । *रागपादिति । दुर्ववशात् । *धर्मेति । धर्मस्थानमित्यर्थः । *तत्र । तयोर्मध्ये । क्रिया साधनम् ।

२ । षष्ठ्यन्तात्सार्वविभक्तिकस्तासिरित्याह *उभयोरिति । सत्सु इत्यस्य व्याख्या संभवात्स्विति । सामानाधिकरण्यभ्रमनिरासाय । प्रतीकपूर्वकं पूर्ववादिन इत्यस्यार्थान्तरं निरा[illegible]न् व्याचष्टे *साक्षिण इति । *न पुनरिति । तावताऽपि निर्णयासंभवादिति भावः । योग्यं शेषमाह *प्रष्टव्या इति ।

३ । उत्तरार्धार्थमाह *यदा त्विति । अन्यः उक्तपूर्ववादिभिन्नः । *अनेन ब्राह्मणेन । *असाध्येति । अनेनोत्तरेणा[illegible]कृत्य [illegible]कृतत्वादिति भावः । अ[illegible]षक्षादिनाऽऽह *साक्षीति ।

४ । जीर्णोक्तव्याख्यानान्तरं खण्डयि[illegible]त्कर्षयति *इदमेवेति । यत्र द्वावपि भाषावादिनौ तद्विषयतया स्वयं कृतमित्यर्थः । यत्तु उत्तरवशादेवार्थिप्रत्यर्थिभेदेनावेदनक्रमेण पूर्ववादिन उत्तरवादिनश्च साक्षिणः प्रष्टव्या इत्यस्यार्थ इति कश्चित्, तत् खण्डयति *मिथ्योत्तरे इति । मिथ्या क्रिया पूर्ववादे इति प्रागुक्तत्वात् । *कारणोक्तौ त्विति । तत्रार्थादेव पूर्वपक्षनिरासः सम्पन्न इत्याह *पूर्वेति । *प्रतिज्ञातार्थेति । अर्थ्यतइत्यर्थः साध्यं स यस्यास्तीत्यर्थी साध्यवान् । एवं च मिथ्योत्तरे पूर्ववादी साध्यवान् कारणप्राङ्न्याययोरुत्तरवाद्येव साध्यवानिति यस्य साध्यवत्ता तस्यैव साधनोपन्यास इत्यभिप्रायकार्थस्य प्राक् तत्रैवोक्तत्वादिति भावः ।

५ । अत्र विरोधमपि सूचयन् ऋष्यन्तरसंवादोऽपि पूर्वव्याख्याने इत्याह *पूर्वेति । एवेन द्वितीयव्यवच्छेदः । *स्पष्टीकृतं स्पष्टीकृतं च । मिथ्या मिथ्योत्तरे । प्राङ्न्यायेति । पूर्वन्यायकरणनिश्चयेऽ[illegible]त्यर्थः । जयपत्रं तत्प्रदर्शनम् । तथा च प्रतिवादिन्येव

क्रियेति भावः । शुद्धमा न्यायाविषयमिदमिति स्पष्टमेव । अर्थे एकार्थविषये । *पूर्वपक्ष इति । पूर्वत्र काले भातिगृहीतमुपन्यस्तं चेत्यर्थः । उक्त पूर्वपक्षो निरस्तो येन भवेदिति तदप्यर्थः । अत एव न न्यूनता म नैकवाक्यता च । अत्र अर्थे विवदतोरित्यनेन स्पष्टमेवेदमुक्तम् । साधकान्तरमन्यकार्थे ध्वनयन्नत एवाह *एतस्य चेति । *पूर्वेति । प्रागुक्तार्थिमत्यर्थिविषयकेत्यर्थः । सर्वेत्यपपाठ इति केचित् । सर्वेति पाठे प्रागुक्तसर्वेत्यर्थः ॥ १७ ॥

या० सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् ।
दण्डं च स्वपणं चैव धनिने धनमेव च ॥ १८ ॥

मि० अपिच । यदि विवादो व्यवहारः सपणः पणनं पणः तेन सह वर्ततइति सपणः स्यात्तदा तत्र तस्मिन् सपणे व्यवहारे हीनं पराजितं पूर्वोक्तं दण्डं स्वकृतं च पणं राज्ञे, अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा । यत्र पुनरेकः कोपावेशवशाद्यद्यत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीते, अन्यस्तु न किञ्चित्प्रतिजानीते तत्रापि व्यवहारः प्रवर्तते । तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि हीयते तदा स एव सपणं दण्डं दाप्यः । अन्यस्तु पराजितो दाप्यः न पणम् । स्वपणं चेति विशेषोपादानात् । यत्र त्वेकः शतमन्यस्तु पञ्चाशतं प्रतिजानीते तत्रापि पराजये स्वकृतमेव पणं दाप्यौ । सपणश्चेद्विवादः स्यादिति वदता पणरहितोऽपि विवादो दर्शित इति ॥ १८ ॥

बा० १। व्यवहारे ऽपरमपि विशेषं ...दाह *अपि चेति। ... *यदीति। विवादो न प्रसिद्ध इत्यत आह *व्यवेति। पारिभाषिकपणग्रहणे ...नतापत्तेराह *पणनमिति। व्यव...रण-मित्यर्थः। स्वोक्तिसत्यतासूचनाय यथासम्भव...दानाङ्गीकर-णमिति यावत्। तत्रेत्यस्य व्याख्या तस्मिंश्चेति। वक्ष्यमाण-स्य विशेषविषयत्वादाह *पूर्वोक्तमिति। प्रकृतार्थसममिति नि-ह्नवे भावित इत्यत्रोक्तमित्यर्थः। सपणमित्यपपाठसूचनाय स्वप-णमित्यस्यार्थः स्वकृतं पणमिति। अत एव योग्यतया शेषमाह राज्ञे इति। प्राड्विवाकादिरिति शेषः। न्यूनाधिकत्वानिरासा-याह *विवादेति। राजेत्युपल... । इदमुभयकृत-समपणविषयकमेवेति भ्रमो न कार्यः। तत्रैव गमकाभावात्। किं त्वन्यतरकृतो विषमश्चोभयकृतस्तद्विषयकमपीति।

२। अनेन स्वपदघटितेन सूचितमेव विशेषमाह *यत्र पुन-रित्यादिदाप्यइत्यन्तेन। पुनस्त्वर्थे। *तत्रापीति। निमित्तसत्त्वा-दप्रवृत्तौ मानाभावाच्चेति भावः। *दण्डं दण्डमेव। अत एवाह *न पणमिति। तत्र स्वपणस्यैवाभावादिति भावः। तदाह *स्वपणं चेतीति। *परेति। अन्यतरस्येति भावः। एवेनान्यकृतव्यवच्छेदः। दण्डस्तु वर्त्ततएवेति भावः। चेत्स्यादिति सूचितं विशेषान्तर-माह *सपण इति ॥ १८ ॥

या० छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ १९ ॥

मि० किञ्च। छलं प्रमादाभिहितं निरस्य परित्यज्य भूतेन वस्तुतत्त्वानुसारेण व्यवहारान् नयेत् अन्तं नृपः। यस्मात् ...तमपि वस्तुतत्त्वमपि अनुपन्यस्तमनभि-

तं ह्रियते हानि- पणच्छाते व्यव । रतः व्यव । रेण सा-
क्ष्या । भिः तस्मा । तानुसरणं कर्तव्यः । यथाऽर्थि-
प्रत्यर्थिनो । त्यमेव व । तस्तथा ससभ्येन । मापातेना
य । तव्यं सामा । भि । पायः । तथा सति साक्ष्यादि-
नैरपेक्ष्येणैव निर्णयो भवति । अथ सर्वथापि भूतानु-
सरणं न । कर्तुं तथा सति साक्ष्या । भिर्निर्णयः
कार्य इत्य- कल्पः ।

यथोक्तम्, (ना० स्मृ० १।२९)

भूतच्छलानुसारित्वा । द्विगतिः समुदाहृतः ।
भूतं तत्त्वार्थसं । क्तं । भिहितं छलम् ॥ इति ।

तत्र । तानुसारो व्यवहारो मुख्यः छला । सारो
त्व- कल्पः । साक्षिलेख्यादिभिर्व्यव । रनिर्णये कदा-
चिद्भूतत्व- सरणं भवति कदाचिन्न भवति । साक्ष्या-
दीनां व्यभिचारस्यापि सम्भवात् ॥ १९ ॥

बा० १ । व्यवहारे विशेषान्तरमा । मूलकृत् *किं चेति । न
मास । मत्र तादित्याह *प्रमादेति । भूतार्थो वस्त्विति । *नये-
दिति । अन्त । ति शेषः । क्वचित्तथा पाठ एव । तस्यावश्यकत्व-
मुत्तरार्धेन हेतुपरेण सशेष । रणेन प्रतिपादयति *यस्मा-
दिति । *अनभिहितमिति । अर्थिप्रत्यर्थ्यन्यतरेणेति शेषः ।
। यमानपापयोगाश्चेति करण । तायान्तात्तसिरित्याह । *व्यवहा-
रेणेति । अत्र साधनं पूरयति *साक्ष्यादिभिरिति । तथाच साक्ष्या-
दिभिः क्रियमाणेन व्यवहारेण तद्धीयते इत्यर्थः । एतेन भूत-
मपि व । तत्त्वमपि साक्ष्यादिभिर- पन्यस्तं सद् व्यवहारतो ही-
यते इत्यन्वयः इति व्याख्यानमपास्तः । भ्रममूलकत्वा । सा-

काद्दस्त्वादाह *तस्मादिति । अस्य तात्पर्यार्थम। *यथेति । तत्फलमा *तथेति । *निर्णय इति । यच यानिश्चय इत्यर्थः ।

२ । अनेन सूचितं पक्षान्तरमा *अथेति । वोक्तस्य मुख्यत्वादाह *इत्यनुकल्प इति । स्प मस्यतो अतीत न मानं नार माह *यथोक्तमिति । *भूतेति । भूतच्छले ज- सरात त- च्छलस्तत्त्वा द्विप्रकार इत्यर्थः । *संक्तामिति । युक्तं यदिति पाठान्तर । अत्रानुक्तं मा त्यनुराधेनाह *तत्रेति । नन्वस्यापि मुख्यत्वं कुतो न, अत आह *साक्षीति । *व्यभिचारेति । अयथार्थवादित्वस्याभात्पर्यः ॥ १९ ॥

मि० तमप्यनुपन्यस्तं हीयते व्यव ारतः-
इत्यत्रोदाहरणमा ।

या० निह्नुते लिखितं नैकमेकदेशविभावितः ।
दाप्यः सर्वं नृपेणार्थं न ग्राह्यस्त्वनिवेदितः ॥ २० ॥

मि० न ामनेकं वर्णरजतवस्त्रादि लिखितम भि- युक्तमार्थेना प्रत्यर्थी यदि सर्वमेव नि नुते अपजानीते तदाऽर्थिनक शे हिरण्ये साक्ष्यादि िः प्रत्यर्थी भावितोऽ ीकारितः सर्वं रजताद्यर्थं लिखित दाप्योऽर्थिने नृपेण । न ग्राह्यस्त्वनिवे ितः, पूर्वं भाषाकाले अनिवे ितः पश्चादर्थिना पूर्वं मया विस्मृत इति निवेद्यमानो न ग्राह्यो न ापयितव्यो नृपेण । एतच्च न केवलं वाचानिक । एक शे प्रत्यर्थिनो मिथ्यावा- ित्वनिश्चया केशान्तरेऽपि मिथ्यावादित्वसम्भवात् । अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेक शान्तरेऽपि सत्यवा ित्वसम्भवात् । एवं तकापरनामसम्भावन -

प्रत्यया गृहीतादस्मादेव योगीश्वरवचनात्सर्वं दाप-नीयं नृपेणेति निर्णयः। एवं च तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारद-र्शिनां न दोषः।

तथा च गौतमे, न्यायाधिगमे तर्कोऽभ्युपायस्ते-नाभ्युह्य यथास्थानं गमयेदित्युक्ता तस्माद्राजाचा-र्यावनिन्द्यावित्युपसंहरति। न चैकदेशविभावितोऽनु-पादेयवचनः प्रत्यर्थीत्येतावदिह गम्यते। एकदेशवि-भावितो नृपेण सर्वं दाप्य इति वचनात्।

यत्तु कात्यायनेनोक्तम्,

अनेकार्थाभियोगेऽपि यावत्संसाधयेद्धनी।

साक्षिभिस्तावदेवासौ लभते साधितं धनम्॥

इति, तत्पुत्रादिदेयपित्राद्यृणविषयम्। तत्र हि बहूनर्थानभियुक्तः पुत्रादिर्न जानामीति प्रतिवदन्नि-ह्नववादी न भवतीत्येकदेशविभावितोऽपि न क्वचि-दसत्यवादीति "निह्नुते लिखितं नैकम्" इति शास्त्रं तत्र न प्रवर्तते। निह्नवाभावादपेक्षिततर्काभावाच्च। अनेकार्थाभियोगेऽपीति कात्यायनवचनं सामान्यावि-षयं विशेषशास्त्रस्य विषयं मिथ्योत्तरं परित्यज्या-ज्ञानोत्तरे प्रवर्तते। ननु,

ऋणादिषु विवादेषु स्थिरप्रायेषु निश्चितम्।

ऊने वाप्यधिके वार्थे प्रोक्ते साध्यं न सिध्यति॥

इति वदता कात्यायनेनानेकार्थाभियोगे साक्षि-भिरेकदेशे भाविते अधिके वा भाविते साध्यं सकलं न सिध्यतीत्युक्तम्। तथासत्येकदेशे भाविते अभावि-

तक ेशासिद्धिः तस्या । उच्यते । लिखितसर्वार्थ-साधनतयोपन्यस्तैः साक्षिभिरेक शाभिधानेऽधिका-भिधाने वा कृत्स्नमेव साध्यं न सिध्यतीति तस्या-र्थः । तत्रापि निश्चितं न सिध्यतीति वचनात् अवत्सं-शय एवेति प्रमाणान्तरस्यावसरोऽस्त्येव । छलं निर-स्येति नियमात् । साहसादौ तु सकलसाध्यसाधनत-योद्दिष्टः साक्षिभिरेकदेशेऽपि साधिते कृत्स्नसाध्य-सिद्धिर्भवत्येव । तावतैव सा साहसादेः सिद्धत्वात् । का-त्यायनवचनाच्च ।

साध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्ये यत्साध्यं परिकीर्तितम् ॥इति॥२०॥

बा० १ । तावन्मात्रस्योदाहरणत्वात् पादत्रयस्यैकं सशेषमर्थमाह *नैकमिति । नशब्देन समासः । अत एवाह *अनेकमिति । लिखितमित्यस्य व्याख्या अभियुक्तमिति । प्रतिज्ञाकाले ऽर्थिना ऽभियोगत्वेनाभिहितमित्यर्थः । निह्नुते इत्यत्र कर्मत्वेनान्वयोऽस्य । अग्रे सर्वपदोक्तेः सामान्येनोक्तेश्च स्वारस्यादाह *सर्वमेवेति । एकदेशेति सुप्सुपेति सप्तमीसमास इत्याह *एकदेशे इति । पूर्वोक्तांशैकदेशविषये इत्यर्थः । सुवर्णस्याङ्गीकृतत्वादाह *रजताद्यर्थमिति । अनतिप्रसङ्गायाह *पूर्वेति । तुर्यपादार्थं सप्रतीकमाह *न ग्राह्य इति । निष्ठालब्धपूर्वमित्यस्यार्थो *भाषेति । तच्छ्रवणस्य दुष्परिहरत्वादाह *न दापयितव्य इति । एवम् अंशद्वयेन प्रतिज्ञाकालेऽभिहित एवार्थो व्यवहारतः प्राप्य इत्यन्वयो ऽनभिहितो न प्राप्य इति व्यतिरेकश्च दर्शितौ यतोऽतोऽन्वयव्यतिरेकाभ्यां भूतमप्यनुपन्यस्तं हीयते इत्येतत् दृढीकृतमिति तदुदाहरणत्वमस्येत्यर्थः ।

२। विप्रषमा *एतच्चेति। किं तु प्रकारान्तरमपीति भावः॥ पर्यवासितमाह *एवमिति। उक्तप्रकारेणेत्यर्थः। *तर्कापरेति। प्रत्ययो ज्ञानम्। तर्कज्ञानस्य नामान्तरं सम्भावनेति। एवं च तर्कापरनामिका या सम्भावना सैव यः प्रत्ययो ज्ञानं तत्सहकृतात् निह्नुते इति योगीश्वरवचनादित्यर्थः। एतदुक्तिफलमाह *एवं चेति। अस्य तदनुगृहीतत्वे चेत्यर्थः। *तर्केति। तयोरनुसारेणेत्यर्थः।

२। अत्र मानमाह *तथा चेति। उपसंहरतीत्यत्रान्वयः। *न्यायाधीति। न्यायज्ञाने तर्क उपायस्तेन तर्केण न्यायम् अभ्युह्य निश्चित्य। ऊहते रूपम्। उपसर्गाद् ह्रस्व ऊहतेः इति ह्रस्वः। यस्मिन्विषये न्यायो योजनीयस्तत्स्थानं गमयेदित्यर्थः। यद्वा यथास्थानं न्यूनातिरेकरहितं यथा तथा गमयेदित्यर्थः। एवं सति तर्केणैव सिद्धे मूलवचनवैयर्थ्यं परिहर्तुं शङ्कते *न चैकेति। यथा भाषासमयेऽनिवेद्य पश्चादभिधीयमानोऽर्थो नादर्तव्यस्तथा एकदेशविभावितः सन्नपि प्रत्यर्थी नादर्त्तव्य इति। तावताऽपि न दाप्य इत्येव पादत्रयार्थोऽस्तु किमिति सर्वं दाप्य इत्यर्थ इति भावः। *एकदेशेति। यत्र वचनं नास्ति तत्र तद्दृष्टान्तमूलस्तथैव तर्कः स्यादत्र तु वचनसत्त्वतथा तर्कासम्भवेन एवमेव तर्कसम्भवेन तदर्थतया वचनं सफलम् इति भावः।

४। एवं निश्चितेऽर्थे प्रसक्ताविरोधं परिहरति *यश्चेति। *योगेऽपीति। तेषां मध्ये इति शेषः। साक्षिभिरित्यस्य मध्यमणिन्यायेनान्वयः, सम्भवात्। उपलक्षणं चैतल्लेख्यस्यापि। एवेनान्ययोगव्यवच्छेदः। असौ धनी। *पित्रेति। तत्कृतेत्यर्थः। अत्र हेतुमाह *तत्र हीति। *न भवतीति। ऋणस्यान्यकृतत्वे-

न...तत्र सम्भवेनापलापाभावादिति भावः।इतिः हेतौ। क्वचित् क्वापि। अ...नसम्भवात्। तदेवाह *निह्नवेति । अत एव संशयाभावादाह *अपेक्षितेति। *कात्यायन वचनं तु। इदं कर्तृ। सामान्यविषय...क्तकात्यायनवचनं तु विशेषशा...स्य निह्नुते इत्यस्य विषयं निह्नवोत्तरं, ज्ञात्वाऽपलापो निह्नवस्तद्रूप...त्तरं, परिहृत्य परित्यज्या...नोत्तरे ज्ञानाभावेनोत्तरे प्रवर्त्तते इत्यर्थः। तथाच सामान्यविशेषशा...योरनयोरुत्सर्गापवादव्यवस्थेति भावः।

५। विरोधान्तरं परिहरति *नन्विति। *ऋणादि... ऋणादानादिषु। *स्थिरेति। लिङ्गदर्शनमात्रेणादृढहे...नाऽपि स्त्रीसंग्रहणादिरूपसाध्यस्य सिद्धिर्भवतीति तादृशानामस्थिरत्व..., ऋण...दानादि...य साध्यस्य तु दृढसाधनेनैव सिद्धेस्तेषां स्थिरत्वं, तदपि नाकाशादिवादिति स्थिरप्रायत्वमित्यर्थः। निश्चितामिति क्रियाविशेषणम्। *अभियोगे, सतीति शेषः। *साक्षीति। तेषां मध्ये इत्यादिः। *एकेति। ऊने इत्यर्थः। प्रोक्ते इत्यस्यार्थो भाविते इति। *अधिके इति। उक्तसर्वापेक्षयेत्यादिः। सामान्योक्तं साध्यमित्यस्य साध्यत्वावच्छिन्नमित्यर्थः। तत्फलितम्। *सर्वमेवेति। *तथा सति, सर्वसाध्यासिद्धत्वे सति। *सिद्धिः, मूलतात्पर्यविषयभूता।*अभावितैकदेशेति।एकदेशान्तरेत्यर्थः। *लिखितेति। सुवर्णादित्रयं गृहीतमित्यभियोगे कृते न मया गृहीतं मिथ्यैतदिति निह्नवे कृते सर्ववस्तुग्रहणसाधनतया कथितैः साक्षिभिः सुवर्णाद्यन्यतमग्रहणे सुवर्णादि धान्यं च गृहीतमित्यधिकवस्तुग्रहणे वा निर्दिष्टे सर्वमपि साध्यं न सिध्यतीत्येतत्परं कात्यायनवचनम्। निह्नुते इति वचनं तु उक्तरीत्या ऽभियोगे निह्नवे च कृते सुवर्णग्रहणसाक्षिणः सन्तीत्युक्ते तैस्तावन्मात्रेऽपि साक्षिभिः साधिते प्रत्यर्थी सर्वं दाप्यः पूर्वोक्तमित्येतत्परमिति

न विरोधो मिथ इति भावः। *तस्य, कात्यायनवचनस्य। नन्वेवं तादृशे किं व्यवहारो नैव, अत आह *तत्रापीति। तदुक्तस्थले-ऽपीत्यर्थः। *नियमादिति। आरब्धस्यान्तगमनमिति न्यायेन प्राप्तस्य तस्य विधानेन नियामकत्वं तस्येति भावः। स्थिरप्राये-ष्वित्यस्य मत्युदाहरणमाह *साहसादौत्विति। उद्दिष्टैः कथितैः। उपदिष्टैरिति पाठान्तरम्। एवं साधिते ऋष्यन्तरसंवादमप्याह *कात्यायनेति। तदेव वचनमाह *साध्यार्थांशेऽपीति। स्त्रीसंग्र-हादिके विवादपदत्रये भाषावादिना यदेकार्थरूपं साध्यत्वेन कथितं तत् तदनेकसाध्यसाधनतयाऽभिहितैस्साक्षिभिः साध्या-र्थजातस्यैकदेशेऽपि साधिते सकलं भवेत् सिध्येदित्यर्थः। तथा चोक्तव्यवस्था निर्व्यूढेति सिद्धम्॥ २०॥

मि० ननु निह्नुते लिखितं नैकमितीयं स्मृतिः त-थाऽनेकार्थाभियोगेपीतीयमपि स्मृतिरेव। तत्रानयोः स्मृत्योः परस्परविरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति विषयव्यवस्था किमित्याश्रीयते इ-त्यत आह।

या० स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः।

मि० यत्र स्मृत्योः परस्परतो विरोधस्तत्र विरोध-परिहाराय विषयव्यवस्थापनादावुत्सर्गापवादादिल-क्षणो न्यायो बलवान्समर्थः। स च न्यायः कुतः प्रत्येतव्य इत्यत आह। व्यवहारत इति। व्यवहारा-द् वृद्धव्यवहारात् अन्वयव्यतिरेकलक्षणादवगम्य-ते। अतश्च प्रकृतोदाहरणेऽपि विषयव्यवस्थैव युक्ता। एवमन्यत्रापि विषयव्यवस्थाविकल्पादि यथासम्भवं योज्यम्॥

मि० एवं सर्वत्र प्रसक्तेऽपवा. माह ।

या० अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥२१॥

मि० धर्मशास्त्रा...सारेणेत्यनेनैवौशनसाद्यर्थशास्त्रस्य निरस्तत्वा... धर्मशा...न्तर्गतमेव ...जनीतिलक्षणमर्थशास्त्रमि... विवक्षितम् । अर्थशा...धर्मशास्त्रस्मृत्योर्विरोधे अर्थ... बलवादिति स्थितिर्मर्या... । यद्यपि समानक...कतया अर्थशास्त्रधर्मशास्त्रयोः स्व...पगतो वि...षो नास्ति तथापि प्रमेय...य धर्मस्य प्राधान्या...र्थस्य चाप्राधान्या...मशास्त्रं बलवदित्याभिप्रायः । धर्मस्य प्राधान्यं शास्त्रा... दर्शितम् । तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशा...स्य बाध एव, न ... था, नापि विकल्पः । किमत्रोदाहरणम् । न तावत्— (मनु.अ.८।श्लो.३५०।३५१)

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आतता...नमायान्तं ...न्यादेवाविचारयन् ॥
न...येवधे दोषो हन्तुर्भवति कश्चन ।
प्रच्छन्नं वा प्रकाशं वा मन्...स्तं म...मृच्छति ॥

तथा—

अ...यिनमायान्तमपि वेदान्तगं रणे ।
जिघां...न्तं जिघां...याञ्च तेन ब्रह्महा भवेत्

इत्याद्यर्थशास्त्र...,

इयं वि...द्धि...दिता प्रमाप्याकामतो द्विजम् ।
क...मतो ब्रा...णवधे निष्...निर्न विधीयते ॥

इत्यादि धर्मशास्त्र...,(म.स्मृ.११।८९)तयोर्विरोधे धर्म-

शास्त्रं बलवदिति युक्तम्। अनयोरकविषयत्वा सम्भवे-न विरोधाभावाच्च बलाबलाधेन्ताऽवत ति। तथाहि। शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।(मनु.८।३४८)

इत्युपक्रम्य—

आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति (मनु.८।३४९)

इत्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणाद्यभिरक्षणार्थं च शस्त्रेण घ्नन् न दण्डभागित्युक्त्वा तस्यार्थवादार्थमिदमुच्यते, गुरुं वा बालवृद्धौ वेत्यादि। गुर्वादीनपि स्यन्तावध्यानप्याततायिनो हन्यात्किमुतान्यानेति। वाशब्दश्रवणाद् अपि वेदान्तगमित्यत्रापिशब्दश्रवणाच्च गुर्वादीनां वध्यत्वप्रतीतिः। नाततायिवधे दोषोऽन्यत्र गोब्राह्मणादिति सुमन्तुवचनाच्च।

आचार्यं च प्रवक्तारं मातरं पितरं गुरुम्।
न हिंस्याद् ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः॥

इति मनुवचनाच्च। (मनु.४।१६२) आचार्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनं नाथवत्तान्यथा। हिंसामात्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात्।

न ततायिवधे दोषो हन्तुर्भवति कश्चन।

इत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव।

यतः—

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः॥

तथा—

उद्यता। निविषाग्निदश्च शापोद्यतकरस्तथा।
आथर्वणेन हन्ता च पिशुनश्चापि राजनि॥
भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः।
एवमाद्यान्विजानीयात्सर्वानेवाततायिनः॥

इति सामान्यनाततायिनो दर्शिताः। अतश्च ब्राह्मणादयः आततायिनश्च आत्मादिरक्षार्थं हिंसानभिसन्धिना निवार्यमाणाः प्रमादाद्यदि विपद्येरन् तत्र लघुप्रायश्चित्तं राजदण्डाभावश्चेति निश्चयः। तस्मादन्यदिहोदाहरणं वक्तव्यम्।

तदुच्यते। (या० स्मृ० १। ३५२)

हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः।
अतो यतेत तत्प्राप्तावित्यर्थशास्त्रं,
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः। (या० २।१)

इति धर्मशास्त्रं, तयोः क्वचिद्विषये विरोधो भवति। यथा। चतुष्पाद्व्यवहारे वर्तमाने एकस्य जयेऽवधार्यमाणे मित्रलब्धिर्भवति न धर्मशास्त्रमनुसृतं भवति। अन्यस्य जयेऽवधार्यमाणे धर्मशास्त्रमनुसृतं भवति मित्रलब्धिर्विपरीता। तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत्। अत एव "धर्मार्थसन्निपाते अर्थग्राहिण एतदेव" इति प्रायश्चित्तस्य च गुरुत्वं दर्शितमापस्तम्बेन। एतदेवेति तत्रत्याद्यर्थकं प्रायश्चित्तं परामृश्यते॥२१॥

बा० १। वक्ष्यमाणश्लोकस्य तदाक्षेपनिवारकत्वमिति तामाहोपपत्ति *नन्विति। *तत्र, तथा सति। *अप्रामाण्यं, तदेव। एवव्यवच्छेद्यमेवाह *विषयेति। परस्परतः परस्परम्। *परीति। अविरोधे सम्भवति विरोधो न न्याय्य इति भावः। आदिना वि-

...। अत एव अग्निमादिना तुल्यार्थोऽस्त्विति न्यायस्य ...विषयानिर्विषयत्वानिर्विषयं बल...। इत्यस्य च परिग्रहः। *उत्स-र्गेति। सामान्यस्य विशेषो बाधक इत्येवं सामान्यापवादलक्षणो न्याय ...न्त्रान्तरे प्रसिद्ध इत्यर्थः। पञ्चम्यन्तात्सार्वविभक्तिक-स्तसिरित्या... *व्यवहारा...िति। प्र...तव्यव...ार...प्रमानिरासाय तद्रूपमाह *वृद्धेति। तत्स्वरूपमा... *अन्वयेति। एतौ च साक-ल्यास...ल्याम्या...पर्यायौ। समाधितात्पर्यार्थमाह *अतश्चेति। ...वनाप्रामाण्यव्यवच्छेदः। नेदं प्र...तमात्रविषयमपि तु सार्वत्रिकमि-त्याह *एवमिति। *विकल्पादीति। आदिना प्रबलप्रमाणवि...धे-ऽथवाद...श्रित्य ...योचितन्यायानुसारेण योज्यमिति परिगृह्यते।

२। *एवम्, उक्तप्रकारस्य। *धर्मशास्त्रेति। एकविषययोर्वि...-र्थयोर्हि स्मृत्योर्मिथो विरोधो न तु भिन्नविषययोर...वरु...र्थयो-र्वा। सति च विरोधे ...भावचिन्ता। एवं च पूर्वमेव धर्मशास्त्रानुसारेणैव व्यवहारद... विहितत्वाद...-तिशास्त्रस्य न व्यव...ारविषये प्रवृत्तिः। अत ...कविषयत्वाभावादर्थ-शास्त्रधर्मशास्त्रयोः सुतरां विरोधाभावादनयोः प्रबलदुर्बलभाव-चिन्तनमेव तावद...क्तमिति शङ्काशयः। नात्रौशनसार्थशा...धर्म-शा...योस्ताच्चिन्ता, अपि तु धर्मशास्त्रान्तर्गतयोरेव तयोस्तच्चिन्तेति ...कविषयतया विरोधसम्भवात्तच्चिन्तनं युक्तमित्युत्तराशयः। अर्थपदार्थमाह *अर्थेति। अत एवाह *...त्योरिति। ...स्थितीति-त्यस्य व्याख्या मर्यादेति। *यद्यपीति। ...शार्थशास्त्रधर्मशा...यो-र्मन्वादि...भत्वेन वचनस्वरूपगतविशेषाभावादनयो-रपि न ता...न्तनं युक्तमिति भावः। *प्रमेयस्येति। न तद्विशेषा-च्चिन्ता, अपि तु धर्मशा...प्रमेयस्य षड्विधस्यापि धर्मस्य मु-ख्यतया प्रधानत्वादर्थशास्त्रप्रमेयस्यार्थस्य नीतिलक्षणस्या...-

ध्यतयोपसर्जनत्वात्प्रमेयगतविशेषासम्भवात्तच्चिन्ता युक्तैवेति भावः। हेत्वसिद्धिं परि रति *धर्मस्य चेति। *आचार्याणां, आचाराध्यापकयोः । वचनार्थमुपसंहरति *तस्मादिति ।

३ । उदाहरणाभावप्रयुक्तं तच्चिन्तनवैफल्यं परिहर्तुं शङ्कते *किमत्रोदाहरणमिति । अन्योक्तमुदाहरणमनूद्य दूषयति *न तावदित्यादि क्तमित्यन्तेन । अत्र, इति न तावदादौ उदाहरणं युक्तमिति व्यवहितेनान्वयः । अदोषत्वे हेतुमाह *प्रच्छन्नमिति । यतो मन्युरेव प्रकाशमप्रकाशं वा तं मन्युं निस्तीत्यर्थः । तथा च मन्योरेव कर्तृत्वादिना हन्तृत्वादिरिति न दोष इति भावः । अत एव मन्युरकार्षीदिति श्रुतिः सङ्गच्छते । मनुमुक्त्वा स्मृत्यन्तरमाह *तथेति । वेदान्तगमपीत्यर्थः। अपि वेदान्तपारगमिति पाठान्तरम् । *तेन, तादृशब्राह्मणवधेन । मनुमेवाह *इयमिति। अकामतो द्विजं हिंसित्वा स्थितस्येयं पूर्वतना विशुद्धिः कथितेत्यर्थः । तत्र अनुदाहरणत्वे हेतुमाह *अनयोरिति । यत इत्यादिः । गुरुं वेत्यादेरर्थवादत्वेन स्वार्थे प्रामाण्याभावादेकविषयत्वाभावेन विरोधाभावात्तच्चिन्ताया असम्भवेन नोदाहरणत्वमित्यर्थः ।

४ । तदेवाह *तथाहीत्यादि । *शस्त्रमिति । मनूक्तिरेवेयम् । इत्युक्तमिति पाठे इतः पूर्वमिति शेषः । इत्युक्तेति पाठे तु न शेषोपयोगः । *उपक्रम्येति ।

द्विजातीनां च वर्णानां विप्लवे कालकारिते । (मनु.८।३४८)

इति मध्ये उक्तम् । *इति, इत्यनेन । अस्य व्याख्यानम् *आत्मरक्षणे इति । व वचनादाद्यर्थलाभ इत्याह *दक्षिणानामिति । अत एव सामान्येनार्थमा *यज्ञोपेति । परित्राणे इत्यस्य व्याख्यायेतान्व इत्याह *रक्षणे इति । सङ्करे

इत्यस्यार्थमाह *गुद्धेचेति । तस्याग्रे ऽन्वयो ऽनेन सूचितः । एवं प्रागपि । नीविमित्याद्यर्थमाह *नीति । धर्मेणेत्यस्यार्थः *अकूटेति । न दुष्यतीत्यस्य न पापाभावपरत्वमित्याह *न दण्डेति । *इतीति । इत्यर्थकमुक्तेत्यर्थः । इममर्थमेवाह *गुरुमिति । तस्यार्थवादत्वमेवाह *गुर्वादीनिति । तथा च कैमुतिकन्यायेन गुर्वादिभिन्नानामीदृशस्थले हननं प्रशस्तमिति स्तूयते । अतः तात्पर्येनार्थवादत्वमिति भावः । नन्वेतत् गुर्वादिहननविधायकमेवास्तु तदसम्भवे एव तत्त्वाङ्गीकारात् अत एवाह *वाशब्देति । ग्रन्थान्तरेऽप्येवमित्याह *अपि वेदान्तगमिति । अयं भावः । यथा लोके ऽत्र पिशाचो ऽस्तीत्युक्ते पिशाचो वा भवतु राक्षसो वा भवतु भूतमपि भवतु प्रेतोऽपि भवत्विति उत्तरे प्रौढिप्रतिपादने तात्पर्यं तथा ऽत्रापि वाशब्दापिशब्दयोः प्रौढिप्रकर्षे तात्पर्यमिति तद्विशिष्टवाक्यजातस्य गुर्वादिहनने न तात्पर्यम् । तथा वेदेऽपि "वायुर्वै क्षेपिष्ठा देवता" इति "प्रातितिष्ठन्ति ह वा यएताः" "तस्मादपि वध्यं प्रपन्नं न" इत्यादौ वैशब्दहशब्दापिशब्दादीनां विधिशक्तिप्रतिबन्धकत्वस्य दर्शनात्प्रकृतेऽपि वापिशब्दाभ्यां तद्विधिशक्तेः प्रतिबद्धत्वान्न गुर्वादिहननविधिः । वस्तुतस्तु अपि वेदान्तगमित्यादौ सम्भावनाविषयतया क्रियागतमौचित्यमपिद्योत्यम् । सम्भावितौचित्यस्य चानुष्ठानमयुक्तमिति स्वार्थे तात्पर्याभावः । स्पष्टं चेदं मञ्जूषायामिति बोध्यम् । अतश्च गुर्वादिविषये एकत्र गुरुं वेत्यादिवचनजातेन हननविधेस्तन्निमित्तप्रायश्चित्तविधेरियं विशुद्धिरित्यनेनाप्राप्तत्वादनयोरेकविषयत्वाभावान्मिथो विरोधाभावात्कथं तदुदाहरणत्वमिति ।

५ । वचनसिद्धोऽप्ययमर्थ इत्याह *नाततायीति आचार्य

चेति च । आभ्यां हि ब्राह्मणाचार्यादिभिन्नानामेवाततायिनां वधे दोषाभावप्रतिपादनादाततायिनामपि गुर्वादीनां न वध्यत्वमिति भावः । ननु आचार्यं चेति मनुवाक्ये आचार्याद्युपादानं प्रदर्शनमात्रतात्पर्यकं । तथा च हिंसामात्रनिषेधे तात्पर्यादस्य वचनस्य नाततायिनामाचार्यादीनां विधिनिषेधपरत्वं येन गुरुमित्यस्यैतद्वचनविरोधः स्यादत आह *आचार्यादीनामिति । *हिंसेति । विशेषेण हिंसानिषेधेनेत्यर्थः । अन्यथा तेषामुपादानमफलमेव स्यादिति भावः । *इदम्, आचार्यं चेत्येतत् । *हिंसेति । हिंसामात्रनिषेधस्येत्यर्थः । तत्सामान्यनिषेधस्येति यावत् । *सामान्येति । न हिंस्यादित्यादिवचनेनैवेत्यर्थः । तथा च तत्सामान्यनिषेधस्य सामान्यवचनेनैव सिद्धत्वादस्मिन्वचने आचार्याद्युक्तेः स्वार्थाविवक्षाकारणाभावाद्धिंसाविशेषनिषेधेनैवैतद्वचनं सफलम् । सामान्यनिषेधपरत्वे तु वचनान्तरेणैव तन्निषेधस्य प्राप्तत्वात्पुनरुक्तेर्निष्फलत्वं स्यात् इति भावः ।

६ । नन्वेवमाचार्यं चेत्यनेनाततायिनामप्याचार्यादीनां हिंसानिषेधप्रतिपादनान्नाततायिवधे दोष इत्यनेन तु आततायिहिंसाया दोषाभावप्रतिपादनेन तेषां वध्यत्वप्रतीतेरनयोर्वचनयोर्मिथो विरोधापत्तिरेवात आह *नाततायीति । तथा च भिन्नविषयत्वेनाविरोध इति भावः । तदन्यविषयत्वमेव द्रढयन् तत्र हेतुमाह *यत इति । सामान्येनाततायिनो दर्शिता इत्यत्रान्वयः।

७। मात्स्ये तु अधिका अपि आततायिन उक्ताः,

गुरुं वा तापसं वाऽपि ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥
नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति ॥

गृहक्षेत्राभि... न्तारस्तथा पत्न्यभिगामिनः ।
अग्निदो गरदश्चैव तथैवाभ्युद्यता... धः ॥
अभिचाराणि कुर्वाणो राजगामि च पैशुनम् ।
एते हि कथिता लोके ...आततायिनः ॥ इति ।

...त्यन्तरमाह *तथेति । असिविषाग्नीनां द्वन्द्वं ...त्वोद्यतशब्देन बहुव्रीहिः । शापोद्यतेत्यत्र बहुव्रीहिद्वयम् । आद्ये आहिताग्न्यादित्वात्परनिपातः । *आथर्वणेन, तद्वेदप्रतिपादिताभिचारिककर्मणा । पिशुनः सूचकः । *दर्शिता इति । अत्र सामान्येनैवाततायिनां ...नाप्याततायीति सामान्यपदे...आततायीत्यादि ...म् आचार्यं चेत्यादि ...विषयं ब्राह्मणादिकं परि...त्यान्यत्र प्रवर्तते इति भावः ।

८ । ननु एवं सिद्धे आततायिनां ब्राह्मणादि...ध्यत्वे सति प्रमादाद्यदि तेषां हननं स्यात्तदा तस्य प्रामादिकत्वात् किं हन्तुर्दोषाभाव एवेति चेत्, नेत्याह *अतश्चेति । *यदि विपद्येरन्, मृत्युं प्राप्नुयुः । *तस्मात्, तदुदाहरणासम्भवात् ।

९ । स्वाभिमत...दाहरणमाह *तदुच्यते इति । *हिरण्येति । अभ्यर्हितत्वात्...र्वनिपातः । प्रागुक्तमौलमाह *धर्मशास्त्रेति । *च...ष्यादिति । तस्य तत्त्वं च प्रागेव प्रतिपादितम् । *विपरीतेति । न भवतीत्यर्थः । अत्र मानमाह *अत एवेति । यतो धर्मशास्त्रं ...लमस्मादेव हेतोरित्यर्थः । दर्शितमित्यत्रान्वयः । *धर्मेति । धर्मार्थयोः सन्निपाते एकत्र तच्छास्त्रयोः प्रसङ्गेऽर्थशास्त्रप्रा...णि इत्यर्थः । अन्यथा तदसङ्गतिः स्पष्टैवेति भावः । गुरुत्वमेव दर्शयति *एतदिति । *इति, इत्यनेन । पूर्वं तस्यैव प्रक्रान्तत्वादिति भावः ॥ २१ ॥

मि० ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्—

इत्युक्तं, किं तत्साधनमित्यपेक्षित आह।

या० प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्।
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ २२ ॥

मि० प्रमीयते परिच्छिद्यतेनेऽनेति प्रमाणम्। तच्च द्विविधं मानुषं दैविकं चेति। तत्र मानवं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति। कीर्तितं, महर्षिभिः। तत्र लिखितं द्विविधं, शासनं चीरकं चेति। शासनमुक्तलक्षणम्। चीरकं तु वक्ष्यमाणलक्षणम्। भुक्तिरुपभोगः। साक्षिणो वक्ष्यमाणस्वरूपप्रकाराः। ननु लिखितस्य साक्षिणां च शब्दाभिव्यक्तिद्वारेण शब्देऽन्तर्भावाद्युक्तं प्रामाण्यम्। भुक्तेस्तु कथं प्रामाण्यम्। उच्यते। भुक्तिरपि कैश्चिद्विशेषणैर्युक्ता स्वत्वहेतुं क्रयादिकमव्यभिचारादनुमापयन्ती अनुपपद्यमाना वा कल्पयन्ती इत्यनुमानेऽर्थापत्तौ वाऽन्तर्भवतीति प्रमाणमेव। एषां लिखितादीनां त्रयाणामन्यतमस्याप्यभावे दिव्यानां वक्ष्यमाणस्वरूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते। मानुषाभावे एव दिव्यस्य प्रामाण्यमस्मादेव वचनादवगम्यते। दिव्यस्य स्वरूपप्रामाण्ययोरागमगम्यत्वात्। अतश्च यत्र परस्परविवादेन युगपद्धर्माधिकरणं प्राप्तयोः एको मानुषीं क्रियाम् अपरस्तु दैवीमवलम्बते तत्र मानुष्येव ग्राह्या।

तथा च कात्यायनः,

यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम्।
मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः॥ इति।

यत्रापि प्रधानैकदेशसाधनं मानुषं सम्भवति तत्रापि न दैवमाश्रयणीयम्। यथा रूपकशतमनया वृद्ध्या गृहीत्वाऽयं न प्रयच्छतीत्याभियोगापह्नवे ग्रहणे साक्षिणः सन्ति नो संख्यायां वृद्धिविशेषे वा अतो दिव्येन भावयामीत्युक्ते। तत्रैकदेशविभावितन्यायेनापि संख्यावृद्धिविशेषसिद्धेर्न दिव्यस्यावकाशः।

उक्तं च कात्यायनेन,

यद्येकदेशव्याप्ताऽपि क्रिया विद्येत मानुषी।
सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम्॥ इति।

यत्तु,

गूढसाहसिकानां च प्राप्तं दिव्यैः परीक्षणम्। इति,

तदपि मानुषासम्भवे एवेति नियमार्थम्।

यदपि नारदेनोक्तम् (अ० २। ३०)

अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे।
न्यासापह्नवने चैव दिव्या सम्भवति क्रिया॥ इति,

तदपि मानुषासम्भवे एव। तस्मान्मानुषाभावे एव दिव्येन निर्णय इत्यौत्सर्गिकम्। अस्य चापवादो दृश्यते,

प्रकान्ते साहसे वादे पारुष्ये दण्डवाचिके।
बलोद्भूतेषु कार्येषु साक्षिणो दिव्यमेव च॥ इति।

तथा लेख्यादीनामपि क्वचिन्नियमो दृश्यते। यथा,

पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता।
तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः॥

तथा,

क्षारभागक्रियाभागजलवा ादि क्रिया ।

 क्रिरेव तु गुर्वी स्यान्न दिव्यं न च सा णः ॥

तथा—

दत्तादत्ते भृत्यानां वामिना निर्णये सति ।

विक्रय ानसम्बन्धे क्रीत्वा धनमानिच्छ ति ॥

द्यूते समा य चैव विवादे समुपस्थिते ।

साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यक ॥इति॥२२॥

बा० १ । अव्यवहितेन सङ्गत्यभावाद् व्यवहितेन सङ्गतिमा *ततोऽर्थीति। अपेक्षितः आकाङ्क्षितः । प्रमितिव्यवच्छेद सा-धनपरत्वाय चाह *प्रमीयते इति । साक्षात्प्रमाजनकत्वा गवा-त् दाप्यः सर्वमिति विषये वस्तुनो ऽन्यथात्वे परम्परयाऽपि तदभावादाह *परीति । भ्रमप्रमासाधारणनिश्चयः परिच्छेदः । कीर्त्तितमित्यत्र शेषमाह *महर्षिभिरिति । पूर्वोत्तरतदुत्तरानुरोधे-नात्रानुक्तमप्याह *तत्रेति । तेषां त्रयाणां मध्ये इत्यर्थः । *उ-क्तेति । पूर्वाध्यायान्ते ।

दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यं तु कारयेत् । (या० स्मृ० १ । ३१८)

इत्यादिना इति भावः । *वक्ष्यमाणेति । अत्रैवाध्याये ले-ख्यप्रकरणे यः कश्चिदित्यादिना इति भावः । भोजनस्य साधनस्य च व्यवच्छेदायाह *उपभोग इति । *वक्ष्यमाणस्व-रूपेति । स्वरूपं च प्रकारश्च तौ वक्ष्यमाणौ स्वरूपप्रका । ये येषामित्यर्थः । तत्र प्रकारो भेदः, दृष्टसाक्षिणः श्रुतसाक्षिणः इत्येवमादिः ।

२ । ननु प्रत्यक्षाद्यष्टप्रमाणान्तर्गतमेव प्रमाणं नान्यदिति

द्वयोः कथं चित् तत्त्वसंभवेऽपि भुक्तेर्न तदन्तर्भाव इति कथं तत्त्वमित्याशयेनाह *नन्विति । लिप्यादिना शब्दः स च नित्य त्याशयेनाह *शब्दाभिव्यक्तीति। लिपेः स्फाटव्यञ्जकत्ववत्सा- क्षिणां ध्वनेश्चरा तदभिव्यञ्जकत्वात्स्वरूपतस्तेषामतत्त्वेऽपि तत्त्वात्तत्त्वमिति भावः । तस्या अपि तदन्तर्भावमाह *भुक्ति- रिति । प्रमाणमेवेत्यन्वयः । *कैश्चिदिति । आसेधरहितत्वादि- विशेषणैरित्यर्थः । *अव्यभिचारादिति । अनेनानुमितिसामग्री उक्ता । यथासंख्यमत्रान्वयः । *कल्पयन्तीति । अत्रान्तम तिक- म् । क्षत्रादिकम् अस्य क्रयादिप्राप्तम् आसेधरहितत्वे सति चि- रकालोपभुक्तत्वात् तदीयगृहादिवत् इत्यनुमानप्रयोगः । तादृशी भुक्तिः स्वतोऽनुपपद्यमाना तादृशं तत् कल्पयतीत्यर्थापत्ति- ध्या । एवं क्रयादौ सिद्धे स्वामीरिक्थेत्यादिवचनोक्तानि- तकारकहेतुभिः स्वत्वं सिद्धं भवति ।

३ । उत्तरार्थमाह *त्रयाणामिति । मध्ये इति शेषः । अप्य- र्थान्तर्भावेण समास इत्याह *अन्यतमस्याप्यभावे इति । अ- पिना भयादिसमुच्चयः । *वक्ष्येति । प्राग्वत् । तेषां तत्त्वं न ऐच्छिकं किं तु व्यवस्थितमित्याह *जातीति । प्रमाणमित्य- स्यानेनापि सम्बन्ध इत्याह *प्रमाणमिति । उक्तमित्यत्र महर्षि- भिरिति शेषः। मानुषप्रमाणाभावमात्रे दिव्यावसर इति यथाश्रुतं प्रतीयमानो न तदर्थः किं तु तदभावनिर्णये सत्येव तदवसर इतीत्याह *मानुषेति । अत्र गमकमिदमेवोपस्थितमाह *अस्मा- दिति । अन्यथा त्रयाणामन्यतमाभावे त्यस्यानर्थक्यं स्पष्टमेव । ग्राह्यमिति शेषः । केन प्रामाण्यमित्यनेन अवगम्यते इत्यनेन चास्यैवार्थस्याभिमतत्वात् ।

४ । ननु यथार्थतात्पर्यबोधकमेवेदं वचनमिति न व्यर्थमवस्त-

हेतुमाह *दिव्यस्येति । दृष्टे सत्यदृष्टाश्रयणस्यान्याय्यत्वात् । दिव्यस्य तयोः शा स्त्रगम्यत्वेनालौकिकत्वेनाद त्वात्तया अन-त्यानर्थक्यादिति भावः । एतत्फलमाह *अतश्चेति । स्पष्टोऽर्थः । क्रियामित्यस्याग्रे, अवलम्बते इत्यस्य पूर्वत्रानुषङ्गः ।

५। ननु यत्र सर्वसाध्यसाधकं क्रियाद्वयं तत्र भवतु मा-ष्येव ग्राह्येति, यत्र त्वेकदेशसाधनभूता मानुषी सर्वसाधनभूता दैवी तत्र का ग्राह्येत्यत आह *यत्रापीति । *न दैवमिति । उक्तहेतो-रेवेति भावः । उदाहरति *यथेति । *इत्यभियोगेति । इति यो-ऽभियोगस्तस्यापह्नवे परेण कृते सतीत्यर्थः । *ग्रहणे इति । मू-लभूतं द्रव्यं प्रधानं तस्यैकदेशो ग्रहणं संख्या वृद्धिश्च । अभिम-तवृ[illegible]करूपकशतग्रहणं प्रधानं वा । *इत्युक्ते, स्थलविशेषे । पूर्वा-न्वयीदम् । नन्वेवं कथं सर्वसाध्यसिद्धिरत आह *तत्रैकेति । तद-विषयत्वादाह *न्यायेनेति । तद्रीत्येत्यर्थः । अपिर्दिव्यसमुच्चये । *संख्येति । संख्यावृद्धिविशेषयोः सिद्धेरित्यर्थः । *व्याप्ता, त-न्मात्रसाधिका । सर्वसाधिका ग्राह्येति किमु [illegible]र्थः । *सा, सैव । अत एवाह *न त्विति । वदतां वादिनां मध्ये कस्य चित् इत्यर्थः । दैवी विवदतामिति पाठान्तरम् ।

६ । एवं स्थिते कात्यायनविरोधं परिहरति *यत्त्विति । *गूढेति । कर्मधारयान्मत्वर्थीयः । चस्त्वर्थे । तु इत्येव पाठान्तरम् । प्राप्तं योग्यम् । *मानुषासम्भवे एवेति । मानुषासम्भवकृत-नियमार्थमिति पाठान्तरम् । नियमश्च परीक्षणस्यादृष्टार्थः । प्राग्वदाह *यदपीति । *साहसे, तदाख्ये विवादे । मानुषासम्भ-वाय तस्य चत्वार्यधिकरणान्युक्तानि *अरण्ये इति । निमित्ता-न्तरमाह *न्यासेति । उपसंहरति *तस्मादिति ।

७। *अस्य, उक्तस्यौत्सर्गिकस्यार्थस्य । *प्रक्रान्ते इति । अस्य

तत्रान्वयः। अत्र साक्षिदिव्ययोर्विकल्पविधानात् लेख्यार्थानामेव विकल्पात्तदपवादत्वम्। कात्यायनोक्तिरियमपि। एवमग्रेऽपि त्रिषु।

८। प्रसङ्गात् मूलानुक्तमन्यदपि किञ्चित्सिद्धान्तभूतमाह *तथेति। आदिना भुक्तिसाक्षिणोः परिग्रहः। एवं च तत्राप्यै-च्छिकत्वं नेति भावः। तत्रादौ लेख्यस्याह *यथेति। पूगादे-रर्थः स्फुटीभविष्यति। स्थितिर्मर्यादा। *तस्याः, स्थितेः।

९। भुक्तेराह *तथेति। क्रियाशब्दस्य द्वन्द्वान्ते श्रूयमा-णस्य प्रत्येकं सम्बन्धः। क्रिया करणम्। आभोगः परीणाहः। तेन च परिणाहवदङ्गणादिकं लक्ष्यते। अर्शआद्यच्वा। जलवाहो जलनिर्गममार्गः। आदिना गेहादिप्रमार्जितरजःपुञ्जप्रक्षेपस्था-नादिपरिग्रहः। अत्र द्वन्द्वोत्तरपदकद्वन्द्वघटितबहुव्रीहिः।

१०। साक्षिणामाह *तथा दत्तेति। बहुवचनान्तयोर्द्वन्द्वः। दत्तादत्तं विद्यते येषु दत्ताप्रदानिकाख्यविवादपदे। दत्ते चेति दत्ते ऽथेति वा पाठान्तरम्। स्वामिभृत्यनिर्णयाख्ये तत्र। विक्रयेत्यनन्तरं विक्रीयासम्प्रदानाख्ये तत्र। धनं मूल्यं, दातु-मिति शेषः, तत्र यस्तत्सम्बन्धस्तत्रेत्यर्थः। द्यूते समाह्वयाख्ये च तत्र। *समुपस्थिते, प्राप्ते। एतानि च विवादपदान्यग्रे स्फुटीभ-भविष्यन्ति ॥ २२ ॥

मि० उभयत्र प्रमाणसद्भावे प्रमाणगतबलाबल-विवेके प्रसक्ते पूर्वापरयोः कार्ययोः कस्य बलीयस्त्व-मित्यत आह।

या० सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया।

मि० ऋणादिषु सर्वेष्वर्थविवादेषु उत्तरा, क्रिया

क्रियत इति क्रिया कार्यं, बलवती । उक्त कार्यं साधिते तद्वादी विजयी भवति । पूर्वकार्ये सिद्धेऽपि तद्वादी पराजीयते । तद्यथा । कश्चिद् प्रमाणेन धारणं साधयति कश्चित्प्रतिदानेनाधारणं तत्र प्रतिदाननयोः प्रमाणसिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी जयति । तथा, पूर्वं द्विकं शतं गृहीत्वा कालान्तरे त्रिकं शतमङ्गीकृतवान् । तत्रोभयत्र प्रमाणसद्भावेऽपि त्रिकशतग्रहणं बलवत् । पश्चाद्भावित्वात् पूर्वाबाधेनानुत्पत्तेः ।

उक्तं च,

पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति । इति ।

मि० अस्यापवादमाह ।

या० आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥ २३ ॥

मि० आध्यादिषु त्रिषु पूर्वमेव कार्यं बलवत् । तद्यथा । एकमेव क्षेत्रमेकस्याधिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति तत्र पूर्वस्यैव तद्भवति नोत्तरस्य । एवं प्रतिग्रहे क्रये च ।

नन्वाहितस्य तदानीमस्वत्वात्पुनराधानमेव न संभवति । एवं दत्तस्य क्रीतस्य च दानक्रयौ नोपपद्येते । तस्मादिदं वचनमनर्थकम् । उच्यते । अस्वत्वेऽपि मोहात्कश्चिल्लोभाद्वा पुनराध्यादिकं करोति तत्र पूर्वं बलवदिति न्यायमूलमेवेदं वचनमित्यचोद्यम् ॥ २३ ॥

बा० १ । *उभयत्रेति । वादिप्रतिवाद्युक्तयोः । *बलाबलेति।प्रागुक्ते इत्यर्थः । *कार्ययोः, साध्ययोः।करणरूपार्थनिरासाय। *क्रिय

ते इति । तात्पर्यार्थमाह *उत्तरेति । प्रमाणेने ते भावः । सिद्धे-ऽपीति । पूर्वप्रमाणेनेति भावः। अस्य लक्ष्यान्तरमाह *तथेति। द्वे वृद्धी यस्य तत् द्विकं, तदस्मिन्निति कन् । निष्कशतस्य प्रतिमासं निष्कद्वयं वृद्धिरित्येवं प्रथमं गृहीत्वा कालान्तरे तद्दातुमसमर्थस्य स्वकार्यवशात्तस्यैव निष्कशतस्य निष्कत्रयं वृद्धिरित्यङ्गीकारे त-देव परं बलवत् । विरोधेनोत्तरसंख्यायाः पूर्वसंख्याबाधकत्वेन पूर्वसंख्याया अप्रसरादित्यर्थः । ननु व्याकरणे सति विरोधे परस्य पूर्वबाधकत्वं विप्रतिषेधसूत्रमूलकं दृष्टम्, अणुदित्सूत्रे च भाष्ये उक्तं, गौणी मुख्या चोत्तरा संख्या पूर्वां संख्यां बाधते इति, तद्वदत्र किं मूलम् अतस्तन्न्यायेनैवोभयत्र बीजमाह *पश्चा-दिति । किं तु तद्बाधेनैव परस्योत्पत्तेरित्यर्थः ।

२ । *एकस्य, निकटे । एवमग्रेऽपि । प्रागुक्तहेतोरत्रासत्त्वमत्र हेतोः सत्त्वं च सूचयन्नाह *नन्वित्यादिना । पूर्वस्वत्वादेवाह *तदानीमिति।*न्यायेति, बहुव्रीहिः षष्ठीतत्पुरुषो वा। एकत्राहि-तादेरन्यत्राधानकरणादौ स्वत्वमेव नास्तीत्ययमेव न्यायः । तत्सिद्धार्थ एव स्वत्वायानूद्यते ऽनेन ।यद्वा तथा ऽर्थे बोधिते तद्बलात्तस्य पुनस्तत्र स्वत्वाभावादिति स न्यायो निष्पन्न इति । उभयथा ऽपि प्रकृतोक्तिर्निर्बाधैवेति भावः ॥ २३ ॥

मि० भुक्तेः कैश्चिद्विशेषणैर्युक्तायाः प्रामाण्यं दर्श-यिष्यन् कस्याश्चिद् भुक्तेः कार्यान्तरमाह ।

या० पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी ।
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ २४ ॥

मि० परेणासंबन्धेन भुज्यमानां भुवं धनं वा प-श्यतः, अब्रुवतः मदीयेयं भूः न त्वया भोक्तव्येति

अप्रति[illegible]घयतः, तस्या [illegible]मेविंशति[illegible]का अप्रति वं विंशतिव[illegible]पभो[illegible]मित्ता हानिर्भवति। धनस्य तु [illegible]देशवार्षिकी हानिः।

नन्वेतदनुपपन्न[illegible]। न ह्यप्रतिषेधा[illegible]वत्वमपगच्छ[illegible]ति। अप्रतिषेधस्य दानविक्रयादिवत् [illegible]। सहेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वा[illegible]। नापि विंशतिवर्षोपभोगात् स्वत्वम्। उपभोगस्य स्वत्वे प्रमाणत्वात्। प्रमाण[illegible]य च प्रमेयं प्रत्य[illegible]त्पादकत्वा[illegible]। रिक्थक्रयादिषु स्वत्वकारकहेतुषु अपाठाच्च। तथाहि। स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु—

ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विनिर्जितम्।

निर्विष्टं वैश्यशूद्रयोरित्यष्टावेव स्वत्वका[illegible]कहेतून् गौतमः पठति न भोगम्। न चेदमेव वचनं विंशतिवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वं प्रतिपादयतीति युक्तम्। स्वत्वस्य स्वत्वहे[illegible]नां च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च विभागप्रक[illegible]णे निपुणतरमुपपादयिष्यते। गौतमवचनं तु नियमार्थम्।

अपि च, (ना० ऋ० १।८७)

अनागमं च यो भुङ्क्ते बहून्यब्दशतान्यपि।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः॥

इत्येतत् अनागमोपभोगस्य स्वत्वहे[illegible]त्वे विरु[illegible]ते। न च—अनागमं च यो भुङ्क्ते इत्येतत् परोक्षभोगविषयम्, पश्यतोऽब्रुवत इति प्रत्यक्षभोगविषयमि[illegible] युक्तं वक्[illegible]म्। अनागमं च यो भुङ्क्ते [illegible]त्यविशेषाभिधानात्।

नोपभोगे बलं कार्यमा .त्रा तर्‌ तन वा ।
प..आ. कषादीनामिति धर्मो व्यव. चित: ॥

इति कात्यायनवचनाच्च । उपभोगाभावे च हानिकारणाभावेन हानेरसम्भवात् । न चैतन्मन्तव्यम्, आधिप्रतिग्रहक्रये पूर्वस्याः क्रियायाः प्राबल्यादपवादेन भूविषये विंशतिवर्षोपभोगयुक्तायाः धनाविषये शवर्षोपभोग युक्तायाः उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यते इति । यतस्तेषूत्तरैव क्रिया तत्त्वतो नोपपद्यते । स्वमेव ह्याधेयं देयं विक्रेयं च भवति । न चा .तस्य दत्तस्य विक्रीतस्य वा स्वत्वमस्ति । अस्वस्य दाने प्रतिग्र . च दण्डः स्मर्यते,

अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति ।
उभौ तो चौरवच्छास्यौ दाप्यौ चोत्तमसाहसम् ॥ इति ।

तथा, आध्यादीनां त्रयाणामपवादत्वेऽस्य श्लोकस्याधिसीमादीनामुत्तरश्लोकेऽपवादो नोपपद्यते । तस्माद् भूम्यादीनां हानिर्‌ पपन्नैव । नापि व्यवहारहानिः ।

यतः,

उपेक्षां कुर्वतस्तस्य तूष्णींभूतस्य तिष्ठतः ।
काले विपन्ने पूर्वोक्ते व्यवहारो न सिद्ध्यति ॥

इति नारदेनोपेक्षालिङ्गाभावकृता व्यवहार . . . न तु वस्त्वभावकृता ।

तथा म . नाप्ये, (मनु० ८।१४८)

---

१ अयं श्लोकः ना . . ता मूले नोपलभ्यते । ताट्टिप्पण्या . पलभ्यते ।

अजडश्चे पोगण्डो विषयश्चास्य भुज्यते।
भग्नं तद्व्यव हारेण भोक्ता तद्धनम र्हति॥

इति व्यव हारतो भङ्गो दर्शितो न वस्तुतः। व्यवहारभङ्गश्चैवं, भोक्ता किल वदति, अजडोऽयमपौगण्डोऽयमबालोऽयम् अस्य सन्निधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं तत्र बहवः साक्षिणः सन्ति, यद्यस्य स्वम् अन्य येन मया भुज्यते तदाऽयं किमित्येतावन्तं कालमुदास्ते इति तत्र चायं निरुत्तरो भवतीति। एवं निरुत्त स्यापि वास्तवो व्यवहारो भवत्येव।

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः।

इति नियमात्।

अथ मतम्, यद्यपि न वस्तुहानिर्नापि व्यव हारहानिस्तथापि पश्यतोऽप्रतिषेधतो व्यवहार हानिशङ्का भवतीति तन्निवृत्तये तूष्णीं न स्थातव्यमित्युपदिश्यत इति। तच्च न। स्मार्तकालाय भुक्तेर्हानिश ङ्काकारणत्वाभावात्। तूष्णीं न स्थातव्यमित्येतावन्मात्राभिधित्सायां विंशतिग्रहणमविवक्षितं स्यात्। अथोच्येत— विंशतिग्रहणमूर्ध्वं पत्र दोषोद्भावनानि राकरणार्थम्,

यथाह कात्यायनः,

भुक्तस्य संनिधावर्थो यस्य लेख्येन भुज्यते।
विं शद्वर्षाण्यतिक्रान्तं तत्पत्रं दोषवर्जितम्॥ इति,

तदपि न। आध्यादिष्वपि विंशते रूर्ध्वं पत्रदोषोद्भावननिराकरणस्य समस्त्वेनापवादासम्भवात्।

यथाह कात्यायनः,

अथ विंशतिवर्षाणि आधिर्भुक्तः सुनिश्चितः ।
तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिता ॥

तथा,

सीमाविवादे निर्णीते सीमापत्रं विधीयते ।
तस्य दोषाः प्रवक्तव्या यावद्वर्षाणि विंशतिम् ॥इति।

एतेन धनस्य दशवार्षिकीत्येतदपि प्रत्युक्तम् ।

तस्मादस्य श्लोकस्य सत्योऽर्थो वक्तव्यः। उच्यते ।

भूमेर्धनस्य च फलहानिरिह विवक्षिता न वस्तुहानिर्नापि व्यवहारहानिः । तथाहि । निराक्रोशं विंशतिवर्षोपभोगादूर्ध्वं यद्यपि स्वामी न्यायतः क्षेत्रं लभते तथापि फलानुसरणं न लभते । अप्रतिषेधलक्षणात् स्वापराधात् अस्माच्च वचनात् । परोक्षभोगे तु विंशतेरूर्ध्वमपि फलानुसरणं लभते एव । पश्यत इति वचनात् । प्रत्यक्षभोगे च साक्रोशे । अब्रुवत इति वचनात् । विंशतेः प्राक् प्रत्यक्षे निराक्रोशे च लभते। विंशतिग्रहणात् ।

ननु तदुत्पन्नस्यापि फलस्य स्वत्वात्तद्धानिरनुपपन्नैव । बाढम् । तस्य स्वरूपाविनाशेन तथैवावस्थाने। यथा तदुत्पन्नपूगपनसवृक्षादीनाम् । यत्पुनस्तदुपभोक्तुरुपभोगान्नष्टं तत्र स्वरूपनाशादेव वस्तुनाशः ।

अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

इत्यनेन वचनेन निष्क्रयरूपेण गणयित्वा चौरवत्तत्समद्रव्यदानं प्राप्तं हानिर्विंशतिवार्षिकीति अपोद्यते । राजदण्डः पुनरस्त्येव [illegible] ।

अनागमोपभोगात् प्रमाणाभावाच्च। तस्मात्स्वामिपक्षा-
लक्षणस्वापराधात् स्माच्च वचनाद्विंशतेरूर्ध्वं फलं नष्टं
न लभते इति स्थितम्। एतेन धनस्य शाबाधिकी-
त्येतदपि व्याख्यातम्॥ २४॥

१। *भुक्तेः, प्रागुक्तप्रमाणान्तर्गतायाः। *कैश्चिदिति।
आसेधरहितत्वाचिरकालत्वादिविशेषणैर्युक्ताया इत्यर्थः। *का-
र्यान्तरमिति। पूर्वत्र क्रियाशब्दस्य कार्यपरत्वस्योक्तत्वेन
तदुभयान्यतरसाध्यसिद्धिरूपकार्यातिरिक्तकार्यमित्यर्थः। अ-
नेन व्यवहिताव्यवहितसङ्गतिरुक्ता। एकदेशिमतेन व्याचष्टे
*परेणेति। सम्बन्धे सति दानक्रयादिरूपे परत्वस्यैवाभावादाह
*असम्बन्धेनेति। बहुव्रीहिः। असम्बन्धेनेति पाठान्तरम्।
कर्माकाङ्क्षायां प्रत्यासत्तेराह *भुज्यमानां भुवमिति। *पश्यत
इति। वादिन इत्यर्थः। अब्रुवत इति छेदेनाह *अब्रुवत इति।
तत्र कर्माकाङ्क्षाशान्तये तदर्थमाह *भोग्यमिति। षष्ठीयम्।
*तस्या इति। तत्सम्बधिन्याः परेण भुज्यमानाया
इत्यर्थः। स्पष्टत्वाय पुनराह *अप्रतीति। स्पष्टत्वायोक्त-
सहितं विंशतीत्यस्यार्थमाह *अप्रतिरवमिति। अशब्दं यथा
तथेत्यर्थः। समस्तपाठो युक्त एव। विंशतिवर्षशब्दस्तदुपभोगे
लाक्षणिकः। कृतलब्धेत्यर्थे कालाट्ठञ्। वर्षस्याभविष्यतीत्यु-
त्तरपदवृद्धिः। एवमग्रेऽपि। तत्फलितमाह *उपभोगनिमित्तेति।

२। अनुपपत्तौ हेतुमाह *न हीत्यादिना। अप्रतिषेधा-
त्स्वामिनः स्वत्वानपगममुक्त्वा तावत्पर्यन्तं तादृशोपभोगेन स्वत्वा-
नुत्पत्तिमाह *नापीति। *स्वत्वमिति। उत्पद्यते इति शेषः।
अत्र हेतुमाह *उपभोगस्य स्वत्वे प्रमाणत्वादिति। तस्य स्वत्व-
विषयकप्रमितिजनकत्वादित्यर्थः। क्वचित्समस्तपाठः। यथा धूम-

स्य [illegible]पकत्वं न तदुत्पादकत्वं तथोपभोगस्यापि स्वम-मेयभूत[illegible] नोत्पादकत्वम् अतो न ततस्तदुत्पत्तिरिति-भावः। तदाह *प्रमाणेति। ननूपभोगस्य न तत्प्रमाण[illegible] माना-भावात् किं [illegible]त्पादकत्वमेव अत आह *रिक्थेति। तत्र तस्यापा-ठाच्च तस्य तत्त्वमित्यर्थः।

३। तत्रापाठमेव दर्शयति *तथाहीति। गौतमवाक्यमाह *स्वामीति। रिक्थादिषु पञ्चसु सत्सु स्वामी भवतीति सर्वसा-धारणस्वत्वकारकहेतुपरिगणनम्। अप्रतिबन्धो दायो रिक्थ-म्। सप्रतिबन्धो दायः संविभागः। क्रयः प्रसिद्धः। अरण्या-दिष्वनन्यपरिगृहीततृणकाष्ठादि[illegible]करणं परिग्रहः। निध्यादि-प्राप्तिः अधिगमः। असाधारणकारकहेतुमाह *ब्राह्मेत्यादिना। ब्राह्मणस्य प्रतिग्रहादिना यल्लब्धं तद् आधिकम् असाधारणं स्वत्व-जनकमित्यर्थः। वैश्यस्य भोगरूपेण भृतिरूपेण वा यल्लब्धम्, शूद्रस्य द्विजशुश्रूषादिना भृतिरूपेण यल्लब्धं, तद् आधिकम् असाधारणं स्वत्वजनकम्। निर्वेशो भृतिभोगयोरित्यमरः।

४। ननु एवमपि पश्यत इति वचनमेव तादृशोपभोगस्य स्वत्वहेतुत्वविधायकमस्तु इत्याशयेन शङ्कते *न चेदमिति। आपत्तिः प्राप्तिः। तत्र हेतुमाह *स्वत्वस्येति। एकशब्दो मात्रा-र्थः। विधेरत्यन्ताप्राप्तप्रापणस्वभावत्वेन लोकप्रसिद्धार्थे प्रवृत्त्य-भावादिति भावः। *एतच्चेति। तस्य तेषां च लोकसिद्धत्वमित्ये-तदित्यर्थः।

५। नन्वेवमुक्तगौतमवाक्यस्य का गतिरत आह *गौतमे-ति। शास्त्रपरिगणितैरेव हेतुभिः स्वत्वमुत्पाद्यं नापरिगणितै-रपि चौर्यादिभिरिति नियमो ऽदृष्टायेति नियमार्थं न तु स्वत्वादि शास्त्रमात्रसमाधिगम्यमित्येवमर्थमित्यर्थः। यद्वा तैः स्वत्वेम-

नास्वत्वमिति तथा नियमः ।

६ । स्मृतिविरोधरूपं दोषमप्याह *आप चेति । द्वौ ब्राह्मणावितिवत् बहूनीति प्रयोगः । *विरुध्यते इति । अनागमोपभोगेन स्वत्वोत्पत्तावुपभोक्तुर्दण्डविधानमनुपपन्नम् । विहितस्तु दण्डः। अत एतद्वचनविरोधादपि न स्वत्वं तादृशोपभोगादुत्पद्यते इत्यर्थः।

७ । ननु सति विरोधे तादृशोप भोगात्स्वत्वा नुत्पत्तिः, स एव नेत्याशयेन । *न चेति । स्वाम्यसमक्षं बहुकालोपभोगेऽपि स्वत्वानुत्पादादुपभोक्ता चोरवद्दण्ड्य इति तदर्थः । *पश्यत इति। स्वामिनः समक्षम् अनासेधोपभोगे विंशतिवर्षादूर्ध्वं तद्धानिर्भवतीति उपभोगादुपभोक्तुः स्वत्वमुत्पद्यते इति तदर्थः । एवं च परोक्षत्वापरोक्षत्वरूपविशेषप त्वेन न मिथो विरोधो येन तदभावः स्यादिति भावः । प्रतिज्ञामात्रेणार्थासिद्धेरत्र हेतुमाह *अनागममिति । उक्तविशेषं विना सामान्येन तादृशोपभोक्तुर्दण्डनिर्देशान्न तथा व्यवस्था युक्तेति भावः ।

८ । ननु तत्र सामान्योक्तावप्यत्र विशेषोक्त्या एतदन्यपरत्वं तस्येति युक्तैव व्यवस्था ऽत आह *नोपेति । उपभोगमात्रबलादेव न स्वत्वसिद्धिरित्यर्थः । तथा च कथं समक्षभोगेऽपि तन्मात्रात् स्वत्व ानिस्तदुत्पत्तिश्च । यदि तथा ङ्गीक्रियते तर्हि सामान्यैतद्वचनविरोध इति भावः । नन्विदमपि परोक्षभोगविषयकमेवास्ता क्तवचनैकवाक्यतया अत आह *समक्षेति । चो ऽन्ते योज्यः । अनासेधेन स्वत्वानपगम उपभोगेन स्वत्वानि -त्तिश्चेति प्रागुक्तरीत्या हानिकारणाभाव इति भावः । तस्मादेतदनुपपत्तिस्तदवस्थेति सिद्धम् ।

९ । नन्वेवं मा ऽस्त्वस्य प्रागुक्तोऽर्थः किं त्वन्य ेत्याह *न चैतन्मन्तव्यमिति । इतीत्यन्तेन वक्ष्यमाणमित्यर्थः । *माव-

स्येति । आध्यादिषु तदपवादत्वेन य[illegible]क्रियायाः प्राबल्यमुक्तं तद[illegible] भूमौ विंशतिवर्षोपभोगसहितोत्तरक्रिया प्रबला, धने तु द[illegible]गसहितेति, ईदृशस्थले आध्यादि[illegible]रैव क्रिया ग्राह्येत्येवार्थ इत्यर्थः । अत्र क्रिया करणम् । भूमौ विंशतिवर्षोपभोगाभावे धने च तादृशतदभावे पूर्वकृताध्यादिकमेव प्रबलं, ततोऽन्यत्र तदपेक्षयोत्तर[illegible] तत्प्रबलमिति व्यवस्थेति भावः । हेतुमाह * यत इति । * तेषु, आध्यादिषु । उत्तर क्रियाया एव वस्तुतोऽभावात्पूर्वक्रियाऽपेक्षया प्राबल्यं न संभवति । सति हि धर्मिणि धर्मचिन्तनमिति भावः । तदाह * स्वमेव हीति । स्वत्वविशि[illegible]मेव हीत्यर्थः । तत्र हेतुमाह * न चेति । न हीत्यर्थः । वा चार्थे । प्रतिग्रहांशे युक्त्यन्तरमप्याह * अस्वस्येति ।

१० । अभ्युपेत्य एवं सति याज्ञवल्क्यस्य पूर्वापरविरोधादानर्थक्यापत्ति[illegible]पि दोषान्तरमित्याह * तथेति । अस्य श्लोकस्येत्यस्य मध्यमणिन्यायेनोभयत्रान्वयः । अपवादः अपवादत्व[illegible] । आधौ पूर्वत उत्तरप्राबल्येऽनेन बोधिते ऽग्रिमवचनेन आधौ एतदपवादतयोत्तरकार्यप्राबल्यबोधने तत्रैव विपरीताभिधानेन मिथो विरोधात्तदानर्थक्यमिति भावः । उपसंहरति * तस्मादिति । *[illegible]निरिति । स्वत्वहान्या स्वरूप[illegible]निरित्यर्थः ।

११ । ननु मा भूत्स्वरूपहानिः किं तु तदनन्तरं तद्विषयव्यव[illegible]रहानिरनेन प्रतिपाद्यते इत्यत आह * नापीति । तावत्पर्यन्तं परोपभोगे भोग्यवस्तुनो नष्टत्वात्तदभावनिमित्तकनृपादिकृतवास्तवव्यवहार[illegible]निरित्यर्थः । तत्र हेतुमाह * यत इति । उक्तेत्यत्रान्वयः । * तस्य, वादिनः । उपेक्षामित्यनेन शारीरव्यापारशून्यत्वं, तूष्णीमित्यनेन [illegible]व्यापारशून्यत्वं, तेन अब्रुवत इत्यर्थलाभः । * तिष्ठतः, विद्यमानस्य । अनेन द्वि-

विषानिष्पमानत्वस्यावच्छेदः। तेन पश्यत इत्यस्यायस्य लाभः। * विपन्ने, पूर्णे समाप्ते इति यावत्। * पूर्वोक्ते, सङ्केतिते। व्यवहारहा-नौ मुख्यहेतुमाह * उपेक्षालिङ्गेति। अन्यथा त्वद्विवक्षानर्थक्य-मेवेति भावः। तथा च उक्तार्थे हेतुत्वमेवास्य वचनप्रधानेनोपपा-दितमिति बोध्यम्। उपेक्षायां यानि लिङ्गानि जडत्वबालत्वा-दीनि तेषां यो ऽभावः तत्कृता तन्निमित्तैवेत्यर्थः। व्यवच्छे-द्यमाह * न तु वस्त्वभावेति। पराक्रान्तत्वात्तत्सम्बन्धाभावकृत-तदभावेत्यर्थः। उपेक्षालिङ्गेष्वसत्सु तावत्पर्यन्तं विपन्नवस्तुनः स्वीयत्वे किमित्यनेन व्यवहारो न कृत इति प्रत्यर्थिनोक्ते वादी निरुत्तरो भवतीत्येवं प्रकारेण व्यवहाराभावो नारदेनाप्युक्तः। उपेक्षां कुर्वत इत्युक्तेः। अन्यथा तदानर्थक्यं स्पष्टमेव। अतो न तथा वस्तुनोऽभावकृतो व्यवहाराभावो वक्तुं शक्य इति तात्पर्यम्।

१२। साधकान्तरमाह *तथेति। *विषयश्चास्य भुज्यते इति। विषये चास्येति पाठान्तरम्। विषये चास्य भुञ्जते इति तृतीय-पाठः। विषयो देशः। *अस्य, धनिनः। अजडश्चेदित्यादि।

यत्किञ्चिद्दश वर्षाणि सन्निधौ प्रेक्षते धनी।

भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति॥ (मनु. ८।१४७)

इति पूर्वशेष इति मेधातिथिः। *तत्, धनिकरूपम्। *तद्धनं, तदुत्पन्नं फलरूपम्। *इति, इत्येवं प्रकारेण। प्रथमपक्षं निराचष्टे न वस्तुत इति। न तथा वस्त्वभावकृत इत्यर्थः।

१३। सर्वथा व्यवहारभङ्गे नानयोस्तात्पर्यम्, किन्तु वादि-निरुत्तरत्वे इति प्रतिपादयन्नाह *व्यवहारेति। भवतीतीत्यन्ते-नान्वयः। वदत्येतस्य उदास्ते इतीत्यत्रान्वयः। अजड इत्यादि उपलक्षणमन्येषामपीत्याह *अबाल इति। अस्येति अनन्तर-

योगे षष्ठी। तत्सूचितमाह *सन्निधाविति। भुज्यते इति वर्तमानसामीप्ये लडित्याह *भुक्तमिति। चकारस [मुच्च]यमाह *तत्रेति। *भुज्यते, भुक्तम्। *उदास्ते, उदासीनः। अस्य फलमाह *एवमिति।

। अथास्यान्यथा व्याख्यानमा *अथ मतमिति। तादृशोपभोगान्न भूम्यादेः तद्विषयव्यवहारस्य च हानिः। किं तु तस्य तादृश य व्यवहारहानिश [ङ्क]ा स्यादिति तन्निवृत्त्यर्थमासेधो विधेय इत्यासेधस्यावश्यकर्तव्यत विधत्ते इदं वचनमित्यर्थः। तदपि व्याख्यानं दूषयति *तच्च नेति। ननु तूष्णीं न स्थातव्यमि [त्यु]पदेशः किमदृष्टार्थः उत दृष्टार्थः। न तावदन्त्यः, असंभवात्। व्यवहारहानिशङ्कायां सत्यां तन्निवृत्त्यर्थमुपदेशो वाच्यः। सा च कारणे सत्येव भवति नासति। तच्च कारणं विंशतिव[र्ष]परिमिता भुक्तिरुतान्यत्। तत्र नान्त्यः। वचनेऽनुक्तेः। नाद्य इत्याह *स्मार्तेति। स्मरणविषयतायोग्यकालिक [त]त्वा व्यव[हा]रहानिशङ्कैव नोत्पद्यते साक्ष्यादिसंभवादिति भावः। नाप्यदृ[ष्टा]र्थ इत्याह *तूष्णीमिति। दोषद्वयप्रतिपादकोऽयं ग्रन्थः। अविवक्षितं स्यादित्यस्योभयत्रान्वयः। तथा चैतावन्मात्राभिधित्सायामविवक्षितमनुपपन्नं स्यादित्याद्यर्थः। तूष्णीं नेति उपदेशस्यादृष्टं फलं विधिबलात्कल्प्यं यद्यपि तथापि कल्पनैव तावद्गरीयसी। किं चादृष्टसत्त्वमेव न।

बालाग्रशतभागोऽपि न कल्प्यो निष्प्रमाणकः।

इति न्यायात्। किं च वक्ष्यमाणप्रकारेण गत्यन्तरसंभवे तदभावमूलकतत्कल्पना ऽसंगता। एवं चादृष्टकल्पनयैवा [न्य]च सार्थक[ल्प]नायं बीजाभावा[द]स्यादृष्टार्थत्वमिति भावः।

१५। अस्योपदेशस्यादृष्टार्थत्वमभ्युपेत्याप्याह। *विंशतीति।

अत्र तदविवक्षितमनर्थकं स्यादित्यर्थः । अस्योपदे[illegible]फलकत्वे तत्फलस्य विंशतिवर्षरूपमर्यादाऽनुक्तावपि तूष्णीं न स्थातव्यमिति निषेधमात्रेणापि सिद्धिरिति तदुपादानमनर्थकं स्यादिति भावः । यद्वा तदपि व्याख्यानं दूषयति *तच्च नेत्यादिना । असौ मदीयं क्षेत्रादिकं प्रतिग्रहादिकं विनोपभुङ्क्ते इति स्मरणयोग्यकालिकी या भुक्तिस्तस्या व्यवहारहानिशङ्कां प्रति कारणत्वाभावात्तन्निवृत्त्यर्थत्वस्यैतदुपदेशस्यासम्भवात्तूष्णीं नेत्येतावन्मात्रोपदेशे वाच्ये विंशतीत्यनर्थकं स्यात्[illegible]दृष्टफलाभावेनाद[illegible]फलकल्पनायां विंशतिवर्षरूपमर्यादाऽनुक्तावपि सम्भवात् इति भावः ।

१६ । विंशतीत्यस्योक्तमानर्थक्यं निराचष्टे *अथोच्येतेत्यादिना । *ऊर्ध्वं, विंशतेरिति शेषः। पश्यत इत्यनेन तूष्णीं नेत्येवोपदिश्यते नाधिकं यद्यपि तथापि विंशतीति सार्थकम् । तथा हि । यदि विंशतिवर्षपर्यन्तं स्वामिकृतासेधाभावेन तद्रहितं तावत्कालं वस्तु कपटकृतलेख्यकमपि प्रत्यर्थिनोपभुक्तं तदा विंशतिवर्षोत्तरं तत्पत्रं निर्दोषमिति पत्रदोषोद्भावननिराकरणार्थत्वेन तत्सार्थकमितिभावः । अत्र प्रमाणमाह *यथाहेति । *शक्तस्य, निराकरणे समर्थस्य । संनिधावित्यनेनासांनिध्यव्यवच्छेदः । *लेख्येन, कपटकृतेन । विंशद्वर्षाणीत्यार्षम् । कालाध्वनोरिति द्वितीया । भुज्यते इति प्राग्वत् ।

१७ । इदमपि निराकरोति *तदपि नेति । तथा तस्य सार्थक्ये आध्यादिष्वपि उक्तन्यायस्य तुल्यत्वेनाग्रे आधिसीमोपेत्यादि[illegible]लवचनेनापवादत्वोक्त्यसङ्गत्यापत्त्या[illegible]लयोर्मिथो विरोधापत्तेरिति भावः । न[illegible]त्या पश्यत इत्यनेन सामान्यतो विंशतिवर्षो[illegible]गोचरं सर्वत्र पत्रेषु दोषोद्भावननिराक[illegible]णे प्राप्ते

आधिसीमोपेत्यनेन विशेषवचनेन तद्विषये तथा न, किं तु तदुत्तरमपि तदुद्भावनं कर्तव्यमेवेति बोध्यते इति प्रागुक्तापवादत्वसम्भवेन तस्य कुतो विरोधो मिथ इति चेन्न । वचनान्त विरोधेनैवं व्यवस्थाया दुर्वचत्वा । तदेतदभिमेत्य तद्वचनमाह *यथाहेति । तथा च तथा ऽङ्गीकारे कात्यायनादिविरोधोऽन्यथा मिथो विरोधः । सेयमुभयतःस्पाशा रज्जुरिति भावः । *अथेति । आधिसीमापत्रयोरपि तदुत्तरं दोषोद्भावनं न, अपि तु अदृष्टमेवेत्यस्यैतदुभयप्रतिपाद्यत्वेनैतद्विपरीततया लवचनयोर्व्यवस्थायामेतद्विरोधः । न चैतद्युक्तं, वक्ष्यमाणप्रकारेणाविरोधेनैवोपपत्तेरिति भावः । *सत्योऽर्थ इति । निर्दुष्टोऽर्थ इत्यर्थः । अन्योऽर्थ इति पाठान्तरम् ।

१८ । तमेव स्वाभिमतमाह *उच्यते इति । *इह, पश्यत इत्यत्र वचने । *विवक्षितेति । तात्पर्यत इति भावः । अत एवोपपादयति *तथाहीति । निराक्रोशमिति उपभोगक्रियाविशेषणम् । *फलेति । तावत्पर्यन्तं ततस्तेन लब्धेत्यादिः । ननु स्वल्पापराधे महदनिष्टमनुचितमत आह *अस्मादिति । पश्यत इति वाक्यादित्यर्थः । अन्यथैतस्य वैयर्थ्यं स्पष्टमेव । पदकृत्यान्याह *परोक्षेति । *साक्रोशे इति । फलानुसरणं लभते एवेत्यस्यानुषङ्गः । अत्र हेतुमाह *अब्रुवत इति । यतोऽब्रुवत एव फलहानिरतो ब्रुवत आक्रोशं कुर्वतः फलमस्तीति भावः । *निराक्रोशे चेति । फलानुसरणमित्यस्यानुषङ्गः ।

१९ । इदमप्ययुक्तमिति शङ्कते *नन्विति । *फलस्येति । फलस्यापीत्यर्थः । *तद्धानिरिति । फलहानिरपीत्यर्थः । अस्तु स्वत्वं तथापि [illegible] फलहानिरुपपन्नैवेत्यङ्गीकारेण परिहरति *बाढमिति । क फल[illegible]निनास्ति का[illegible]यां यत्र

फलं विद्यते ऽत्र हानिर्न, विपरीते विपरीतमित्यर्थः। *तस्येति। फलस्येत्यर्थः। स्वरूपपदं स्पष्टार्थम्। यद्वा स्वरूपतः सर्वांशेने-त्यर्थः। *तदिति। क्षेत्रेत्यर्थः। पूगः क्रमुकः। एवं चायं पूर्वप-क्षविषय इति भावः।

२०। प्रकृतवचनविषयमाह *यत्र नरिति। यत्त्वित्यर्थः। यत्र पुनरिति पाठान्तरम्। *स्वत्वना। इति। सम्बन्धिनः स्वरूपस्याभावात्सम्बन्धघटकस्वत्वस्य निवृत्तावपीत्यर्थः।*वच-नेनेति। चोरेणापहृतं द्रव्यं स्वामिने दापयित्वा ततो यथा राज्ञा दण्डो गृह्यते तद्वत् तादृशोपभोक्तारं पापिष्ठं तं स्वामिने तद्दापयित्वा स्वयं राजा दण्डयेदिति तत्पूर्वकदण्डविधायकेन कात्यायनवचनेने-त्यर्थः। *अपोद्यते, बाध्यते। उक्तवचनबलात्फलहान्यादिदाने प्राप्ते केवलं फलहानिस्तत्रानेन विधीयते इति तदपवादत्वमस्येति भावः। अत एवाह *राजदण्ड इति। तद्वचनबोधित इत्यर्थः। स्वत्वहेतुः प्रतिग्रहक्रयादि [illegible]ः। वचने तत् क्रियाविशेषणम्। *अपवादे-ति। तद्वद् [illegible] ऽपवादाभावाच्चेत्यर्थः। स्वोक्तमुपसंहरति *तस्मादिति। अन्योपेक्षा नापराध इति सूचयन्नाह *स्वाम्युपे-ति। *नष्टमिति। स्वरूपत इति भावः। *व्याख्यातमिति। उक्तवत् तस्यापि फलहानिपरतया सुयोजत्वात्॥ २४॥

मि० अस्यापवादमाह।

या० आधिसीमोपनिक्षेपजडबालधनैर्विना।
तथोपनिधि राजस्त्रीश्रोत्रियाणां धनैरपि॥ २५॥

मि० आधिश्च सीमा च उपनिक्षेपश्च आधिसी-मोपनिक्षेपाः। जडश्च बालश्च जडबालौ तयो-र्धने जडबालधने। आधिसीमोपनिक्षेपाश्च जडबाल-

धने च आधिसीमोपनिक्षेपजडबालधनानि। तैर्विना।
उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं पर-
स्य हस्ते निहितं द्रव्यम्।

यथाह नारदः, (व्य० प०२।१)

स्वं द्रव्यं यत्र विस्रंभान्निक्षिपत्यविशङ्कितः।

निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः॥ इति।
उपनिधानमुपनिधिः। आध्यादिषु पश्यतोऽब्रुवतोऽपि भूमेर्विंशतेरूर्ध्वं धनस्य दशभ्यो वर्षेभ्य ऊर्ध्वमपि उपचयहानिर्न भवति। पुरुषापराधस्य तथाविधस्याभावात्। उपेक्षाकारणस्य तत्र तत्र संभवात्। तथाहि। आधेराधित्वोपाधिक एव भोग इत्युपेक्षायामपि न पुरुषापराधः। सीम्नश्चिरकृततुषाङ्गारादिचिह्नैः सुसाधत्वादुपेक्षा संभवति। उपनिक्षेपोपनिध्योर्भुक्तेः प्रतिषिद्धत्वात् प्रतिषेधातिक्रमोपभोगे च सोदयफललाभादुपेक्षोपपत्तिः। जडबालयोर्जडत्वाद्बालत्वादुपेक्षा युक्तैव। राज्ञो बहुकार्यव्याकुलत्वात्। स्त्रीणामज्ञानात् अप्रागल्भ्याच्च। श्रोत्रियस्याध्ययनाध्यापनतदर्थविचारानुष्ठानव्याकुलत्वादुपेक्षा युक्तैव। तस्मादाध्यादिषु सर्वत्रोपेक्षाकारणसंभवात् समस्तभोगे निराक्रोशे च न कदाचिदपि फलहानिः॥ २५॥

१। यथाश्रुतप्रकारद्वयेऽप्यनुपपत्तेराह *आधिश्चेत्यादिना। लघ्वक्षरत्वाज्जडस्य पूर्वनिपातः। अत्र द्वन्द्वस्वरूपप्रतिपादने तात्पर्यं न तु क्रमे। तथा च जडेत्यादि संसाध्य तेन सहोपनिक्षेपादिभिस्त्रिभिर्व्युत्क्रमेण त्रिवारं द्वन्द्वः कार्यः। यथाश्रुते तु आधिशब्दस्य घ्यन्तत्वात्पूर्वनिपातसम्भवेऽपि द्वितीयद्वन्द्वे जडेत्या-

दे: पूर्वनिपातः स्यात्। अनित्यत्वं त्वगतिकगतिः। अत उक्तैव गतिर्न्याय्या। उपनिधिना उपनिक्षेपस्य भेदं दर्शय...तदर्थमाह *उपनिक्षेपो नामेति। तथा च रूपसंख्ये अदर्शयित्वा रक्षणार्थं यद्दीयते स उपानिधिः। स्वमुद्राङ्कितग्रन्थिकरणमुभयत्र समानम्। अत एव तत्र भोगाभाव इति बोध्यम्। अत्र उपेत्याविवक्षितमिति सूचयन्नाह *यथाहेति। स्वामित्यस्य यदित्यादिः। *यत्र, परस्तहे। *विस्रम्भात्, विश्वासात्। अनेन रूपसंख्याप्रदर्शनं सूच्यते। अविशङ्कित इत्यनेन रक्षणार्थत्वं सूच्यते। तथोपनिधीति भिन्नं वाक्यम्। सामान्ये नपुंसकम्। विनायोगे द्वितीयैकवचनम्। तद्विना चेत्यर्थः। तद्रूढ्यर्थस्तु उक्तः। योगार्थमाह *उपनिधानमिति। अभ्यर्हितत्वाविवक्षया राजशब्दस्य पूर्वनिपातः। धनैरपीत्यत्र विनेत्यस्यानुषङ्गो बोध्यः। इदं च पूर्ववाक्येन पश्यत इत्यनेनान्वेति। तथा च तदेकवाक्यता शाब्दी।

२। अथ तात्पर्यार्थमाह *आध्यादिष्विति। अब्रुवत इति छेदः। अपिना ऽन्यसमुच्चयः। अग्रिमापिना प्राक्त्वसमुच्चयः। *उपचयेति। फलहानिर्न भवतीत्यर्थः।अत्र हेतुमाह *पुरुषेति। स्वामीत्यर्थः। स्वल्पसत्त्वेऽपि न दोष इत्याह *तथाविधेति। येनेदृशं फलं तादृशेत्यर्थः। अत्र हेतुमाह *उपेक्षेति। *तत्र तत्र, आध्यादिषु। *आधित्वोपाधिक एवेति। आधित्वनिमित्त..., एवेत्यर्थः। आधिक्योपाधिक इति पाठान्तरम्। तत्र आधिक्यं वृद्धिः। *चिरकृतेति। पूर्वतरकृतेत्यर्थः। चिरधृतेति पाठान्तरम्। सुसाधत्वादिति पाठः। सुसाधनत्वादिति पाठान्तरम्। मौलक्रमबोधने तात्पर्यादाह *उपनिक्षेपेति। अन्यथाऽल्पाच्तरत्वात्पूर्वनिपाते वैपरीत्यं स्यात्। प्रतिषिद्धत्वादित्यस्योपेक्षोपपत्तिरित्यत्रान्वयः। निधानकाले तत्कृतं प्रतिषेधमुल्लङ्घ्य भो-

मे क्रियमाणे आह *प्रतिषेधेति। षष्ठीतत्पुरुष उपपदकतृतीयातत्पुरुषः। चो व्युत्क्रमे। फललाभावेत्यर्थः। *व्या लत्वादिति। उपेक्षा कैवल्यस्याह पक्षः। एवमग्रेऽपि। *तदर्थेति। विचारा ष्ठानयोर्द्वन्द्वं कृत्वा तन्शब्देन षष्ठीतत्पुरुषं कृत्वा नत्रयाणां द्वन्द्वं कृत्वा तृतीयातत्पुरुष इति भावः। उपसंहरति *तस्मादिति। *कदाचिदिति। विंशतेः पूर्वं तदनन्तरं चेत्यर्थः॥ २५॥

मि० आध्यादिषु दण्डविशेषप्रतिपादनार्थमाह।

या० आध्यादीनां विहर्तारं धनिने दापयेद्धनम्।
दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा॥ २६॥

मि० आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनापहर्तारं विवादास्पदीभूतं धनं स्वामिने दापयेदित्यनुवादः। दण्डं च तत्समं विवादास्पदीभूतद्रव्यसमं राज्ञे दापयेदिति विधिः। यद्यपि गृहक्षेत्रादिषु तत्समो दण्डो न सम्भवति तथापि—

मर्यादायाः प्रभेदे च सीमातिक्रमणे तथा। (याज्ञ० २।१५५)

इत्यादिवक्ष्यमाणो दण्डो द्रष्टव्यः अथ तत्समदण्डेनापहर्तुर्दमनं न भवति बहुधनत्वेन, तदा शक्त्यपेक्षं धनं दापयेत्। यावता तस्य दर्पोपशमो भवति तावद्दापयेत्। दण्डो दमनादित्याहुस्तेनादान्तान् दमयेदिति दण्डग्रहणस्य दमनार्थत्वात्। यस्य तु तत्समसमापे द्रव्यं नास्ति सोऽपि यावता पीड्यते तावद्दाप्यः। यस्य पुनः किमपि धनं नास्ति असौ धिग्दण्डादिना दमनीयः।

तथाच मनुः, (अ० ८।१२९)

धिग् ण्डं प्रथमं ्याद्वाग्दण्डं तदनन्तर् ।
तृतीयं धनदण्डं तु वध ण्डमतः परम् ॥
वध ण्डोऽपि ारे ब्राह्मणव्यति ानां द-शधा दर्शितः ।

यथाह मनुः, (अ० ८।१२४।१२४)
दश ानानि ण्डस्य मनुः स्वायम्भुवोऽब्रवीत्।
त्रिषु वर्णेषु यानि स् रक्षतो ब्राह्मणो व्रजेत् ॥
उपस्थ दरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥ इति ।

एतेषां य ल अ ाद निग्रहः कार्य इति द्रष्टव्य । कर्म वा कारयितव्यो बन्धनागा वा प्रवेशयितव्यः ।

यथोक्तं कात्यायनेन,
धनदानासहं बुध्वा स्वाधीनं कर्म कारयेत् ।
अशक्तौ बन्धनागा प्रवेश्यो ब्राह्मण ते ॥ इति।

ब्राह्मणस्य पुनर्द्रव्याभावे कर्मवियोगा ानि प्र-योज्यानि ।

यथाह गौतमः, कर्मवियोगविख्यापननिर्वा ना-करणादीन्य ानीति ।

नार नापि, (व्य० प० १४। श्लो०८।९।१०)
वधः सर्वस्वहरणं ने ।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसा सः ॥
अविशेषेण वर्णानामेष दण्डविधिः स्मृतः ।
इ ्क्तम्,
वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति ॥

शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात् ।
ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च ॥ इति ।
अङ्कने च व्यवस्था दर्शिता, (मनु० ९।२३७)
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥ इति ।

यत्तु चक्षुर्निरोधो ब्राह्मणस्येत्यापस्तम्बेनोक्तम्, ब्राह्मणस्य पुरान्निर्वासनसमये वस्त्रादिना चक्षुर्निरोधः कर्तव्य इति तस्यार्थो, न चक्षुरुद्धरणम् । "अक्षतो ब्राह्मणो व्रजेत्" "न शारीरो ब्राह्मणे दण्ड" इत्यादि-मनुगौतमवचनादिविरोधात् । इत्यलं प्रसङ्गेन ॥२६॥

बा० १ । *आध्यादिषु, अपह्रियमाणेषु । अव्यवहितग्रहण-सम्भवे व्यवहितग्रहणे मानाभावादाह *श्रोत्रियेति । अ-पहारे निमित्तमाह *चिरेति । धनमित्यस्यार्थमाह *विवा-देति । *अनुवाद इति । निह्नवे भावितो दद्यादित्यनेनैवास्यार्थस्य विहितत्वेन दानेनैव दापनस्याप्याक्षिप्तत्वादिति भावः ।

२ । तृतीयपादार्थमाह *दण्डं चेति । तत्समामित्यस्य व्या-ख्या *विवादेति । अन्वयक्रमेणाह *दापयेदिति । *विधिरिति । प्राड्विवाकादेरिति शेषः ।

३ । नन्वयमपि विधिर्न, निह्नवे इत्यत्र राज्ञे च तत्समामि-त्यनेनैव प्रकृतधनसमदण्डस्यापि विहितत्वादिति चेन्न । तस्य ऋणादानमात्रविषयत्वेनासर्वविषयत्वेन प्रकृते ऽप्राप्तेः । सर्व-विषयत्वेऽपि तत्र तत्र विहितदण्डस्य राज्ञे च तत्समामित्यनेना-नुवादात् । अतो न दोषः । प्रतिपादितमिदं तत्रैव । तदेतत् ध्वनयन्नेवाह *यद्यपीति । गृहान्तरादिरूपदण्डदानस्यासम्भवे-नाशक्यत्वात् । यद्यपि शक्तस्यास्ति सम्भवस्तथापि साम्यं दु-

घटम् । तथाच आध्यादिसर्वविषयत्वमेतस्या. पपन्नमिति भावः । आदिना—

क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः।(या.व.व्य.श्लो. १५५)

इत्युत्तरार्धपरिग्रहः । *दण्ड इति । तत्रेति शेषः । तथा च तत्सममित्यनेन तादृशे स्थले वक्ष्यमाण एव मूल्यसाम्यद्वारा दापनीयत्वेनास्य दण्डो विधीयते इति भावः । नन्वेवमत्रा. चक चैवार्थस्य विधानादन्यतरस्याविधित्वं स्यादिति चेन्नावक्ष्यमाणस्थले दण्डस्वरूपविधिरत्र तु प्राप्तदण्डानुवादेन दापनविधिरित्येवमुभयत्र विधिसम्भवात् ।

४ । तुर्यपादार्थमाह *अथेति । बहिति पूर्वान्वयि । शतपेक्षत्वस्य मर्यादामाह *यावतेति । एतल्लाभोपायमाह *दण्ड इति । *तेन, दण्डेन । *दण्डोति । अत्र गौतमीये दण्डग्रहणस्य दमनार्थत्वस्योक्तत्वात् इत्यर्थः । तथा च तस्य योगरूढत्वेन योगवशेन तल्लब्धमिति भावः । अनेनैवाधिकस्येव न्यूनस्यापि विनिगमकाभावात्तथोक्त्या संग्रह इत्याह *यस्य त्विति । एवमेवानेनैव लब्धं विशेषान्तरमाह *यस्य पुनरिति । यस्य त्वित्यर्थः । ननु धिग्दण्डादेर्दण्डत्वमेवादावसिद्धं, सिद्धेऽपि वा दण्डत्वे तद्विधिः कुतो ऽवगम्यते इत्यत आह *तथा चेति । धिग्दण्डो धिक् धिगिति कुत्सनम् । वाग्दण्डः परुषवाक्यवचना.त्म .ः । धनदण्डो धनापहारः । वधदण्डः शारीरो बन्धरोधादिर्जीवितवियोगान्तः ।

५ । एते च चतुर्विधा दण्डा व्यस्ता एकैकशः, समस्ता द्वित्रा।स्त्रिच.रा वा अपराधानुसारेण प्रयोक्तव्याः । तदुक्तं—

मनुना, (अ. ८ । श्लो. १३० ।)

वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुया. ।

तदेषु सर्वमप्येतत्म[illegible]ज्ञात चतुष्टय[illegible] ॥ इति ।

* वधेनापि, त[illegible]नेनापि[illegible]परन्यस[illegible]चये । उक्तक्रमेण पूर्व-पूर्वासाध्ये उत्तरःउत्तरः प्रयोक्तव्यः । तथा चात्र प्रथमतदनन्तर-तृतीयातःपरशब्दा धिग्दण्डवाग्दण्डधनदण्डवधदण्डानां मध्ये [illegible]वापेक्षयोत्तरोत्तरस्याधिक्यप्रतिपादका न तु सर्वेष्वप्यपराधे प्रथमादिक्रमेण कर्त्तव्यताप्रतिपा[illegible]का इति बोध्यम् । अयं पाठः मा[illegible]कस्य धि[illegible]ण्डस्त्वथेति मूलस्य संवादी ।

६ । [illegible]पातिथिना तु आद्य[illegible]येन पाठं धृत्वा यो गुण-[illegible]नीषत्प्रथममेवापराधं कृतवान् स वाचा निर्भर्त्स्यः, साधु [illegible]जवानसि मा पुनरेवं कार्षीरिति । तथोच्यमानो यदि ततो न निवर्त्तते तदा धिग्दण्डेन [illegible]त्साविशिष्टः परुषवचनैर्निर्भर्त्स्यः। एवमग्रेऽपीति व्याख्यात[illegible] ।

७ । नारदेन तु [illegible]ण्डद्वैविध्यमुक्तम् । तथाहि,

शारीरश्चार्थदण्डश्च दण्डस्तु द्विविधः स्मृतः ।
[illegible]ताडनादिस्तु [illegible]णान्तः प्रकीर्त्तितः ॥
काकिण्यादिस्त्वर्थदण्डः सर्व[illegible]न्तस्तथैव च । इति ।

द्विविधोऽप्यपराधा[illegible]सारेणानेकधा भवति । आह स्म स एव,
शारीरो दशधा प्रोक्तो ह्यर्थदण्ड[illegible] । इति ।

इदं च दण्डकथनम् ब्राह्मणादिसर्वविषय[illegible] । न च राजा सर्वस्येष्टे ब्राह्मणवर्जमिति [illegible] ब्राह्मणा दण्ड्या इति वा-

---

१ इमौ श्लोकौ नारद[illegible]ता परि[illegible]ष्टभागे उपलभ्येते । शारीर-श्चार्थ-[illegible]ण्डश्चेत्यस्योत्तरार्धः शारीरो दशधा प्रोक्त इति अग्रे वर्तते । ५३ । ५४ श्लोकौ । शारीरस्ताडना[illegible]रिति श्लोकेऽपि पूर्वार्धोत्तरा-र्धयोः विपर्यासो दृश्यते ।

च्यम् । तस्य प्रशंसार्थत्वात् । न चैवं षड्भिः परिहार्यो राज्ञेति मा. ण्त्स्वोक्तिवि ।ध इति वाच्यम् । अस्यैतदव्यवहित वतनेन स्वेनैव "स एष बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वा.ोवाक्यति-हासपुराणकुशलस्तदपेक्षस्त .त्तिश्चा ।चत्वारिंशता संस्कारैः सं-स्कृतः॥ कर्मस्वभिरतः षट्सु वा सामयिकाचारिकेष्वभिवि-नीत" इत्यनेन प्रतिपादितब .श्रुतविषयत्वेन ब्राह्मणमात्रविषय-त्वाभावात् । प्रतिपादितमिदमधस्तात् व्याख्यातं च ।

८ । तदेतत् ध्वनयन्विशेषमाह *वधदण्डोऽपीति । *ब्राह्म-णव्यतिरिक्तानां, ब्राह्मणव्यतिरिक्तानां तु । क्वचित्तथैव पाठः । अत्र क्वचिद्वधदण्डोऽपि शारीरो ब्रा .णव्यतिरिक्तानां नवधा दर्शित इति पाठः । स च वक्ष्यमाणाद्यव्याख्यानानुकूलः । आद्यपाठस्तु द्वितीयव्याख्यानानुकूलो दश स्थानानीत्युक्ति-स्वरससिद्धः । शारीरो दशधा प्रोक्त इति नारदसंवादी चे-ति बोध्यम् । तत्र मानमाह *यथाहेति । त्रिषु क्षत्रियवैश्यशूद्रेषु वर्णेषु यानि दण्डस्य स्थानानि तानि दश सोऽब्रवीदित्यर्थः । इदमुपलक्षणमनुलोमादेरपि । तदेतत् ध्वनयन्नाह *अक्षत इति । शारीरसकलवधदण्डरहित इत्यर्थः । *व्रजेत्, राजगृहात् पुराद्वा । *पञ्चमं,स्थानम् । अव्यवहितेनान्वेति । स्थानशब्दोऽत्र विषयपरः । तत्तत्प्रदेशे पीडनीय इति तात्पर्यम् । न च धनदण्डस्य पृथग्वि-हितत्वाच्छारीरभेदमध्ये तदुक्तिः पुनरयुक्ता ऽसम्ब. । चेति वाच्यम् । धनकृतापराधे तद्दण्ड एव नान्य इत्येतदर्थं पुनस्तदु-क्तेः । तन्मध्ये लेखस्तु तत्तुल्यत्वप्रतिपादनाय । यद्वा तत्पीडया शरीरपीडापरो ऽयमन्य एव ततो धनदण्डान्भिति प्रकारान्तरमत्र मेधातिथिनोक्तं, तत् तत एव बोध्यम् ।

१ एतच्चिह्नमध्यस्थः पाठः पुस्तकान्तरेऽस्ति ।

९ । अव्यवस्थानि ।सायोक्तेस्तात्पर्यमाह *एतेषां चेति । उपस्थादीनां मध्ये इत्यर्थः । उपस्थमत्र [illegible] सयोः मजनोत्पा- कम् । यत्र च [illegible]विशेषो नाम्नातस्तत्र यस्य य[illegible]तापराधस्स तत्रैव पीडनीयः । त[illegible]गम्यागमन उपस्थनिग्रहः । अभ[illegible]भक्षण उदरनिग्रह आहारानिवृत्त्यादिना । वाग्दण्डपारुष्ये जिह्वायाः । स च छेदः । चौर्ये हस्तयोः । पादजे बलवद्व्यतिक्रमात् पादयोः । राजदारादिदृक्षायां चक्षुषोः । तद[illegible]लेपनाद्याजिघ्रता नासिकायाः । राजादिरहस्यं भित्त्याद्यन्तरे शृण्वतः कर्णयोः । [illegible] मारणे दे[illegible]स्येति बोध्यम् ।

१० ।ननु आध्याद्यपहारे महादोषे अकिञ्चनस्य धिग्दण्डाद्युक्तम[illegible], तस्य स्वल्पापराधविषयत्वात्, अतः तत्रैव पक्षान्तरमप्याह *कर्मेति । अत्र क्रमोऽप्येवमेव बोध्यः । मेधातिथ्युक्तेः, अग्रेऽशक्तावित्युक्तेश्च । अत्र मानमाह *यथोक्तमिति । *धनेति । सर्वथा धनदानाक्षमं ज्ञात्वा स्वाधीनं कर्म कारयेदित्यर्थः । *अशक्तौ, कर्मक[illegible]णाशक्तौ। ब्राह्मणादृते इति उभयोः शेष इति ध्वनयन्नाह *ब्राह्मेति । *पुनः, तु । अधिकरणस्य शेषत्वविवक्षया षष्ठी, प्रयोज्यानीत्यस्य कर्त्तव्यानीत्यर्थो वा । *अवृत्ताविति । अवृत्तौ दुराचारेऽन्यायिनि ब्राह्मणे स्वव्यापारनिरोधान्यायप्रख्यापनादीनि कर्त्तव्यानीत्यर्थः । ब्राह्मणे इति प्रकृतत्वाल्लब्धम् । *नारदेनापीति । उक्तोक्तमित्यत्रान्वयः । वधः प्राणवियोगानुकूलव्यापारः । निर्वासनेत्यस्य नित्यसापेक्षत्वेन [illegible]रादिति विशेषणान्वितत्वेऽपि समासः । *तदङ्गेति । यदङ्गकृतोऽपराधस्तदङ्गेत्यर्थः । *वधादृते इति । एष दण्डविधिः स्मृत इत्यस्यानुषङ्गः । तदेव [illegible] *न वधमिति ।

११ । वधानुकल्पमाह *शिरस इति । अत एव—

मनुः, (अ. ८ ।)
अब्राह्मणः सङ्ग्रहणे प्राणान्तं दण्डमर्हति । (श्लो. ३५९ ।)
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥ (श्लो. ३७९)
न जातु ब्राह्मणं हन्यात्सर्वपापेष्ववस्थितम् ।
राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् ॥ (श्लो. ३८८ ।)
न ब्राह्मणवधाद् भूयानधर्मो विद्यते भुवि ।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥ इति ।
श्लो. ३८१ ।

यमोऽपि,
सर्वेषामेव वर्णानामन्योन्यस्यापराधिनाम् ।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥
जगत्सर्वमिदं हन्यात् ब्राह्मणस्य न तत्समम् ।
तस्मात्तस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥
अवध्यान् ब्राह्मणान् प्राहुः सर्वपापेष्ववस्थितान् ।
यद्यद्विभे कुशलं तत्तद्राजा समाचरेत् ॥ इति ।
सुमन्तुरपि,
नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधादिति ।
बृहस्पतिरपि,
महापातकयुक्तोऽपि न विप्रो वधमर्हति ।
निर्वासनाङ्कने मौण्ड्यं तस्य कुर्यान्नराधिपः ॥ इति ।
वधादृते ब्राह्मणस्य दण्डो भवति कर्हिचित् ।
अवध्या ब्राह्मणा गावो लोकेऽस्मिन्वैदिकी स्मृतिः ॥
इति स्मृत्यन्तरेऽपि ।
१२ । *पुरादिति । अत एव—

मनुः (अ. ९ । श्लो. २३८ । २३९)
असम्भोज्या असंयाज्या असम्पाठ्याविवाहिनः ।
चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः ॥
ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः ।
निर्दया निर्नमस्कारास्तन्मनोरनुशासनम् ॥ इति ।
१३ । *ललाटे चेति । अत एव
बृहस्पतिः,
हस्ताग्रधिलिङ्गनयनं जिह्वा कर्णौ च नासिका ।
ग्रीवा पादार्द्धसन्दंशं ललाटौष्ठं गुदं कटिः ॥
स्थानान्येतानि दण्डस्य निर्दिष्टानि चतुर्दश ।
ललाटेऽङ्को ब्राह्मणस्य नान्यो दण्डो विधीयते ॥ इति ।
१४ । *प्रयाणमिति । अत एव—
यमः,
ब्राह्मणस्यापराधेषु चतुर्ष्वेव विधीयते ।
शिरसो मुण्डनं दण्डः पुरान्निर्वासनं तथा ॥
प्रख्यापनार्थं पापस्य प्रयाणं गर्दभेन च ।
ललाटे चाङ्ककरणं कुर्याद्राजा यथाविधि ॥ इति ।
*दर्शितेति । मनुनेति शेषः । *गुर्विति ।
ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः ।
एते सर्वे पृथक् ज्ञेया महापातकिनो नराः ॥ (अ. ९ । २३५ ।)
चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम् ।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥ २३६ इत्यादिः ।
*सुरेति । सुरासम्बन्धी यो ध्वजः स कार्य इत्यर्थः ।
*श्वपदं, शुनः पदम् । अशिराः कबन्धः ।
ब्राह्मणस्य च ब्रह्महत्यागुरुतल्पसुवर्णस्तेयसुरापानेषु कब-

न्धभगश्वपदध्वजांस्तप्तेनायसेन ललाटेऽङ्कयित्वा विषयान्ते नि-र्वासनमिति बौधायनः ।

ब्राह्मणस्यापराधेषु चतुर्व्वङ्को विधीयते ।
गुरुतल्पे सुरापाने स्तेये ब्राह्मणहिंसने ॥
गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः ।
स्तेये तु श्वपदं कृत्वा शिखिपित्तेन पूरयेत् ॥
विशिराः पुरुषः कार्यो ललाटे द्विजघातिनः ।
असम्भाष्यस्तु कर्त्तव्यस्तन्मनोरनुशासनम् ॥ इति नारदः ।
व्य. प. १८ । श्लो. (४३ । ४४ । ४५ ।)

शिलाञ्जनं शिखि[illegible]वमित्यमरः । अस्यापवादोऽपि मनु-नोक्तः, (अ. ९ । श्लो. २४० । २४१)

प्रायश्चित्तं तु कुर्वाणाः सर्वे वर्णा यथोदितम् ।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहस[illegible] ॥
आगःसु ब्राह्मणस्यैव कार्यो मध्यमसाहसः ।
निर्वास्यो वा भवेत् राष्ट्रात्सद्रव्यः सपरिच्छदः ॥ इति ।

प[illegible]रच्छद[illegible]न पुत्रदारभृत्यहस्त्यश्वादिसम्पदुच्यते । स-परिग्रह इति पाठान्तरेऽप्येवम् । तदङ्गच्छेदोऽपि ब्राह्मणस्य ना-स्तीति प्रतिपादयन् विरोधं परिहरति *यत्त्विति। *आपस्तम्बे-नोक्तमिति । आपस्तम्बवचनमिति पाठान्तरम् । *न चक्षुरुद्ध-रणमिति । न चक्षुषोरुद्धरणं तस्यार्थ इत्यर्थः । [illegible] पाठः । मनुं प्रागुक्तमाह *अक्षत इति । गौतममाह *न शा-रीरो ब्राह्मणे दण्ड इति । प्रथमादि[illegible] [illegible] गौतमवचना-[illegible]ः । द्वितीयादिना—

न त्वङ्गभेदं विप्रस्य प्रवदन्ति मनी[illegible]णः ।
तपसा चेज्यया चैव ब्राह्मणः पूयते सदा ॥

इति ारातस्य,

सर्वत्र त्रयाणां वर्णानां धन ारको वधबन्धक्रियाप्रयोगो म त्स्वपि पातकेषु विवासकरणं ब्राह्मणस्य प्रायश्चित्तानि वा शोधनम् अपीड्यो हि ब्राह्मण इति शङ्खलिखितयोः, प्रागुक्तस्मृतीनां च परिग्रहः । सर्वस्व रणमपि ब्राह्मणस्य नास्ति । सद्रव्यः सपरिच्छद इत्यग्रे—

इतरे कृतवन्तस्तु पापान्येतान्यकामतः ।
सर्वस्व ारं न्ति कामतस्तु प्रवासनं ॥

इति मनूक्तेः । (अ. ९।२४२ ।)

त्रयाणां वर्णानां धनापहारवधबन्धनक्रियाविवासना करणं, न ब्राह्मणस्येति शङ्खोक्तेश्च । तत्र धनापहारः सर्वस्वाप ारो विवक्षितो वधसाहचर्यात् । शारीरस्त्ववरोधादिरिति प्रा कनारदीये वधसर्वस्व रणयोः पाठाच्चेति । तस्मात् ब्राह्मणस्य शारीरः सर्वोऽपि दण्डो नास्ति कदाचिदपि । प्रागुक्तस्मृतिकदम्बात् ।

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् ।
न हिंस्यात् ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विनः ॥

(म. अ. ४ । श्लो. १ ६ २ ।)

इति मनूक्तेश्च । धनदण्डमध्ये सर्वस्व रणं नास्ति । तदन्यधनदण्डस्त्वस्त्येव । समग्रधनमिति तु कृतसाहसविषय । ब्राह्मणे साहसः पूर्व इति मनूक्तमप्येवं । तथा च धिग्दण्डवा ण्डौ मौण्ड्यं यत्कि ि ददूषणे विवासनाङ्ककरणादिभयानानि च पर्यवसितानि । इदमपि प्रायश्चित्तानिच्छोः । तदिच्छोस्तु तदेव नैतत् । एवं बहुश्रुतस्यापि न किञ्चित् । किं तु स्वयमेव निष्कृतिं कुर्यात् । साऽपि स्वल्पा प्रायश्चि ्ये स्फुटीभ ष्यति । अत ात्रापि ाशिष्ठ े मूले उक्तम्,

(या. अ. २ । श्लो. ८१ । ८२ ।)

पृथक् पृथक् दण्डनीयाः कूटकृत्साक्षिणस्तथा ।
विवादाद् द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः ॥
यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः ।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ इति ।
स्तेयप्रकरणेऽपि, (या. अ. २ । श्लो. २७० ।)
सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत् ।
इत्युक्तम् । मनुनाऽप्युक्तं, (अ. ८ । श्लो. १२३ ।)
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥ इति ।

अस्यार्थोऽग्रे स्फुटीभविष्यति । अत्र प्रवासः ओष्ठच्छेदनं जिह्वाच्छेदनं प्राणवियोजनं चेति यथायथं बोध्यम् । विवासो निष्कासनं नग्नीकरणं वा गृहभङ्गो वेति यथायथं बोध्यम् । तत्रेयं व्यवस्था । लोभादिकारणविशेषपरिज्ञाने ऽनभ्यासे च ब्राह्मणस्यापि तत्र तत्रोक्तो ऽर्थदण्ड एव अभ्यासे त्वर्थदण्डो विवासनं च । तत्रापि जातिद्रव्यानुबन्धाद्यपेक्षया निष्कासनं नग्नीकरणं गृहभङ्गो देशान्निर्वासनं चेति व्यवस्था द्रष्टव्या । लोभादिकारणविशेषापरिज्ञाने ऽभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मणस्यापि क्षत्रियादिवदर्थदण्ड एव । महाविषये तु देशान्निर्वासनमेव । अत्राप्यभ्यासे सर्वेषामेव मनूक्तं बोध्यम् । अकिञ्चनस्य तु तस्य निमित्ततारतम्येन मौण्ड्याङ्ककरणगर्दभप्रयाणधिग्दण्डवाग्दण्डाः क्रमेण बोध्या इति । न च समग्रधनमित्यादिना ब्राह्मणस्यार्थदण्डो नास्तीति वाच्यम् । अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पेऽप्यपराधे सधनस्य नग्नीकरणमुण्डभङ्गाङ्ककरणविप्रवासनं दण्डाभावो वा प्रसज्येत यतः । चतुर्णामपीति

मा कात्स्मृतेः,

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् ।

इति स्मृतेश्चेति दिक् । एवं कर्मकारणबन्धनागा भवेत्रा-वपि ब्रा णस्य नेति सिद्धम् । तदेतदभिमेत्याह *इत्यलं प्रस-ङ्गेनेति ॥ २६ ॥

मि० बत्वाव्यभिचा त्वेन भोगस्य स्वत्वे प्रामा-ण्यमुक्तम् । भोगमात्रस्य स्वत्वव्यभिचारित्वात् की-

दृशो भोगः प्रमाणमित्यत आह ।

या० आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।

मि० स्वत्वहेतुः प्रतिग्र क्रयादिरागमः । स भोगा-दप्यधिको बलीया । स्वत्वबोधने भोगस्यागम पे-क्षत्वात् ।

यथाह नारदः । (व्य० प० १ श्लो० ८५)

अ गमेन विशुद्धेन भोगो याति प्रमाणता ।

अवि द्धागमो भोगः प्र माण्यं नैव गच्छति ॥ इति ।

न च भोगमात्रात्स्वत्वावगमः । परकीय याप्यप-रा दिनोपभोगप्रसङ्गात् । अत एव—

भोगं केवलतो यस्तु कीर्तयेन्नागमं क्वचित् ।

भो च्छलोपदेशेन विज्ञेयः स तु तस्करः ॥

इति स्मर्यते । (ना० व्य० प० १।८६)

अतश्च सागमो दीर्घकालो ने न्तरो निराक्रो नः प्रत्यर्थिप्रत्यक्षश्चेतिपञ्चविशेषणयुक्तो भोगः प्रमाणमि-त्युक्तं भवति ।

तथा च स्मर्यते,

सागमो दीर्घकालश्चाविच्छेदोऽपरवोज्झितः ।

मत्यर्थिसंनिधानोऽपि परिभोगोऽपि पञ्चधा ॥ इति ।

क्वचिदागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमे-त्याह *विना पूर्वक्रमागतादिति । पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमः तेनागतो यो भोगस्तस्माद्विना, आगमोऽभ्यधिक इति संबन्धः । स पुनरागमादभ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः । तत्राप्यागमज्ञाननिरपेक्षो न सत्तानिरपेक्षः । सत्ता तु तेनैवागम्यते इति बोद्धव्यम् । विना पूर्वक्रमागतादित्येतच्च अस्मार्तकालमभिप्रेत्यार्थम् । आगमोऽभ्यधिको भोगादिति च स्मार्तकालविषयम् । अतश्च स्मरणयोग्ये काले योग्यानुपलब्ध्या आगमाभावनिश्चयसंभवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम् । अस्मार्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासंभवादागज्ञाननिरपेक्ष एव संततो भोगः प्रमाणम् । एतदेव स्पष्टीकृतम्—

कात्यायनेन,

स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।
अस्मार्तेऽनुगमाभावात्क्रमात्त्रिपुरुषागता ॥ इति ।

स्मार्तश्च कालो वर्षशतपर्यन्तः । शतायुर्वै पुरुष इति श्रुतेः । अनागमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादिति । अतश्च वर्षशताधिको भोगः संततोऽप्रतिरवः प्रत्यक्षश्चागमाभावानिश्चिते अव्यभिचारादागमः स्वत्वं गमयति। अस्मार्तेऽपि कालेऽनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम् । अत एव—

अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

इत्युक्तम् । न चानागमं तु यो भुङ्क्ते इत्येकवचननिर्देशाद् बहून्यब्दशतान्यपीति आपशब्दप्रयोगाच्च प्रथमस्य पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यम् । द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् । न चतदिष्यते ।

आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा ।

इति नारदस्मरणात् । (नोपलब्धम् ।)

तस्मात्सर्वत्र निरागमोपभोगे अनागमं तु यो भुङ्क्ते इत्येतत् द्रष्टव्यम् । यदपि—

अन्यायेनापि यद् भुक्तं पित्रा पूर्वतरैस्त्रिभिः ।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥

इति, तदपि पित्रा सह पूर्वतरैस्त्रिभिरिति योज्यम् । तत्रापि क्रमात् त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणम् । त्रिपुरुषाविच्छिन्नायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भवात् द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् । तथा सति—

स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते ।

इति स्मृतिविरोधः । अन्यायेनापि यद् भुक्तमित्येतच्च अन्यायेनापि भुक्तमपहर्तुं न शक्यम्, किंपुनरन्यायानाश्रये इति व्याख्येयम् । अपिशब्दश्रवणात् ।

यथोक्तं हारीतेन,

यद्विनाऽऽगममत्यन्तं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम् ॥

इति, तत्र व्यत्यन्तमागमं विनेति अत्यन्तानुप- लभ्यमानमागमं विनेति व्याख्येयम्, न पुनरागम- स्वरूपं विनेति । आगमस्वरूपाभावे भोगशतेनापि न स्वत्वं भवतीत्युक्तम् । क्रमात्त्रिपुरुषागतमित्येतत् उक्तार्थम् । ननु स्मरणयोग्य काले भोगस्यागमसा- पेक्षस्य प्रामाण्यमनुपपन्नम् । तथाहि । यद्यागमः प्र- माणान्तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोग- स्य स्वत्वे आगमे वा प्रामाण्यम् । अथ प्रमाणान्तरे- णागमो नावगतः कथं तद्विशिष्टो भोगः प्रमाणम् । उच्यते । प्रमाणान्तरेणावगतागमसहित एव निर- न्तरो भोगः कालान्तरे स्वत्वं गमयति । अवगतो- ऽप्यागमो भोगरहितो न कालान्तरे स्वत्वं गमयितु- मलम् । मध्ये दानविक्रयादिना स्वत्वापगमसम्भवा- दिति सर्वमनवद्यम् ।

आगमसापेक्षो भोगः प्रमाणमित्युक्तम् । आग- मस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह ।

या० आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि यत्र नो॥२७॥

यस्मिन्नागमे स्वल्पाऽपि भुक्तिर्नो नास्ति तस्मि- न्नागमे बलं सम्पूर्णं नैवास्ति । अयमभिसन्धिः । स्व- स्वत्वनिवृत्तिः परस्वत्वापादनं च दानम् । परस्वत्वा- पादनं च परो यदि स्वीकरोति तदा सम्पद्यते नान्य- था । स्वीकारश्च त्रिविधः, मानसो वाचिकः कायि- कश्चेति । तत्र मानसो ममेदमिति सङ्कल्परूपः । वा- चिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पः

प्रत्ययः । कायिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः ।

तत्र च नियमः स्मर्यते,

दद्यात् कृष्णाजिनं पृष्ठे गां पुच्छे करिणं करे ।
केसरेषु तथैवाश्वं दासीं शिरसि दापयेत् ॥ इति ।

आश्वलायनोऽप्याह,

अनुमन्त्रयेत प्राण्यभिमृशेदप्राणि कन्यां चेति । तत्र हिरण्यवस्त्रादावुदकदानानन्तरमेवोपादानादिसम्भवात् त्रिविधोऽपि स्वीकारः सम्पद्यते । क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासम्भवात् स्वल्पेनाप्युपभोगेन भवितव्यम् । अन्यथा दानक्रियादेः सम्पूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्बलो भवति तत्सहितादागमात् । एतच्च द्वयोः पूर्वापरकालापरिज्ञाने । पूर्वापरकालपरिज्ञाने तु विगुणोऽपि पूर्वकालागम एव बलीयानिति ।

अथवा ।

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधम्—इत्युक्तम् । एतेषां समवाये कुत्र कस्य वा प्राबल्यमित्यत्रेदमुपतिष्ठते,

आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ।
आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि यत्र नो ॥ इति ।

अयमर्थः । आद्ये पुरुषे साक्षिभिर्भावित आगमो भोगादभ्यधिको बलवान् । पूर्वक्रमागताद्भोगाद्विना । स पुनः पूर्वक्रमागतो भोगश्चतुर्थपुरुषाल्लिखितेन भावि-

तादागमाद् बलवान् । मध्यमे तु भोगरहितादागमा-
त्स्तोकभोगसहितोऽप्यागमो बलवानिति ।

एतदेव नारदेन स्पष्टीकृतम्,

आदौ तु कारणं दानं मध्ये भुक्तिस्तु ..गमा ।
कारणं भुक्तिरेवैका सन्तता या चिरन्तनी॥इति ॥२७॥

बा० १ । अव्यवहितेन सङ्गत्यभावाद् व्यवहितेन सङ्गतिमाह
*स्वत्वे इति । पश्यतो ब्रुवत इत्यत्रेति भावः ।*भोगमात्रस्य, केवल-
भोगस्य । एवमग्रेऽपि । आद्यपादे शाब्दं स्वत्वोपपाद..-
रागमस्य भोगात्प्राबल्यरूपं विशिष्टभोगस्य स्वत्वे प्रामाण्यम-
भिप्रायतोऽभिधास्यन्नाह *स्वत्वेति । तत्र हेतुमाह *स्वत्वबोधेति।
भोगस्य स्वत्वे प्रामाण्यस्य प्रतिग्रहादिसापेक्षतया प्रतिग्रहादेस्तु
..त्वोत्पत्तौ भोगानपेक्षतया सापेक्षनिरपेक्षयोर्निरपेक्षं बलीय
इति न्यायेनागमस्य प्रतिग्र..धात्मकस्य ततो बलीयस्त्वमिति
भावः । अत्र मानमाह *यथाहेति । यथाकथञ्चिद..गमस्यापि
न तद्ब..त्वमित्याह *विशुद्धेनेति । कापट्यर..तेनेत्यर्थः । इद-
मेव व्यतिरेक..खेन द्रढयति *अविशुद्धेति । तदेव विशदयति
*न चेति । न हीत्यर्थः।एवं चेदम..क्रमेवेति शङ्काशयः । समा-
धत्ते *परेति । तथा च तस्य तद्व्यभिचारित्वेन तत्त्वमिति तद्यु-
क्तमेवेति भावः । अत्रापि नारदमेवाह *अत एवेति । स्मर्यते
..त्यत्रान्वयः।*केवलतः, केवलम्। सार्वविभक्तिकस्त..ि:। अस्यैव
व्यवच्छेद्यमाह *नागममिति । *कचित्, कचिदपि । यद्वा कापि
व्यवहारविषये। *भोगेति। भोगच्छलस्योपदेशेन कथनेनेत्यर्थः।
छलापदेशेनेत्यपपाठः, पौनरुक्त्यापत्तेः । फलितमा.. *अतश्चेति।
तस्य ततो बलवत्वाचेत्यर्थः । तत्र तावत्सामान्यत आह *सागम
इति । सागमः विशुद्धागमसहितः । *दीर्घेति । बहुव्रीहिः ।

एवमग्रेऽपि । आवि ः निरन्तरः । अपा वर्जितः नि ।क्राशः विच्छेनापरवोज्झित इति पाठे विच्छेदश्चापरवश्च ताभ्या ज्झि-तः रहितः । विच्छेदोऽपरवोज्झित इति पाठस्तु युक्त एव । अपरव आक्रोशः । विच्छेदरहितो निरन्तरः । अपरवरा ता निराक्रोशः । *प्रत्यर्थीति । व्यधिकरणपदो बहुव्रीहिः । अपिः प्रकृतान्यस ाचायकः ।

२ । उक्तपञ्चविशेषणानं व्यव चाथं पूर्वावतारितवचनस्यैव द्वितीयपादमभिप्रायतो व्याख्या वतरणमाह *कचिच्चेति । क-पिञ्जलाधिक णन्यायेन वक्ष्यमाणवाक्यकदम्बा रोधेन चाह *त्रयाणामिति । नित्यसापेक्षत्वा ाः । सम्भवत्येकवाक्यत्वे इति न्यायेनाह *आगम इति । तात्पर्यार्थमाह *स पुनरिति । स वक्रमागतो भोगस्त्वित्यर्थः । आगमादित्यादेस्तात्पर्यार्थमा *आगमेति । शाब्दस्तु प्राग्वत् । अत्र आगमनैरपेक्ष्यं तज्ज्ञान-नैरपेक्ष्यकृतं, न तु तत्सत्तानैरपेक्ष्यकृतमिति विशेषमा *तत्रा-पीति । आगमनिरपेक्ष इत्यत्रापीत्यर्थः । बो ध्यमित्यत्रान्वयः । तत्रापि कालक्रमोऽस्तीत्यागमसद्भाव ानापेक्षा ननु अयमागम इति ग्रहिकथा तज्ज्ञानापेक्षेति भावः ।

३ । नन्वेवमपेक्षितसत्तासद्भावे किं मानमत आह *सत्ता-त्विति । *तेनैव, विशि नोपभोगेनैव । नन्वेवमन्योन्याश्रयप्रसङ्गः । तथाहि । प्रमाणभूतेन तादृशभोगेनागमसत्ताऽवगतिः आगमस-त्ताऽवगतौ तत्सहकृतभोगस्य प्रामाण्यावधा णमिति । अत्राहुः । चिरकालोपभोगानुपपत्तिरूपार्थापत्त्याऽऽगमसत्तावगतिः । तस्या-मवगतायं त सहकृतभोगस्य प्रामाण्यनिश्चय इति साक्षात्प्रमाण-भूतेन भोगेनागमसत्ताया अनिश्चयान्नान्योन्याश्रयः । तेनैवेत्यस्य तु तद्द्वारकार्थापत्तिप्रमाणेनेवेत्यर्थ इति नासङ्गतिः । तथा च

आगमो ऽभ्यधिक इत्यत्र पादभेदेन द्विविधभोगस्य प्रामाण्यमभिमतं मुनेः। स्मार्तकालिकः अस्मार्तकालिकश्च सः।

४। तदुभयं विभज्य योग्यतया व्यवस्थापयितुमपवादविषयनिर्णयं विना नोत्सर्गविषयानिर्णय इति व्युत्क्रमणाह *विनेति। *प्रदर्शनार्थमिति। विषयेत्यादिः। तथा सति आद्यचकारस्तदर्थे। अस्य तदपवादत्वे सतीति तदर्थः। अत एव सामान्यापेक्षयोत्सर्गतेत्यर्थः *आगम इति। द्वितीयचकारस्त्वर्थे। *स्मार्तेति। स्मरणयोग्येत्यर्थः। अस्मार्तकालिको भोग आगमज्ञाननिरपेक्षः स्मार्तकालिकस्तु आगमज्ञानसापेक्ष इति भावः।

५। नन्वेकस्यैव भोगरूपप्रमाणस्य क्वचित्तत्सापेक्षत्वं क्वचिन्नेति कुतो ऽवगतमित्यतो मौलक्रमेण सान्निध्याद् व्युत्क्रमेण द्वितीयमेव सहेतुमाह *अतश्चेति। उभयोरुक्तरीत्या विषयभेदाच्चेत्यर्थः। वस्तुतः स्मृत्यभावेऽपि तत्त्वस्येष्टत्वादाह *योग्ये इति। अभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वस्य तन्त्रान्तरे प्रसिद्धत्वादाह *योग्यानुपेति। स्मरणयोग्ये काले प्रतिग्रहादिरूपस्यागमस्य प्रमितियोग्यत्वे सत्यपि तदभावादागमाभावनिश्चयः। सिद्धे च तस्मिन्केवलभोगस्य बलात्कारेणापि सम्भवेनाप्रामाण्यप्रसङ्गात्तत्सापेक्षत्वमावश्यकमिति भावः।

६। अथाद्यं तादृशमाह *अस्मार्तेति। अस्मरणयोग्य इत्यर्थः। एतद्विशेषणाभावेऽपि विशेषणान्तरसत्ता ऽपेक्षितैवेत्याह *सन्तत इति। निरन्तर इत्यर्थः। इदमुपलक्षणं दीर्घकालादेरपि। योग्यत्वे सत्यनुपलब्धियोग्यानुपलब्धिः। अस्मृतियोग्ये काले प्रतिग्रहादिरूपस्य प्रमायोग्यत्वाभावादेव योग्यानुपलब्ध्यभावः। अतस्तेनागमो नास्तीति निश्चेतुं न शक्यते। अभावग्राहकप्रमाणस्य योग्यानुपलब्धेरभावात्। एवं च पूर्वे तत आ-

गमा [illegible]वनिश्चयेन यद्यपि भोगो न प्रमाणं मूलशैथिल्या[illegible], तथापि प्रकृते [illegible] मूलशैथिल्याभावेन तन्निरपेक्षत्वमिति तादृशो भोगः [illegible]र्थः ।

७ । क्रिया प्रमाणम् । *अ[illegible]गमेति । तन्निश्चय[illegible]नाभावादित्यर्थः । ये गत्यर्थास्ते ज्ञानार्था इति भावः । *क्रमात्, प्रपितामहा[illegible] क्रमेण । स्मार्तकाल[illegible] परमावधिमाह *स्मार्तश्चेति । अ[illegible]गमस्य साकाङ्क्षत्वात्तां पूरयन् प्रागुक्तैकवाक्यतायै समतीकं तत्पदं व्याचष्टे *अ[illegible]गमेति । * इति, अस्यार्थ इति शेषः ।

८ । विशेषं वक्तुं विना [illegible] विषयं सविशेषमुपसंहरति *अतश्चेति । उक्तहेतोश्चेत्यर्थः । *वर्षेति । अनेन दीर्घकालत्वमुक्त[illegible] । सन्ततो निरन्तरः । अप्रतिरवः निराक्रोशः । *प्रत्यक्षेति । प्रत्यर्थिन इत्यादिः । भोगस्य विशेषणा[illegible]न्तरम । *आगमेति । उक्त[illegible]त्येत्यादिः । *आक्षिप्तेति । बहुव्रीहिः । [illegible] इति पाठः । ततश्च पञ्चविशेषणमध्ये सागमत्वं स्मार्तकालविषय[illegible] । अन्यचतुष्टयं तदन्यविषयमिति व्यवस्था सिद्धा । तं विशेषमेवाह *अस्मार्तेऽपीति ।

९ । अत्र मानं मनुमाह *अत एवेति । तस्यां सत्यां तस्याप्रमाणत्वादेवेत्यर्थः । अन्यथाऽनागमोपभोगे विशेषेण द[illegible]ण्डविधानं मनूक्तमयुक्तं स्यादिति भावः ।

१० । ननु व[illegible]र्षाण्यब्देत्यत्र अपिः समुच्चये, तथा चोक्तम्, अपिः सम्भावनानिवृत्त्यपेक्षास[illegible]मुच्चयगर्हाशीःसमर्थ[illegible]नप्रश्नेष्विति । तथा च व[illegible]र्षाण्यब्दशतान्यपि व्याप्यापि य उपभुङ्क्ते स दण्ड्य इत्यर्थेन एककर्तृकानेकवर्षोपभोग एव स[illegible]मुच्चयस्य सम्भवो नान्यथेत्यपिशब्दबलादुपभोक्तुरेकत्वं प्रतीयते । तथा य इत्याद्येकवचननिर्देशादपि । तथा च य एकाब्दकालमनागम[illegible] भुङ्क्ते स

दण्ड्य इत्येकस्यैव दण्ड्यत्वं न बहूनाम् । पितृपरम्परायातभोगे तु भोक्तॄणामनेकत्वादीदृशैकभोक्तुरभावेन थममनागमेनाप-भोक्तुरेकत्वेन तस्यैव चोरसदृशदण्डो न द्वितीयादेरिति, तत्र भोगस्य प्रामाण्यापत्त्या ऽनागमस्मृतिपरम्परायां भोगो न प्रमाणमिति यदुक्तं तद् क्तमित्याशयेन शङ्कते *न नागमं त्विति । यद्वा अपिशब्दः समर्थवाची, उक्तहेतोः । तथा चानागमचिरकालोपभोगे यः समर्थः स एव दण्ड्यो नान्य इत्यर्थेन प्रथमस्यैव समर्थत्वेन द्वितीयादेः परम्परायातभोगत्वे तादृशसामर्थ्याभावात्प्रथम एव दण्ड्य इत्याशयेनाशङ्कते *न चेति । *प्रयोगात्, प्रयोगाच्च । *प्रथमस्य, तस्यैव । इदमन्त्ये परम्परायातभोगविषय । अपिनैकमात्रकर्तृकानेकवर्षोपभोगसमुच्चयः । आद्ये त्वस्य साधारणत्वात् अपिना तद्वदल्पकालोपभोगसमुच्चयः ।

११ । इष्टापत्तिं निराचष्टे *न चैतदिति । नहीत्यर्थः । कारणं क्रिया । प्रमाणमिति यावत् । *नारदेति । मध्येऽपि सागमाया एव भुक्तेः प्रामाण्यबोधकनारदवचनादित्यर्थः । य इत्यत्रोद्देश्यगतत्वेन एकत्वस्याविवक्षितत्वाच्चेत्यपि बोध्यम् । तथा च सर्वत्र सागमभुक्तेः प्रामाण्यमिति द्वितीयादावपि निरागमोपभोगे दण्डो दुर्निवार इत्यनागमस्मृतिपरम्परायां सत्यां भोगो नैव प्रमाणमिति सिद्धम् । तदेतदुपसंहरति *तस्मादिति । *सर्वत्र, आदौ मध्येऽन्ते चेत्यर्थः । एवं चापिः सम्भावने, न समुच्चये नापि समर्थे इति । बह्वब्दशतव्यापित्वेन यस्य भोगः सम्भाव्यते स [illegible] तादृशोपभोगवानपि पुरुषो दण्ड्यः किमुतानागमाल्प भोगवानिति तात्पर्यार्थः ।

१२ । नन्वस्मरणयोग्यकालिकस्य पूर्वक्रमायातस्य भोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमिति यत्सिद्धान्तितं तदयुक्त-

म् । अन्यायेनापीति वाक्ये ऽन्यायेनापि पित्रा यद् भुक्तं तथा पूर्वतरैस्त्रिभिर्यद् भुक्तं तत्रोभयत्रापि प्रत्यपहारो न शक्य इत्युक्त्या ऽनागमोपभोगस्य स्मरणयोग्यकालिकस्यापि प्रामाण्यप्रतीते-त्याशयेनाह *यदप्यन्यायेनापीति । अत्रान्यायेनापीति निरागमभोगस्य प्रामाण्यप्रतिपादकं, पित्रेति स्मरणयोग्यकालिक य-ति भावः । स्मार्त्तकालिकोपभोगस्य तन्निरपेक्षस्य न प्रामाण्य-मिति भा[illegible]त्यैव परिहरति *तदपि पित्रा सहेति । अयं भावः । पित्रा यद् भुक्तमिति न पृथगन्वयो, येन पित्रुपभोगस्य स्मार्त्तकालिकत्वेन तादृशनिरागमोपभोगस्य प्रामाण्यं स्यात्, अपि तु सहार्थयोगे इयं तृतीया । तथा च पित्रा सह पूर्वतर-पुरुषत्रयोपभोगे क्रमेणाविच्छिन्ने तादृशे जाते तत् क्षेत्रादिकं त-स्मादपहर्तुं न शक्यमिति प्रागुक्तैकवाक्यतया, सम्भवतीति न्या-येन च [illegible]कवाक्यत्वेऽनेकपुरुषोपभोगस्य चिरत[illegible]कालं विनाऽस-म्भवेनास्मार्त्तकालिकोपभोगस्य प्रामाण्यमुक्तमिति न निराग-मस्य स्मार्त्तकालिकोपभोगस्य प्रामाण्यमिति ।

१३ । ननु त्रिपुरुषागतमित्यनेनानेकपुरुषोपभोगलाभेऽपि कथम[illegible]भोगलाभो ऽत आह *तत्रापि क्रमादिति । लक्षणेति भावः । शक्यार्थत्यागे बीजमाह *त्रिपुरुषेति । पात्रा-दित्वात् स्त्रीत्वाभावस्तत्रात्र च । एवं पूर्वकातीयेऽपि । प्रसङ्गा-दिति पाठः । प्रसङ्ग इति पाठे यत इत्यादिः । इष्टापत्तिं निरा-चष्टे *तथा सतीति । नन्वस्तु अस्मार्त्तकालिको भोगः प्रमाणमि-ति, तथाऽपि त[illegible]सापेक्षत्वे[illegible]पो[illegible]क्तिः कथ-मत आह *अन्यायेनापीति । चस्त्वर्थे । तत्र बीजमाह *अपी-ति । अन्यथा तदानर्थक्यं स्पष्टमेव ।

१४ । नन्वस्मार्त्तकालिकी भुक्तिरागमज्ञानं नापेक्षते तत्सत्त्वां

त्वपक्षतएवेत्युक्तम । क्तं, यद्विनाऽऽगममिति वाक्ये ऽत्यन्तमित्युक्त्वा सर्वात्मना भुक्तेस्तन्नैरपेक्ष्येण प्रामाण्यप्रतीतेरित्याशयेन शङ्कते *यच्चोक्तमिति । यद ुक्तमित्यर्थः । अत न्तमागमं विनेत्य य‍ः । प्रागुक्तरीत्या परिहरति *तत्रापीति । उ वाक्यऽपीत्यर्थः । *इति, वाक्यम् । *अत्यन्तम्, अतिशयेन। उक्तहेतोः शेषमाह *उपेति । *पुनस्त्वर्थे । आगमस्वरूपमपि विनेत्यर्थः । व्याख्येयमित्यस्यानुषङ्गः। अत्र हेतुमाह *आगमेति । यत इत्यादिः । अयं भावः । सर्वात्मना ऽऽगमज्ञानस्यास्मार्तकालिकोपभोगे ऽपेक्षाया अभावादत्यन्तं सर्वात्मना आगमज्ञानं विना ऽस्मार्त्तकालिकोपभोगे सति यद् भुक्तं वस्तु तदपाहर्तुं न शक्यमित्येव वाक्यार्थो न तु वस्तुत आगमसत्त्वां विनाऽप्युपभोगात्स्वत्वमस्तीति, येन प्रागुक्तविरोधः स्यादिति । उक्तवद्विरोधमत्रापि परिहरति *क्रमादिति । *उक्तार्थमिति । अस्मार्त्तकालोपलक्षकत्वेनोक्तार्थकामित्यर्थः । तत्सिद्धमस्मार्तकालिक उपभोग आगमज्ञाननिरपेक्षः प्रमाणं स्मार्त्तकालिकस्तु तत्सापेक्षस्तथेति ।

१५ । तत्रान्त्यमाक्षिपति *नन्विति । *प्रामाण्येति । प्रामाण्यं यदुक्तं तदनुपपन्नमित्यर्थः । अनुपपत्तेः स्फुटतया ऽभासात्तामुपपादयति *तथा हीति । यमागममपेक्षते भोगः स किं प्रमाणान्तरेणावगतो ऽथ वा नेति विकल्पं हृदि निधायाद्ये दोषमाह *यद्यागम इति । *प्रमाणान्तरेण, भोगान्येन प्रत्यक्षादिना । *तेनैव, मानान्तरावगतागमेनैव । मानान्तरावगतत्वेना- पयुक्तत्वादाह *आगमेवेति । तथा च मानान्त प्रमिते उभयत्र ज्ञापकत्वासम्भवेमा- त्पादकत्वेन चाप्रामाण्यात्तत्सापेक्षो भोगः प्रमाणमिति दुर्वचामिति भावः । द्वितीये दोषमाह *अथेति । अनवगताग े न वैशिष्ट्यासम्भवादिति भावः । प्रथमपक्षादरेऽपि का-

लविशेषे तदुपयोग इत्याह *प्रमाणान्तरेणेति । मानान्त...णैवा-गमावगमो यद्यपि तथापि तादृशागमविशिष्ट एव भोगः प्रतिग्र-हाद्युत्तरभाविनि कालान्तरेऽपि स्वत्वबोधक इति भावः ।

१६ । ननु तथाऽवगतागमेनैव स्वत्वावबोधे किं भोगेने-त्युक्तमेव अत आह*अवगतोऽप्यागम इति। *अलं,समर्थः ।उपसं-हराति *इतीति । कुत इत्यत आह *मध्ये इति ।

१७ । अव्यवहितसङ्गतिमाह * आगमेति । प्रमाणमित्य...च स्यादिति शेषः। स्तोकाऽपीत्यस्य व्याख्या *स्वल्पापीति । बल-मित्यस्य व्याख्या *सम्पूर्णतेति । ननु अस्योदाहरणं किमत आह *अयामिति। द्वितीयचस्त्वर्थे । *तत्र, तेषां मध्ये। *सविक-ल्पेति । स तु स्वीकारो मदीयमेतदित्याद्यभिवदनाविषयकस्तज्ज-न्यो वा सविकल्पक...ानरूप इत्यर्थः। यद्वा स इति भिन्नं पदं, वा-चिकस्तु स स्वीकारो यस्तादृशविकल्पात्मकज्ञानरूप इत्यर्थः । *पुनः, तु। *तत्र च, उक्तरूपकायिकस्वीकारे च। *करे, शुण्डा-दण्डे । *दापयेत्, दद्यात् ।स्वार्थे णिच् । निवृत्तप्रेषणादिति प्रकारो वा ।

१८ । *अ...मन्त्रयेतेति । प्रतिग्राह्यो यदा प्राणी बलवान् वक्तुं समर्थस्तदा तं प्रतिग्राह्यं प्रतिग्रहीता अनुमन्त्रयेत, अमुक त्वं मदीयोऽसीति । सोऽपि ब्रूयादहं भवदीयोऽस्मीति। यदा प्र-तिग्राह्यमप्राणि अभिवदनानाभिज्ञं गवादि प्राणिष्वपि कन्या च, तदुभयं प्रतिग्रहीता ऽभिमृशेत् स्पृशेत् उक्तस्थले इत्यर्थः। प्रकृत-माह *तत्रेति । तेषां मध्ये इत्यर्थः । *पुनः, तु । *तत्सहिता-दिति । कायिकस्वीकारस...तागमापेक्षयेत्यर्थः ।

१९। ननूपभोगस...तागमापेक्षयोपभोगराहितस्यागमस्य दुर्ब-लत्वे य...कमेव क्षेत्रमेकस्याधीकृत्य ...नरन्यस्याधीकृत्य पुनर-

न्यस्याप्याधीकरोति तत्र यदि दैवात् पूर्वस्य भोगाभाव उत्तरस्य तु भोगोऽस्ति तत्रापि भोगरहितागम थ दौर्बल्यं स्यात् । तथा चार्थौ प्रतिग्रहे इति वचनाविरोधः स्यादत आह *एतच्चेति । सिद्धान्तित [illegible]क्तरूपमित्यर्थः । इतीत्यस्य बोध्यमिति शेषः ।

२० । यद्यप्यागमोऽभ्यधिक इत्यस्य पूर्वमीषद्व्यवहितसङ्गत्या व्याख्यानं कृतं, तथाऽपि तन्न युक्तं, व्याख्याकृदुक्तार्थसङ्गतिलाभेऽपि मूलसङ्गत्यभावात् । किं च प्र[illegible]स्य तात्पर्यविषयतया यथाकथञ्चित् योजनेऽप्यशाब्दत्वेन स्वारस्यानावहत्वात् । अतस्तत् प्रकारान्तरेण ततोऽपि व्यवहितसङ्गत्या शब्दमर्यादया व्याचष्टे *अथवेति । *समवाये इति । एतेषां लिखितादीनां समवाये मेलने इत्यर्थः । सर्वेषां सम्भवे इति यावत् । इदमर्थमाह *आगम इति । प्राग्वत् । द्वि[illegible]र्थमाह *पूर्वेति । पूर्वक्रमायातभोगान्यभोगापेक्षयाऽऽगमो बलवानित्यर्थः । पूर्वक्रमागतभोगस्य विजातीयागमापेक्षया क्वचित् बलवत्त्व[illegible] । तत्तात्पर्यविषयमाह *स पुनरिति । स त्वित्यर्थः । अत एव वचनेऽन्यथाक्रमसत्त्वेऽपि अत्रानुवादेऽन्यथा पठितम् । एतद्वचनक्रमेण द्वितीयार्धे तात्पर्यतो व्याचष्टे *मध्यमेत्विति । अपिर्बहुभोगसाहितपरिग्र[illegible]कः । प्रतियोग्यन्तराभावेन स्वापेक्षया केवलस्वस्य प्राबल्यासम्भवेन च योग्यतयाऽभुक्तितो भुक्तेः प्राबल्यमनेन बोध्यते इति भावः । पूर्वार्धमेव समवायविषयमिति तात्पर्यम् । इतिः व्याख्यानसमाप्तौ ।

२१ । अत्र मानमाह *एतदेवेति । एतेन प्रा[illegible]क्त०व्यवच्छेदः । चतुर्थपुरुषविषयमाह *कारणं भुक्तिरिति । एवेन प्रागुक्तागमव्य[illegible]च्छेदः । सन्तता निरन्तरा । चिरन्तनी दीर्घकाला । चिरन्तनेति पाठे आर्षत्वाद्वा[illegible] ॥ २७ ॥

मि० पश्यतो ऽब्रुवत इत्यत्र विंशतिवर्षोपभोगादूर्ध्वं भूमेः धनस्यापि दशवर्षोपभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तम्। तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रामाण्यव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह।

या० आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत्।
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥२८॥

मि० येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुषः कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तमागमं प्रतिग्रहादेः इति लिखितादिभिरुद्धरेत् भावयेत्। अनेन आगमकर्तुः पुरुषस्यागममनुद्धरतो दण्ड इत्युक्तं भवति। तत्सुतो द्वितीयोऽभियुक्तो नागममुद्धरेत्। किंतु अविच्छिन्नामातरवसमन्नभोगम्। अनेन चागममनुद्धरतो द्वितीयस्य न दण्डोऽपितु विशिष्टं भोगमनुद्धरतो दण्ड इति प्रतिपादितम्। तत्सुतः तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपितु क्रमागतं भोगमात्रम्। अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दण्डो नागमानुद्धरणे न विशिष्टभोगानुद्धरणे चेत्यभिहितम्। * तत्र, तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी। तत्रापि द्वितीये गुरुस्तृतीये गरीयसीति विवेक्तव्यम्। त्रिष्वप्यागमानुद्धरणेऽर्थहानिः समानैव, दण्डे तु विशेष इति तात्पर्यार्थः।

उक्तं च नारदेन,

आगमस्तु कृतो येन स दण्ड्यस्तमनुद्धरन्।

न तत्सुतस्तत्सुतो वा भोग्यहानिस्तयोरपि॥इति॥२८॥

वा० १ । एतस्य तत्स.तत्वाद्व तेन उत्तरस.गतिमाह*पश्यत इति । *उक्तमिति । सिद्धान्तमतेनेति भावः । *तत्र, तथा सति । अन्वये दृष्टान्तः । *दर्शयितुम्, अनेनैव तात्पर्यतः प्रतिपादयितुम् । अयं भावः । आद्येन पुरुषेण प्रतिग्रहादिकमेवोपन्यसनीयं, द्वितीयेनाविच्छिन्नाप्रतिरवसमक्षत्वादिविशेषणविशिष्टो भोग एवोपन्यसनीयः, तृतीयेन समक्षत्वादिविशेषणवैशिष्ट्यं विनापि क्रमागतभोगमात्रमुपन्यसनीयमिति नियमस्यानेन विधेर्नियमातिक्रमे दण्डविधानमप्यर्थसिद्धमेवेति दण्डव्यवस्थाविधायकत्वमुपपन्नमेव । एतेनात्र वचने दण्डव्यवस्थाविध्यभावादिदमयुक्तमित्यपास्तमिति ।

२ । *स्वीकार इति । प्रतिग्रहादिनेति भावः । *अभियुक्तः, परेण । क्षेत्रादिकमिति पाठः । तथा च प्रतिग्रहादिरिति तस्योत्तरमुक्त्वा तथा कार्यमिति भावः । प्रतिग्रहादेरितीति पाठे इत्युक्त्वा तमागममर्थात् प्रतिग्रहादिकमित्यर्थः । यथाश्रुतापाठानुवादाह *भावयेदिति । प्रतिपादयेदित्यर्थः । अङ्गीकारयेन्निति वा । अस्य तात्पर्यार्थमाह * अनेन चेति ।

३ । न तत्सुत इत्यंशं शेषपूरणेन सानुषङ्गेण व्याचष्टे *तत्सुत इति । अत्र प्रागुक्तविशेषणचतुष्टयमध्ये दीर्घकालत्वमेव, तद्भिन्नमत्रेत्याह *अविच्छिन्नेति । *भोगमिति । उद्धरेदित्यस्यानुषङ्गः । एवमग्रेऽपि । *विशिष्टं भोगं, स्वोक्तम् ।

४ । तत्सुतो वेत्यत्र वा चार्थे इत्याशयेन तमंशं व्याचष्टे *तत्सुत इति । *नापि विशिष्टमिति । विशिष्टभोगानुद्धरणे चेति पाठः ।

५ । तुर्यपादमव्यवहितोभयशेषत्वेन व्याचष्टे *तत्रेति । अस्य

व्याख्या *तयोरिति । तद्व्याख्या *द्वितीयेति । सर्वं वाक्यमिति न्यायेनाह *भुक्तिरेवेति । प्रकर्षस्य प्रतियोगिसापेक्षत्वेन तत्स्वारस्येन लब्धमाह *तत्रापीति । तयोर्मध्येऽपीत्यर्थः । परमतात्पर्यमाह *त्रिष्वपीति । अस्य पूर्वतः स्वरसतो ऽलब्धत्वादत्र मानमाह *उक्तं चेति । पादत्रयस्योक्त एवार्थः ।*भोग्येति । अर्थेहा।निस्तदुद्धरणे द्वितीयतृतीययोरपीत्यर्थः । अपिनाऽऽद्यस्य समुच्चयः ॥ २८ ॥

मि० अस्मार्तस्यालोपभोगस्यागमज्ञानानेरपेक्षस्य प्रामाण्यमुक्तं, विना पूर्वक्रमागतादित्यत्र ।

तस्यापवादमाह ॥

या० योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ।
न तत्र कारणं भुक्तिरागमेन विना कृता ॥ २९ ॥

मि० यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतः परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत् । यस्मात् तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम् । पूर्वाभियोगेन भोगस्य सापवादत्वात् ।

नारदेनाप्युक्तम्, (व्य० प० १।९३)

तथाऽऽरूढविवादस्य प्रेतस्य व्यवहारिणः ।
पुत्रेण सोऽर्थःसंशोध्यो न तं भोगो निवर्तयेत् ॥इति॥२९॥

बा०१। सङ्गतिमाह *अस्मार्तेति।*पुनः, तु । यदर्थमाह *आहर्त्रादिरिति । आहर्त्रादिरभीति पाठः ।अभियोगनिमित्तसूचना-

थाहतुरुपादानं । तदसम्भवात् आदिना तत्पुत्रादिग्रहणम् ।
आर्थिकमाह *अकृतेति । परेत इत्यस्य परमित इति व्युत्पत्ति-
लभ्यमर्थमाह *परलोकमिति । तदः प्रकृतबुद्धिस्थपरामर्शित्वा-
दाह *आगममिति । अत्रोत्तरार्द्धे हेतुरिति यस्मादितिशेषेण
व्याचष्टे *यस्मादिति । तत्रेत्यस्य व्याख्या *तास्मिन्नित्यादि
आगमेन विनेत्यस्य व्याख्या *आगमेति । कृतेत्यस्य व्याख्या
*साक्ष्यादिभिरिति । *न प्रमाणमिति । अत इति शेषः । य-
स्मादित्यस्यार्थमाह *पूर्वेति । एवं चात्रागमज्ञानसापेक्षस्य तस्य
प्रामाण्यमिति भावः ।

२ *तथाऽऽरूढेति । तथाशब्दः पूर्वसमुच्चये । आरूढविवा-
दस्य प्राप्तविवादस्य व्यवहारिणः प्रेतस्य मृतस्य सम्बन्धिना पु-
त्रेण सोऽर्थो विवादास्पदीभूतः संशोध्यः आगमेन संसाध्यो
यतस्तमर्थं भोगो न निवर्तयेत् प्रत्यावर्त्तयेत् । भोगस्तत्र प्रमाणं
न भवतीति यावदित्यर्थः ॥ २९ ॥

मि० अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते व्यवहा-
रो न निवर्तते इति स्थितम् । निर्णीतेऽपि व्यवहारे
स्थिते च व्यवहर्तरि वा व्यवहारः क्वचित्पुनः प्रवर्तते
क्वचिन्न प्रवर्तते इति व्यवस्थासिद्धये व्यवहारदर्शिनां
बलाबलमाह ॥

या० नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ॥ ३० ॥

नृपेण राज्ञा अधिकृताः व्यवहारदर्शने नियुक्ताः
"राज्ञा सभासदः कार्या" इत्यादिनोक्ताः । पूगाः स-
मूहाः, भिन्नजातीनां भिन्नवृत्तीनां एकस्थाननिवा-

सिनां, यथा ग्रामनगरादयः । श्रेणयो नानाजातीना-
मेकजातीनामपि एकजातीयकर्मोपजीविनां संघाताः,
यथा हेडाबुकानां ताम्बूलिककुविन्दचर्मकारादीनां
च । कुलानि ज्ञातिसम्बन्धिबन्धूनां समूहाः । ए-
तेषां नृपाधिकृतादीनां चतुर्णां पूर्वं पूर्वं यथा-
त्पूर्वं पठितं तत्तद् गुरु बलवज्ज्ञेयं वेदितव्यम्,
नृणां व्यवहर्तॄणां व्यवहारविधौ व्यवहारदर्शनका-
र्ये । एतदुक्तं भवति । नृपाधिकृतैर्निर्णीते व्यवहारे
पराजितस्य यद्यप्यसंतोषः कुदृष्टबुद्ध्या भवति त-
थापि न पूगादिषु पुनर्व्यवहारो भवति । एवं पूग-
निर्णीतेऽपि न श्रेण्यादिगमनम् । तथा श्रेणिनिर्णीते
कुलगमनं न भवति । कुलनिर्णीते तु श्रेण्यादिगमनं
भवति । श्रेणिनिर्णीते पूगादिगमनम् । पूगनिर्णीते
नृपाधिकृतगमनं भवतीति ।

नारदेन पुनर्नृपाधिकृतैर्निर्णीतेऽपि व्यवहारे नृप-
गमनं भवतीत्युक्तम्, (अ० १। श्लो० ७)

कुलानि श्रेणयश्चैव गणाश्चाधिकृता नृपः ॥
प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम् ॥ इति ।

तत्र च नृपगमने सोत्तरसभ्येन राज्ञा पूर्वैः सभ्यैः
सह सपणे व्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवादी
पराजितस्तदाऽसौ दण्ड्यः । अथासौ जयति तदाऽधि-
कृताः सभ्या दण्ड्याः ॥ ३० ॥

बा० १। अव्यवहितेन सङ्गतिमाह *अनिर्णीतेति ।*निवर्तते । सं-
साध्यते इति पाठान्तरम् । तेन नापगच्छति भवतीत्येवेत्यर्थः ।
*व्यवेति । नरित्यादिः । विचित्रया पाठ एव । मूले अथशब्दः चार्थे ।

नृपेणाधिकृता इति भि मित्याशयेन वाक्यार्थ ानोपयागितया आदौ पद ानाह *नृपेणेति । प्रकृतयोग्यतयाऽऽह *व्यवेति । ते के इत्यत आह *राज्ञेति । आका ाशान्तये ऽसाङ्कर्याय चाह *भिन्नेति । *नानेति । उभयोः सङ्घाता इत्यत्रान्वयः । इदमुभयं स्वरूपकीर्त्तनमिति सूचयन् आवश्यकम् उभयशेषमाह *एकजातीयेति । तत्राद्यादा रणं, *हेडेति । देशाद्देशातरं गत्वा प्रस्थाप्य वा ऽश्वविक्रेता । हेडाबुकाः । गुर्जरदेशे प्रसिद्धोऽयं तत्र शब्दः । द्वितीयोदाहरणं *ताम्बूलिकेति । तद्विक्रेतेत्यर्थः । कुविन्दस्तन्तुवायः । आदिना तक्षादयः । सङ्घाता इत्यस्या पक्षः । सम्बन्धी जामात्रादिः ।

२ । अथ वाक्यार्थमाह *एतेषामिति । *चतुर्णां, मध्ये इति शेषः । पूर्वत्वं न कारणत्वादिकृतं किन्तु पाठकृतमित्याह *यद्यत्पूर्वं पठितमिति । कुत्रेत्याह *नृणामिति । प्रकृतयोग्यत्वादाह *व्यवेति । योग्यतया व्यवहारशब्दो दर्शनपरः कर्मक्तिप्रत्ययान्तो विधिशब्द इत्याह *व्यवहारेति ।

३ । अवतरणोक्तं स्पष्टयितुं तात्पर्यार्थमाह *एतादिति । कुह ेत्यनेन वास्तवासन्तोषबीजनिरासः जातव्यव ारस्य यथार्थत्वं च सूचितम् । व्युत्क्रमेण व्यतिरेकमाह *कुलेति ।

४ । विशेषं स्वल्पमाह *नारदेति । *पुनः, तु । यद्यप्यत्र गणा इति पठितं, मूले च पूगा इति, अस्ति च तयोर्भेदः, तत्र पूगस्वरूपमुक्तं, सर्वेषां हीनवर्णानां सङ्घातो गणः, अत एव पूगश्रेणिगणादीनामिति प्राक् उक्तं, तथापि तत्स्थाने मुनिद्वयप्रामाण्यादुभयोर्विकल्पेन ग्रहणम्, अत एव चतुर्णामिति व्याख्यातृदुक्तिसङ्गतिः । यद्वा गणाश्चेति चेन तदग्रे पूगानां समुच्चयः । मूलेऽथशब्दस्य चार्थस्य पूगा इत्यत्रान्वयेन तदग्रे तेन तेषां

समुच्चय इति एकवाक्यतैव । नारदेन पुनरित्यादि वदता व्याख्याकृता भाष्यकचतुष्टयं नाभिमतमिति सूचितमेवेति बोध्यम् । नृप इति पाठः । *प्रतिष्ठा इति । व्यवहारदर्शनानां स्थानानीत्यर्थः ।

५ । तथा सति विशेषमाह *तत्र चेति । तेषां मध्ये इत्यर्थः । *सोत्तरेति । सभायां साधुः सभ्यः उत्तरश्चासौ सभ्यश्च तत्सहितेनेत्यर्थः । पूर्वसभ्यतो भिन्नोत्कृष्टसभ्ययुक्तेनेति यावत् । *सपणे इति । उभयकारितपणसहिते इत्यर्थः । अयमेव पूगाद्यर्थः पूर्वत्रापि ज्ञेयः ॥ ३० ॥

मि० दुर्बलैर्व्यवहारदर्शिभिर्दृष्टो व्यवहारः परावर्तते प्रबलदृष्टस्तु न निवर्तते इत्युक्तम् ।

इदानीं प्रबलदृष्टोऽपि व्यवहारः कश्चिन्निवर्तते इत्याह ॥

या० बलोपाधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत् ।
स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा ॥ ३१ ॥

मि० बलेन बलात्कारेण उपाधिना भयादिना विनिर्वृत्तान्निष्पन्नान्व्यवहारान्निवर्तयेत् । तथा, स्त्रीभिः नक्तं रात्रावस्त्रीभिरपि अन्तरागारे गृहाभ्यन्तरे बहिः ग्रामादिभ्यः शत्रुभिश्च कृतान् व्यवहारान्, निवर्तयेदिति संबन्धः ॥ ३१ ॥

बा० १ । उपसंहरन्नव्यवहितसङ्गतिमाह *दुर्बलैरिति । *कश्चित्, न सर्वः । बलं चोपाधिश्च ताभ्यां विनिर्वृत्तानिति व्युत्पत्तेराह *बलेनेति । उपधीति पाठान्तरम् । शत्रुशब्दान्तद्वन्द्वे कृतशब्देन शेषषष्ठ्या समासे आद्यन्तयोस्तत्र कर्तृत्वेनान्वयो मध्यमानामधिकरणत्वेन फलतीत्याह *तथा स्त्रीभिरिति । अपौनरुक्त्याया

ह *अन्तीभिरपीति । मध्ये इत्यर्थकान्तरशब्देन ष ासमासे राजदन्तादित्वात्परनिपात इत्याह *गृहाभ्यन्तरे इति । तथाऽर्थमाह *चेति । कृतांश्चेत्यर्थः । मध्यमणिन्यायेनान्वयादाह *निवर्तयेदिति ॥ ३१ ॥

मि० अपिच ।

या० मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः ।
असंबद्धकृतश्चैव व्यवहारो न सिध्यति ॥ ३२ ॥

मि० मत्तो मदन‌ ‌ण । उन्मत्त उन्मादेन पञ्चविधेन वातपित्तश्लेष्मसंनिपातग्रहसंभवेनोपसृष्टः । आर्तो व्याध्यादिना । व्यसनमिष्टवियोगोऽनिष्टप्राप्तिः तज्जनितं दुःखं तद्वान् व्यसनी । बालो व्यवहारायोग्यः । भीतोऽरातिभ्यः । आदिग्रहणात्पुरराष्ट्रादिविरुद्धः ।

पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विसर्जितः ।
अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः ॥

इति मनुस्मरणा‌ ।

एतैर्योजितः कृतो व्यवहारो न सिद्ध्यति । अनि‌ ‌क्तासंबद्धकृतोऽपि व्यवहारो न सिद्ध्यतीति संबन्धः ।

यत्तु स्मरणम्,

गुरोः शिष्ये पितुः पुत्रे दम्पत्योः स्वामिभृत्ययोः ।
विरोधेऽपि मिथस्तेषां व्यवहारो न सिद्ध्यति ॥ इति,

तदपि गुरुशिष्यादीनामात्यान्तिकव्यवहारप्रतिषेधपरं न भवति । तेषामपि कथंचिद्व्यव‌ारस्येष्टत्वा-

त्। तथाहि। "शिष्यशिष्टिरवधेन, अशक्तौ रज्जुवेणु-विदलाभ्यां तनुभ्याम्, अन्येन घ्नन् राज्ञा शास्य" इति गौतमस्मरणात्, नोत्तमाङ्गे कथंचनेति मनुस्मरणाच्च, यदि गुरुः कोपावेशवशान्मर्यादातिक्रमेण दण्डेनोत्तमाङ्गे ताडयति तदा श्रुतिव्यपेतेन मार्गेणाधर्षितः शिष्यो यदि राज्ञे निवेदयति तदा भवत्येव व्यवहारपदम्।

तथा,

भूर्या पितामहोपात्तेत्यादिवचनात् पितामहोपात्ते द्रव्यादौ पितापुत्रयोः स्वाम्ये समाने यदि पिता विक्रयादिना पितामहोपात्तं द्रव्यादि नाशयति तदा पुत्रो यदि धर्माधिकरणं प्रवेशयति तदा पितापुत्रयोरपि भवत्येव व्यवहारः।

तथा, (याज्ञ. २।१४७)

दुर्भिक्षे व्याधिकार्ये च व्याधौ संप्रतिरोधके।
गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हति॥

इति स्मरणात् दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भर्ता व्ययीकृत्य विद्यमानधनोऽपि याच्यमानो न ददाति तदा दम्पत्योरपीष्यते एव व्यवहारः।

तथा। भक्तदासस्य स्वामिना सह व्यवहारान् वक्ष्यति। गर्भदासस्यापि गर्भदासादीनधिकृत्य—

यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात्।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च॥

इति नारदोक्तत्वात् (व्य. प. ५।३०) तन्मोचने पुत्रभागादाने च स्वामिना सह व्यवहारः केन वार्यते। तस्मात् दृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार,

इति प्रथमं शिष्यादयो निवार्णीयाः राज्ञा व्यवहारेषु, इति गुरोः शिष्य इत्यादेः श्लोकस्य तात्पर्यार्थः। अत्यन्तनिर्बन्धे तु शिष्यादिनामन्यप्रकाररीत्या प्रवर्तनीयो व्यवहारः। यदपि—

एकस्य बहुभिः सार्द्धं स्त्रीणां प्रेष्यजनस्य च।
अनादेयो भवद्वादो धर्मविद्भिरुदाहृतः॥

इति नारदवचनम्। तत्रकथापि—

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः।(याज्ञ.२।१८७)

तथा, एकं घ्नतां बहूनां चेत्यादिस्मरणादेकार्थैर्बहुभिः सार्द्धं व्यवहार इष्यते एवेति भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहारो न भवतीति द्रष्टव्यम्। स्त्रीणामित्यपि गोपशौण्डिकादिस्त्रीणां स्वातन्त्र्याद्व्यवहारो भवत्येवेति। तदन्यासां कुलस्त्रीणां पतिषु जीवत्सु तत्पारतन्त्र्यादनादेयो व्यवहार इति व्याख्येयम्। प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य च स्वामिपारतन्त्र्यात् स्वार्थव्यवहारेऽपि स्वाम्यनुज्ञयैव व्यवहारो नान्यथेति योजनीयम्॥ ३२॥

बा० १।*अपि चेति।अन्योऽपि कश्चित्॥ व्यवहारो निवर्त्तते इत्याहेत्यर्थः। वाक्यार्थबोधायादौ पदयोजना *मत्त इत्यादि। आर्तादिभीतान्तद्वन्द्वं कृत्वा पुनस्तेन मत्तोन्मत्ताभ्यां कृत्वा बहुव्रीहितत्पुरुषौ कार्यौ। करणेऽनीयर्। पञ्चविधेनेत्यस्य व्याख्या *वातेति। *सम्भवेनेति। ग्रहान्तपञ्चकजन्येनेत्यर्थः। कारणभेदेन कार्यभेदात् पञ्चविधत्वम्। *जानिवदिति। एतदन्यतरजनितमित्यर्थः। *व्यवेति। न तु स्तनन्धयादिरेवेति भावः। राष्ट्रादी-

त्यादिपदग्राह्यं वचने एव स्फुटम् । *पुरेति । पुरविरुद्धो राष्ट्रविरुद्धश्चेत्यर्थः । यः एवं स वादः तद्वादे उदाहृतः कथितो भवेदित्युत्तरार्धार्थः । एवं च तस्यार्थिकी निवृत्तिर्बोध्या ।

२ । वाक्यार्थमाह *एतैरिति । असम्बद्धकृत इत्यंशम् अनियुक्तपदाध्याहारेण व्याचष्टे *अनियुक्तासम्बद्धेति । अनियुक्तत्वेनाप्रेषितत्वेन प्रकृतव्यवहारासम्बद्धो यस्तत्कृत इत्यर्थः । चार्थमाह *अपीति । इतिरर्थसमाप्तौ ।

३ । ननु मत्तादिकृतव्यवहारो न सिध्यतीत्यत्र मत्तादिग्रहणमुपलक्षणं न वा । आद्ये ऽन्यकृतव्यवहारासिद्धेरपि संग्रह इति न स्मृत्यन्तरविरोध इति फलं यद्यपि, तथाप्येवकारासङ्गतिः । द्वितीये एवकारबलेनास्य नियामकत्वलाभेनैवकारसङ्गति साफल्यत्वेऽपि स्मृत्यन्तरविरोध इति संशये श्रुतैवकारबलेनाद्यस्य दुर्वचत्वेन द्वितीयमेव वाच्यम् । यद्यप्याद्येऽप्यादिश्रुतिरस्ति तथापि सर्वथा ऽनन्यगतिकसंग्रहेणैव तत्साफल्ये सगतिकसङ्ग्रहो नेति तात्पर्यार्थः । तथा सति वचनान्तरविरोधः । तेनान्यकृतव्यवहारस्यासिद्धिप्रतिपादनेन नियमस्य दुर्वचत्वादित्याशयेन शङ्कते ।

४ । यत्त्विति । विरोधे इति पूर्वान्वयि । मिथ इत्युत्तरान्वयि । गुरोः शिष्ये विरोधे त्वित्यादौ सति तेषां गुरुशिष्यादीनां मिथो व्यवहारो न सिध्यतीत्यर्थः । अपिनैतज्जातीयस्मृत्यन्तरसमुच्चयः । त्वर्थे वा सः । आत्यन्तिकत्वं प्रतिषेधविशेषणम् । *कथञ्चित्, केनचित्प्रकारविशेषेण । तथा च तत्र चार्थस्तुः सिध्यतीत्यग्रे योज्यः । तेन सिद्धिसमुच्चयः । तयोर्व्यवस्था तु वक्ष्यमाणप्रकारेण । यद्वा तुर्मिथ इत्यग्रे योज्यः । मिथस्तु मिथ एव न सिध्यति किं तु व्यवहारदार्शिभिः सिध्यतीत्यर्थः । यद्वा

गृहीतक्षण्यमूकक्तुर्यश्रुत एव । तथा च ⁻ लवाक्यस्वंवका-रस्य न सिध्यतीत्यग्रे योजनं कृत्वा मत्तादिकृतो व्यव हारः सर्वात्मना न सिध्यत्येवेत्यर्थः । अयं रूरीत्या कृतः सिध्यत्यन्यथा नेति । यद्वा यथाश्रुत एव सः । तदन्तं चावृत्त्या भिन्नं वाक्यम् । यद्यपि वक्ष्यमाणरीत्या न सिध्यति तथापि प्रबलविरोध वकदुराग्रहे तु सिध्यत्येवेत्यर्थः इति न कोऽपि दोष इति भावः ।

५ । नन्वयाग्यत्वादेतेषां व्यवहार एव नोचितो ऽसम्भवश्च तस्य अतस्तमुपपादयति * तथाहीति । तत्र तावत् गुरुशिष्ययार्व्यवहारस्थलमाह *शिष्येति । स्मृतिव्यपेतमार्गप्रदर्शनाय हेतुद्वयमिदम् । शिष्टिः शिक्षा । * अवधेन,अताडनेन। अशक्तौ तथा कर्तुं शक्यते न चेत्तदा सूक्ष्मेण रज्जुखण्डेन वेणुखण्डेन च तच्छिक्षा कार्या । अन्येन उक्तभिन्नेन स्थूलेन रज्जुखण्डेन वेणुखण्डेन च घ्नन् ताडयन् गुरू राज्ञा शास्यः शिक्षणीय इत्यर्थः । यदीत्यनेनान्यथा व्यवहारपदत्वाभावः सूचितः । एवमग्रेऽपि ।

६ । पितापुत्रयोस्तदाह *तथेति ।

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव च ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चैवहि ॥ (याज्ञ.२।१२१)

इति वक्ष्यमाणवचनादित्यर्थः । साम्ये हेतुरयम् । समाने सतीति शेषः । * धर्मेति । धर्मनिर्णयस्यानामित्यर्थः ।

७ । दम्पत्योस्तदाह * तथेति । *सम्प्रतीति । सर्वस्वहरणं कृत्वा दुर्गादौ परबलैर्निरोधकरणं सम्प्रति निरोधकम् । * नाकाम इति । मारणकस्यलान्यतमे गृहीतं स्त्रीधनं पुनस्तस्यै दातुमनिच्छुश्चेन्न दद्यादित्यर्थः । व्यतिरेके हेतुरयम् । विद्यमानेत्यादिविशेषणद्वयेन तदभावे तदभावः सूचितः । अपिर्मिथः समुच्चये।

८ । दासभेदा वक्ष्यन्ते भक्तदासगर्भदासादयः, तत्राद्ये तयोस्तदाह *तथेति । भक्तमन्नम् । "भक्तमन्धोऽन्नमिति" अमरः । द्वितीये तयोस्तदाह *गर्भेति । अयं द्विविध इत्यन्यत्र स्पष्टम् । स्वामिना सहेत्यप्रेतजनान्वयः । *येषामिति । एषां गर्भदासादीनां मध्ये यः कश्चिदित्यर्थः । *विमुच्यते, मोचनीयः । *लभेत, प्रापयेत् । *तत्, तस्माद्दासत्वात् । नन्वेवं तस्य का गतिरत आह *तस्मादिति । प्रथममित्युक्तिस्वारस्यादाह *अत्यन्तेति । अग्रे गर्भदासादौ द्वितीयपक्षे तु त्वित्यर्थः ।

वमन्यविरोधं परिहरति *यदप्येकस्येति । वाद इत्यस्य त्रिभिरन्वयः भागभेदकवाक्यतया । तत्राद्यस्यार्थमाह *तत्रैकेति । तेषां त्रयाणां मध्ये इत्यर्थः । अपिनाऽनेकसमुच्चयः । एकार्थैरित्यत्र क्रमेणान्वयः । *गणेति ।

सवस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् । (याज्ञ० २।१८७)

इत्युत्तरार्धम् । व्यवहारादृष्टि शेषः । स्मृत्यन्तरमाह *तथेति । *एकमिति । यथोक्तात् द्विगुणो दम इति वचनशेषः । गणद्रव्यहार्यादेः सर्वस्वहरणादिविधानमेकस्यान्यां बहूनां च द्विगुणदण्डविधानं स्मृतावुक्तम् । इदमुभयमपि व्यवहारत्वेन तादृशापराधवतामेव भवतीति व्यवहारोऽस्तीति भावः । भागभेदकमेव विशेषमाह *एकार्थैरिति । अत एवोक्तनारदाभिप्रायमाह * भिन्नार्थैरिति । भागभेदकयुक्तेराह * युगपदिति । किं त्वीदृशविषये क्रमेण व्यवहार इति भावः । द्वितीयतात्पर्यं भागभेदकमाह *स्त्रीणामिति । इति व्याख्येयमित्यत्रान्वयः । गोपशौण्डिकेत्यवक्ष्यमाणभेदकेराह * गोपेति । तत्रापि विशेषं सूचयन्नाह *पतिष्विति । तथा च तदभावे तत्रापि व्यवहार उपादेय एवेति भावः । अयं च तस्याः पत्या सार्कं न किंत्वन्येनेति बोध्यम् । एव-

अंशेऽपि। ।तीयतात्पर्यमाह * प्रेष्येति । इति योजनीयमित्यग्रि-मेणान्वयः । * स्वार्थेति । भृत्यार्थेत्यर्थः अपिना तदर्थ-व्यवहारस-च्चयः । तस्मादुक्त एवाशय इति न कोऽपि दोषइति तत्त्वम् ॥ ३२ ॥

मि० प ।वत्यं व्यवहारमुक्त्वा इदानीं प ।वत्यं ।व्यमाह ।

या० प्रनष्टाधिगतं देयं नृपेण धनिने धनम् ।
विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥ ३३ ॥

मि० प्रनष्टं हिरण्यादि शौल्किकस्थानपाला-दिभिरधिगतं राज्ञे समर्पितं यत् तत् राज्ञा धनिने दातव्यम्, यदि धनी रूपसंख्यादिभिर्लिङ्गैर्भावयति । यदि न भावयति तदा तत्समं दण्ड्यः । असत्यवा-दित्वात् । अधिगम-्च स्वत्वनिमित्तत्वा- स्वत्वे प्राप्ते तत्पर। ।तेरनेनोक्ता ।

अत्र च कालावधिं वक्ष्यति, (याज्ञ० २।१७३)
शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् ।
अर्वाक् संवत्सरात् वामी हरेत परतो नृपः ॥ इति ।
मनुना— (अ० ८।३०)
पुनः संवत्स त्रयमवधित्वेन निर्दिष्टम्,

प्रनष्ट वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् ।
अर्वाक् त्र्यब्दाद्धरे- वामी परतो नृपतिर्हरेत् ॥ इति।

तत्र -त्सरत्रयपर्यन्तमवश्यं र-णीयम् । तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत्तदा -त्स्नमेव दद्यात् ।

यदा पुनः संवत्सरा ध्वम ात तदा किञ्चिद्भागं रक्षण ल्यं गृ त्वा शेषं ामिन दद्यात् ।

यथाह, (मनु० ८।३३)

आ दीताथ षड्भागं प्रनष्टाधिगता पः ।

दशमं द्वादशं वापि सतां धर्मम स्मरन् ॥ इति ।

तत्र प्रथमे वर्षे त्स्नमेव दद्यात् । द्वितीये द्वादशं भागं तृतीये दशमं चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात् । राजभागस्य चतुर्थोऽशोऽधिगन्त्रे

दातव्यः । स्वाम्यनागमे तु कृत्स्नस्य धनस्य चतुर्थमंशमाधिगन्त्रे दत्त्वा शेषं राजा गृह्णीयात् ।

यथाह गौतमः,

प्रनष्टस्वा धिगम्य संवत्सरं राज्ञा रक्ष्यमूर्ध्वमाधिगन् र्थोऽशो राज्ञः षामिति ।

अत्र संवत्स ामित्येकवचनमविवक्षितम् । राजा त्र्यब्दं निधा दिति स्म णात् । हरेत परतो नृप त्येतदपि स्वामिन्यन गते त्र्यब्दादूर्ध्वं व्ययीकरणाभ्यनुज्ञा । ततः प मागते तु स्वामिनि व्ययीभूतेऽपि द्रव्ये राजा स्वांशमवतार्य तत्समं दद्यात् । एतच्च ि रण्यादिविषयम् । गवादिविषये वक्ष्यति, "पणानेकशफे दद्यात्" इत्यादिना ॥ ३३ ॥

बा० १ । प्रसङ्गसङ्गतिमाह *प ावत्यमिति । प्रनष्टेति कर्मधारयो न तु पञ्चमासम स इत्याह *प्रनष्टमिति । धनमित्यस्यार्थमा *हिरण्यादीति । *शौल्किकेति । द्वन्द्वं कृत्वा बहुव्रीहिः कार्यः । असमर्पणे तेषां दण्डसत्त्वादाह *राज्ञे इति । उत्तरार्धसूचितमार्थिकं पूर्वशेषमाह *यदीति । उत्तरार्धार्थं कथयन् चेदर्थमाह *यदि

चेति । लिङ्वर्थोऽधिकारिण इत्याह *भावयतीति । *तत्समं, प्रनष्टाधिगतद्रव्यसमम् । पूर्वं नदीयमस्मादिति निवेद्य पश्चाद्यदि न साधयति तदा स दण्ड्य इत्यर्थः । तदेव ध्वनयन्ना *अस-त्येति । ननु प्रनष्टाधिगतस्य परकीयत्वेनादेयत्वाद्देयमित्युपदेशो व्यर्थ एव अत आह *अधिगमस्येति।द्रव्यनाशानन्तरं तदलब्ध्वा स्वामिनो देशान्तरगमने विशेषमाह *अत्र चेति । प्रनष्टाधिगत-स्य प्रतिदानविषय इत्यर्थः । अत्र सर्वत्र प्रनष्टेति दन्त्यपाठः । नशेरिति तन्निषेधात् । तदेव मूलोक्तमाह *शौल्किकेति । शुल्कं गृह्णन्ति ते शौल्किकाः । स्थानपालाः तन्मात्ररक्षकाः । *नष्टेति । नष्टं सत् अधिगतं राज्ञे समर्पितमित्यर्थः । यद्वा नष्ट-मपहृतं चाधिगत्य राज्ञे समर्पितमित्यर्थः ।

२ । अत्र विशेषमाह *मनुना पुनरिति । मनुना त्वित्यर्थः । मनुमतमाह *प्रनष्टेति । स्वामिनः सकाशात्प्रनष्टं प्रनष्टस्वामिकम् । राजदन्तादिः । स्वार्थे कः।अत एव पूर्वैकवाक्यता उत्तरार्द्धसङ्गति-श्चेति भावः । यद्वोक्तरीत्या तदनन्तरं देशान्तरगतस्वामिकमिति यथाश्रुत एवार्थः । हृतं नष्टं च लभ्यते इतिवत् प्रयोग इति न कोपि दोषः । एवं सति प्रसक्तविरोधपरिहाराय व्यवस्थां कथयन्नादौ मूलतात्पर्यमाह *तत्रेति । तथा सतीत्यर्थः । *अव-श्यमिति । तन्मध्ये व्ययं न कुर्यादित्यर्थः । निधापयेदित्यु-क्तिस्वारस्यादिति भावः । *तत्र, तावत्पर्यन्तरक्षणीये।तस्मिन्स-ति मूलतात्पर्यमाह *यदीति । पुनस्त्वर्थे । अत्र मानमाह *यथा-हेति । अस्य पक्षत्रयस्य व्यवस्थां कथयितुमादौ मूलोक्तमेवाह *तत्रेति । तेषां मध्ये इत्यर्थः। अन्यथा तदानर्थक्यं स्पष्टमेव । द्वादश-भागमित्यादेर्गृहीत्वेत्यादिना अन्वयः । विशेषमाह * राजभागे-ति । * चतुर्थोऽश इति । अयं च विशेषो द्वितीयादौ न त्वाद्ये ।

तत्र राजभागस्यैवाभावः । एतदर्थमेवचतुर्थ इत्युक्तम् । अन्यथा चतुर्थोऽंश इत्येव वदेत् । राजभागसंबन्धिचतुर्थांशदानमित्यर्थे तु आददीताथ षड्भागमिति वचनाद्विरोधः स्यात् । तथा च प्रनष्टाधिगतं द्रव्यं यः शौल्किकादी राज्ञे समर्पयति तस्मै, राज्ञो यो भागः षष्ठादिरूपः तच्चतुर्थांशः तत्तुल्य उद्धृतषष्ठादिभागाद्धनादवशिष्टाद्दातव्यो रक्षणीय न तु राज्ञोंऽशात् तद्विरोधापत्तेरित्यर्थो बोध्यः । उभयत्र चतुर्थपादार्थतात्पर्यं वक्तुं विशेषमाह *स्वाम्यनेति । *अधिगन्त्रे, शौल्किकप्रभृतये । अत्र सर्वत्र मानमाह * यथाहेति । *प्रनष्टेति । पूर्ववत् । *ऊर्ध्वमधिगन्तुरिति । संवत्सरादित्यशेषः । तथा च संवत्सरानन्तरं स्वामिन्यागते ऽधिगन्तुश्चतुर्थोऽंशो भवति, शेषं राज्ञो भवतीत्यर्थः । तत्राधिगन्त्रे चतुर्थांशदाने इयान्भेदः, स्वामिन्यागते प्रागुक्तरीत्या राज्ञः षष्ठांशमुद्धृत्यावशिष्टधनाद्राज्ञः चतुर्थांशसमभागो देयः, अनागते तु तस्मिन्सर्वस्य धनस्य चतुर्थांशो देय इति । एवं राज्ञः शेषमित्यत्रापि तस्मिन्नागते पूर्वोक्तरीत्या षष्ठादिभागरूपम्, अनागते तु तस्मिन्सर्वधनं दत्तचतुर्थांशकमिति भेदो बोध्यः । एवं च राज्ञ इत्यस्य मध्यमणिन्यायेनान्वयो बोध्यः ।

३ । मनुतात्पर्यविरोधं परिहरति *अत्रेति । गौतमीये इत्यर्थः । उपेक्ष्यविशेषणत्वादिति भावः । तथा सत्यनतिमसङ्गाय तन्मूलं तदुक्तमेव हेतुमाह * राजेति ।

४ । नन्वेवं सर्ववचनाना व्यवस्थायां पादत्रयार्थलाभेऽपि मनुगौतमयोस्तुर्यपादार्थस्य निर्विषयत्वापत्तिरेव, चतुर्थादिष्वपि अवशिष्टदानस्य स्वामिने प्रतिपादितत्वादित्यत आह *हरेतेति । अपिना मनूक्तचतुर्थपादसमुच्चयः । यद्यप्यत्र संवत्सरादिति प्रक्रान्तं तथाप्युक्तरीत्या मन्वेकवाक्यतयैवाह * त्र्यब्दादि-

ति। तथा चात्र परत इत्यत्र व्यब्दादिति शेषो बोध्यः। ननु ...ागमने कथं ... आह *आगते त्विति। *अवतार्य, ...कृत्य। तस्मिन्प्रक्षिप्य। *तत्समम्, अवशिष्टतुल्यं। तथा च राजा स्वांशं षष्ठार्यंशं तथा कृत्वा तत्समं यावदधिगन्तृहस्ता... गृहीतं तत्संख्याकं स्वामिने ...त्यर्थः। तत्रापि न तज्जन्यद्रा... द्याद्पि तु ...लमात्रमव।"हरेत परत" इत्यनेन व्ययवत् व्यवहारस्यानुज्ञाना...। तथा च व्ययीकरणे व्यवहारे सति द्रा...द्रव्येण तत्समत्वं तदभावे स्वांशप्रक्षेपेण। ततोऽप्यपूर्त्तौ तत्समत्वं स्वकीयद्रव्येणैव, न त्वधिगन्त्रे यश्चतुर्थांशो दत्तस्तद्ग्रहणेनापि। तस्मै ...तिरूपण दत्तत्वात्। भृतिरूपस्याप्यादाने कालान्तरे प्रनष्टाधिगतमत्यर्पणा...कं न स्यात्। स्वांशमवतार्येति विशेषोक्तेश्चेति बोध्यम्।

५। विशेषमा... *एतच्चेति। अत एव प्राक् तथैव व्याख्यातम्। सङ्कोचे मानमाह *गवादीति। मूलकृदेवेति भावः॥ ३३॥

मि० रथ्या...लकशाला...निपतितस्य ...र्णादेर्नष्टस्याधिगमे विधिमुक्ता अधुना भूमौ चिरनिखातस्य ...वर्णादेर्निधिश... वाच्यस्याधिगमे विधिमाह।

या० राजा लब्ध्वा निधिं दद्याद् द्विजेभ्योऽर्द्धं द्विजः पुनः।
विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः॥ ३४॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत्।
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च॥ ३५॥

मि० ...णं निधिं राजा लब्ध्वा अर्द्धं ब्राह्म-

णेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसम्पन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वब्राह्मणव्यतिरिक्तेन अविद्वब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमाधिगन्त्रे दत्त्वा शेषं निधिं स्वयमेवाहरेत् ।

यथाह वसिष्ठः,

अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेत् षष्ठमंशमधिगन्त्रे दद्यादिति ।

गौतमोऽपि,

निध्यधिगमो राजधनं भवति, न ब्राह्मणस्याभिरूपस्य, अब्राह्मणोऽप्याख्याता षष्ठमंशं लभेतेत्येके इति ।

अनिवेदित इति कर्तरि निष्ठा । अनिवेदितश्चासौ विज्ञातश्च राज्ञेत्यनिवेदितविज्ञातः । यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं निधिं दाप्यो दण्डं च शक्त्यपेक्षया । अथ निधेः पि- त्राद्याभ्यागत्य रूपकसंख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांऽशं स्वयमाहरेत् ।

यथाह मनुः (अ. ८ श्लो० ३५)

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥इति ।

अंशविकल्पस्तु वर्णकालाद्यपेक्षया बोद्धव्यः॥३४॥३५॥

बा० १। अन्यदपि तसङ्गतिं प्रसङ्गरूपामाह *देयेति । इदं नष्टपद-

व्याख्यानम्।एतेनभाक्तनः प्रनष्टपदमपि व्याख्यातम्।*एवम्,उ-त्क्रमक्र।ेण।*उक्तेति। भूमौ चिरनिखातं सुवर्णादीत्यर्थः।तुर्यपाद-बलात् द्विजपदं ब्राह्मणपरमित्याह *ब्राह्मणेभ्य इति। एवमग्रेऽपि। फलितमाह *शेषमिति। पुनःशब्दार्थमाह *त्विति। विद्वानित्यस्य व्याख्या *श्रुतेति। न केवलया इत्यादिस्मृत्यन्तरादिदः पलक्षण-मित्याह *सदेति।पुनःशब्दानुषङ्गेण द्वितीयपद्यार्थमाह *इतरेण-त्विति। इतरत्वमुभयापेक्षमित्याह *राजेति। शेषपूरणेन व्याचष्टे *अधिगन्त्रे इति। यद्यप्यत्र अषष्ठांशमिति छेदेन वाक्यपूर्तिः सिद्धा तथापि उपक्रमे वासिष्ठे च दद्यादित्युक्त्या दानशब्दत्वस्यैवे -त्वेनात्रार्थिकत्वे तद्विरोधापत्तेः शेषपूरणापत्तेः, विद्वद्विप्रविषये सर्वस्येति हेतूक्त्याऽन्यविषये राज्ञः प्रभुत्वसूचनेन तत्रापि तदा-हरणस्यार्थसिद्धत्वेन विध्यनुपयोगात्, अत एवानिवेदितेत्यने-न विप्रस्यापि वैपरीत्योक्तेः, अतएव च दानपूर्वकाहरणस्यैव विवक्षितत्वेन तदीयलाभापत्तेश्च, अतएवोपक्रमवाक्यं तथा व्याख्यातम्। अत इग्यण इतिसूत्रादिभाष्यसिद्धान्तमूलकेन प्रविश पिण्डीम् इत्यादिवद्वाक्यैकदेशन्यायेन तन्त्रादिना द्वितीय-पादस्य शाब्दमर्थमाह *राजेति। यथाश्रुतार्थत्यागेन तथा व्याख्याने बीजमाह *यथाहेति। *अप्रज्ञायमानमिति। चिर-निखातमित्यर्थः। अनेन वित्तस्य निधित्वं सूचितम्। *तत्, ततः। *निध्यधिगम इति। अधिगम इति कर्मणि घञ्। कर्मधा-रयः। कडारादिः। अधिगम्यमानो निधिः राजधनं नाधिग-न्तुः।*अभिरूपस्य, श्रुताध्ययनादिसम्पन्नस्य ब्राह्मणस्य तु स न राजधनम् अपि तु तस्यैव। एवंचेदं वाक्यद्वयं यथासंभ-वं शेषानुषङ्गाभ्याम् इति बोध्यम्।*अब्राह्मणोऽपि विद्वद्ब्राह्मण-भिन्नोऽप्याख्याता तत्कथयिता यदि तदा तस्य षष्ठमंशं लभेते-

त्येके इत्यर्थः । अपिना विद्वद्ब्राह्मणसमुच्चयः । तथा च त-स्यापि षडंशमात्रप्राप्तौ प्रागुक्तविरोधो ऽत आह *एके इति । अनेन तत्सीयसर्वग्रहणेन सह षड्भागग्रहणस्य पुरुषभेदेन विकल्पः सूचित इति बोध्यम् ।

२। नन्वनिवेदितविज्ञात इत्ययुक्तं, कर्मनिष्ठायां निध्यधिगन्त्रा अन्येन वाऽनिवेदने राज्ञो ज्ञानाभावात्, किं च दाप्य इत्यनेना-न्वयासम्भवात्, अत आह *अनिवेदित इतीति । गत्यर्थाकर्मकेत्य-नेनेति भावः । पदार्थमुक्त्वा वाक्यार्थमाह *यः कश्चिदिति । विद्वद्ब्राह्मणस्तद्भिन्नो वेत्यर्थः । तमित्यस्यार्थमाह *सर्वं नि-धिमिति । विशेषानुक्तेः केवलार्थकैकशब्दस्वरसाच्चाह *शक्त्य-पेक्षयेति । यदि निध्यधिगन्ता स्वयं निवेदने साक्षात्कर्तृ-प्रयोजको वा न भवति अपि त्वन्यैर्निवेदितः सन् राज्ञा विज्ञातो भवति तदा स तं निधिं दण्डं च यथाशक्ति दाप्य इति तात्पर्यम् ।

३। इतरेणेत्येतत्सूचितमेव विशेषमाह *अथेति । अपिः प्रागु-क्तमनष्टसमुच्चायकः । *भावयति, साधयति । अत्र मानमाह *यथाहेति । *ममायमिति । *अनेन कर्मणा द्विकर्मकत्वं भुवः । *सत्येन, रूपसंख्यादिकथनेन । *तस्येति । अवधेः सम्बन्धित्व-विवक्षया षष्ठी । प्राग्वद् व्यवस्थामाह *अंशेति । *वर्णेति । सद्सद्वर्णाचिरादिकालाद्यपेक्षयेत्यर्थः ॥ ३४ ॥ ३५ ॥

मि० चौरहृतं प्रत्याह ।

या० देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ।
अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् ॥३६॥

मि० चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तत् द्रव्यं तस्मै राज्ञा दातव्य-

म् । हि यस्मात् अददत् अप्रयच्छन् यस्य तत् अपहृतं द्रव्यं तस्य किल्विषमाप्नोति । तस्य चौरस्य च ।

यथाह मनुः, (अ० ८ श्लो० ४०)

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरहृतं धनम् ।
राजा तदुपभुञ्जानश्चौरस्याप्नोति किल्विषम् ॥ इति ।

यदि चौरहस्तादादाय स्वयमुपभुङ्क्ते तदा चौरस्य किल्विषमाप्नोति । अथ चौरहृतमुपेक्षते तदा जानपदस्य किल्विषम् । अथ चौरहृताहरणाय यतमानोऽपि न शक्नुयादाहर्तुं तदा तावद्धनं स्वकोशाद्दद्यात् ।

यथाह गौतमः,

चौरहृतमवजित्य यथास्थानं गमयेत् कोशाद्वा दद्यादिति ।

कृष्णद्वैपायनोऽपि,

प्रत्याहर्तुम् अशक्तस्तु धनं चौरहृतं यदि ।
स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षिता ॥ इति ।

इति असाधारणव्यवहारमातृकाप्रकरणम् ॥ ३६ ॥

बा० १ । *चौरेति । प्रनष्टप्रसङ्गादित्येवेति भावः । ननु स्वयमलब्धं कथं देयम् अत आह *चौरेभ्य इति । ततः शासनपूर्वं गृहीत्वेत्यर्थः । जनपदे भवो जानपदः । अनतिप्रसङ्गाय तस्य च सम्बन्धिशब्दत्वादाह * स्वदेशेति । तथाप्यनतिप्रसङ्गायाह * यस्येति । अनेन वर्णसामान्यपरामर्शः । अत एव मन्वेकवाक्यता । तुः पादपूरणे । यस्येत्यन्तं भिन्नं वाक्यं, तस्येति च भिन्नं, तादित्यस्योभयत्रान्वयः, तदाह * हीति । अस्यार्थमाह *यस्मादिति । तदित्यस्य व्याख्या *अपहृतं द्रव्यमिति । यस्-

दोर्मिथः साकाङ्क्षत्वाच्छेषं पूरयति *तस्येति। द्वितीयवाक्यार्थमाह *तस्य चौरस्य चेति। किल्विषमित्यादेरनुषङ्गः। यथाश्रुतार्थं विहाय एवं व्याख्याने मानमाह *यथाहेति। *तदुपभुञ्जान इति। तदुपयुञ्जान इति पाठान्तरम्। अत्र मनु...भ्यां यथाश्रुतं वि... । अतो मन्वेकवाक्यतयैव मूलस्य सम्भवात् वैपरीत्यासम्भवात् द्वेधा व्याख्यानं कृतमिति। तस्याप्रतिदाने राजा तयोः उभयोः किल्विषमाप्नोतीत्युक्तं, तथा सति मनुवचने प्राप्त...नता।निरासाय विषयव्यवस्थामाह *यदीति। अनेन म... विषयः प्रदर्शितः। मूलविषयमाह *अथेति। एवमपि मूलोत्तरार्धस्य सुयोजत्वात्तस्य व्यवस्थितत्वाद्वेति भावः। मनुमूलपूर्वार्द्धतात्पर्यार्थमाह

२। *अथेति। तावदित्यनेन न्यूनाधिकभावो निरस्तः। अत्र मानमाह *यथाहेति। *यथास्थानमिति। यस्य तद्धनं तं प्रापयेदित्यर्थः। *कृष्णेति। व्यासोऽप्याहेत्यर्थः। *अशक्तस्तु, अशक्त एव। राजा भवेदिति शेषः। *हि, तदा। द्विर्बद्धमिति न्यायेन सत्यां शक्तौ तथा न कार्यमिति स्पष्टार्थमाह *अशक्तेनेति। *महीति। महीं क्षयति निवासयति गमयति वा, क्षिणोति हिनस्ति शास्ति दण्डयति वा महीक्षित् तेनेत्यर्थः।

३। *इत्यसाधारणव्यवहारमातृकेति। इति साधारणासाधारणव्यवहारमातृकेति पाठान्तरम्। तस्य च पूर्वं तथा पाठाभावो वक्ष्यमाणप्रकारो वा ऽभिप्रायः॥ ३६॥

अथ ऋणदानप्रकरणम् ॥ ३ ॥

मि० साधारणासाधारणरूपं व्यवहारमातृकामभिधायाधुनाऽष्टादशानां व्यवहारपदानामाद्यमृणादानपदं दर्शयति, "अशीतिभागो वृद्धिः स्यात्" इत्यादिना

"मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने"

इत्येवमन्तेन । तच्च ऋणादानं सप्तविधम् । ईदृशमृणं देयम्, ईदृशमदेयम्, अनेनाधिकारिणा देयम्, अस्मिन् समये देयम्, अनेन प्रकारेण देयमित्यधमर्णे पञ्चविधम् । उत्तमर्णे दानविधिरादानविधिश्चेति द्विविधमिति । एतच्च—

नारदेन स्पष्टीकृतम्, (व्य० प० १।१)

ऋणं देयमदेयं च येन यत्र यथा च यत् ।
दानग्रहणधर्मश्च ऋणादानमिति स्मृतम् ॥ इति ।

तत्र प्रथममुत्तमर्णस्य दानविधिमाह । तत्पूर्वकत्वादितरेषाम् ।

या० अशीतिभागो वृद्धिः स्यान्मासि मासि सम्बन्धके ॥
वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा ॥ ३७ ॥

मि० मासि मासि, प्रतिमासम् । बन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत् । बन्धकेन सहवर्त्तते इति सबन्धकः प्रयोगः तस्मिन् सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्य अशीतितमो भागो वृद्धिर्धर्म्या भवति । अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणादीनां क्रमेण द्वि-

त्रिचतुःपञ्चकं शतं धर्म्यं भवति । ब्राह्मणेऽधमर्णे द्विकं शतं क्षत्रिये; त्रिकं वैश्ये चतुष्कं शूद्रे पञ्चकं, मासि-मासीत्येव । द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्वि-त्रिचतुःपञ्चाः अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिच-तुःपञ्चकं शतम् । तदस्मिन् वृद्ध्यायलाभशुल्कापदा दीयते इति संख्याया अतिशदन्तायाः कन् । तदन्त-विधिश्चात्र द्रष्टव्यः ।

इयं च वृद्धिर्मासि मासि गृह्यते इति कालिका । इय-मेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमा-णा कायिका भवति ।

तथा च नारदेन, (व्य० प० १।१०२।१०३।१०४).

कायिका कालिका चैव कारिता च तथा परा ।
चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा ॥

इत्युक्त्वोक्तम्,

कायाविरोधिनी शश्वत्पणपादादिकायिका ।
प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥
वृद्धिः सा कारिता नामाधमर्णिकस्वयंकृता ।
वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता ॥ इति ॥ ३७ ॥

बा० १। पौर्वापर्ययोर्ग्रन्थसन्दर्भयोः सङ्गतिमाह*साधारणासाधार-णेति । प्रथमप्रकरणे साधारणमातृका ऽभिहिता, द्वितीयप्रकरणे ऽसाधारणमातृका । एवं च प्रकरणद्वयस्य निरपेक्षस्योत्तरग्रन्थो-पयोगित्वेन ताभ्यामुत्तरग्रन्थसङ्गतिरिति भावः । यद्वा ऽनन्त-रप्रकरणमव साधारणासाधारणात्मकम् । देशाद्देशान्तरं यातीत्या-दि दुष्टलक्षणं सर्वसाधारणम्, छलं निरस्य भूतेनेत्यादिकमपि ।

इतरदसाधारणम् । समाप्त्या व्यात्मकत्वेन प्रकरणसमापनमिति भावः । *व्यवहारपदानां, मध्ये इति शेषः ।

२ । तत्र तावत् ऋणस्य अदानम् आदानं वा यस्मिन्निति व्युत्पत्तावपि योगरूढोऽयम् ऋणादानशब्दः । तदेतदभिप्रेत्याह *तत्रेति । तत्र तावत् अधमर्णसम्बन्धिभेदानाह * दशमिति । याचनापूर्वकत्वादृणस्य तस्याश्च अधमर्णनिष्ठत्वात् मल्लग्रामादिवद्वेति भावः । एतेन सूचीकटाहन्यायेन वैपरीत्यमुचितमित्यपास्तम् । नारदवचनाच्च । अस्वतन्त्रैरपि स्त्र्यादिभिः कुटुम्बरक्षणार्थं यदृणं गृहीतं तद्देयम्, उक्तव्यतिरिक्तं तु न देयं, पुत्रपौत्रादिरूपेणाधिकारिणा देयम्, अस्मिन्काले देयं, क्वचित्सवृद्धिकं देयं क्वचिदवृद्धिकमित्येतदन्यतरदित्येवमधमर्णे देयं पञ्चप्रकारम्, उत्तमर्णे द्विविधमित्यर्थः ।

३ । * एतच्चेति । उक्तभेदकथनेनास्य योगरूढत्वं चेत्यर्थः । येन देयमित्यधिकारिनिर्देशः । यत्र देयमिति कालनिर्देशः । यथाचेति प्रकारनिर्देशः । देयमित्यस्य सर्वत्रान्वयः । धर्मश्चेति पाठः । द्वन्द्वान्ते श्रूयमाणत्वात्प्रत्येकं सम्बन्धः । तदिति पाठे यदिति शेषः । वैपरीत्ये वैपरीत्यम् इति । यत् तदृणादानमित्यन्वयः ।

एवं स्मृत्यन्तराविरोधेनास्य सप्तविधत्वमाग्रिमोपयुक्तं प्रतिपाद्य अधुना मूलवचनमवतारयति *तत्रेति । तेषां मध्ये इत्यर्थः ।

४ । द्वयोरेवेतिभ्रमनिरासाय वीप्साद्विर्वचनेनाह *प्रतीति । *प्रयोगे, दाने । अत्र विशेषोल्लेखेऽप्रयोगात्फलेऽविशेषाच्च । *द्रव्यस्येति । अशीतिपदं तत्संख्यापूरके लाक्षणिकं भागपदसामर्थ्यादित्याह *अशीतितम इति । तथा च तत्र कर्मधारयो बोध्यः । शास्त्रविहितत्वादेवाह * धर्म्येति । लिङ्गस्याविवक्षयाऽऽह *भवतीति । उत्तरार्धं व्याचष्टे *अन्यथेति । अस्य व्याख्या *बन्धकेति । सामान्येनोक्तं स्पष्टार्थं विशिष्य ।

*ब्राह्मणे इति। शतमित्यस्याग्रे सर्वत्रान्वयः। एवं भवतीत्यस्यापि। मासि मासीत्यनुवर्त्तते इत्याह *मासीति। तथा च प्रतिमासं ब्राह्मणादिक्रमात् तथा भवतीत्यर्थः।

५। ननु कथमुक्तार्थलाभस्तत इत्यत आह *द्वौवेति। संख्ययाऽव्ययेति बहुव्रीहिरिति भावः। * तदस्मिन्निति। तथा च कनः सर्वत्र सम्बन्ध इति भावः। उक्तवृद्धेरुपाधिभेदान्मूलानुक्तं द्वैविध्यं कथयन्नाह * इयं चेति। मूलोक्तेत्यर्थः।

६। मूलानुक्तमाह *इयमेवेति। मूलोक्तैवेत्यर्थः। विशेषमाह *दिवसेति। मास येति भावः। अत्र मानमाह * तथा चेति। उक्तो ... मित्यत्रान्वयः। *तस्य, ऋणस्य। उक्तेति शेषः। *कायेति। तदविरोधिनी तदनुकूला यथा तस्य प्रतिदिनं वृद्धिस्तथा शरीरसत्त्वे प्रातिदिनं वृद्धिरिति तथा दीयमानेत्यर्थः। यद्वा यया खेदन शरीरनाशो न भवति तादृशी स्वल्पेत्यर्थः। अधिकदाने खेदेन देहस्यारक्षणेन नाशसंभवात्। * शश्वत्, मुहुर्मुहुः प्रातिदिनमिति यावत्। * पणेति। पणस्य पादश्चतुर्थांश इत्यर्थः। तथा च पणपादादिरूपा तदविरोधिनी प्रतिदिनं स्रवन्ती कायिकेत्यर्थः। *स्रवन्ती, आगच्छन्ती। उभयत्र मत्वर्थीयष्ठन्। अधमर्णिके बह्वच इत्यनुकम्पादौ ठच्। ऋणिकेनेति पाठान्तरम्। तदा मत्वर्थीयष्ठन्॥ ३७॥

मि० ग्रहीतृविशेषेण वृद्धेः प्रकारान्तरमाह।

या० कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।

मि० कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः। ये वृद्ध्या धनं गृहीत्वाऽधिकलाभार्थमातिगहनं प्राणधनविनाशशङ्कास्थानं प्रविशन्ति ते दशकं शतं

दद्युः, ये च स[illegible]गास्ते विंशकं शतं,मासि मा[illegible]त्यर्थ। एतदुक्तं भवति। [illegible]यो दशकं शतं सामुद्रेभ्यश्च विंशकं शतम् उत्तमर्ण आदद्यात्। [illegible]लनाशस्यापि शाङ्कितत्वा[illegible]ति।

मि० इदानीं [illegible] वृद्धिमा[illegible]।

या० दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥३८॥

मि० सर्वे वा ब्राह्मणादयोऽधमर्णाः अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः। क्वचिदकृतापि वृद्धिर्भवति।

यथाह नारदः, (व्य० प० १।१०८)

न वृद्धिः प्रीतिदत्तानां स्याद[illegible] क्वचित्।
अनाकारितम[illegible]र्ध्वं वत्सरार्द्धाद्वि वर्द्धते ॥ इति।

यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति—

कात्यायनेनोक्तम्,

यो याचितकमादाय तम[illegible]त्वा दिशं व्रजेत्।
ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात् ॥ इति।

यश्च याचितकमादाय याचितोऽप्य[illegible]त्वा देशान्तरं याति तं प्रति—

तेनैवोक्तम्,

[illegible]रमदत्वा यो या[illegible]चतस्[illegible] दिशं व्रजेत्।
ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुया[illegible] ॥ इति।

यः पुनः स्वदेशे स्थित एव याचितो या[illegible]चत[illegible] न ददाति तं याचनकालादारभ्य वृद्धिं [illegible]पयेद्राजा।

यथाह,

स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित् ।
तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत् ॥ इति ।

अनाकारितवृद्धेरपवादो नारदेनोक्तः, (अ.२।३६)

पण्यं मूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः ।
वृथादानाक्षिकपणा वर्द्धन्ते नाविवक्षिताः ॥ इति ।

अविवक्षिता अनाकारिता इति ॥ ३८ ॥

बा० १। *ग्रहीत्रिति। अथेत्यादिः । *दशकमिति। पूर्ववत् । *विंशकमिति। डवुन्नन्तम्। प्रकरणाद्विशेषपरत्वमित्याह *अरण्यमिति । कर्मणो ऽधिकरणत्वविवक्षया सप्तमी *तत्रेति । तादित्यर्थः । परिखेतिवत् डः । अत एव तथैव पदार्थमुक्त्वा वाक्यार्थमाह *ये इति । तत्रापि अरण्यसामान्यं न विवक्षितमिति सूचयन्नाह *अतीति । अभ्यर्हितत्वात्प्राणस्य पूर्वनिपातः । वस्तुतो ऽविनाशसंस्थानेपि आह *शङ्केति । तत्रापि प्रकर्ष इत्याह *प्रेति। अपकर्षेणाह *दद्युरिति ।

२ । *ये च, ये तु । सामुद्रा इत्यत्रेदमर्थेऽणिति सूचयन्नाह *समुद्रगा इति । दद्युरित्यस्यानुषङ्गः । मासि मासीत्यनुवर्त्तते सामर्थ्यादित्याह *मासीति ।

३ । ननु तथा सति यदि विनाशस्तावत्तद्दानमपि कथमतः तात्पर्यार्थमाह *एतदिति । आदावेवेति भावः । इदं चानन्तर्यादबन्धकप्रयोगविषयम् । अत एवाह *मूलेति ।

४ । *स्वीकारितामिति। अत एव मूले वाशब्दो विकल्पार्थः । तदाह *सर्वे इति । अस्य व्याख्या *ब्राह्मणेति । अत्र च ब्राह्मणादीनामधमर्णत्वं प्रदर्शनमात्रं, हीनोत्तमभावमपरिगणय्य यथाकथं चिदुत्तमर्णत्वमधमर्णत्वं च भवतीत्यर्थः । संकोचे

मानाभावादाह * अबन्धके इति । प्रयोगे इति शेषः । यथाश्रुतासंगतेराह * स्वाभ्युपेति । उद्देश्यस्याधिकरणत्वविवक्षया आह * सर्वास्विति ।

५। विशेषमाह *क्वचिदिति । *न वृद्धिरिति। वृद्धिं कुर्वन्तमधमर्णमुत्तमर्णः प्रयुङ्क्ते इति णिचि निष्ठायाम् आङ्ग कारिताशब्दस्य समासे ततो नञा तस्य समास इति कश्चित् । अकृतेति स्वारस्यात् प्रार्थयन्तीतिवत् णिजिति तु तत्त्वम् । अत एव स्वकृतामित्युक्तं मूले । एवं रीतिः कारितेत्यत्रापि बोध्या । अत एव स्वयं कृतेत्येव तत्रोक्तम् । एवं चाकृता वृद्धिस्त्वं यथेच्छं व्यव रेति दत्तानां क्वचिदपि न स्यात् । अत्र प्रीतिदत्तेत्यनेन ग्रहीतुर्याचनाभावः सूचितः। अत एव तत्र विशेषं वक्ष्यति ईदृशेऽपि स्थले । हिस्त्वर्थे । *वत्सरार्धाद्धि, वत्सरार्धात्तु। *ऊर्ध्वं, षण्मासोत्तरं तु । * अनाकारितमपि, अर्शआद्यजन्तं, धनं बर्धते इत्यर्थः । विवर्धते इति पाठान्तरम् । कश्चिन्मते ऽकृतेत्यर्थः स्वोक्ताविरुद्ध इति बोध्यम् । वर्द्धनप्रकारस्तु सबन्धाबन्धकप्रकारभेदकृतः प्रागुक्तो द्रष्टव्यः ।

६। विशेषान्तरमाह *यस्त्विति । याच्ञाप्राप्तं याचितकमित्यमरः । वृद्धिं विना प्रार्थनया गृहीतमित्यर्थः । *तं, तादृशमर्थं, विना याचनामिति शेषः । अत एव तत्र विशेषं वक्ष्यति ।

७। तृतीयं विशेषमाह *यश्चेति । योऽपीत्यर्थः । यातीति वर्त्तमानसामीप्ये इति भूते लट् ।

८। *तेनैव, कात्यायनेनैव। *कृत्वोद्धारमिति। याचितकरूपेणोद्धारमादायेत्यर्थः। कृतोद्धारमिति पाठे कर्मधारयः। गृहीतयाचितकमित्यर्थः । उधार इति भाषाप्रसिद्ध उद्धारः । कर्मणि घञ् । उदित्यस्य वृद्धिमुल्लङ्घ्येत्यर्थः । * तु, अपि । यद्वा य

इत्यग्रे योज्यो यथाश्रुत एव। याचित इत्यत्र अपीति शेषः।

९। चतुर्थपादव्याख्या *यः पुनरिति। यस्त्वित्यर्थः। *याचितः,याचितोऽपि। *याचनेति। अधमर्णयाचनेत्यर्थः। * स्वेति। यस्तु स्वदेशे स्थितः सन् याचितोऽपि क्वचित्कदाचित्तन्न दद्यादित्यर्थः। क्वचिदिति देशविशेषणं वा। अनिच्छन्तं च तमपि तम् अकारिताम् अकृतामपि वृद्धिं प्रागुक्तरीत्या ततोऽधमर्णयाचनकालादारभ्य राजा दापयेदित्युत्तरार्धार्थः।

१०। *अनाकारितेति। न वृद्धिः प्रीतीति नारदेन षड्मासानन्तरं प्रीतिदत्ते उक्ताया इत्यर्थः। *नारदेनेति। तेनैवेत्यर्थः। पण्यं विक्रेयं वस्तु। मूल्यं धान्यादि। भृतिर्वेतनम्। वृथादानेति त्रयाणामितरेतरद्वन्द्वः। वृथादानं वन्दिचारणादिभ्यो दानम्। आक्षिकं द्यूतजितम्। पणः व्यवहारे क्रियमाणनिबन्धः। न्यासान्यपण्यादिषु दास्यामीति दृढप्रतिज्ञायां कृतायां सत्यां तावत्तेषां पण्यादीनां परकीयत्वेनादानेऽनाकारितवृद्धिः प्राप्ताऽनेनापोद्यते इति भावः।

११। न्यासपदेन तु न्यासविशेषो ग्राह्यः। तथा हि। यत्र विश्वस्ते पुरुषे रूपसंख्याप्रदर्शनेन द्रव्ये न्यस्ते स यदि मयैतद्व्यवह्रियते कालान्तरे एतत्संख्याकमेतज्जातीयं च द्रव्यं दास्यामीति स्वामिनः पुरस्तात् कथयति स च स्वामी तथैवाङ्गीकुरुते तादृशे न्यासे ऽकृता वृद्धिर्नास्तीत्यर्थः। षण्मासं वृद्ध्यभावस्य सिद्धत्वात् स्वामिनेऽकथयित्वैव व्यहारे कृते सोदयस्य देयत्वाच्चेति बोध्यम्। अविवाक्षिता इत्यत्र अर्शआद्यच्। तदाह *अनाकारिता इति ॥ ३८ ॥

मि० अधुना द्रव्यविशेषेण वृद्धिविशेषमाह।

या० सन्ततिस्तु पशुस्त्रीणां

मि० पशूनां स्त्रीणां च सन्ततिरेव वृद्धिः । पशूनां स्त्रीणाम् पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति । ग्रहणं च क्षीरपारिचर्यार्थिनः ।
३ अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेणापि चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षिते आह ।

या० रसस्याष्टगुणा परा ।
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ ३९ ॥

मि० रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्द्धमानस्याष्टगुणा वृद्धिः परा नातः परं वर्द्धते । तथा वस्त्रधान्याहिरण्यानां यथासङ्ख्यं चतुर्गुणा त्रिगुणा द्विगुणा च वृद्धिः परा ।

वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम्,

द्विगुणं हिरण्यं त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च । तुलाधृतम् अष्टगुणमिति ।

मनुना तु— (अ० ८।१५१)

धान्ये च पुष्पमूलफलादीनां च पञ्चगुणत्वमुक्तम्,
धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम् । इति ।

शदः क्षेत्रफलं पुष्पमूलफलादि । लवो मेषोर्णचमरीकेशादिः । वाह्यो बलीवर्दतुरगादिः । धान्य-

शालवचाद्यविषया वृद्धिः पञ्चगुणत्वं नातिक्रमतीति। तत्राधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या। एतच्च सत्कृत्प्रयोगे सकृदाहरणे च वेदितव्यम्। पुरुषान्तरसंक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे अनेकशः प्रयोगान्तरकरणे सुवर्णादिकं द्वैगुण्याद्यातिक्रम्य पूर्ववद्वर्द्धते। सकृत्प्रयोगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यासम्भवात्पूर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्द्धते एव।

यथाह मनुः, (अ० ८।१५१)

कुसीदिवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता। इति।

सकृदाहृतेत्यपि पाठोऽस्ति। उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिः द्वैगुण्यं नात्येति नातिक्रामति, यदि सकृदाहिता सकृत्प्रयुक्ता। पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति। सकृदाहृतेति तु पाठे शनैःशनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा ऽधमर्णादाहृता द्वैगुण्यम् अत्येतीति व्याख्येयम्।

तथा गौतमेनाप्युक्तम्, चिरस्थाने द्वैगुण्यं प्रयोगस्येति।

प्रयोगस्येत्येकवचननिर्देशात्प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः। चिरस्थाने इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः॥ ३९॥

बा० १। *स्त्रीणां चेति। दासीनां नकुलस्त्रीणामित्यर्थः। त्वर्थमाह *एवेति। एतत्प्रसङ्गमाह *पशूनामिति। *पुष्टीति। द्वन्द्वोत्तरं

बहुव्रीहिः । इदं दातुरुक्त । अथप्रतिग्रहीतुराह *ग्रहणं चेति । *क्षीरेति । द्वन्द्वोत्तरं तत्पुरुषः । यथासंख्यमुभयत्र बोध्यम् ।

२।*प्रयुक्तेति । वृद्धिलोभेनेति भावः । अत एवाह *वृद्धी· ति। ग्रहणं न तु करणम्। *वास्थितस्येति। विषये। तेषां मध्ये इति शेषः। स्थितत्वे इति पाठेपि तेषां मध्ये इति शेषः । अन्यथा नि- र्धारणे व वचनाचित्येन यथाश्रुतासम्बद्धत्वं स्पष्टमेव । *परा, उत्कृष्टा चरमेति यावत् । *तैलेति । घृततैलादेरि [illegible] चितं,शाक- पार्थिवादिर्वा । तस्य लघ्वक्षरत्वात् । कारितवृद्ध्यभिप्रायेणाह *स्वेति । *परेत्यस्य तात्पर्यार्थमाह *नातः परमिति ।

३ । उत्तरार्धार्थमाह *तथेति । हिरण्यशब्देनात्र धनं द्रव्याप- रपर्यायं सर्वम् ।

४ । पक्षान्तरं रसे आह *वासिष्ठेन त्विति । परत्वं वृद्धेरिति शेषः । अतिदिशति *धान्येनैवेति । *फलानिचेति । व्या- ख्यातानीति शेषः । *तुलेति । तुलायां धृतं निहितं त्रितयं हि- रण्यधान्यरसात्मकमदत्तं चि [illegible] कालस्थितमित्यर्थः ।

५ । धान्य [illegible] धांशे पक्षान्तरमा *मनुनात्विति । प्राग्वत् । आदिग्राह्यं वचने स्पष्टम् । पूर्वनिपातप्रकरणानित्यत्वा [illegible] स्य पूर्वनिपातः । बलीवर्दस्याभ्यर्हितत्वात्सः । पदार्थानुक्त्वा वाक्या- र्थमाह *धान्येति । सर्वत्र विषयस [illegible] *विषयेति । पञ्च- [illegible] लक्ष्यार्थमाह *पञ्च [illegible] त्वमिति । इतीत्यस्य अर्थे इति शेषः । एवं सति सम्भवात् तस्य दुष्टत्वाच्च विकल्पान्य - कारेण विरोधं परिहरति *तत्रेति । तेषु पक्षेष्वित्यर्थः । परकीययोग्यतायास्तथ्यतः स्पष्टमज्ञानादाह *दुर्भिक्षेति ।

६ । विशेषमाह *एतच्चेति । एकस्मिन्नेव *ऋणद [illegible] एकदैव च सह । [illegible] ग्रहणे चेत्यर्थः । एकस्मि [illegible] ऋणदानप्रयोगे द्वि-

रूपकेषु दत्तेषु प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्धेरग्रहणे कालविलम्बवशात् वृद्धेर्द्वैगुण्यातिक्रमेणापि वृद्धिः प्राप्ता, तत्र सवृद्धिकमूलमकदैव गृह्णन्नुत्तमर्णो मूलाद्द्विगुणं तेन सह विंशतिरूपकपरिमितं द्रव्यं गृह्णीयात् इत्यभिप्रायः।

७। आद्यस्य प्रत्युदाहरणमाह *पुरुषान्तरेति। अन्यस्मै पुरुषाय दानेनेत्यर्थः *प्रयोगान्तरकरणं द्वेधा, तत्रैकमुक्त्वा द्वितीयमाह * तस्मिन्नेवेति। *अनेकशः, पुनः पुनः। अनेकश इत्यत्र रेकसेकाभ्यामिति पाठे प्रयुक्तद्रव्यैकदेशग्रहणेन न्यूनीकरणं रेकः तत्रैव प्रक्षेपेणाधिकीकरणं सेकः। रिच वियोजनसम्पर्चनयोः षिच क्षरणे। तत्र तेन सर्वग्रहणादपि *सुवर्णेति। *पूर्ववत्, अशीतिभाग इत्याद्युक्तप्रकारेण। अयं भावः। यदा तदेव विंशतिसंख्याकं द्विगुणद्रव्यम् अन्यस्मै दीयते पूर्वं यस्मै दत्तं तस्माएव वा दीयते प्रयोगान्तरेण तथा वा क्रियते तदा पूर्वप्रयोगे द्विगुणीभूतमिति कृत्वा पुनः क्रियमाणे प्रयोगान्तरे न वर्द्धते इति न। तदा द्विगुणितस्य तस्यैव मूलत्वेन वृद्धेरिष्टत्वात्। अत एव प्रथमप्रयोगे एव द्वैगुण्याद्यतिक्रमेण वृद्धिर्न, द्वितीयादिप्रयोगे तु द्वैगुण्याद्यप्यत्येतीति।

८। सकृदाहरणे चेत्यस्य प्रत्युदाहरणमाह *सकृदिति। *देयस्य, मूलस्य। असंभवस्त्वेवं, प्रतिदिनादिक्रमेण तद्दाने यस्मिन् दिने या वृद्धिर्दीयते तद्दिनात्पूर्वमभिवृद्धस्य धनस्य विच्छेदः पुनरपि नूतनत्वेन वृद्धिः एवं च वस्तुतः प्रयोगान्तरमिव भवतीति यावत् द्वैगुण्यं प्राप्नोति तावदविच्छेदेन वृद्धस्य द्रव्यस्यावस्थित्यभाव इति।

९। अत्रोभयत्र मानमाह *यथाहेति। आहेत्यस्येतीति शेषः। क्वचित्तथा पाठ एव। पाठभेदेन द्वयोर्लाभो नकस्मादित्याह

*सकृदिति । त ाद्यपाठनाद्यलाभ इत्याह *यदीति । एतत्सप-णतात्पर्यमाह *पुरुषान्तरेति । आदिना मा्र क्त्द्वितीयपरिग्रहः। द्वितीयेन द्वितीयलाभ इत्याह * सकृदिति । सकृद। तीतिपाठे इति पाठः । यदि सकृदाहृता मूलसहिता वृ ि रेकदैव गृहीतेत्या-द्यर्थः । तत्तात्पर्यार्थमाह *शनैः शनैरिति । अन्यथेत्यादिः । शनैरित्यस्यैव व्याख्या *प्रतीति ।

१०। मानान्तरमा *तथेति । तद्वदित्यर्थः । अत एव अपिना पौ-नरुक्त्यं न । स्थानं स्थितिः । प्रयोगस्य प्रयुज्यमानऋणस्य प्रतिदिना-दिक्रमेण वृ ि ग्रहणं विना चिरकालस्थितौ सत्यां द्वैगुण्यं भव-तीत्यर्थः । उक्तमित्यस्य ध्वनितमित्यर्थ इति सूचयन्नाह *प्रयो-गेति । अनेनाद्यार्थलाभ उक्तः । द्वितीयस्य तमाह * चिरेति । *शनैरिति । उक्तरीत्येति भावः । *दर्शितः, अभिप्रेतः ॥३९॥

मि० ऋणप्रयोगधर्मा उक्ताः । सांप्रतं प्र्र ुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते ।

प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् ।
साध्यमानो नृपं गच्छेत् दण्ड्यो दाप्यश्च तद्धनम् ॥४०॥

प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्प्रत्याहरन् धर्मादि [illegible] मर्णो नृप-तेर्न वाच्यो निवारणीयो न भवति । धर्मादयश्चोपाय

मनुना दर्शिताः, (अ. ८।४९)

धर्मेण व्यव ारेण छलेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥ इति ।

धर्मेण प्रीतियुक्तेन सत्यवचनेन । व्यव ारेण साक्षिलेख्या पन्यासेन । छलेन उत्सवा ि व्याजेन

वणादिग्रहणेन। आचरितेन भोजनेन। पञ्चमेनोपायेन बलेन निगडबन्धनादिना। उपचयार्थं प्रयुक्तं व्यमेतैरुपायैरात्मसात्कुर्यादिति। प्रपन्नं साधयन्नर्थं न वाच्य इति वदन् अप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति। एतदेव स्पष्टीकृतं—

कात्यायनेन,

पीडयेद्यो धनी कश्चि ऋणिकं न्यायवादिनम्।

तस्माद‌र्थात्स हीयेत तत्समं चाप्नुयाद्दमम्॥ इति।

यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेत् राजानमभिगम्य साधकमभियुङ्क्ते स दण्ड्यो भवति शक्त्यनुसारेण, धनिने तद्धनं दाप्यश्च राज्ञा।

दापने च प्रकारा दर्शिताः,

राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत्।

देशाचारेण चान्यांस्तु दुष्टान् संपीड्य दापयेत्॥

रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेत्। इति।

साध्यमानो नृपं गच्छेदित्येतत् स्मृत्याचारव्यपेतेनेत्यस्य प्रत्युदाहरणं च बोद्धव्यम्॥ ४०॥

बा० १। सङ्गतिमाह *ऋणप्रयोगेति। ऋणदानेत्यर्थः। प्रपन्नमित्यस्य व्याख्या *अभ्युपगतमधमर्णेनेति। अर्थपदार्थो *धनमिति। व्याख्यानान्तरमाह *साक्ष्यादीति। अत एवान्यथा शेषं पूरयति *धर्मादिभिरिति। लिङर्थाविवक्षया आह *भवतीति।

२। तानेवाह *धर्मान्यश्चेति। तेत्वित्यर्थः। प्रकृतोपयोग्यानर्थनाह *प्रीतीत्यादिना। तैर्भावितत्वादाह *उपन्यासेनेति। यथाश्रुतार्थसङ्गत्यभावाद्‌र्थमाह *उत्सवेति। आचरितेनेत्यस्यार्थं

*भोजनेनेति। त॰ ॰नेनेत्यर्थः। अचरि तेन अभोजनेनेति पाठान्तरम्। तस्य भोजना॰॰॰॰॰र्थः। चर गतिभक्षणयोः। एतेषां सर्वेषामुपायत्वं ॰ चयन्नाह *उपायेनेति। बलेनेत्यस्य व्याख्या*निगडेति।

३। एवं पदार्थानुक्त्वा वाक्यार्थमाह *उपचयेति। एतैः पञ्चाभिर्व्यस्तैः समस्तैर्वा यथासम्भवम्। इतीत्यस्य अर्थ इति शेषः।

४। ध्वनितमाह *प्रपन्नमिति। अप्रतिपन्नम् अन॰ीकृतादि साधयन् प्रत्याहरन्, एतैरुपायैरिति शेषः। ध्वनितत्वेनास्पष्टत्वा॰च्चिवः। ऋणिके मत्वर्थीयष्ठन्। * न्यायेति। यथार्थान॰ङ्गीकारादिभाषिणमित्यर्थः। *दमं, दण्डम्।

५। उत्तरार्धार्थमाह *यास्त्विति। उपायैरित्यस्य साध्येत्यत्रान्वयः। कर्मणि लडित्याह *याच्येति। गमनमात्रेण नानिष्टम्, अतस्तस्य लक्ष्यार्थमाह *राजानमिति। लिङर्थाविवक्षया आह *अभियुङ्क्ते इति। अनेन गच्छन्नित्यपपाठ इति सूचितम्। विशेषाभावादाह * शक्त्यनुसारेणेति।

६। प्रपन्नसाधने उत्तमर्णस्य प्रागुक्तप्रकारवदत्रापि शेषसूचनाय तानाह * दापनेचेति। मनुनैवेति भावः। अधमर्णविशेषेणात्र प्रकारभेद इत्याह * विप्रमिति। एवं प्रागपि बोध्यम्। *सान्त्वेन, प्रीतियुक्तसत्यवचनेन। एवेनेतरव्यवच्छेदः। एवमग्रेऽपि। *देशेति। साक्षिलेख्याद्युपन्यासरूपव्य॰हारेण भोजनादिरूपेण च विप्रान्यानित्यर्थः। अनेन प्रागुक्तद्वयसंग्रहः। तत्रैव विशेषमाह *दुष्टानिति। अयं प्रागुक्तपञ्चमः प्रकारः। तृतीयमाह * रिक्थिनमिति। विषयद्वयमत्र। एवं च सामादयो नीतिशास्त्रोक्ता उपाया एवात्र शब्दान्तरेणोक्ता इति बोध्यम्।

७। नन्वत्र व्यवहाराभावेन कथं दण्डादिदापनं राजकृतमत आह * साध्येति। अयं भावः। स्मृत्याचारेत्यनेन तादृशस्य

...दत्वमुक्तम्, अत्र तु तदविरुद्धमार्गेणाधर्षितत्वाद्राज्ञे न निवेदनीयम्, यदि निवेदयति तदा ... व्यवहारपदं न भवति । अत एव द...र्धं विधीयते । तत्राप्यादौ दण्डस्य पश्चात् तस्येति निःश...मविचार्य तथा कार्यमिति तद्विपरीतो-...मतादित्यर्थ इति ॥ ४० ॥

मि० ब...षूत्तमर्णिकेषु ...गपत्प्रा...एकोऽधमर्णि-कः केन क्रमेण दाप्यो रा...इत्यपेक्षिते आह ।

या० गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।

दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ॥ ४१ ॥

मि० समानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको राज्ञा दाप्यः । भिन्न-जातीयेषु तु ब्राह्मणा... क्रमेण ॥ ४१ ॥

बा० उत्तमर्णिके बहच इति अ...कम्पादौ ठच् । एवमधम-र्णिकेऽपि बोध्यम् । अभ्यहितसङ्ग... । * गृहीतेति । ग्रहणानुक्रमादित्यर्थः । धनिनामित्युद्देश्यस्य सम्बन्धत्वविवक्षया षष्ठी । धनमिति शेषः । उत्तरार्धलब्धां व्यवस्थामाह * समा-नेति । सत्सु इति शेषः । तुरुक्तवैलक्षण्ये । तथा च नृपतेरि...प-लक्षणमग्रिमस्यापि ॥ ४१ ॥

मि० यदा ...नरुत्तमर्णां दुर्बलः प्रतिपन्नमर्थं धर्मा-दिभिरुपायैः साधयितुमशक्नुवन् राज्ञा साधितार्थो भवति तदाऽधमर्णा...च दण्ड...त्तमर्णस्य च भृति-दानमाह ।

या० राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शतम् ।

पञ्चकं तु शतं दाप्यः प्राप्तार्थो ह्युत्तमर्णिकः ॥ ४२ ॥

मि० अप्रामाणिको राज्ञा प्रतिपन्नार्थात्साधिता च्छक्त शतं दाप्यः । प्रतिपन्नस्य साधितार्थस्य दशमंशं राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः । उत्तमर्णस्तु प्राप्तार्थः पञ्चकं शतं भृतिरूपेण दाप्यः । साधितार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णीयादित्यर्थः । अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितो निह्नवे भावितो दद्यादित्यादिना ॥ ४२ ॥

बा० १। अवतरणं ससङ्गतिकमाह *यदा पुनरिति। यदात्वित्यर्थः । अशक्तौ हेतुं सूचयन्नाह * दुर्बल इति । चस्त्वर्थे, व्युत्क्रमेण समुच्चये वा । * भृतिदानं, शब्दानुशासनमाचार्यस्येति वत्प्रयोगः ।

२। शाब्दमर्थमाह *अधमर्णिक इति । साधितादित्यस्य साकाङ्क्षं प्रकृतं शेषमाह *प्रतीति । कर्मधारयः । *दशकमिति । पञ्चद्दशतौ वर्गे वेति पक्षे परिमाणार्थककन्नन्तः । शतमित्यप्रतीति शेषः, तत् प्रति दशसंख्यकामित्यर्थः । एवं पञ्चकं शतमित्यत्रापि बोध्यम् ।

३। तत्र शतग्रहणमुपलक्षणमिति प्रतीत्यः कर्मधारयम् अन्यस्मै दापनाविवक्षां च सूचयन्नस्य तद्दशमांशत्वसम्भवात्फलितमर्थमाह *प्रतीति। प्राग्वत् अर्थद्वयमाह क्रमेण*उत्तमर्ण इत्यादिना । लेतुव्युत्क्रमे इत्याह *उत्तमर्णस्त्विति। *प्राप्तेति। अनेनातथात्वे नैवमिति सूचितम् । एतत्सूचक एव हिः । भृतिर्वेतनम् । अत्र तस्य तत्त्वासम्भवादेतस्यैव सम्भवादाह * विंशतीति ।

४ । नन्विदमुभयमयुक्तं, भृतिदण्डयोरत्रानुक्त्या राज्ञस्तत्तदंशग्रहणमात्रप्रतीतेरिति चेन्न । ग्रहणप्रतीतेर्निर्विवादत्वेन तत्र हेतुपरामर्शे दृष्टे सति अदृष्टकल्पनाया अन्याय्यत्वेन तत्सम्भवे तदभा-

त्वेनाधमर्णे अ[illegible]कृतायादानरूपापराधरूपस्य हष्टहेतोः सम्भवे-नोत्तमर्णे ऽपराधाभावेन केवलाशक्तिसत्त्वेन गुरुत्वल[illegible]त्वतारत-म्येनाधमर्णादपराधेन दण्डस्य ग्रहण[illegible]त्तमणा[illegible]त्या भूतेरिति तात्पर्यात् ।

५। ननु सप्र[illegible]यसाधने इदं सर्वमुक्तम् अप्रतिपक्षे तु का गतिरत आह *अप्रतीति । *दण्डेति । ससाधनप्रकार इत्यादिः । तत्रापि वक्ष्यते इत्युक्तं स्थितं, तदत्रोक्तमेवेति बोध्यम्॥ ४२ ॥

मि० [illegible]धनमधमर्णिकं प्र[illegible]क्तम् । अधुना निर्धन-मधमर्णिकं प्रत्याह ।

या० हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ।
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम्॥ ४३॥

मि० ब्रा[illegible]ण्या[illegible]रुत्तमर्णो [illegible]नजातिं क्षत्रिया[illegible]-जातिं परिक्षीणं निर्धनमृणार्थं ऋणनिवृत्त्यर्थम् कर्म स्वजात्यनुरूपं कारयेत् तत्कु[illegible]म्बाविरोधेन । ब्रा-ह्मणः पुनः परिक्षीणो निर्धनः शनैः शनैः यथोदयं यथासम्भवमृणं दाप्यः। अत्र च हीनजातिग्र[illegible]णं समजातेर[illegible]पलक्षणम् । अतश्च समानजा[illegible]तिम[illegible]पि परिक्षीणं यथोचितं कर्म कारयेत् । ब्राह्मणग्र[illegible]णं च श्रेष्ठजातेरुपल[illegible]णम् । अतश्च क्षत्रिया[illegible]रपि परिक्षीणो वश्या[illegible]ः शनैः शनैर्दाप्यो यथो[illegible]यम् ।

एतदेव मनुना स्पष्टीकृतम् । (अ. ८. श्लो. १७७.)
कर्मणापि समं [illegible]योद्धनिकेना[illegible]र्णिकः ।
समोऽप[illegible]ष्टजातेश्च दद्या[illegible]च्छ्रेयांस्[illegible] तच्छनैः ॥ इति ।

उत्तमर्णेन समं निवृत्तोत्तमर्णाधमर्णव्यपदेशमा-

त्मानमधमर्णः कर्मणा कुर्यादित्यर्थः ॥ ४३ ॥

वा० १। हीनजातिमित्यत्र शूद्रादेरेव न विवक्षितः उत्तमर्णस्वा-रस्यादित्याह *ब्राह्मणेति। योग्यतयाऽऽह *उत्तमर्ण इति। परिक्षीणमित्यस्य व्याख्या अनतिप्रसङ्गाय योग्यतया * निर्ध-नमिति। माक्षिकार्थो धूम इतिवत् ऋणार्थमितीत्याह *ऋणानिष्ट-त्यर्थमिति। योग्यतयाऽनतिप्रसङ्गायाह *स्वेति। नन्वेवं तत्कुटुम्बविनाशः स्याद्रक्षणाभावादत आह * तदिति। तदु-पयोगि सम्पाद्य अवशिष्टकाले इदं तेन कार्यमिति भावः।

२। उत्तरार्धार्थमाह *ब्राह्मणइति। त्वर्थमाह *पुनरिति। शनैरित्यत्र वीप्सान्तर्भाव इत्याह * शनैः शनैरिति। यथोद-यमित्यस्य प्रसिद्धार्थो नेत्याह * यथासंभवमिति।

३। विशेषद्वयमाह * अत्र चेत्यादि। मूलवचने इत्यर्थः। अपिना तस्यापि संग्रहस्तेन न सर्वथा न्यूनता। *समानजातिर-पि,ब्राह्मणादिकम्। च्विः प्राग्वत्। *कर्मेति। समोऽपकृष्टजाति-श्चाधमर्णिको धनिकेन सार्धमात्मानं कर्मणाऽपि समं तुल्यं कु-र्यात्। श्रेयांस्तु तद्धनं शनैर्दद्यादित्यर्थः। अपिनोक्तसमुच्चयः।

४। तत्रास्पष्टांशमाह *उत्तमर्णेनेति। कर्मणा धनादिकृततु-ल्यत्वासंभवात्सममिति व्याचष्टे * निवृत्तोत्तमर्णेति। अयमुत्त-मर्णनिरूपिताधमर्णव्यपदेशस्तत्र यथा नास्ति एवं स्वास्मिन्नपीत्य-र्थः। यद्वा दृष्टान्तार्थमुत्तमर्णग्रहणम्। तयोर्मिथः ससंबन्धिकत्वा-दन्यतरनिवृत्तावपरस्यापि निवृत्तिः ॥ ४३ ॥

किञ्च।

या० दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम्।
मध्यस्थस्थापितं चेत्स्याद्वर्द्धते न ततः परम् ॥ ४४ ॥

मि० उपचयार्थं प्रयुक्तं स्वकीयं धनम् अधम-

र्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृ ाति तदाऽ मर्णेन मध्यस्थ स्ते स्थापितं यदि स्यात्त ततः स्थापनादूर्ध्वं न वर्द्धते । अथ स्थापितमपि या- ना न ददाति ततः पूर्ववद्वर्द्धते एव ॥ ४४ ॥

बा० १। किंचेति। उत्तमर्णेऽन्यद व्यते इत्यर्थः। उत्तरार्धानुरोधेनाह * उपचयेति । स्वकमित्य स्वार्थे कानित्या * स्वकीयमिति। योग्यतया आह *अधमर्णेनेति । य इत्यस्यार्थः *उत्तमर्णइति । अग्रहणे हेतुं पूरयति * वृद्धीति । तथैवाह * यदीत्यादि । मध्यस्थपदं [illegible] *हस्ते इति । *तत्, धनम् । तत इत्यस्य व्याख्या * स्थापनादिति । परमिति व्याचष्टे * ऊर्ध्वमिति ।

२। तुल्य त्वा तदनुक्तं विशेषमा * अथेति । *याच्येति । र्णेनाधमर्ण इत्यर्थः । *ततः, तस्मात् । *पूर्ववत्, स्थापनतः प्राग्वत् ॥ ४४ ॥

मि० इदानीं देयमृणं यदा येन च देयं तदाह ।

या० अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत् ।
दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥४५॥

मि० अविभक्तैर्बहुभिः कु म्बार्थमेकैकेन वा यदृणं कृतं तदृणं कुटुम्बी दद्यात् । तस्मिन्प्रेते प्रोषिते वा तद्रिक्थिनः सर्वे दद्युः ॥ ४५ ॥

बा० १। एव त्तमर्ण प्रकारद्वयमुक्त ,अथाधमर्णे आह *इदानीमिति । यदेति [illegible]ः। येनेत्याधिकारिनिर्देशः । *तत्, त्रितयम् । अ[illegible]रित्यत्र बहुवचनबलाद्बहुत्वं विवक्षितम् । तथा च समस्तैर्व्यस्तैर्वा तैरित्यर्थः । क्तवलक्षण्ये, तत्फालितम।

*अविभक्तै[illegible]ति । कुटुम्बेत्यस्य मध्यमणिन्यायेनान्वयः । कुटुम्बार्थे इत्यन्यर्यं तत्रेत्या[illegible] * अर्थमिति । अस्योभयत्रान्वयः । तथा च बहुभिस्त[illegible] वा कुटुम्ब[illegible] यहणं [illegible]तामित्यर्थः । अनेन देयर्ण कथितम् । उत्तरा[illegible] स्वारस्येन शेषं पूरयति *तद्दणं कुटुम्बी दद्या[illegible]ति । अनेनाधिकारिकथन[illegible] । *तस्मिन्, कुटुम्बिनि । *तदिति । तस्य कुटुम्बिनो ये रिक्थग्राहका इत्यर्थः । [illegible] वचनलभ्यमाह * सर्वे इति । अत्र प्रेते प्रोषिते वेति कालाभिधानं, तद्रिक्थिन इत्यपि अधिकारि[illegible] भावः ॥ ४५ ॥

मि० येन [illegible]यामित्यत्र प्र[illegible]दाहरणमाह ।

या० न योषित् पतिपुत्राभ्यां न पुत्रेण कृतं पिता ।

दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥ ४६ ॥

मि० पत्या [illegible]तमृणं योषिद्भार्या नैव दद्यात् । पुत्रेण कृतं योषिन्माता न दद्यात् । तथा पुत्रेण कृतं पिता न दद्यात् । तथा भार्याकृतं पतिर्न दद्यात् । कुटुम्बार्थादृते इति [illegible]विशेषः । अतश्च कुटुम्बार्थं येन केनापि कृतं तत् कु[illegible]म्बिना देयम् । तदभावे तद्दायहरै[illegible]यमित्युक्तमेव ॥ ४६ ॥

बा० १। *प्र[illegible]दाहरणमिति । पूर्ववचनेन कुटुम्ब्यादिभिराधिकारिभिर्ऋणं देयमिति येनेत्यं[illegible]ऽपि वृत्तः । तत्र योषिदादीनामपि कुटुम्ब्यादित्वेनाधिकारित्वेन तस्य देयत्वं यद्यपि प्राप्तं तथापि विषयविशेषे देयमिति पूर्वाभिहितम् ऋणस्य देयत्वं व्यावर्त्यते इति प्र[illegible]दाहरणत्वमित्यर्थः । तथाचानेनादेयमृण[illegible]च्यते इति भावः ।

२। [illegible]तामित्यस्य पूर्वत्रापि संबन्धः । योषित्पदं योग्यतय भ्यर्थमिति पृथक् व्याचष्टे *पत्येति । पूर्वतोऽनुवृत्तेराह *ऋणमि-

ति । सर्वमिति व्यायवा * नैवेति ।

३। द्वितीयपादमवतारयति * तथेति ।

४। तुरीयपादमवतारयति * तथेति । योग्यतया स्त्रीपदार्थमाह *भार्येति । न दद्यादित्यस्यानुषङ्गः ।

५। अत्र क्लीबत्वभ्रमनिरासाय * कुटुम्बेति । सर्वशेष इति पाठः । घञजपः पुंसीत्युक्तेः । शेषमिति पाठस्तस्य भावोपादत्वेन । यद्वा सर्वस्य शेषः शेषत्वं यस्य तत् । अत एव प्रत्युदाहरणतया पूर्वैकवाक्यतेत्याह *अतश्चेति । *कृतम्, ऋणमिति शेषः । *तद्दायहरैः, यैः कैश्चित् ।

नारदोऽपि, (व्य० प० १।१६।१७)

न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा ।
अभ्युपेतादृते यद्वा सह पत्या कृतं भवेत् ॥
दद्यादपुत्रा विधवा नियुक्ता या मुमूर्षुणा ।
यो वा तद्रिक्थमादद्याद्यत्र रिक्थमृणं ततः ॥ इति ।

कात्यायनोऽपि,

भर्त्रा पुत्रेण वा सार्द्धं केवलेनात्मना कृतम् ।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया ॥
मुमूर्षुणा वा भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं तया ॥ इति ॥४६॥

मि० पुत्रपौत्रैर्ऋणं देयमिति वक्ष्यति, तस्य पुरस्तादपवादमाह ।

या० सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम् ।
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम् ॥ ४७ ॥

मि० सुरापानेन यत्कृतमृणं, कामकृतं स्त्रीव्यसननिर्बृ-

त्तं, द्यूते पराजयनिर्वृत्तं, दण्डशुल्कयोरवशिष्टं, वृथा-
दानं धूर्तबन्दिमल्लादिभ्यो यत्प्रतिज्ञातम् ।

धूर्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे ।
चाटचारणचौरेषु दत्तं भवति निष्फलम् ॥

इति स्मरणात् । एतदृणं पित्रा कृतं पुत्रादिः
शौण्डिकादिभ्यो न दद्यात् । अत्र दण्डशुल्कावशि-
ष्टकमित्यवशिष्टग्रहणात्सर्वं दातव्यमिति न मन्त-
व्यम् ।

दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा ।
न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम् ॥

इत्यौशनसस्मरणात् ।

गौतमेनाप्युक्तं, मद्यशुल्कद्यूतकामदण्डाः पुत्रा-
न्नाध्यावहेयुरिति । न पुत्रस्योपरि भवन्तीत्यर्थः । अ-
नेनादेयमृणमुक्तम् ॥ ४७ ॥

बा० १। *तस्येति । अदेयप्रक्रमादिति शेषः । तथाचैतदर्थ-
मेवमुक्तौ इतः परस्यापि पाठक्रमादिति न्यायेनार्थक्रमतः पूर्व-
भावादपवादत्वमिति न काचिदसंगतिरिति भावः ।

२। द्यूतान्तद्वंद्वस्य कृतशब्देन तृतीयातत्पुरुषः । तस्य च प्रत्ये-
कं सबन्धः । सुरापदं च तत्पाने लाक्षणिकं साहचर्यादित्याह
*सुरापाणेनेति । वा भावकरणयोरिति णत्वविकल्पः । कामो
रत्यभिलाष इत्याह *स्त्रीति । बहुव्रीहिः । एवमग्रेऽपि । द्यूते
द्वैविध्यसत्त्वेऽपि जये तदभावादाह *पराजयेति । लक्षणेति
भावः । दण्डेत्यत्र द्वन्द्वोत्तरं षष्ठीतत्पुरुषः स्वार्थे कन् इत्याह
*दण्डेति । क्रयविक्रये राजभागः शुल्कम् । *वृथेति । वृथा-
दानमित्यस्य वृथादीयमानमित्याद्यर्थे शब्दे बाधात्तद्वत्तद्व-

शि मित्यर्थः व्याख्यानात् *धूर्तेति । तथा च तदनुकूलो व्यापारोऽत्र प्रतिज्ञारूप एवेति भावः ।

३। धूर्तादिभ्यो दत्तस्य वृथादानत्वं समूलयति *धूर्ते इति। *कितवे, द्यूतकारिणि । *चाटे,विदूषके । अत्र निष्फलमित्यत्रापि लौकिकफलाभावाद् वृथादानत्वं विवक्षितं, न तु दृष्टफलाभावादिति भावः ।

४। पदार्थानुक्त्वा वाक्यार्थमाह *एतदिति । पैतृकमिति व्याचष्टे * पित्रेति । अयं फलितार्थः । आगत इत्यधिकारे पितुर्यच्चेति ठञ्विधानात् । उत्सर्गानुरोधेन पुत्रपदमुपलक्षणमित्याह * पुत्रादिरिति । इहेति व्याचष्टे *शौण्डीति । तस्य तत्त्वविवक्षया तत्र सप्तमी ।

५। विशेषमाह * अत्रेति । वचने इत्यर्थः । * तु पुत्रेण, पुत्रेण च । * व्यावहारिकमिति । न कुटुम्बोपयोगीत्यर्थः ।

६। *मद्येति । अत्र मद्यादिदण्डान्तपदैस्तदर्थं व्ययीकृतानि द्रव्याणि लक्ष्यन्ते। तानि पितृसंबद्धानि पुत्राभाव्यावहेयुरित्यर्थः। अभिभवेयुरिति पाठान्तरम्। पराभवेयुरिति उभयार्थः। तात्पर्यार्थमाह *न पुत्रस्येति। तथा च दण्डशुल्कावशिष्टकमित्यत्र त्रयाणां समाहारद्वंद्वः । कन्स्वार्थे । अवशिष्टं चोपस्थितत्वात्तयोरेवेत्येवं विवक्षितं न तु प्रागुक्तमिति अनेन सूचितमिति बोध्यम् । उपसंहरति *अनेनेति । उभयेनेत्यर्थः ॥ ४७ ॥

मि० न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह ।

या० गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।
ऋणं दद्यात्पतिस्तेषां यस्माद्वृत्तिस्तदाश्रया ॥४८॥

मि० गोपो गोपालः,शौण्डिकः कल्पाकारः, शैलूषो

नटः, रजको वस्त्राणां रञ्जकः, व्याधो मृगयुः। एतेषां योषिद्भिर्यदृणं कृतं तत् पतिभिर्देयं, यस्मात्तेषां वृत्ति-जीवनं तदाश्रया योषिदधीना। यस्मात्तास्तदाश्र-येति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्ते-ऽपि योषित्कृतमृणं दद्युरिति गम्यते ॥ ४८ ॥

बा० १। गोपेति। अभ्यर्हितत्वात्पूर्वनिपातः। व्याधान्तैर्द्वन्द्वः योषिद्भिस्तत्पुरुषः। आदौ पदार्थानाह *गोप इति। अथ वाक्यार्थमाह *तेषामिति। अनेन द्वन्द्वः सूचितः। पतिभिरिति ... तावेकव-चनामित्या * पतिभिरिति।

२। तत्र बीजमाह *यस्मादिति। *तेषां, तत्पतीनाम्। अनेन तासामित्यपपाठ इति सूचितम्। नेदं परिगणनं किंतूपलक्षणमि-त्यनेनैव सूचितमित्याह * यस्मादिति। * अन्येपि, तद्भिन्नाः सर्वे ब्राह्मणान्योऽपि ॥ ४८ ॥

मि० पतिकृतं भार्या न दद्यादित्यस्यापवादमाह।

या० प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्।
स्वयं कृतं वा यदृणं नान्यत्स्त्री दातुमर्हति ॥ ४९ ॥

मि० मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋण-दाने यत् प्रतिपन्नं तत् पतिकृतमृणं देयम्। यच्च पत्या सह भार्यया ऋणं कृतं तदपि भर्त्रभावे भार्यया अपुत्रया देयम्। यच्च स्वयमेव कृतम् ऋणं तदपि देय-म्। ननु प्रतिपन्नादित्रयं स्त्रिया देयमिति न वक्तव्य-म्। संदेहाभावात्।

उच्यते।

(मनु० ८।४१६)

भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्॥

इति वचनात्स्त्रियाः निर्धनत्वेन प्रतिपन्नर्णदानाभावाशङ्कायामिदमुच्यते, प्रतिपन्नं स्त्रिया देयमित्यादि। न चानेन स्त्र्यादीनां निर्धनत्वमभिधीयते। पारतन्त्र्यमात्रप्रतिपादनपरत्वात्। एतच्च विभागप्रकरणे स्पष्टीकरिष्यते। नान्यत्स्त्री दातुमर्हतीत्येतत्तर्हि न वक्तव्यम्। विधानेनैवान्यत्र प्रतिषेधासिद्धेः। उच्यते।

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्।

इत्यनयोरपवादार्थमुच्यते, अन्यत् सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति॥ ४९॥

बा० १। प्रथमपादार्थमुत्क्रमेण स्मृत्यन्तरानुरोधेनाह *मुमूर्षुणेति। परलोकं गन्तुमिच्छता देशान्तरं गमिष्यता वा भर्त्रा ऋणदानविषये नियुक्तया प्रेरितया भार्यया यत्प्रतिपन्नं प्रदानमङ्गीकृतं तत् तादृशं तया देयमित्यर्थः।

२। द्वितीयपादार्थमाह *यच्चेति। अनेन वा चार्थे इति सूचितम्। एवमग्रेऽपि। अत्र पत्या सहेत्युक्त्या तस्याप्राधान्यं सूचितम्। एवमग्रे पुत्रःतस्या उभयोरभावे तस्या दानाधिकारादाह *भर्त्रभावे इत्यादि।

३। तृतीयपादार्थमाह *यच्चेति। मध्यमतो भेदाय सर्वमिति व्याचष्टे *स्वयमेवेति।

तथा च नारदः,

न स्त्री पतिकृतं दद्यादृणं पुत्रकृतं तथा।

अ. प्रवासे यद्वा सह पत्या कृतं भवेत् ॥
दद्याद् भा विधवा नियुक्ता या मुमूर्षुणा ।
यो वा तद्रिक्थमादद्यादत्र रिक्थ. णं ततः ॥ इति ।
कात्यायनेऽपि,
भर्त्रा पुत्रेण वा सार्धं के. लेनात्मना कृतम् ।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया ॥
मर्तुकामेन वा भर्त्रा उक्ता देयमृणं त्वया ।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥ इति ।

४। *त्रय एवेति । एवोऽप्यर्थे । एते त्रयोऽर्जितधना अपि अधना एव अस्वामिनो धने स्मृता इत्यर्थः । *यत्ते इति । ते भार्यादयो यत्किंचित्समधिगतधनमर्जयन्ति तद्धनं यस्य ते भार्यादयस्तस्य भवतीत्यर्थः । यस्य ते इति पाठः । यस्यै ते इति पाठान्तर. ।

५। नन्वनेन तस्या निर्धनत्वे प्रतीयमाने सति प्रतिपन्नमित्या-दिवचनशतैर्देयत्वोक्तावपि कथं तया देयं निर्धनत्वाद. आ-ह * न चेति । नहीत्यर्थः । * अनेन, म. वचनेन । अत ए-वाशङ्क्यमिति प्राक् उक्तम् । *पारतन्त्र्येति । तन्मात्रप्रतिपा. न-तात्पर्यकत्वादित्यर्थः । तथा चानुज्ञां विना नाधिकारः स्वात-न्त्र्येण यत्र . त्रचिद्विनियोगे, सत्यां तु तस्यां सोऽस्तीति भावः ।

६। नन्वत्र किं नियामकं, तथैवार्थः कुतो न, अथम. र्वो विधिरस्तु,तथा चैतदन्यविषयत्वं तस्येति व्यवस्थासंभवाददोषो-ऽत आह *एतच्चेति ।

७। एवं सति तुर्यपादांशे एव शङ्कते *नान्यदिति । *सिद्धे-रिति । अर्थादिति शेषः । प्र. रेवाभावादिति भावः । यथाकथं-चित्स्वयं कृतस्यावश्यदेयत्वादाह *अनयोरिति । *सुरेति । सु-

रापानादिव्यसनेनोपार्च कृतमित्यर्थः । इतिरर्थसमाप्तौ । एतेनै-तच्छेषविषयता प्राग्वाक्यनिषेधस्येति ध्वनयितुं पुनरुक्तं नान्यथेति व्याख्यानमपास्तम् । तथा पुष्टेरभावात् ॥ ४९ ॥

पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तन्नियममाह ।

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ॥५०॥

पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशं ग-तोऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृत-मृणमवश्यम् अपनेयं पुत्रेण पौत्रेण वा, पितृधनाभा-वेऽपि पुत्रत्वेन पौत्रत्वेन च । तत्र क्रमोऽप्ययमेव पित्र-भावे पुत्रः पुत्राभावे पौत्र इति । पुत्रेण पौत्रेण वा निह्नवे कृते अर्थिना साक्ष्यादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यर्थः । अत्र पितरि प्रोषिते इत्येतावदुक्तम् । कालविशेषस्तु —

नारदेनोक्तो द्रष्टव्यः, (व्य० प० १।१४)

नार्वाक्संवत्सराद्विंशात्पितरि प्रोषिते सुतः ।
ऋणं दद्यात्पितृव्ये वा ज्येष्ठे भ्रातर्यथापि वा ॥ इति ।

प्रेतेऽप्यप्राप्तव्यवहारकालो न दद्यात् । प्राप्तव्य-वहारकालस्तु दद्यात् ।

स च कालस्तेनैव दर्शितः, (व्य० प० १३५।३६)

गर्भस्थैः सदृशो ज्ञेय आऽष्टमाद्वत्सराच्छिशुः ।
बाल आषोडशाद्वर्षात्पौगण्डश्चेति शब्द्यते ॥
परतो व्यवहारज्ञः स्वतन्त्रः पितरावृते । इति ।

यद्यपि पितृमरणात् पूर्वं बालोऽपि स्वतन्त्रो जा-त तथापि नर्णभाग्भवति ।

यथाह, (ना० व्य० प० १।३१)

अप्राप्तव्यवहारश्चेत् स्वतन्त्रोऽपि हि नर्णभाक् ।
स्वातन्त्र्यं हि स्मृतं ज्येष्ठे ज्यैष्ठ्यं गुणवयःकृतम् ॥ इति ।

तथा आसेधादानिषेधश्च दृश्यते, (ना. अ० १।५४)

अप्राप्तव्यवहारश्च दूतो दानोन्मुखो व्रती ।
विषमस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥ इति ।

तस्मात् —

अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता मोचनीयो यथा न नरकं व्रजेत् ॥ इति,

पुत्रेण व्यवहारज्ञतया जातेन निष्पन्नेनेति व्या-ख्येयम् । श्राद्धे तु बालस्याप्यधिकारः । न ब्रह्माभि-व्याहारयेदन्यत्र स्वधानिनयनादिति गौतमस्मरणात् । पुत्रपौत्रैरिति बहुवचननिर्देशाद् बहवः पुत्रा यदि विभक्ताः स्वांशानुरूपेण ऋणं दद्युः, अविभक्ताश्चेत्सं-भूयसमुत्थानेन, गुणप्रधानभावेन वर्तमानान् प्र-धानभूत एव वा दद्यादिति गम्यते ।

यथाह नारदः, (व्य० प० १।२)

अत ऊर्ध्वं पितुः पुत्रा ऋणं दद्युर्यथांशतः ।
अविभक्ता विभक्ता वा यस्तामुद्वहते धुरम् ॥ इति ।

अत्र च यद्यपि पुत्रपौत्रैर्ऋणं देयमित्यविशेषेणोक्तं तथापि पुत्रेण यथा पिता सवृद्धिकं ददाति तथैव ऋ-णं देयम् । पौत्रेण तु समं मूलमेव दातव्यं न वृद्धि-रिति विशेषोऽवगन्तव्यः ।

णमात्मीयवाल्पैत्र्यं देयं पुत्रैर्विभावितम् ।
पैतामहं समं देयमदेयं तत्सुतस्य तु ॥

इति बृहस्पतिवचनात् । अत्र विभावितमित्य-विशेषोपा नात्साक्षिविभावितमित्यत्र साक्षिग्रहणं प्रमाणोपलक्षणम् । समं यावद् गृहीतं तावदेव देयं न वृद्धिः । तत्सुतस्य प्रपौत्रस्यादेयमगृ तिधनस्य । एतच्चोत्तरश्लोके पष्टायिष्यते ॥ ५० ॥

बा० १। सिं वलोकनन्यायादरेणाह *पुनरपीति । कंचिद्विशेषं व मिति भावः । वक्ष्यमाणक्रममाह *पितेति। मा क्रमेणाह *प्रेतइति । प्रोषिते इत्यस्यार्थो *दूरेति । सुरापानादिव्यसनाक्रान्तऋणस्यादेयत्वस्योक्तत्वा व्यसनेत्यस्य व्याख्या *अचिकित्सेति । आदिनाऽऽधिः । देयमित्यस्य व्याख्या *अवश्येति । आवश्यके कृत्ये इति भावः । द्वंद्वादुभाभ्यां युगपद्देयमिति प्रतीयमानार्थनि सायाह * पुत्रेणेति । ब वचनं व्यक्त्यभिप्रायम्। तत्त्वादेवाह *पित्र्येति। पितुरागतेत्यर्थः। पितृधनेति पाठान्तरम्। *तत्र, दाने। तुर्यपादार्थमाह *पुत्रेणेति। वक्ष्यमाण त्या साक्षिपदमुपलक्षणमित्याह *साक्ष्यादीति । सर्वस्या पन्न इत्याह *ऋणमिति ।

२। अत्र छन्दोनुरोधेन यथाश्रुतोक्तिक्रमेणाद्ये विशेषमा *अत्रेति । *विंशात्, विंशतेः पूरणात् । तत्र पितरीत्युपलक्षणमिति सूचयन्नाह *पित्र्ये इति । कनिष्ठनिरासायाह * ज्येष्ठे इति । इदं चाविभक्तत्वे तदीयधनग्रहणे चेति बोध्यम् । द्वितीये विशेषमाह *प्रेतेऽपीति । पितरीति शेषः । अग्रे पुत्रादिरिति शेषः ।

३। *तेनैव, नारदेनैव। *आऽष्टमात्, आङभिव्याप्तौ । एव-

मग्रेऽपि। तत्साहश्य तस्यैव नाम शि रिते। षोडशादि डश-न्तम्। पौगण्ड इति बालस्यैव संज्ञान्तरम्। *शब्द्यते, कथ्यते। *परतः, षोडशवर्षादूर्ध्वम्। *पितराद्दते, तौ विना। तत ऊर्ध्वं स तयोरभावे स्वतन्त्र इत्यर्थः।

४। ननु षोडशवर्षानन्तरं तस्य तत्त्ववत्तयोरभावे वातन्त्र्य-मिति नियमो वचनबोध्योऽयुक्तः। यतः पूर्वमपि पि णे स्वातन्त्र्यसिद्धिः। तथा च तद्वत्तस्यापि तद्दानाधिकारित्वमित्यप्राप्त-व्यवहारस्यापि ऋणं देयं स्यादिति, अन्यथा प्रा मयुक्तमित्यत आह *यद्यपीति। पित्रोर्मरणेत्यर्थः। अपिना शिशुसमुच्चयः। व्युत्क्रमेणोक्तिरियम्। *यथाहेति। यतः स एव आहेत्यर्थः। *अप्राप्तेति। अप्राप्तव्यवहारः षोडशवर्षातिक्रम हितः। *चेत्, यदि। *हि, तदा। अनयोरभावात्स्वतन्त्रोऽपि ऋणभाक् न भवतीत्यर्थः। अपिना अस्वतन्त्रसमुच्चयः। ननु तत्र तद्व-त्स्वातन्त्र्यमपि माऽस्तु अत आह *स्वातन्त्र्यमिति। हि यतः स्वातन्त्र्यं ज्येष्ठे स्मृतं न तु तत्रैवेत्यर्थः। ननु तद्वत्तदा तदपि न अत आह *ज्यैष्ठ्यमिति। तथा च तयोरभावादुभयकृतज्यैष्ठ्या-भावात्तस्मिन् तत्त्वेन तत्त्वेपि वचनान्न तत्त्वमित्युक्तवचने तयो-रभावाद्यः स्वतन्त्रः स परतो व्यवहारज्ञ इत्यन्वयो न तु परत इत्यस्याग्रेऽपीति न कोऽपि दोषः। अत एव तथैव प्रतिज्ञानम्।

५। तत्राप्राप्तव्यवहारत्वदृढीकरणेनोक्तार्थे युक्त्यन्तरमपि सू-चयन्नन्यदप्याह *तथेति। उक्तनिषेधवदित्यर्थः। *आसेधेति। आसेधा नयोर्निषेधोऽपीत्यर्थः। *विषमेति। सङ्कटस्थाश्चेत्यर्थः। अत्र पञ्चानां निषेधः।

६। एवं सति प्राप्तस्मृत्यन्तरविरोधं परिहरति *तस्मादिति। यतोऽप्राप्तव्यवहारो न ऋणभाक् तस्मात्, *इति

वचनम्, *इति एवं व्याख्येयमित्यर्थः। अन्यथा विरोधो दुष्परिहर इति भावः। *अतः, पुत्रत्वात् । *यत्नतः, यत्नेन । तदेवाह *यथेति । तथा च जातमात्रेण पुत्रेण स ऋणान्मोच्य इति नार्थः किं तु व्यवहारज्ञतया जातेन तदूर्ध्ववर्षकेण तेन स ततो मोच्य इत्यर्थः ।

७। नन्वेवं तस्य श्राद्धेऽप्यधिकारो न स्यात् व्यवहारानभिज्ञतया वैदिकव्यवहारानभिज्ञत्वस्य सुतरां सत्त्वादत आह *श्राद्धेत्विति । तुरुक्तवैलक्षण्ये । अपिः प्राग्वत्। *न ब्रह्मेति । ब्रह्म वेदं नाभिभाषयेदन्येन बालः । स्वधा स्वधाकारः निनीयते प्रणीयते ऽस्मिन् श्राद्धे तत्स्वधानिनयनं ततो ऽन्यत्र श्राद्धादन्यत्र नाभिभाषयेदित्यर्थः । अयं भावः, श्राद्धे वेदोच्चारणं कारयेद्यदि स्वयमनुपनीतः, उपनीतस्य च स्वयमुच्चारणे ऽधिकारात् । एवं च बालस्यापि प्रयोजककर्तृत्वप्रतीतिबलाधजमानताप्रतीतेरधिकारोऽस्तीति ।

८। वस्तुतस्तु ब्रह्म वेदमन्य ऋत्विगादिः प्रयोजकः अनुपनीतं बालं नाभिव्याहारयेत् तं वेदोच्चारणे न प्रयोजयेत्स्वधानिनयनादन्यत्रेत्यर्थः ।

मनुरपि,

न ह्यस्मिन्युज्यते कर्म किञ्चिदामौञ्जिबन्धनात् ।
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ॥ इति ।

एवं च कृतचूडस्यानुपनीतस्यापि श्राद्धे ऽधिकारस्तस्य मुख्यत्वात् । एवं च तदुपयोगी तस्य मन्त्रपाठोऽपि भवत्येवेति बोध्यम् ।

कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च ।
स्वधाकारं प्रयुञ्जीत मन्त्रोच्चारं न कारयेत् ॥

इति व्याघ्रनाम्ना लिखितं वचनं यदि समूलं तदा मन्त्र-
विषये विकल्पो द्रष्टव्यः ।

९। व्यक्ताभिप्रायेण कृतव वचनस्य फलमाह * त्रपौत्रारिति।
पत्रमन्यन्तर गम्यते स्यत्रान्वयः। * विभक्ता इति । तदेति
शेषः । क्वचित् पाठ एव । एवमग्रेऽपि। *सम्भूयेति । मिलित्वा
देयमिति स तेनेत्यर्थः, मिलित्वा कीकरणेन वा । अंशतो
नमत्रापि । पूर्वं भेदेन दानमत्र तु मेलनेनेति विशेषः। अत एव
नारदैकवाक्यता । दद्युरित्यस्यानुषङ्गः । इदमग्रे स्फुटीभविष्यति
तद्विवादप्रकरणे। इदमपि समप्रधानभावविषयम्, अत एवाह *गु-
णेति। *वर्तमानानां, प्रधानानां तु । *प्रधानेति । मुख्येत्यर्थः।
उक्तद्वये मानमाह *यथाहेति । अतः पुत्रा ऊर्ध्वं पितुः तन्मरणा-
द्यनन्तरम् विभक्ता वेत्यन्त एकोऽन्वयः। यथांशत इत्यस्योभय-
त्रान्वयः। अनेन प्रकारद्वयमुक्तम्। तृतीयप्रकारमाह *य इति ।

१०। विशेषमाह * अत्र चेति । पुत्रपौत्रैरित्यस्मिन्वचने
इत्यर्थः । *समं, गृहीतसदृशं । लमेवेत्येवव्यवच्छेद्यमा *न
वृद्धिरिति । एवमग्रेऽपि ।

११। अत्र मानमाह * ऋणमिति । आत्मीयवदित्यनेन
सवृद्धिकदानमुक्तम् । *सममिति। अधात्पौत्रेण। *तत तस्येति।
पात्रं तस्य मपां स्येत्यर्थः ।

१२। पुत्रपौत्रैरिति विशेषस्यानेन गुरुवाक्येन सामान्यप ण

१ पुत्रपौत्रैरिति या वल्क्यवाक्य लाक्षिभावितमितिप्रमाणा -
पोपन्यासात्तस्य विशेषत्व । ऋणमात्मीयवदिति हस्पतिवाक्ये
विभावितमिति प्रमाणविशेषानुपन्यासात् सामान्यत्व । तथापि
त । प्रकृते दुर्वचमित्यन्वयः। दुर्वचत्वे हेतुः सामान्यस्यत्या :
बलत्वेनेत्यन्तः। दुर्वचमिति इत्यनन्तरं हेतोरिति शेषः। वैपरीत्ये-
नेत्यस्य न्यान्तरासिद्धन्यायवैपरीत्येनेत्यर्थः ।

सह मा. विरोधपरिहारः सामान्य च विशेषे उपसं ार इति न्यायेन तन्त्रान्तरसिद्धेन कर्तुं यद्य चितस्तथापि सामान्यस्याधिकसंग्राहकत्वेन सफलत्वेन स्य न्यूनत्वेन दुर्बलत्वेन तथा प्रकृते वचामिति वैप त्येन विरोधं परिहरति *अत्रेति। हस्पतिवाक्ये इत्यर्थः। *अविशेषेति। सामान्येनेत्यर्थः। *इत्यत्र, मूलवाक्ये। *प्रमाणोपल णमिति। प्रमाणमात्रोपलक्षणमित्यर्थः। तथा च येन केनापि प्रमाणेन साधितमृणं पुत्रादिना यमित्यर्थेन न वचनयोर्मिथो विरोध इति भावः। अत एव प्राक् तथा व्याख्यातः।

१३। अस्योत्त र्धार्थमाह *सममित्यादि। विशेषान्तरमा *तत्सुतेति। विशेषान्तरमाह *अगृहीतेति। नन्वत्र किं मानमत आह *एतच्चेति॥ ५०॥

मि० णापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शिताः। तेषां च समवाये क्रमोऽपि दर्शितः।

इदानीं कर्त्रन्तर मवाये च क्रममा ।

या० रिक्थग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥५१॥

मि० अन्यदीयं द्रव्यमन्यस्य क्रया व्यतिरेकेण यत्स्वीभवति तद्रिक्थम्। विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः। स ऋणं दाप्यः। एतदुक्तं भवति। यो यदीयं द्रव्यं रिक्थरूपेण गृह्णाति स तत् तमृणं दाप्यो न चौरादिरिति। योषितं भार्यां गृ ातीति योषि ग्राहः। स तथैव ऋणं दाप्यः। यो यदीयां योषितं गृह्णाति स तत् तमृणं

दाप्यः। यो ि तोऽविभाज्य. व्यत्वेन रिक्थव्यप शा-नर्हत्वाद्भेदेन निर्देशः। पुत्रश्चानन्याश्रितद्रव्यः ऋणं दाप्यः। अन्यमाश्रितमन्याश्रित. अन्याश्रितं मातृ-ाप. सम्बन्धिद्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्या-श्रितद्रव्यः [illegible]ः। पुत्रहीनस्य रिक्थिन ऋणं दाप्या इति सम्बन्धः। एतेषां समवाये क्रमश्च प ठक्रम एव। रिक्थग्राह ऋणं दाप्यस्त भावे यो-षिद्ग्राहस्तदभावे पुत्र इति। नन्वेतेष समवाय एव नोपपद्यते।

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।

(मनु० अ० ९।१८५)

इति पुत्रे सति अन्यस्य रिक्थग्रहणासम्भवात्। योषिद्ग्राहोऽपि नोपपद्यते। (मनु. अ. ५. श्लो. १६२.)

न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते।

इति स्मरणात्। तथा ऋणं पुत्रो दाप्य इत्यप्य-युक्तम्। पुत्रपौत्रैर्ऋणं देयमित्युक्तत्वात्। अनन्या-श्रितद्रव्य इति विशेषणमप्यनर्थकम्। पुत्रे सति द्रव्यस्यान्याश्रयणासम्भवात्। सम्भवे च रिक्थ-ग्राहीत्यनेनैव गतार्थत्वात्। पु[illegible] रिक्थिन इत्ये-तदपि न वक्तव्यः। पुत्रे सत्यपि रिक्थग्राही ऋणं दाप्य इति स्थितम्। असति पुत्रे रिक्थग्राही सुतरां दाप्य इति सि[illegible]भवति।

अत्रोच्यते। पुत्रे सत्यप्यन्यो रिक्थग्राही सम्भ-वति। क्लीबान्धबधिरा[illegible]नां पुत्रत्वेऽपि रिक्थहरत्वा-भावात्। तथाच क्लीबादीन[illegible]क्रम्य "भर्तव्यास्

नि शङ्का" इति वचनात । तथा, सवर्णासु ओऽप्य-न्याय तेन मेतकेषामिति गौतमस्मरणात् । अ-तश्च क्लीबादि पुत्रेषु सत्सु अन्याय त च सवर्णा-पुत्रे सति पितृव्यतत् आदिः। यापि प्राह यद्यपि शा विरोधेन न सम्भवति तथाप्यतिकान्-निषेधः पूर्वपति तर्णापाकरणाधिका भवत्येव । योषित् प्राह यश्च त णा आरिणीलामसितिसं गृ ाति यश्च नभ्या ति र्णां प्रथमा ।

यथाह नारदः, (व्य० प० १२।४५-५२)

पर वाः ि यस्त्वन्याः सप्त प्रोक्ता यथाक्रम ।
नभूस्त्रिविधा तासां स्वा णी तु चतुर्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहण षिता ।
पुनर्भूः प्रथमा नाम पुनःसंस्का कर्मणा ॥
शयमानवेक्ष्य स्त्री कामिया प्र ीयत ।
उत्पन्नसा साऽन्यस्मै सा ि प्रकीर्तिता ॥
उत्पन्नसा सा उत्पन्नव्य भिचारा ।
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
वर्णाय सपिण्डाय सा तीया प्रकीर्तित ॥
स्त्री प्रसूताऽप्र ता वा पत्यावेव तु जीवति ।
अन्य प्रथमा स्वा णी तु सा ॥
कामा पति त्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात्स ि तीया प्रकीर्तिता ॥
मृते भर्तरि तु प्राप्तान् देवरादीनपास्य या ।
उपगच्छत्परं कामात् तीया प्रकीर्तिता ॥
प्राप्ता शाद्धनक्रीता क्षुत्पिपासा रा च या ।

तथाऽऽह मि[illegible] पगता सा चतुर्थी प्रकीर्तिता ॥
अन्तिमा स्वैरिणीनां या प्रथमा च [illegible]नसुताम् ।
ऋणं तयोः पतिकृतं दाप्यस्ते ऽप[illegible]तः॥ इति।
(व्य० प० १।२४)

तथा, अन्योऽपि योषि[illegible] ग्राह ऋणापाकरणेऽधिकारी तेनैव दर्शितः, (व्य० प० १।२१)

या तु [illegible]प्रधनैव स्त्री [illegible]पत्या चाऽन्यमाश्रयेत् ।
[illegible]ऽस्या [illegible]चाहृणं भ[illegible]त्सृजेद्वा तथैव ताम् ॥

प्र[illegible]ष्टेन धनेन सह वर्तते इति सप्रधना, बहुधनेति यावत् । तथा— (ना० व्य० प० १।२२)

अधनस्य ह्य[illegible]त्रस्य [illegible] यः स्त्रियम् ।
ऋणं वोढुः स भजते सैव चास्य धनं स्मृतम् ॥ इति।

पुत्रस्य [illegible]नवचनं क्रमार्थम् । अनन्याश्रित[illegible]व्य इति बहुषु पुत्रेषु रिक्थाभावे अंशग्र[illegible]णयोग्यस्यैव ऋणापाकरणेऽधिकारो नायोग्यस्यान्धादेरित्येवमर्थम्। [illegible]त्रहीनस्य रिक्थिन[illegible]स्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रा[illegible]यो यदि रिक्थं गृ[illegible]न्ति तदृणं दाप्याः नान्यथेत्येवमर्थम् । [illegible]प्रपौत्रौ च रिक्थग्र[illegible]णाभावेऽपि [illegible]प्यावित्[illegible]क्तम् ।

यथाह नारदः, (व्य० प० १।४)

क्रमादव्या[illegible]तं प्राप्तं पुत्रैर्यन्नर्णमु[illegible]तम् ।
दद्युः पैतामहं पौत्रा[illegible]च[illegible]थान्निवर्तते ॥

इति सर्वं निरवद्य[illegible] ।

यद्वा । योषिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तम् । [illegible]त्राभावे योषि[illegible]ो दाप्य इत्युच्यते, पुत्र[illegible]नस्य

रिक्थिन इति । रिक्थशब्देन योषिदेवोच्यते । सैव चास्य धनं स्मृतमिति स्मरणात् ।

यो यस्य हरते दारान् स तस्य हरते धनम् । इति च ।

ननु यो [illegible]भावे पुत्र ऋणं दाप्यः, पुत्राभावे योषिद्ग्राह इति परस्परविरुद्धं । उभयसद्भावे न कश्चिद्दाप्य इति । नैष दोषः । अन्तिमस्वैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः [illegible]हारिणश्चाभावे पुत्रो दाप्यः, पुत्राभावे तु निर्धननि[illegible]पत्ययोषिद्ग्राही दाप्य इति ।

एतदेवोक्तं नारदेन, (व्य० प० १।२३)

धनस्त्रीहारि[illegible]त्राणामृणभाग् यो धनं हरेत् ।
पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनि[illegible]त्रयोः ॥ इति ।

धनस्त्रीहारिपुत्राणां समवाये यो धनं हरते स ऋणभाक् । पुत्रोऽसतोः स्त्रीधनिनोः—स्त्री च धनं च स्त्रीधने ते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋणभाक् भवति । धने[illegible]त्रयोरसतोः स्त्रीहार्येव ऋणभाक् । [illegible]भावे पुत्र ऋणभाक्, पुत्राभावे स्त्रीहारीति विरोधप्रतिभासपरिहारः पूर्ववत् ।

पुत्रहीनस्य रिक्थिन इत्यस्यान्या व्याख्या । अत्र एते धनस्त्रीहारि[illegible]त्रा ऋणं कस्य दाप्या इति वीक्षायाम् उत्तमर्णस्य दाप्यास्तदभावे तत्पुत्रादेः । तत्पुत्राद्यभावे कस्य दाप्या इत्यपेक्षाया[illegible]मिद[illegible]पतिष्ठते, [illegible]त्रहीनस्य रिक्थिन इति । पुत्राद्यन्वयहीनस्योत्त[illegible]र्णस्य यो रिक्थी रिक्थग्रहणयोग्यः सपिण्डा[illegible]स्तस्य

रिक्थिनो दाप्याः।

तथा च नारदेन, (व्य० प० १।११२।११३)

ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः।
निर्वपेत्तत्स्य कुल्येषु तदभावेऽस्य बन्धुषु॥

इत्यभिधायाभिहितम्,

यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः।
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत्॥

इति॥ ५१॥

बा० १। सङ्गतिं प्रसङ्गरूपामाह *ऋणापाकरणे इति। ऋणनिवारणे इत्यर्थः। *ऋणी, ऋणग्राही। *च समवायेइति। समवाये चेत्यर्थः। *कर्त्रन्तरेति। उक्तादन्येषां समवाये क्रमं चेत्यर्थः।

२। * अन्यदीयमिति। अन्यस्वामिकेत्यर्थः। अत एव चिह्नः। व्यतिरिक्तप्रकारमेवाह * विभागेति। एवमाद्यपादार्थमुक्त्वा तत्तात्पर्यार्थमाह * एतदिति। न चौरेति। तस्य स्तेयादिना तद्ग्राहकत्वेऽप्युक्तरीत्या रिक्थग्राहकत्वाभावादिति भावः।

३। द्वितीयपादार्थमाह *योषितमिति। अस्याभिमतार्थविशेषमाह *भार्यामिति। तथैव चेत्यस्य व्याख्या *ऋणमिति। यद्वा तद्द्वेत्यर्थः। तस्यानुषङ्गः। अस्यापि तात्पर्यार्थमाह * यदीयामिति। ननु योषितोऽपि द्रव्यत्वेन रिक्थरूपत्वाद्रिक्थग्राह इत्यनेनैव सिद्धत्वेदं न वाच्यमत आह * योषित इति। यद्यपि योषित् द्रव्यं भवति तथापि रिक्थशब्दवाच्यत्वं नास्ति तस्याः। विभागार्हद्रव्ये एव लोके रिक्थशब्दप्रयोगात्। योषितश्च विभागानर्हत्वादिति भावः। अविभाज्येति पाठः। ण्यदन्तत्वात्।

४। तृतीयपादार्थमाह *पुत्रश्चेति। न अन्यो ऽनन्य इत्या-

र्थान्तरनिरासाय तत्प ।यमाह *अन्यमिति । त यमाह *मातेति ।

५। यपादार्थमाह * अहीनेति । रिक्थिन इति मवमाव- वचनान्तमित्याश्रयेन सवचनविपरिणामेना पक्षेणाह *न ामिति।

६। एवं कर्त्रन्तरे उक्तेऽपि क्रमो नोक्त इत्येतेषां रिक्थग्रा ।- दीनां मेलने केन क्रमेणैते ऋणं दाप्या इत्याकाङ्क्षाया अभ्रान्ति- रित्यवतरणास ।तेरत आह * तषामिति । तमेवाह *रिक्थे- ति । असति बाधके उपास्त चनपाठक्रमत्याग मानाभावा ति भावः । तुर्ये विशेषस्य वक्ष्यमाणत्वादत्रानुक्तिः ।

७। ननु रिक्थग्राहादनां सति समवाये क्रमचिन्ता स एव मास्तीत्या *नन्वतेषामिति । तमेव तदभावं क्रमेणोपपादय- ति । *न भ्रातर इति । पितुः भ्रातरः पितरश्च न ।रक्थ रा अपि तु पुत्रा एव तथेति मनूक्तत्वात् पुत्रे सत्यन्यस्य तत्त्वा- सम्भवा त्ररिक्थग्राहयोर्मेलनं ना ात्यर्थः । ननु माऽस्तु तयोः समवायः पुत्रयोषिद्ग्राहयोस्तु सम्भवत्येवेति चेन्न । तद- भावादेव तयोस्तस्य दुर्वचत्वादित्याह *योषिदिति । अत्र हेतु- माह *न द्वितीय इति। द्वितीयभर्तृनिषेधादेव योषि ।हाभाव इति भावः । पुत्र इत्यपि व्यर्थं पुनरुक्तं चेत्याह *तथा ऋणमिति । तत्र हेतुमाह *पुत्रेति । तथाचास्यार्थ य तेनैवोक्तत्वेन पौन- रुक्त्यादत्र पुनः कथनम क्तमिति भावः । एवं विशेष्यानर्थ - मुक्त्वा विशेषणानर्थक्यं भेदेनाप्याह *अनन्येति । अत्रोपपत्ति- माह *पुत्रे सतीति । अन्येनाश्रयणेत्यर्थः । तथा च तस्य सत्त्वे तस्यान्यागामित्वाव्यर्थमिति भावः। सत्यपि तस्मिन् तत्त्वम् अ- पत्यापि दोषमाह *सम्भवे चेति । तत्र सत्यपि यदि रिक्थ- ग्राहोऽन्यः सम्भवति तदा केवलं पुत्रो न ऋणं दाप्यः किं

त्वनन्याश्रित ... व्यः स्वयमेव ... त ... इत्यदृत्यवमत्र पक्षे ता ... वचन-
... मिति भावः । मूले य ... ण्णत्वं तथाप्यविशेष ... नि-
न्यन्तना #रिक्थग्रा ... ति । वाऽसरूपन्यायेनेति भावः । रिक्थ-
भागृणं दाप्य इति पाठान्तर ... । ... स्या ऽत्र पक्षे विशेषण-
साफल्येऽपि ... विशिष्टं निष्फलं
पुनरुक्तं चेति भावः । ... र्थपादानर्थक्यमप्याह #पुत्रेति । तदा-
शयमाह #पुत्रे इति । ... इत्यादिः । वचनपाठक्रमस्य भाव-
ल्यात् तत्र सत्यपि स दाप्यस्तदा किमु वाच्यमसति तत्र स
ऋणं दाप्य इतीत्येवं कै ... तिकन्यायेनवास्यार्थस्य ... त्वादि-
दमपि व्यर्थमिति भावः ।

८ । एवं स ... वचनमाक्षिप्य क्रमेण परिहरति #अ ... च्यते
... त्यादिना । पुत्रे सत्यन्यस्य रिक्थग्रहणासम्भव इति यदुक्तं
तत्राह #पुत्रे इति । अत्र मानमाह #तथा चेति । #वक्ष्यति,
मूलकृत् । अन्यथापि सम्भवं ... तत्र मानान्तरमा ... #त-
थेति । #एकेषां, मते । यद्वा एकेषां सा ... त्ताना पितॄणाम् । यद्वा
एकेषां सा ... त्तानामन्येषामसवर्णापुत्राणां समवाये । उपसंहर-
ति #अतश्चेति ।

९ । उक्तदोषस्य दृढत्वाद्यो ... हसद्भावस्य क्लिष्ट-
त्व ... नाय तत्सद्भावं शङ्का ... वकमाह #योषिदिति । शास्त्रविरो-
धेनेति पाठः । ... ऽपपाठः । शास्त्रेण भर्त्रन्तरनिषेधाद्यद्यपि
स्त्रीणां द्वितीयः शास्त्रीयो नास्ति तथापि शास्त्रो ... नकृतो यो-
षि ... हत्वसम्भवात्तादृशस्त तत्पति ... तदृणानिवारणे ऽधिकारी
भवत्ये ... त्यर्थः । नन्वेवं मकारणा ... तत्सम्भवः । तथापि तस्य
स्मृत्यन्तरा ... रोधेन तस्या अनेकविधत्वनानेक ... धत्वा ... नियमेन
सर्वेपि किं ते तत्राधिकारिण इत्याशङ्कायां नियममाह #यश्चत-

॰णामिति । निर्धारणे सर्वा षष्ठी *प्रथमामिति । गृह्णातीत्यनुषज्यते । ॰रिणीनां चातुर्विध्यं पुनर्भुवां च त्रैविध्यं तत्र च तद्ग्राहयोरेवाधिकार त्येतत्सर्वं नारदोक्त्या प्रकाशयति *यथा-हेत्यादिश्रितइतीत्यन्तेन । *परेति । परः पतिः पूर्वो यासां ता इत्यर्थः । *तासां, सप्तानां ॰ । कन्यैवेत्यस्य व्याख्या *अक्षतेति । एवेन व्यभिचारकृतदोषनिरासः । तर्हि किं प्रयुक्तोऽस्या दोषोऽत आह *पाणीति । तेनैव दूषिता नान्येनेत्यर्थः । तथा च ॰दमेवास्या दूषकताबीजं नान्यत्तदपि नाद्यं किं तु द्वितीयमित्याह *पुनः॰ । ईदृशी या सा तेन पुनर्भूः प्रथमोक्तेत्यर्थः । *देशेति । दानसम्बन्धिन इत्यर्थः । *अन्यस्मै द्वितीयस्मै सवर्णाय असपिण्डाय । प्रकृतेऽन्य॰वादाह *व्यभीति । अग्रे ॰का प्रश्लेषः । *पत्यौ जी॰, सति । *कामात्, ॰च्छया । एवमग्रेऽपि । *अन्यं, यं कश्चित् । *कौमारमिति । अपूर्वपतिं कुमारं॰पपन्नमित्यर्थः । *प्राप्तानिति । नियोगविधिना प्राप्तान्देवरादीन्परित्यज्येत्यर्थः । *परम्, अन्यं यं कश्चित् । *प्राप्ता देशादिति । देशान्तरात्प्रा॰ सती या धनक्रीता भवति सा, या च क्षुत्पिपासातुरा सती तवा॰मित्येवं प्राप्ता भवति सा च स्त्री चतुर्थी स्वैरिणी कथितेत्यर्थः । *अन्तिमेति । तासां मध्ये याऽन्तिमा तासां मध्ये च या प्रथमा ते यौ उपाश्रितौ तौ तयोः पतिकृतम् ऋणं दद्यातामित्यर्थः । *तथा, तद्वत् उभयवत् । *अन्यः, उभयान्योऽपि । *तेनैव, नारदेनैव । वा चार्थे । क्वचित् चपाठ एव । अनेन विशेष॰येनान्याश्रयणे आत्मादेर्धनस्य च रक्षणमात्रं निमित्तं न तु कामादिरिति सूचितम् । पत्यौ मृते इति शेषः । अस्या भर्तुरित्यन्वयः । व्यव॰रानभिज्ञतया तया ऋणं न दत्तमिति भावः । *तथैव, यथा स-

मागता तथैव, कथमपि सर्वथाऽऽ शमिति यावत् । गतधनस-
ितेत्यर्थनिरासायाह * प्रकृष्टेनेति । अन्य चितमाह * तथे-
ति । तदुक्तिरेवेयमपि । हिश्वार्थे । * वोढुः, पत्युः । अत्र हेतुमाह
*सैवेति । चो ह्यर्थे । । * अस्य, पत्युः ।

१० । तृतीयपादे दत्तदोषद्वयमुद्धरन् विशेष्यसाफल्यमा
*पुत्रस्येति । पुत्रोऽनन्येत्यत्र पुत्रग्रहणम् उक्तयोरुभयोरभावे तेन
ऋणं देयमित्येवंविधक्रमबोधनार्थं न तु तत्र तस्याधिकारप्रदर्श-
नार्थं, येन पौनरुक्त्यं स्यादित्यर्थः । विशेषणस्यापि साथक्यमा
*अनन्येति । तस्य तत्त्वेन तत्राधिकारो न पुत्रत्वमात्रेणेति अ-
न्धादीनामन्याश्रितद्रव्यत्वेनान्धत्वादिदोषयुक्तत्वेन पितृरिक्थांश-
ग्रहणायोग्यत्वेन नाधिकारस्तत्र किं त्वनन्धादीनामेव तत्त्वेना-
धिकार इत्येतदर्थकतया विशेषणस्य सार्थक्यमिति भावः ।
तथा च योग्यपुत्रत्वेन तत्राधिकारो न पुत्रत्वमात्रेणेति सूचनार्थं
तादिति तत्त्वम् । एवं च पुत्रत्वेनेत्यादि यत् पुत्रपौत्रैरित्यत्रोक्तं
तदप्येवंपरतया व्याख्येयमिति न प्रागुक्तविरोधोऽपीति बोध्यम् ।

११ । तुर्यपादे दत्तदोषमुद्धरति *पुत्रेति । पुत्रग्रहणं तत्रोपलक्ष-
णमित्याह * पौत्रेति । पूर्वत्र द्वयोरेवोपात्तत्वान्नातिप्रसङ्गः ।
रिक्थिन इति प्रथमाबहुवचनान्तमेवेत्याह * प्रपौत्रादय इति ।
* तदृणमिति । तदा प्रपितामहर्णमित्यर्थः । * अन्यथा, तदी-
यरिक्थग्रहणाभावे । रिक्थभाज एव प्रपौत्रादेस्तादृशप्रपिताम-
हादेर्ऋणदानेऽधिकारो नान्यस्येत्येतत्प्रतिपादकतयेदमपि सफ-
लमिति तात्पर्यार्थः ।

१२ । [illegible] फलमाह *पुत्रपौत्रौत्विति । योग्या-
वित्यर्थः । अत एव तत्र नातिप्रसङ्ग इत्युक्तम् पदमेव । *इत्युक्त-
मिति । पुत्रपौत्रैर्ऋणं देयमित्यत्रेत्यर्थः । अत्र नान्यथेत्यत्र संवा-

दमाह *यथाहेति। * अभ्याहर्त, निष्कपट- । क्रमात्मा, मित्यस्यैव व्याख्या * पुत्रैरिति । *तत्, ऋणम् । * चतुर्णात्, । क्याग्रा- हिण इत्यर्थः । आरभ्येति शेषः ।

१३। ननु स्वरसतो न ततस्त थमतीतिः। किं च नार वचनतः सामान्येनैव नि तीतिः, तत्स िचे दृढतरमानान्तराभाव , अ- तस्तं थांसमन्यथा व्याचष्टे *यद्वेति । त्रस्ताद्दयः । *उक्तमिति । त्रयाणां क्रम* प्रागुक्त एवेति भावः । तत्र द्वितीय तीययोर्वैपरी- त्यमपीत्याह * त्रामावेइति । अत्र पक्षे तत्र बहुत्वासम्भवा वचनासङ्गत रि थिन इति पञ्चम्यन्त । विभक्तिवि विपरि- णामेन ऋणं दाप्य इत्यस्यानुषङ्गः तस्य यो रिक्थी त ऋणं प्यामित्यर्थः । तदेतत् ध्वनयन् फलितमा * योषि ाह इति । ननु रिकृथिन इत्यतः कथ कार्यलाभोऽत आह * रि थति । प्रकृते इति शेषः। अतो न पूर्वविरोधः । अन्यथाऽनुपपत्ति न। उक्तव प्रमाणप्रकाराभ्यां व्याख्यानसक त्वात्।अतोऽत्र साधका- न्तरं मा नारदमवाह * सैव चेति । साधकान्तरमा *य इति । अत्र यो यस्य दारान् हरते स तस्य धनमपि हरेदिति न, [illegible]भावात् । किं तु यतो दारा एव धनमतो यो यस्य दारान् हरते स तस्य धनमेव हरते इति । तद्दारान् हरन् तद्धन भागिव त नहारीतिव्यपे भागपि भवतीत्य ः । अस्य चोपयोगः प्रायश्चित्तादौ बोध्यः ।

१४। त्रस्ताद्दयः । * इति । ऋणं दाप्य इत्यस्या- नुषङ्गः । * विरु मिति । द्वितीय तीययोर्यः क्रमः प्रागुक्तस्त- द्विपरीत स्य व्याख्यायां प्रतीयते इति मिथः क्रमे विरुद्ध- मित्यर्थः । ान्तरमाह * उभयेति । द्वयोः सत्त्वे मियोऽभा- वोपल तयारेव तयोः त्वानियमेनोपलम्भकाभावे सति

केनापि ऋणं न देयं स्यादित्यर्थः। छापास्त्वत्र न।

यदा तु न सकुल्याः स्युर्न च सम्बन्धिबान्धवाः।
तदा दद्यात् द्विजेभ्यस्तु तेष्वसत्स्व ः निक्षिपे ॥

(ना० व्य० प० १।११३)

इति तस्यावश्यदेयत्वप्रतिपादकस्मृतिविरोधापत्तेरिति भावः। * नैष दोष इति। जातावेकवचन । प्रागुक्ताः प्रकृतोपयुक्ता अपि याषि हा अनेके यद्यपि तथापि कोटिद्वयं तेषां कार्यम्। अन्तिमस्वैरिणीग्रा ी प्रथमपुनर्भूग्राही समधन ग्रा- ही चेत्येका कोटिः। निर्धननिरपत्यस्त्रीग्राहीति त्वन्या कोटिः। एवं सति व्यवस्थासम्भवान्न दोष इत्याशयेनाद्यकोट्याशयेनाद्यपक्षमाह *अन्तिमेति। यत इत्यादिः। एवं चैतत्कोट्यन्तर्भूतयोषिद्ग्राहाभावे पुत्र ऋणं दाप्य इति तस्यार्थ इति भावः। द्वितीयकोट्याशयेन द्वितीयपक्षमाह *पुत्राभावे त्विति। तथा च तदभावे एतद्बोध्ययोषिद्ग्राह ऋणं दाप्य इति तदर्थः। तथा च यदि सामान्येन तत्तदभावे स स दाप्य इत्युक्तं स्यात्तदोक्तदोषः स्यात्। तदेव न। किं तूक्तरीत्या ऽवान्तरभेद- ःरस्कारेणेति न क्रमे विरोधो नापि तद्वचनविरोधोऽवश्यदेयत्वस्यैवानेन प्रतिपादनादिति भावः।

१८। ननु विनिगमकाभावे वैपरीत्यमेव कुतो न, अत आह *एतदेवेति। एवेन तद्व्यवच्छेदः। एवं च तदनुरोधेनैवमेवोक्तं न त्वन्यथा। तद्विरोधापत्तेरिति भावः। अभ्यर्हितत्वा नस्य पूर्वनिपातः। ःत्रयोरिताति पाठः। धनस्त्रीहारिणौ च पुत्रश्चेति द्वन्द्व इत्याशयेन व्याचष्टे * धनेति। शेषमाह * समवायेइति। लिङ्ग्याविवक्षया आह * हरते इति। ःःःःाऽि हरेदित्येव पाठः। * स्त्रीधनिनोरिति। अभ्यर्हितत्वाविवक्षया ऽल्पाच्तर-

रत्वेन स्त्रीशब्दस्य पूर्वनिपातः। न्यन्तेन द्वन्द्वेन न्यन्तयोरेकशेषेण वा इष्टार्थालाभादाह * स्त्री चेति। सर्वं वाक्यमिति न्यायेन सा॰ षङ्गेणाह * पुत्र एवेति। एवमग्रेऽपि। अत्रापि प्रसक्तं प्राग्वत् विरोधं प्रागुक्तरीत्यैव परिहरति * स्त्रीति।

१६। नन्विदमपि व्याख्यानमयुक्तं, उक्तजातिभ्यां स्त्रियो धनत्वलाभेऽपि रिक्थत्वालाभात्। तत्रैव द्रव्ये तत्प्रयोगात्। लोकप्रसिद्धितः शास्त्रप्रसिद्धेः प्राबल्यादत आह * ग्रहीतस्येति। प्रतिज्ञातव्याख्यानान्तरमेवाभिधातुमादावाकाङ्क्षापूर्वकमर्थसिद्धं किञ्चिदाह * एते इति। रिक्थेत्यादिना द्रव्य इत्यन्तेनोक्ता इत्यर्थः। ऋणं दाप्या इत्युक्तेः आकाङ्क्षोदयादिति भावः। अत्र पक्षे रिक्थिन इति संप्रदानस्य संबन्धत्वाविवक्षया षष्ठ्यन्तमिति तदनुरोधेनाह * कस्येति। एवमग्रेऽपि। * उत्तमर्णस्येति। आद्यौ तस्यैवोपस्थितेर्योग्यत्वाच्च। आदिना पात्रादिग्रहणम्। एवमर्थसिद्धमुक्त्वा तदाह * पुत्राद्यभावे इति। अत्रपदमुपलक्षणमिति सूचयन्नर्थमाह * अत्राद्यन्वयेति। अन्वयो वंशपरम्परा। ननु न सामानाधिकरण्यं बाधितार्थकत्वादत आह * यो रिक्थीति। तदसत्त्वेपि निर्वाहार्थमाह * योग्य इति। * तस्येति। तादृशस्य सपिण्डादेरेते रिक्थग्राहादयः पूर्वोक्तक्रमेण ऋणं दाप्या इत्यर्थं वचनविपरिणामेनाह * दाप्या इति।

१७। अत्र सर्वत्र मानमाह * तथा चेति। अग्रेऽन्वयः। तस्य तु यद्देयं तत्सान्वयस्येत्यर्थः। * सः, यस्य देयं सः सान्वयो ब्राह्मणः। एवमग्रेऽपि। चश्चेदर्थे। तदेति शेषः। * निर्वपेत्, प्रक्षिपेत्। * कुल्येषु, तत्सकुल्ये। क्वचित्तत्सकुल्येष्वित्येव पाठः। तद्धनमिति शेषः। * अस्य, ब्राह्मणस्योत्तमर्णस्य। एवं प्रागपि। निर्वपेदित्यस्यानुषङ्गोऽग्रे। सगोत्रसपिण्डाः सकुल्याः। असगोत्रसपिण्डा बन्धु-

वः । सम्बन्धी उक्त एव । अनेन आद्यन्वयाभावे पिण्डाद्य-
भावे च कस्य ते प्यास्तदित्यध्याका शान्तिं गता । अत्रैते
धनत्यादितः आदेरित्यन्तेन उक्तार्थे श्लोकः किञ्चि मा मा-
नम् । पुत्राद्यभावे इत्यादिदाप्याइत्यन्तेनोक्तार्थे श्लोकद्वयं ताव-
न्मात्रन्यूनं मानम् । स चार्थोऽनेनान्वयव्यतिरेकाभ्यां दृढीकृतः ।
तत्र निर्वपेदित्यन्तेनान्वयः । तदन्वयाभावे तत्स ल्यादिषु नि-
र्वपेदित्यन्वय खेनाभिधानात् । यदा तु न सेति व्यति कः ।
तथा च सकुल्याद्यभावे एव द्विजादौ निक्षिपेदित्युक्त्या सत्सु
तेषु द्विजादावृणदाननिषेधध्वननद्वारा प्रागुक्तार्थदृढीकरणमिति
भावः ॥ ५१ ॥

मि० अधुना पुरुषविशेषे ऋणग्रहणं प्रतिषेधन् प्र-
सङ्गादन्यदपि प्रतिषेधति ।

या० भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥ ५२ ॥

मि० प्रतिभुवो भावः प्रातिभाव्यम् । भ्रातॄणां दम्पत्योः-
पितापुत्रयोश्चाविभक्ते द्रव्ये विभागात्प्राक्प्रातिभा-
व्यमृणं साक्ष्यं च न स्मृतं मन्वादिभिः । अपि तु प्र-
तिषिद्धं, साधारणधनत्वात् । प्रातिभाव्यसाक्षित्वयोः
पक्षे द्रव्यव्ययावसानत्वात् । ऋण च चावश्यप्रतिदेय-
त्वात् । एतच्च परस्परा मतिव्यतिरेकेण । परस्परा -
मत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव ।
विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति ।

ननु दम्पत्योर्विभागात्प्राक्प्रातिभाव्यादिनिषेधो
न युज्यते । तयोर्विभागाभावेन विशेषणानर्थक्यात् ।

विभागाभाव [illegible] दर्शितः, जायापत्यो- र्न विभागो विद्यते इति ।

सत्यम् । आधानसिद्धाग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु च । तथा हि । जायापत्योर्न विभागो विद्यते इत्युक्त्वा किमि- ति न विद्यते इत्यपेक्षायां हेतुमुक्तवान्, पाणिग्रह- णाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु चेति । य- स्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते "जाया- पती अग्निमादधीयाताम्" इति तस्मादाधाने सहाधि- कारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः । तथा, कर्म स्मार्तं विवाहाग्नावित्यादिस्मरणाद्विवाह- सिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव । अत- श्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते । तथा, पुण्यानां फलेषु स्व- र्गादिषु जायापत्योः सहत्वं श्रूयते,दिवि ज्योतिरजर- मारभेतामित्यादि । येषु पुण्यकर्मसु सहाधिकारस्ते- षां फलेषु सहत्वमिति बोद्धव्यम्, न पुनः पूर्तानां भर्त्रनुज्ञयाऽनुष्ठितानां फलेष्वपि ।

ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम्, द्रव्यपरि- ग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमु- पदिशन्तीति ।

सत्यम् । द्रव्यस्वामित्वं पत्न्या दर्शितमनेन, न पुनर्विभागाभावः।यस्माद् द्रव्यपरिग्रहेषु चेत्युक्त्वा त- त्र कारणमुक्तम् । भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्तव्ये दानेऽतिथिभोजनभिक्षाप्रदानादौ यस्मान्न स्तेयमुप-

ि शन्ति मन्वा यस्तस्माद्भार्यायामपि व्यस्वामित्व-मस्ति । अन्यथा स्तेयं स्या िति । तस्माद्भ रिच्छया भार्याया अपि व्यविभागो भवत्येव न स्वेच्छया ।

यथा वक्ष्यति, (या० अ० २।११५)

यदि कुर्या समानंशान्पत्न्यः कार्याः स ािकाः। इति ॥ ५२ ॥

बा० १ । स ति । * अधुनेति । थपादस्य च मव्याख्यानन रिक्थ्येव ऋणं गृ ीया न्य इति नियमलाभेन रिक्थग्र णायो-ग्य रुषांवशेषस्य ऋणग्रहणनिषेधस्याप्यर्थाल्लाभेनार्थिकऋणग्र -णप्रतिषेधप्रसङ्गेन रुषावशेषे वक्ष्यमाणेऽन्यदपि प्रातिभाव्या-दिकम् अवान्तरप्रकारभेदं वक्तुं प्रतिषेधतीत्यर्थः । अपिना ऋ-णग्रहणस च्चयः । अन्यथैतत्प्रकरणे एतदसङ्गतिः स्प वेति भावः । इदं च ऋणग्रहणप्रतिषेधप्रसङ्गादिति का चित्कासम्व -पाठाभिप्रायेण व्याख्यात । वस्तुतस्तु ऋणग्रहणं प्रतिषेधन्प्रसङ्गा-दिति प्रचुरः पाठो युक्तश्चेति बोध्यम् । तदा अधुना अधमर्णी-यपञ्चविधग्रहणधर्मादिकथनानन्तरं वक्ष्यमाणे रुषविशेषे ऋण-ग्रहणस्य प्रतिषेधं कुर्वन् तत्प्रतिषेधप्रसङ्गात्तदर्थं प्रातिभाव्यादि-कमपि प्रतिषेधतीत्यर्थः । अपिः प्राग्वत् । तदस ितः स्पष्टैवेति भावः । लस्यम् अथेति सर्वादौ योज्यम् । उच्यते इति शेषः । एतदर्थ एवा नेत्यादिनोक्तः ।

२। पदार्थमुक्त्वा वाक्यार्थमाह * भ्रातॄणामिति । चः पितापुत्र-योः समुच्चायक इत्याह * त्रयोरिति । सर्वसमुच्चायकत्वार्थमा *चेति । अवि त्वस्य भावप्रत्ययान्तस्य न भ्रात्रादिधर्मपरत्व, तस्य स्वत एव सिद्धत्वा । द्रव्यद्वारकविभागग्रहणे ि त्वामिति सूचयन् थयेता * द्रव्ये इति । ा । स्पष्टत्वाथत -

र्थमाह *द्रव्ये इति।*ऋणं, तद्ग्रहणम्। *नेति। व्याख्यानान्वयाऽत्र। तुल्यचितव्यवच्छेद्यतात्पर्यार्थबोधकवाक्यान्तरमाह *अपित्विति। तैरेवेति भावः। तत्र हेतुमाह *साधारणधनत्वादिति। कर्मधारये हेतोर्वैयधिकरण्यापत्तिः। अतः साधारणं समुदितं सर्वस्वत्वापन्नं धनं येषां भ्रातॄणां तेषां भावस्तत्त्वं तस्मादित्यर्थः।

३। नन्वेतावतापि कुतस्तदभावोऽत आह *प्रातिभाव्येति। क्रमे तात्पर्यात्पूर्वनिपातः। *पक्षे, अधमर्णकृतदानाभावपक्षे। *द्रव्येति। द्रव्यव्ययस्य तद्दानस्यावसानं पर्यवसानं ययोस्तत्त्वादित्यर्थः। तत्र यद्यपि दानप्रतिभुवि निःसन्दिग्धमिदं तथापि वक्ष्यमाणरीत्या दर्शनप्रत्ययप्रतिभुवोरिव साक्षिणोऽपि तदस्तीति स्फुटीभविष्यति। साधारणेन धनेन तु इदमेकेन कर्तुमशक्यमिति तात्पर्यम्।

४। अत एव विशेषमाह *एतच्चेति। *अविभक्तानामपि, भ्रात्रादीनाम्। नन्वेवमविभक्ते इति वाक्यार्थविशेषणं व्यर्थमत आह *विभागादिति। अपिना तस्या अपि समुच्चयः। एतद्विशेषबोधकमेव तादिति भावः।

५। दम्पत्यंशे यत्प्रागुक्तं तद्विशेषणांशे आक्षिपति *नान्विति। *निषेधः,प्रागुक्तः। अत्र हेतुमाह *तयोरिति। तयोर्विभागस्यैवाभावेन तदंशेऽविभक्ते इति वाक्यार्थविशेषणानर्थक्यादित्यर्थः। तथा च तयोः सार्वकालिकतया निषेधे वाच्ये तथा निषेधोक्तिरयुक्तेत्यर्थः। ननु तत्रैव किं मानमत आह *विभागाभावश्चेति।

६। अर्द्धाङ्गीकारेण परिहरति *सत्यमिति। आपस्तम्बार्थमाह *श्रौतेति। *न पुनः,न तु। विभागाभाव इत्यस्यानुषङ्गः। ननु तथैवार्थः कुतो न, अतो हेतुमाह *तथाहीति। *हि, यतः। *तथा, उक्ताशयेनैव तमुक्तवानित्यर्थः। पाणीत्यादिव्याचष्टे

*यस्मादिति। चार्थोऽयम्। क्वचित् हि यस्मादित्येव पाठः। पञ्चम्यु-पपत्तये आह *आरभ्येति। *सहत्वं, साहित्यम्। श्रुतिमाह *जायेति। आकाङ्क्षाशान्तये पूरयति *तस्मादिति। *सहेति। तच्छ्रवणादित्यर्थः। *सहाधिकार इति। सिद्ध इति तयोस्तत्र विभागो नास्तीति शेषः।

७। श्रौते उक्त्वा स्मार्त्ते आह *तथेति। *अग्निसाध्येष्वपि कर्मस्विति। अग्निसाध्येषु कर्मस्वपीत्यर्थः। एवेन विभागव्य-वच्छेद इति तल्लाभः।

८। एवमुभयत्र सहाधिकारविधिबलादर्थसिद्धमर्थमाह * अ-तश्चेति। * पूर्त्तेषु, तडागादिषु। पूर्तं खातादिकर्मणीत्यमरः। तथा-पुण्येति व्याचष्टे * तथेति। चार्थोऽयम्। तत्रत्यतथेत्यस्य तु तद्वदित्यर्थः। कर्मधारयनिरासायाह *पुण्यानामिति। दिवि द्युलोकादौ अजरं कारणभूतसुकृतनाशपर्यन्तमविनश्वरं जरा-रहितं वा ज्योतिः तेजःप्रधानं कलेवरमारभेतामित्यर्थः।

९। नन्वेवं सर्वत्र तत्त्वे सर्वकर्मसु तत्त्वापत्त्या पूर्तेष्वपि प्रागु-क्तपृथगधिकारो न सिध्येत्, अतो निष्कृष्टार्थमाह * येष्विति। *पुनः, तु।

१०। द्रव्येषु चेत्यंशं द्रढयितुमाह * ननु द्रव्येति। यथा तद्-बलादुक्तस्थले सहत्वं विभागाभावश्च तथा द्रव्यस्वाम्येऽपि सह-त्वविधायकवचनबलात्सहत्वसिद्ध्या द्रव्यसाध्यपुत्रादिफलेष्वपि दम्पत्योः सहत्वापत्तिः। स[illegible] द्रव्यस्वाम्या[illegible] द्रव्यस्या-विभाज्यतापत्तिरपि। तथा च द्रव्येऽपि दम्पत्योर्विभागाभावात् प्रा[illegible]क्तदोष एवेति भावः। *उक्तम्, आपस्तम्बेन। तमेवाह *द्रव्येति। पाणिग्रहणाद्धि सहत्वमित्य[illegible]वर्त्तते। तत आरभ्य द्रव्येषु परिग्रहे पुत्रादिजनेषु च सहत्वमेव दम्पत्योरित्यर्थः।

अत्र हेतुमाह *नहीति । भर्तुर्विप्रवास विशेषेण प्रवासे सति भार्याया नैमित्तिकदानविषये हि यतो न स्तेयं चौर्यमुपदिशन्तीति । द्रव्यस्वाम्येऽपि सहत्वविधानात् तद्वत् द्रव्येऽपि विभागो नास्तीत्यर्थः ।

११। अङ्गीकारेण परिहरति *सत्यं द्रव्येति। *स्वामित्वं, तन्मात्रम् । तथा च तन्मात्रमनेनोक्तं न तु तत्र सहत्वं येन विभागाभावः स्यादिति भावः ।

१२। इदमेव विशदयति *यस्मादितिस्यादित्यन्तम् । यस्मादित्यस्य उक्तमित्यत्रान्वयः। *द्रव्येति । अत्र मतेऽस्यायमर्थः। द्रव्यार्जनेष्वपि सहत्वं दम्पत्योरिति हेतुस्वरसासिद्धोऽयमेवार्थो न प्रागुक्तः । एतच्च सहत्वमौपचारिकं न मुख्यम् । तथा हि । यथाऽऽधानादिषु तयोरन्यतराभावे आधानादिस्वरूपासिद्धिर्नैवं द्रव्यार्जनेऽपि तु पतिरर्जयिता पत्नी चार्जितं रक्षतीति योगक्षेमाभ्यां क्रियेते इत्युभयानुसन्धानासिद्धत्वेन सहत्वमिव । एवं च यत्राधानादिषु सहत्वं तत्र स्वत्वमस्तीत्यत्रापिद्रव्यपरिग्रहेषु सहत्वप्रतीतेः स्वत्वमस्तीति । तदेतत् ध्वनयन्नेवाह * उक्ता तत्रेति । वचनं स्वरूपेणोक्तमिति अर्थत आह * भर्तुरिति । नित्यसङ्गशङ्कायाह * अवश्येति । तथा च तदुपलक्षणमिति न्यूनता प्रथमत्यागश्चेति भावः । यद्वा तत्रापि तत्स्वसत्वात्तदुपलक्ष्यायमाह * अवश्येति। काकेभ्यो दधीत्यादिवदिति भावः । वचनस्वरूपव्याख्या *यस्मादिति । क्वचित् हि यस्मादित्येव पाठः । * भार्यायामपि।भार्याया अपीति पाठान्तरम् । * अन्यथा, द्रव्यस्वाम्याभावे। तथा च नेदं सहत्वं विधत्तेऽपि तु लोकसिद्धमेव तत् स्यात्। सति तयोरेव स्वाम्ये । न चैविध्यात्यागार्जिते द्रव्ये पुरुषस्य स्वत्वं तत ऊर्ध्वमर्जिते तु

प्रतिपत्न्योरिति वाच्यम् । तथा सति [illegible]स्यापि [illegible]ः प्राक् पि[illegible]र्जिते द्रव्ये स्वत्वाभावापत्तेरिति भावः ।

१३ । अत्र नैमित्तिके इत्युक्त्याऽन्यत्र स्तेयमस्त्येवेति सूचितम् । एतदेव तत्साम्येऽपि वैषम्यं, यत् पतिर्यथेष्टं विनि[illegible] जाया स्वा[illegible]देति । नच पत्[illegible]जायानुमत्यपेक्षा ।

स्वतन्त्रत्वात् यथा राजा राष्ट्रे तद्वदसौ गृहे ।

अत एव तस्या एव स्तेयशङ्का न भर्त्तुः । एवं पुत्रादावपीति बोध्यम् ।

१४। सविशेष[illegible]पसंहरति *तस्मादिति। एवेन तद्भावव्यवच्छेदः । भर्त्तुरित्यस्य कृत्यमाह *न स्वेच्छेति । अत्र मानमाह *यथेति । कुर्यादित्यतस्तादिच्छाया एव प्रतीतेरिति भावः । इदं तत्रैव स्फुटीभविष्यति ॥ ५२ ॥

मि० अधुना प्रातिभाव्यं निरूपयन्नाह ।

या० दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ ५३ ॥

मि० प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः । तच्च विषयभेदात्त्रिधा भिद्यते । यथा दर्शने दर्शनापेक्षायाम्, एनं दर्शयिष्यामीति। प्रत्यये विश्वासे, [illegible]प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वञ्चयिष्यते, यतोऽमुकस्य पुत्रोऽयम् उर्वराप्रायभूरस्य, ग्रामवरो वा[illegible] । दाने यद्ययं न ददाति तदानीम[illegible]मेव [illegible]स्यामीति । प्रातिभाव्यं विधीयते इति प्रत्येकं संबन्धः । आद्यौ तु दर्शनप्रत्ययप्राति[illegible]वौ वितथे अन्य-

थाभावे अदर्शने वि श्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य । इतरस्य प्रातिभाव्यकर्तुः सुता अपि दाप्याः । वितथे इत्येव । कालान्तरे निर्धनत्वेन वाऽधमर्णेऽप्रतिकुर्वति । इतरस्य सुता अपीति वदता पूर्वयोः सुता न दाप्या इत्युक्तम् । सुता इति वदता न पौत्रा दाप्या इति दर्शितम् ॥ ५३ ॥

बा० १। *अधुनेति। तन्निषेधकथनप्रसङ्गादिति भावः। तथा च तदनन्तरप्रकरणमिदमिति तात्पर्यम्। निरूपणं च लक्षण-विशेषाभ्यां भवति। तत्रादौ मूलानुक्त लक्षणमाह * प्राति-भाव्यमिति। उत्तमर्णाधमर्णान्येनेत्यर्थः। अर्थात्तयोरिति भावः। * समयः, सङ्केतः । स चार्थात्तत्कृत एवेति नातिप्रसङ्ग इति बोध्यम्।

२। अथ मूलोक्तभेदानाह *तच्चेति। * विषयेति। अनेन त्रिषु विषयसम्बन्ध इति सूचितम्। *मत्प्रत्ययेनेति। ममेति अस्मदिति वा पाठान्तरम्। *अस्येति। प्राग्वत्। एवमग्रेऽपि। उर्वरा स-र्वसस्याढ्येत्यमरः। उर्वरायाः प्रायो बाहुल्यं यस्यां तादृशी भू-रस्येत्यर्थः। तस्या दुर्लभत्वात्स्वस्यानिश्चयाच्च * प्रायेति। त-त्कृतमत्युत्कर्षमाह *ग्रामवर इति। ग्रामे श्रेष्ठ इत्यर्थः। *ददाती-ति। वर्तमानसामीप्ये इति लट्। दास्यतीत्यर्थः। समुदायस-म्बन्धानन्तरसम्बन्धयोर्निरासाय। * प्रातिभाव्यमिति।

३। उत्तरार्धार्थमाह *आद्यौ त्विति। तात्पर्यार्थमाह *अ-न्यथेति। क्रमेण तस्यार्थद्वयमाह *अदर्शनेइति। शेषमाह *राज्ञेति। *इत्येवेति। तत्पदमत्रानुवर्तते एवेत्यर्थः। तदर्थे तद-

१ संप्रदानस्य संबन्धत्वाविवक्षया अस्येति षष्ठी। पूर्वं संबन्ध-त्वाविवक्षया चतुर्थ्याः प्रतिपादनात् व्यवमत्रापीति बोध्यम्।

तत्सम्भवात् ॥ * शाठ्येनेति । जैह्म्येन धनाभावेन वा ऽधमर्णे उत्तमर्णाय धने अप्रतिकुर्वति अ पश्चात् सति दानप्रतिभूर्दाप्य इत्यर्थः ।

४। सूचितं ... *इतरस्येति । *न पौत्रा इति । तत्र अपिस्तु तत्समुच्चायक इति भावः ॥ ५३ ॥

मि० एतदेव स्पष्टीकुर्वन्नाह ।

या० दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोऽपि वा ॥

न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः ॥५४॥

मि० यदा दर्शनप्रातिभूः प्रात्ययिको वा प्रातिभूर्दिवं गतः तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः। यस्तु दानाय स्थितः प्रतिभूर्दिवंगतस्तस्य पुत्रा दद्युर्न पौत्राः । ते च मूलमेव दद्युर्न वृद्धिम् ।

ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः ।

समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः ॥

इति व्यासवचनात् । प्रातिभाव्यव्यातिरिक्तं पैतामहमृणं पौत्रः समं यावद् गृहीतं तावदेव दद्यान्न वृद्धिम्। तथा तत्सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं समम् दद्यात् । तयोः पौत्रपुत्रयोः सुतौ प्रपौत्रपौत्रौ च अप्रातिभाव्यायातं प्रातिभाव्यायातं च ऋणं यथाक्रममनधिकारात् न दाप्याविति ।

यदपि स्मरणं,

ग्राहको वित्तहीनः स्याल्लग्नको वित्तवान्यदि ।

मूल्यं तस्य भवेद्देयं न वृद्धिं दातुमर्हति ॥ इति,

तदपि " लग्नकः प्रातिभूः " " ग्राहकोऽधमर्णः "

लग्नको यदि वित्तवान्मृतस्त । तस्य पुत्रेण ऋणमव नातव्यं न द्धिरिति व्याख्येयम् । यत्र दर्शनप्रति : प्रत्ययप्रतिभूर्वा बन्धकं पर्याप्तं गृ त्वा प्रति जात- स्तत्र तत्र। अपि तस्मादेव बन्धकात प्रातिभाव्या- यातमृणं दद्युरेव ।

यथाह कात्यायनः,

गृहीत्वा बन्धकं यत्र दर्शनेऽस्य स्थितो भवेत् ।

विना पित्रा धनात्त स्यात्तदृणं सुतः॥इति।

प्रत्ययस्योपलक्षणम् । *विना पित्रा, पितरि प्रेते दूरदेशं गते वेति ॥ ५४ ॥

बा० १। पौनरुक्त्यं निराचष्टे *एतदिति । इतरस्येत्यादिनोक्तमे वेत्यर्थः । यत्रेति व्याचष्टे *यदेति। अपिसमुच्चयमाह *प्रात्ययिक इति । मृत इत्यस्य व्याख्या * दिवं गत इति । दिष्टं गत इति पाठान्तर । तत्र कालं गत इत्यर्थः ।कालो दिष्टोऽप्यनेहाऽपीत्यम- रः । तथा चेदं न प्रोषिते इति बोध्यम् । तत्पुत्रा इत्यत्र द्विवच- नान्तेन समास इत्याह *तयोरिति । तयोरधमर्णत्वेन प्राप्त- स्यानिषेधायाह * प्रातिभाव्येति । तेन प्रा मित्यर्थः ।

२। अनुषङ्गेण तुर्यपादं व्याचष्टे *यस्त्विति। ए कवचनान्त- न समास इत्याह * तस्येति । * पुत्राः, ते एव। अत एवाह * नपौत्रा इति ।

३।विशेषमनुक्तमाह * ते चेति ।दानप्रतिभुवः पुत्राश्चेत्यर्थः । व्यासवचनं क्रमेण वाक्यत्रयेणोभयपरत्वेन क्लिष्टत्वात् व्याच- ष्टे * प्रातिभाव्येति। इदं विशेषणमर्थसि थकथनपर । तत्र ते- षामनधिकारात् । समांम भयशेष इत्याह * सममिति । शेष- माह * दद्युरिति । पौत्रा इ क्तेरिति भावः । क्वचित्तु मूले

व्याख्यान चक्रवचनान्त पाठ एव पौत्र इति, तदा समं दद्यादि-त्यन्वय इति न कोपि दोषः । अपिः समानांशमोक्तपौत्र-समुच्चायकः । एवेन वृद्धिव्यवच्छेदः । तत्सुताविन्यत्रापि द्विवच-नान्तेन समास इत्याह *तयोरिति । तयोः स्वरूपे आह *प्रपौ-त्रपौत्रौइति ।

४ । पदार्थमुक्त्वा वाक्यार्थमाह * अप्रातिभाव्येति । समुच्चय-वारणायाह *यथाक्रममिति । पौत्रसुतः प्रपौत्रोऽप्रातिभाव्यागतं ऋणं न दद्यात्, पुत्रसुतः पौत्रः प्रातिभाव्यागतं तन्न दद्यादित्य-र्थः । तुसूचितं विशेषमाह *अगृहीतेति ।

५। व्यासवाक्यस्यान्यविरोधमाह *यदपीति । व्यासवाक्येन दानप्रतिभूपुत्रस्य मूलदानमुक्तम्, अनेन तु लग्नकस्य च प्रतिभुव एव मूलदानमुक्तमिति विरोधः । तं परिहरति * तदपीति । व्याख्येयमित्यन्वयः। अप्रसिद्धत्वात्पदार्थमाह *लग्नक इति। अथ वाक्यार्थमाह *लग्नक इति। तद्व्याख्याने [१]शेषद्वयमाह *मृत इति, पुत्रेणेति च । अनेन वृद्धिमित्यत्र तस्येत्यस्यानुषङ्गः । पुत्र इति शेष इति सूचितम् । *मूल्यमिति । मूलेन समं मूल्यं, नौवयोधर्मेत्यादिना यत् । तदेवेत्यर्थः । क्वचित् उभयत्र मूलमित्येव पाठः ।

६ । तयोः सुता न दाप्या इत्युक्तस्यापवादं प्रदर्शयन् विशेष-माह *यत्रेति । यत्रत्वित्यर्थः । क्वचित्तथा पाठ एव । एवनाऽन-न्यव्यवच्छेदः । अत्र तस्मादेवेत्यनेन बन्धकस्य कालवशेन ऋणा-पर्याप्तत्वेऽपि यावद्बन्धकं तावदेव देयं न तु ततोऽधिकं,यावदृणं तावत्स्वीयमपीति सूचितम् । *तस्मात्, तत एव धनात् बन्ध-

---

१ लग्नको वित्तवान् यदि इत्यत्र मृत इति मूल्यं तस्य भवेद्देयम् इत्यत्र च पुत्रेणेति शेषद्वयमित्यर्थः ।

कात् । … नतया प्रतिज्ञातार्थासिद्धेरा… …मनेति । युक्त… …त्य-त्वादिति भावः । *प्रत्यय …ति । त…धापोत्यर्थः । अभिम… …र्थ …ता… * … । अनेन पूर्वं मृत इ… …पलक्षणमिति सूचि-तमिति केचित् । अत्रैव तथोक्तिस्त्व… …ातयेत्यपरे ॥ ५४ ॥

मि० य… …तिभूसंभवस्तत्र कथं …तव्यमि-त्याह ।

या० बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम् ।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ ५५ ॥

मि० यत्रैक… …न्प्रयोगे द्वौ बहवो वा प्रतिभुवः स्युस्त-दृणं संविभज्य …वांशेन दद्युः । एकच्छायाश्रिते… —एक-…याधमर्णस्य छाया सा… …यं तामा…ि…ाः …कच्छाया-श्रिताः । अधमर्णो यथा…त्स्नद्रव्य…नाय स्थितस्तथा दाने प्रतिभुवोऽपि प्रत्येकं कृत्स्नद्रव्यदानाय स्थिताः । एवं दर्शने प्रत्यये च । तेष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिक…ोत्तमर्णस्य यथारुचि यथाकाम… । अतश्च धनिको वित्ताद्यपेक्षायां स्वार्थं यं प्रार्थयते स एव कृ-त्स्नं दद्यान्नांशतः । तेष्वेकच्छायाश्रितेषु यदि कश्चिद्दे-शान्तरं गतस्त…त्र… संनि…तस्तदा धनिकेच्छया स सर्वं दाप्यः । मृते तु कस्मिंश्चित्ततः स्वपि…ंशम… …द्धेकं दाप्यः ।

यथाह कात्यायनः,

…कच्छायां प्रवि…ानां दाप्यो यस्तत्र दृश्यते ।
प्रोषिते त…तः सर्वं पित्र्यंशं तु मृते समम् ॥ इति ॥ ५५ ॥

बा० १। *अनेकेति। ते च सजातीया विजातीयाश्चेति भावः। *इत्याह, इत्यत आह। तत्रादावुत्तरार्धा[illegible]शेन विजातीयस्थले आह *य[illegible]ति। बहुत्वमनेकत्वोपलक्षणमित्या[illegible] *द्वाविति। *स्वांशेनेति। स्वस्वांशेनेत्यर्थः। [illegible]चित्तथैव पाठः। अत एव स्वांशैरिति बहुवचनोपपत्तिः। [illegible] उक्तम् *एकच्छायाश्रितेष्विति। तत्प्रतीकं धृत्वा पदार्थकथनपूर्वकं व्याचष्टे *एकेति। सादृश्यं [illegible] *अधमर्णस्येति।

२। *एवमिति। स यथा दर्शनाय विश्वासाय च स्थित एवं तेऽपीत्यर्थः।

३। एष्वित्यस्य व्याख्या *प्रातिभूष्विति। *यथाकाममिति। दद्यादिति शेषः। क्वचिद्बीजं कथयन् तात्पर्यार्थमाह *अतश्चेति। आदिना सत्यवाक्त्वाभिजात्यादि। *स्वार्थं, स्वधनम्। विशेषमाह *एकेति। तेषां मध्ये इत्यर्थः। *सः, सोपि। *सर्वं, सवृद्धिकम्।

४। *मृते तु कस्मिंश्चिदिति। तेषां मध्ये कस्मिंश्चित्प्रातिभुवि मृते इत्यर्थः। वैलक्षण्यसूचक[illegible]ः। *अंशमिति। अवशिष्टं तु अर्थादवशिष्टानां मध्ये यथारुचि दाप्य इति भावः। *एकेति। तेषां मध्ये स दाप्यः, यस्तत्र दृश्यते यो धनिकेच्छाविषयत्वेन ज्ञायते। तेषां मध्ये कस्मिंश्चि[illegible]न्तरं गते सति तत्सुतोऽपि तदिच्छया सर्वं दाप्यः। तेषां मध्ये कस्मिंश्चिन्मृते तु तत्सुतः स्वपित्र्यमंशमेव दाप्यो न सर्वम्। तत्रापि समम्, अवृद्धिकमेवेत्यर्थः। पित्रंशमिति पाठः। पित्र्यंशमिति पाठे शकन्ध्वादित्वं बोध्यम्॥५९॥

मि० प्रातिभाव्ये ऋणदानाबोधि[illegible]स्का प्रतिभूदत्तस्य [illegible]विधिमा[illegible]।

या० प्रतिभूर्दापितो यत्तु प्रकाशं धनिना धनम्।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥ ५६ ॥

मि० यद् द्रव्यं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः प्रकाशं [illegible]जनसमक्षं राज्ञा धनिनां धनं [illegible]पिता न [illegible]नद्वगुण्यलोभेन स्वयमुपेत्य [illegible]त्तवान्,

यथाह नारदः,

यं चार्थं प्रति[illegible]द्याद्धनिकेनापपीडितः।
[illegible]णिकं तं प्रतिभुवे द्विगुणं [illegible] ॥ इति,

ऋणिकैरधमर्णैस्तस्य प्रतिभुवस्त[illegible]द्विगुणं प्रतिदातव्यं स्यात्। तच्च क[illegible]लविशेषमनपेक्ष्य सद्य एव द्विगुणं [illegible]तव्यम्। वचनारम्भसामर्थ्यात्। एतच्च हिरण्यविषय[illegible]। ननु इदं प्रतिभूवचनं द्व[illegible]ण्यमात्रं प्रतिपा[illegible]याति। तच्च पूर्वोक्तक[illegible]लकलाक्रमाबाधेनाप्युपपद्यते। यथा ज[illegible]विधानं शुचित्वाबाधेन। अपि च सद्यः स[illegible]द्धिकदानपक्षे प[illegible]त्रीणां सद्यः [illegible]न्तत्यभावान्[illegible]लदानमेव [illegible]प्नोतीति। तदस[illegible]।

व[illegible]धान्या[illegible]रण्यानां च[illegible]त्रिद्वैगुणा परा।

[illegible]त्यनेनैव कालकलाक्रमेण द्वगुण्या[illegible]सिद्धेः द्वैगुण[illegible]मात्राविधाने इदं [illegible]चनमनर्थकं स्यत्। प[illegible]त्रीणां तु [illegible]लक्रमेण द्वै[illegible]ण्यादिक्रमपक्षेऽपि [illegible]न्तत्यभावे स्वरूप[illegible]नमेव। यदा प्रतिभूरपि द्रव्य[illegible]नानन्तरं तावत क[illegible]लेनाधमर्णेन संघटते तदा सन्ततिरपि संभवत्ये[illegible]। यद्वा [illegible]वसिद्धसन्तत्या सह प[illegible]त्रिया दास्यतीति न किंचिदत[illegible]। अथ प्रातिभाव्यं प्रीतिकृत[illegible], अतश्च

प्रतिभुवा दत्तं प्रीतिदत्तमेव । नच प्रीतिदत्तस्य याच-
नात्प्राग्वृद्धिरस्ति ।

यथाह, (ना० व्य० प० १।१०९)

प्रीतिदत्तं तु यत्किंचिद्व ते न त्वयाचितः ।

याच्यमानम ं पञ्चकं शतम् ॥ इति ।

अतश्चास्य प्रीति त्तस्यायाचितस्यापि दानदिव-
सादारभ्य यावद्द्वि णं कालक्रमेण वृद्धि त्यनेन व-
चनेनोच्यते इति। तदप्यस । अस्यार्थस्यास्माद्वचना-
दप्रतीतेः । द्विगुणं प्र मित्येतावदिह प्रतीय-
ते । तस्मात्कालक्रममनपेक्ष्यैव द्विगुणं प्रतिदातव्यं
वचनारम्भसामर्थ्यादिति सुष्ठूक्तम् ॥ ५६ ॥

बा० १ । सङ्गतिमाह *प्रातिभाव्ये इति । * प्रतिभूदत्तस्य
प्रतिक्रियाविधिमिति। पलायनं कृत्वा पुनः परावृत्तस्याधमर्णस्ये-
ति भावः । यत्त्विति पाठं सूचयन्नाह *यदिति । धनमित्यस्य
व्याख्या *द्रव्यमिति । ऋणमिति पाठान्त म् । प्रतिभूग्रहण-
मुक्तरीत्योपलक्षणमित्याह * तत्पुत्र इति । विशेषमाह * धनि-
केनेति । धनिनामिति प्राग्वत् षष्ठी । विशेषोक्तिव्यवच्छेद्यमाह
* नपुनरिति । न तु इत्यर्थः ।

२। विशेषे मानमाह * यथाहेति । ऋणिके मत्वर्थीयष्ठन् ।
राजेति शेषः ।

३। उत्तरार्धार्थमाह *ऋणिकैरिति । भवेदित्यस्य व्याख्या
*स्यादिति । विशेषमाह * तच्चेति । तच्च द्विगुणमित्यन्वयः ।
कालेत्यस्य व्याख्या *सद्य एवेति । *वचनेति । प्रतिभूरिति-
वचनेत्यर्थः । अन्यथैतदानर्थक्यं स्पष्टमेव । तथा तस्य प्रागेवो-
क्तत्वादिति भावः ।

४। अनुपदं वस्त्रादौ ।वि ेषस्य वक्ष्यमाणत्वा ।। * एतच्चे-
ति । न वस्त्रधान्यादिविषयकमित्यर्थः ।

५। वचनस्यान्यविषयतया तच्चेत्या ्क्तविशेषमाक्षिपति—

*नन्विदमिति। उक्तव नमित्यर्थः।मात्रपदेनोक्तार्थेऽन्य-
वच्छेदः। * पूर्वोक्तेति।पूर्वोक्तः, काले मासादौ कला ृ स्तस्याः
क्रमः, तदवा ि त्यर्थः। स्वकृतवृद्ध्य- ्सारेण यदा कालान्त
द्वैगुण्यमेति धनं तदैव दत्तद्रव्याय प्रतिभुवे द्विगुणं ातव्यमधम-
र्णेनेति द्वै ण्यमात्रप्रतिपादकेनानेन वचनेन बोध्यते। अन्यथा
तु यावती वृद्धिस्तत्सहितं मूलधनं देयं न द्विगुणम्, इति सद्यो
द्वि ुणदानमयुक्तमिति भावः।

६। अत्रा ि पत्तौ दृष्टान्तमाह *यथेति।चतुर्थे ृतीयपाद
सप्तदशाधिकरणे द्वितीयवर्णकं, ्लसंयोगश्चाचोदिते न स्यात्सं-
योगस्याशेषभूतत्वादिति। वैश्वानरं द्वादशकपालं निर्वपेत् ्त्रे जाते
इत्यादि श्रूयते। तत्र संशयः, ु्त्रजन्मानन्तरमेवेयमिष्टिः कार्योत
जातकर्मानन्तरमेवेति। निमित्तस्य पुत्रजन्मनो नियोज्यविशेषण-
त्वेन निमित्तानन्त मेव कार्येति जातकर्मणः प्रागेवेति पूर्वपक्षः।

७। सिद्धान्तस्तु न केवलं जन्म विशेषणं नियोज्यस्य,अपि तु
पुत्रगतपूतत्वादिकमपि। एवं च जन्मपूतत्वरूपनिमित्तयोः संव-
लितयोरेव नियोज्यविशेषणत्व । ु्त्रगतपूतत्वा।दिकं च पुत्रे जी-
वत्यभिलषितं पितुर्न तद्वैपरीत्ये। जीवनं च स्तनपाना व। स्तन-
पानं च जातकर्मणः प्राङ् निषिद्ध । अतो जातकर्मानन्तरमेवे ि ः।
एवं च जन्मानन्तरभाविन्या इष्टेर्जातकर्मानन्तर ्त्कर्षे आशौचा-
नन्त मेव कार्या न जातकर्मानन्तर । कालबाधरूपा ्यामे
मानाभावात्। शुचिना कर्म कर्त्तव्यमित्य ापवा ाभावादिति।

८। इदं च गुरुमतेनोक्तम्। भट्टमते तु संज्ञायान्तं प्राग्वत्।

निमित्तानन्तर्यं नैमित्तिकस्यावश्यं भावित्वाज्जन्मन एव निमित्तत्वाज्जन्मानन्तरमेवेति पूर्वपक्षः ।

९। सि ... वाक्यशेषश्रुत पुत्रगतपवित्रत्वादिफलकामनावान् वैश्वानरेष्टावधिकारी । तच्च फलं जीवत्येव पुत्रे ऽभीष्टम् । जीवनं च शिशोर्जातमात्रस्य स्तनपानायत्तमेव । तच्च स्तनपानं जातकर्मानन्तरमेव, न ततः प्राक् । अतः पुत्रगतपवित्रत्वादिफलावरोधेन जातकर्मानन्तरमेवेष्टिरिति ।

१०। एवं स्थिते तृतीयवर्णकेऽन्या चिन्ता, जातकर्मानन्तरमेवेष्टिरुताशौचापगमे इति । तत्रतूक्तरूपप्रयोजनवशाज्जन्मरूपप्रयोजनाभावात् निमित्तानन्तर्यं प्राप्ताऽपीयमिष्टिर्जातकर्मानन्तरमुत्कृष्टा । एवमुत्कृष्टायाः पुनराशौचानन्तरमुत्कर्षे प्रयोजनाभावात् जातकर्मानन्तरमेवेति पूर्वपक्षे, उच्यते । निमित्तानन्तर्यमिष्टेस्तावद्बाधितमेव । तद्वतोक्तप्रयोजनवशात् । बाधिते च निमितानन्तर्ये शुद्धकालप्रतीक्षया आशौचापगमे पौर्णमास्यादिके काले कार्या । शुद्धकालस्याप्यबाधितत्वात् । शुचिना कर्मेत्यस्यापवादाभावादिति । तथा च शुद्धकालरूपमक्रमबाधित्वैव जातेष्टिविधानम् ।

११। तथा, अशीतिभाग इत्यादिना प्रागुक्तो यः कालक्रमेण वृद्धिक्रमस्तमबाधित्वैव द्वैगुण्यविधानमिति सद्यो न द्वैगुण्यमिति भावः । अत्र सद्यो द्वैगुण्यदानपक्षेऽग्रे ऽनुपपत्तिमप्याह *अपि च सद्य इति । द्विगुणवृद्धिसहितेत्यर्थः । सद्यो द्वैगुण्यं नाम सद्य एव वृद्ध्या सह द्वैगुण्यं न स्वरूपतः । वृद्धिस्तु पशुस्त्रीणां सन्ततिरेव । सन्ततिस्तु पशुस्त्रीणामित्युक्तत्वात् । तथा च सद्यस्तथाद्वैगुण्यदानपक्षे पशुस्त्रीषु सद्यः संतत्यभावान्मूलमात्रमेव देयं स्यादिति स्त्रीपशुष्वेवेति वक्ष्यमाणमनुपपन्नमित्यर्थः ।

१२। *वस्त्रेति । यत इत्यादिः । वस्त्रेत्यादिवचनारम्भसामर्थ्ये-

नैव तत्क्रमेण द्वैगुण्यादेः प्राप्तौ पुनरत्र तथा तद्विधिर्व्यर्थ इति पूर्वोप्राप्तं सद्यो द्वैगुण्यमेवागत्याऽवश्यं विधेयम् । दृष्टान्ते तु तद्विधिवाक्यस्यानर्थक्याभावाच्चिनेत्येतदबाधेनाप्युपपत्तिरिति विशेष इति तद्वैषम्यमिति भावः ।

१३। एवमाद्यदोषमुद्धृत्य द्वितीयदोषमुद्धरति *पण्यानां त्विति। तथा च तत् संभवापेक्षं न तु नियतमिति भावः। अभ्युपेत्येदम् । वस्तुतस्तदयुक्तमेवेति सूचयन् तदा तत्संभवमप्याह *यदेति। तावता कालेनेति पाठः । *संघटतेइति । तेन सह संगतो भवतीत्यर्थः । सद्यः संघटनपक्षे आह *यद्वेति । *पूर्वेति । प्रतिग्रहीतृकद्रव्यदानात्पूर्वम् अधमर्णस्य पलायनदशायां विद्यमानतादशायां वा जातेत्यर्थः ।

१४। अथास्य वचनस्य विषयविशेषपर्यवसानद्वारा कालक्रमेणैव द्वैगुण्यदानविधिपरत्वाक्षेपाय तदुपयुक्तं किंचिदाह *अथेति । उच्येतेति शेषः । *नच, न हि । नारदमाह *यथाहेति। *यत्किंचित्, प्रतिभूदत्तं धनिकदत्तं वा । *पञ्चकमिति । प्राग्वत् । तमेवाक्षेपमाह *अतश्चेति । *अस्य, प्रतिभूसंबन्धिनः । यावद्द्वैगुण्यमित्यव्ययीभावः । प्रीतिदत्तस्थलेऽयाचिते तदभावस्योक्तत्वेन प्रतिभूदत्तस्यापि तादृशस्योक्तरीत्या तथात्वेन वृद्ध्यभावे प्राप्ते तदपवादत्वेनायाचितस्यापि तस्येदं प्रतिपाद्यते इत्यर्थः ।

१५। *अस्यार्थस्येति। वाक्यार्थो हि वाच्यो लक्ष्यो व्यङ्ग्यो वा भवेत् । तत्राद्यं नाद्यः । अप्रतीतेः । न द्वितीयः । मानाभावात् । अत एव नान्त्य इत्यर्थः । तदाह *द्वैगुण्यमिति । उपसंहरति *तस्मादिति ॥ ५६ ॥

मि० प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमाह।

या० सन्ततिःस्त्रीपशुष्वेव धान्यं त्रिगुणमेव च।
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणस्तथा॥ ५७॥

मि० हिरण्यद्विगुणवत्क लानाः रेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः। श्लोकस्तु व्य ख्यात एव। यस्य द्रव्यस्य यावती वृद्धिः परा काष्ठोक्ता तद्द्रव्यं प्रतिभूदत्तं स्वादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्य सद्यो दातव्यमिति तात्पर्यार्थः। यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णं दर्शयितुमसमर्थः तदा तदन्वेषणाय तस्य पक्षत्रयं दातव्यम्। तत्र यदि तं दर्शयाति तदा मोक्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः।

नष्टस्यान्वे णार्थं तु दाप्यं पक्षत्रयं परम्।
यद्यसौ द र्शयेत्तत्र मोक्तव्यः प्रातिभूर्भवेत्॥
काले व्यतीते प्रतिभूर्यदि तं नैव दर्शये ।
निबन्धं दापयेत्तं तु प्रेते चैष विधिः स्मृतः॥

इति कात्यायनवचना । लग्नकाविशेषनिषेधश्च— तेनैवोक्तः,

न स्वामी न च वै शत्रुः स्वामिनाऽधिकृतस्तथा।
निरु ो दण्डितश्चैव संदिग्धश्चैव न क्वचित्॥
नैव रिक्थी न मित्रं च न चवात्यन्त सिनः।
राजकार्यनियुक्तश्च ये च प्रव्राजिता नराः॥
नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्सम ।
जीवन्वाऽपि पिता यस्य तथैवेच्छाप्रवर्तक :॥
नाविज्ञातो ग्र ातव्यःप्रातिभूः स्वक्रियां प्रति। इति।

सांदिग्धोऽभिशस्तः। अत्यन्तवा िनो नैष्ठिकब्र-

...। इति प्रतिभूविधिः ॥

धनप्रयोगे विश्वासहेतू द्वौ, प्रतिभूराधिश्च।

यथाह नारदः, (ना० व्य० प० १।११७)

विस्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च। इति।

तत्र प्रतिभूर्निरूपितः। इदानीमाधिर्निरूप्यते। आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेऽधिक्रियते। आधीयते इत्याधिः। स च द्विविधः, कृतकालोऽकृतकालश्च। पुनश्चैकैकशो द्विविधः, गोप्यो भोग्यश्च।

यथाह नारदः, (ना० व्य० प० १।१२४।१२५)

अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः।

कृतकालोपनेयश्च यावद्देयोद्यतस्तथा॥

स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्य तथैव च। इति।

*कृतकाले, आधानकाल एवामुष्मिन्काले दीपोत्सवादौ मयाऽयमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीति एवं निरूपित काले, उपनेयः आत्मसमीपं नेतव्यो मोचनीय इत्यर्थः। देयं दानम्। तदनतिक्रम्य यावद्देयम्। उद्यतो नियतः स्थापित इत्यर्थः। यावद्देयमुद्यतो यावद्देयोद्यतः, गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः। गोप्यो रक्षणीयः॥ ५७॥

बा० १।*सर्वत्र, बलादाधिः। अल्पान्तरत्वात्तयोः पूर्वनिपातः। तेषु निवर्तितेष्वित्यर्थः। मा कुर्वीरित्यत आह *कालानादरेणेति। वृद्ध्या सह आधिवर्जम्। सामान्यतः सर्वतात्पर्यमा *यस्येति। विसर्गः—

२। *य...ति। *संप्रतिपन्नेऽहति। प्रतिज्ञाते मासे इत्यर्थः॥

*तत्र, पक्षत्रये वमग्रेऽपि । अत्र मानमाह *न स्यति । *परम्, आधिकम् । *काले इति । परस्मिन्नपि काले यदि स न तथा कुर्यात् तदा तस्मिन्काले व्यतीते तु सति सः तं निबन्धं तमर्थं दापयेदित्यर्थः । उक्तप्रकारमन्यत्रातिदिशति *मेते चेति । अधमर्णे इत्यर्थः ।

३। विशेषान्तरमा *लग्नकेति । प्रतिभूविशेषनिषेधोऽपीत्यर्थः । केषांच प्रति स्वनिषेध इति यावत् । *तेनैव, कात्यायनेन । अत्र स्वामित्वादिकं स्वनिरूपितं ग्राह्यम् । *क्वचित्, क्वापि । रिक्थी पुत्रादिः । * दातुं, धनमिति शेषः । * जीवन्निति । यस्य पिता जीवन् जीवति । व्यत्ययेन शता । आस्ते इति शेषो वा । सोऽपि चेत्यर्थः । *तथैवेच्छेति । स्वेच्छाचरणशील इत्यर्थः । *स्वक्रियेति । प्रतिभूत्वकरणाभिसमीन्हेत्यर्थः । प्रतिभूः स्वांक्रियामिति पाठान्तरम् । अत्र धनिकेन स्वादानाक्रियामभिसमीक्ष्येत्यर्थः । अन्यथा पौनरुक्त्यं स्पष्टमेव । इति प्रतिभूविधिः ॥

४। प्रसक्तसाक्षिनिरूपणमुक्त्वा आधिनिरूपणे सङ्गतिमा *धनेति । तद्दाने इत्यर्थः । विस्रम्भो विश्वासः । * अत्र, धनप्रयोगे । * तत्र, तयोर्मध्ये । * इदानीमिति । तत्प्रसङ्गेऽपि ततोऽस्यान्तरत्वादिति भावः । द्विरूपाद्योप्रयक्तत्वेनात्र मूलानुक्तमुभयं वक्तुं तस्यादौ सामान्यलक्षणमा *आधिर्नामेति । * व्यस्योपरीति । जातविश्वासेत्यर्थः । यद्वा उपरीति लोकोक्तिः । प्रतीतिनिधित्वनेत्यर्थः । * अधीति । स्थाप्यते इत्यर्थः । एवं ... योगमाह * आधीति । अर्थः स एव । अत एव नारदवाक्य तयारुक्तम् । तेनोभयमप्युक्तम् । अत एव तत्र तयोरुक्तं

५। अथ भेदमाह * स चेति । * द्विलक्षण इति । द्विस्वरूप इत्यर्थः । * सः, द्विविधोऽपि । संदिग्धत्वात् कृतत्वा भेदत्रयं

तत्रत्यं क्रमेण व्याचष्टे * कृतकाले इत्यादिना रक्षणीय इत्यन्तेना * काले इति । अनेन कर्मधारयोत्तरं कृत्यैर्ऋणे इति सप्तमीसमासः सूचितः । अस्यार्थमाह * आधानत्यादिकाले - त्यन्तेन । एवेनानन्तरकालव्यावृत्तिः । उपार्थमाह * आत्मेति । विशिष्टतात्पर्यार्थमाह * मोचनीय इति । अयमेव कृतकालः । एतत्स्वरूपमुक्त्वा अकृतकालाख्यद्वितीयस्वरूपं निर्वक्ति * देयमिति । बहुलग्रहणाद् भावे कृत्य इत्याह * दानमिति । अव्ययीभावः पदार्थानतिवृत्तावित्याह * देयमनतिक्रम्येति । उपसर्गार्थमाह * नियत इति । उभयोरन्तर्भावितण्यर्थत्वसूचनायाह * स्थापित इति । सुप्सुपेति समासमाह * यावदिति । तत्तात्पर्यार्थमाह * गृहीतेति । * प्रत्यर्पणं, दानम् । तस्यापि तमाह * अनिरूपितकाल इति । आच्छाद्य इत्यर्थनिरासाय तत्स्वरूपमाह * रक्षणीयइति । भोग्यस्तु प्रसिद्ध इति भावः ॥५७॥

मि० एवं चतुर्विधस्याधेर्विशेषमाह ।

या० आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते ।
काले कालकृतो नश्येत्फलभोग्यो न नश्यति ॥५८॥

मि० प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यति अधमर्णस्वं, धनप्रयोक्तुः स्वं भवति । कालकृतः कृतकालः । आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः । स तु काले निरूपिते प्राप्ते नश्येत्, द्वैगुण्यात् प्राक् ऊर्ध्वं वा । फलभोग्यः—फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स कदाचिदपि न नश्यति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालाति-

क्रमे नाश उक्तः, काले काल ता नश्येदिति। अकृतकाल थ भोग्यस्य नाशाभाव उक्तः,फलभोग्यो न नश्यतीति। पारिशेष्या आधिः प्रणश्येदित्येतत् अकृतकाल प्याधिवि यम ।ति ते । वृ ण्यातिक्रमेण नि पितकालातिक्रमेण च विनाशो चतुर्दशादिवसप्रतीक्षणं व्यात्। बृहस्पतिवचना ।

हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधेः।
बन्धकस्य धनी स्वामी द्विसप्ता प्रतीक्ष्य च ॥

त न्तरा धनं दत्त्वा ऋणी बन्धमवा यात्। इति।

नन्वाधिः प्रणश्येदित्यनुपपन्नम् । अधमर्णस्य स्वत्वानिवृत्तिहेतोर्दानविक्रयादेरभावात् । धनिनश्च स्वत्वहेतोः प्रतिग्र क्रयादेरभावात्।

म वचनविरोधाच्च। (अ. ८ श्लो. १४३)

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय इति।

कालेन संरोधः कालसंरोधश्चिरकालमव थानं तस्मात्कालसंरोध चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति, न च विक्रयः। एवमाधीक णाविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति। उच्यते। आधीकरणमेव लोके सोपाधिकस्वस्वानिवृत्तिहेतुः, आधिस्वीका श्च सोपाधिकस्वत्वा त्तिहेतुः प्रसिद्धः। तत्र धनद्व ण्ये निरूपितकालप्रा च द्रव्य ।नस्यात्यन्तानिवृत्तेः अनेन वचनेनाधमर्णस्य त्य न्तिकी स्वत्वानि त्तिः उत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनविरोधः।

यतः (अ. ८ श्लो. १४३)

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात् ।

इति भोग्याधिं प्रस्तुत्य, तदुच्यते—

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः॥इति।

भोग्यस्याधेश्चिरकालावस्थानेऽप्याधीकरणविक्रय-निषेधेन धानिनः स्वत्वं न भवति । इह तूक्तम्, फलभोग्यो न नश्यतीति । गोप्याधौ तु पृथगारब्धं मनुना, (अ. ८ श्लो. १४४)

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत् ।

इति । इहापि वक्ष्यते, गोप्याधिभोगे नो वृद्धिरिति । आधिः प्रणश्येद्विगुणे इति तु गोप्याधिं प्रस्तुत्योच्यते इति सर्वमविरुद्धम् ॥ ५८ ॥

बा० १। एवंचाधेश्चातुर्विध्यमनेनोक्तं, गोप्यः कृतकालोऽकृतकालश्च एवं भोग्यो द्वेधेति । तदाह * एवमिति । उक्तप्रकारेणेत्यर्थः । *मोच्यते इति । मोक्ष्यते इति पाठान्तरम् । तत्र मोक्ष मोक्षणे इति धातुर्बोध्यः । मोक्षते इति त्वपपाठः ।

२। आद्यार्धार्थमाह * प्रयुक्ते इति । दत्ते इत्यर्थः । * द्विगुणीभूते, सति । * अधमर्णस्वं, तदीयस्वत्वम् । क्वचिद्व्यस्तपाठः । षष्ठ्यन्तमात्रपाठे स्वमित्यग्रिमस्यात्राप्यन्वयो बोध्यः । न केवलं तावदित्याह * धनेति ।

३। तृतीयपादार्थे पदार्थपूर्वमाह *कालकृत इति । अस्य पूर्वानुक्तत्वभ्रमनिरासायाह * कृतेति । ननु एवं सति तदसंगतिः अन्यथा पूर्वविरोधापत्तिः अत आह * आहितेति । पूर्वतो वैलक्षण्यायाह * सत्विति । शेषमाह * प्राप्ते इति । सतीत्यर्थः । अत एव पूर्वेणागतार्थत्वमाह * द्वैगुण्यादिति ।

४। तद्वत् तुर्यपादार्थमाह * फलेति। उक्तक्रमेणैव पूर्वनिपात-स्तस्याऽविगणत्वादित्याह * फलमिति। तत्पुरुषसमासस्तु वक्तु-मुचितः। * कदाचिदिति। द्वैगुण्ये काले च प्राप्ते सत्यपीत्यर्थः।

५। नन्वेवं वाक्यार्थत्रये त्रिषु विशेषलाभेऽपि तुर्ये तदलाभात्प्र-तिज्ञाहानिः,अतोऽन्यथा दुर्वचत्वाद् व्युत्क्रमेण सर्वत्र तेषु विभज्य तमाह * कृतेत्यादि। इदमुभयपरं संकोचे मानाभावादित्याह * गोप्यस्येति। अत एवाह * अकृतेति। विशेषोक्तेराह * भो-ग्येति। * अवतिष्ठते, पर्यवस्यतीत्यर्थः।

६। कृतकालगोप्यभोग्याध्योः कृतकालातिक्रमे नाशः,अकृत-कालगोप्याधेर्द्वैगुण्यातिक्रमे स इत्युक्तं, तत्र द्वैगुण्यतत्काला-तिक्रममात्रयोरेव न सः,किं तु ततोऽप्यग्रे स्वल्पोऽवकाशोऽस्तीति प्राग्वत् विशेषमाह * द्वैगुण्येति। तदेवाह * हिरण्ये इति। ब-न्धकस्येति मध्यमणिन्यायेनान्वेति। प्रतीक्ष्य चेति पाठः। प्र-तीक्षयेदित्यपपाठः। हिरण्ये द्विगुणीभूते सति कृतावधेर्बन्धकस्य काले पूर्णे च सति धनी उत्तमर्णः द्विसप्ताहं प्रतीक्ष्य बन्धकस्य स्वामी भवतीत्यर्थः। द्विः सप्त द्विसप्तास्तेषामह्नां समाहारो द्वि-सप्ताहं चतुर्दश दिनानि। प्रतीक्षाफलमाह * तदन्तरेति। चतु-र्दशदिनमध्ये इत्यर्थः।

७। कृतकाले तथा प्रतिज्ञयोभयत्र नाशेऽप्यकृतकालगोप्याधौ स न संभवतीति पूर्वार्द्धोक्तमाक्षिपति * नन्विति। हेत्वन्तर-माह * मन्विति। तदेवाह * न चाधेरिति। तथा शब्दादप्रती-तेव्याचष्टे * कालेनेति। साधनं कृतेति समासः। बहुकालेने-त्यर्थः। संरोधः स्थितिः। तदाह * चिरेति। * न च विक्रय इति। अस्तीत्यस्यानुषङ्गः। नन्वेतावताऽपि नोक्तार्थलाभोऽत आह * एवमिति। चिरकालावस्थानेनेत्यर्थः। आधात्यस्य न्य-

त्रेत्यादिः। अन्यथत संगतिः स्पष्टैवेति भावः।

८। * सोपाधिकेति। सोपाधिका चासौ स्वत्वनिवृत्ति तस्या स्तत्र वा हेतुरित्यर्थः। एवमग्रेऽपि। स्वत्वनिवृत्तिस्वत्वापत्त्योः स्वाभाविकत्वाभावेन सोपाधिकेत्युभयत्र विशेषण। असि त्वादेरुभयत्रान्वयः। नन्वेवं लोकतः तथाप्यात्यन्तिकयोस्तयो भावादाधिनाशः कथमत आह * तत्रेति। तत्र तस्य तयोस्तद्धे त्वप्रसिद्धौ चेत्यर्थः। * धनेति। अनेन बृहस्पतिवचनेन तयो त्यात्यन्तान वृत्तेस्तयोस्तदुभयं क्रमेण मूलवचनेन भवतीत्यर्थः। त न्तरेत्यादि वदता हस्पतिना तयोरनन्तरमपि चतुर्दशदिनमध्ये पूर्वद्रव्यं देयं न्यग्रे इति सूचितम्। तथा च तदनन्तरमत्यन्तद्रव्यदाननिवृत्तिलाभेन निवृत्ते द्रव्यदाने आधिः प्रणश्येदित्यनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिः, उत्तमर्णस्य चात्यन्तिकी स्वत्वप्राप्तिरुपदिश्यते। अन्यथा वचनवैयर्थ्यं स्पष्टमेवोति भावः।

९। एवमाद्यदोषमुद्धृत्य द्वितीयमुद्धरति *न चेति। *सोपकारे, उपकारसहिते भोग्याधाविति यावत्। तत्राप्य तकाले इति बोध्यम्। कुसीदेन तदर्थद्रव्यप्रयोगेण कृता ताम्। अत एव तथैव तत्तात्पर्यमाह * भोग्येति। * निषेधेनेति। तयोर्निषेधेनेत्यर्थः। *उक्तमिति। अत्रैव वचने इति भावः।

१०। नन्वेवं मनोर्न्यूनता गोप्याधिविषया क्तेः, अत आह *गोप्येति। अत एव बलादित्युक्तम्। *वक्ष्यते, अव्यवहितमेव। अत एवाविरोधं स्पष्टयन् प्रकृतमाह * आधिरिति॥ ५८॥

मि० किंच।

या० गोप्याधिभोगे नो वृद्धिः सोपकारे च ह्रापिते।
नष्टो देयो विनष्टश्च दैवराजकृताद्दते॥ ५९॥

मि० गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति, अल्पेऽप्युपभोगे सत्यपि वृद्धिर्हातव्या। समयातिक्रमात्। तथा सोपकारे उपकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ नष्टे धनिके हापिते हानिं व्यवहाराक्षमत्वं गमिते, नो वृद्धिरिति संबन्धः। नष्टो विकृतिं गतः ताम्रकटाहादिश्छिद्रभेदनादिना, पूर्ववत्कृत्वा देयः। तत्र गोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वा देयः। उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या। भोग्याधिर्यदि नष्टस्तदा पूर्ववत्कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्हातव्या। विनष्टश्च— आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण। तद्दाने सवृद्धिकं मूलं लभते धनी। यदि न ददाति तदा मूलनाशः।

विनष्टे मूलनाशः स्याद्दैवराजकृतादृते।

इति नारदवचनात्। (व्य० प० १।१२६)

दैवराजकृतादृते— दैवमग्न्युदकदेशोपप्लवादि। दैवकृताद्विनाशाद्विना। तथा स्वापराधरहिताद्राजकृतात्। दैवराजकृते तु विनाशे सवृद्धिकं मूल्यं दातव्यम् अधमर्णेन, आध्यन्तरं वा।

यथाह,

स्रोतसाऽपहृते क्षेत्रे राज्ञा चैवापहारिते।
आधिरन्योऽथ कर्तव्यो देयं वा धनिने धनम्॥ इति।

तत्र स्रोतसाऽपहृते इति दैवकृतोपलक्षणम्॥५९॥

बा० १। किं चेति। विशेषान्तरमत्राहेत्यर्थः। नो इत्यस्य व्याख्या #नेति। ननु दत्तकालत्वादयुक्तमेतत् अत आह #अल्पेऽपीति। समयः सङ्केतः। चार्थमाह #तथेति। अथेति तत्र पाठान्तरम्।

अर्थः स एव । उपकारस्य साहित्यं तत्कर्तृत्वेन नान्यथेत्याह *उपकारिणीति । अस्य समयवशेन द्वैविध्यादाह *सवृद्धिके इति । अन्यथैतदसङ्गतिः स्पष्टैव । स्वरूपहानेरविवक्षितत्वादाह *व्यवहारेति । उक्तहेतोरेवान्यमाह *नो वृद्धिरिति ।

२। उत्तरार्धं विवृण्वन् गोप्यभोग्याधिसाधारणं धर्ममाह *नष्टो विकृतिं गत इति । एतेन प्रसिद्धार्थनिरासः । अग्रिमेण पौनरुक्त्यापत्तेः । तृतीयान्तं पूर्वान्वयि । छिद्रं च, भेदनं विदारणं-च, अदाहादित्यर्थः । योग्यतया आह * पूर्ववदिति । उभयसाधारण्यमेव विशदयति *तत्रेति । तयोर्मध्ये इत्यर्थः । *चेत्, यदि । तदेति शेषः । एवमग्रेऽपि । अत एवाह *उपभुक्तोऽपीति । अपिना नाशसमुच्चयः । * वृद्धिरपीति । प्रथमपादोक्तत्वात् । अपिना पूर्ववत्करणस्य समुच्चयः । *वृद्धिः, वृद्धिरपि । द्वितीयपादोक्तत्वात् । वृद्धिर्वेति पाठे वाशब्दः समुच्चये । असद्भावे तु तावन्मात्रमेवेति बोध्यम् ।

३। द्वितीयस्याप्युभयाधिविषयत्वं कथयन् तत्साधारणधर्ममाह * विनष्ट इति । विपदलभ्यमाह *आत्यन्तिकमिति । चार्थमाह *सोऽपीति । तत्स्वरूपस्यैवाभावादाह * मूल्यादीति । * तद्दाने, धनिना तस्मिन्दत्ते स्वीयं तादृशं सर्वं स लभते । *मूल्यं, मूलम् । एवमग्रे सर्वत्र । धनीत्यस्य मध्यमणिन्यायेनान्वयः । विशेषमाह *यदीति । *मूलनाश इति । तथा सति सुतरां वृद्धिनाश इति भावः । *विनष्टे, अदत्ते तथेति शेषः ।

४। अव्यवहितापवादत्वेन तुर्यपादं सप्रतीकं व्याचष्टे *दैवेति । अत एवाह *विनाशादिति । तत्रापि विशेषमाह *स्वा-

---

१ आधौ विनष्टे मूल्यादेर्द्वारेण अदत्ते च धनिनो मूलधनस्य नाश इत्यर्थः ।

पराधेति। *राजकृतात्, विनाशादिनेत्य पज्यत । अनेन सूचितं तत्र विशेषमा * दैवेति । ईदृशे स्थलेऽधमण ैं धन नाशो नोत्तमर्णस्येति भावः । तदसम्भवे आह * आध्यन्तरं वेति ।

५। * स्रोतसा, नद्यादिसम्बन्धिना । * राज्ञेति । अधिकृतद्वारेति भावः । अत एव णिच् । आधिशब्दो ऽव्यवहिततदनन्तर्ये । *धनं, सवृद्धिकम् । तत्र न्यूनतां निराचष्टे * तत्रेति । तयोर्मध्ये इत्यर्थः । द्वि स्य कण्ठत उक्तत्वादिति भावः । *दैवेति । दैव तमात्रेत्यर्थः ॥ ५९ ॥

मि० अपिच ।

या० आधेः स्वीकरणात्सिद्धी रक्ष्यमाणोऽप्यसारताम् ।

यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥ ६० ॥

मि० आधेर्भोग्यस्य गोप्य य च स्वीकरणादुपभोगादाधिग्र णसिद्धिः भवति, न साक्षिलेख्यमात्रेण, नाप्युद्देशमात्रेण ।

यथाह नारदः, (व्य० प० १।१३९)

आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सि िरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥ इति।

अस्य च फलम्— (याज्ञ० २।२३)

आधौ प्रतिग्र े क्रीते पूर्वा तु बलवत्त । । इति ।

या स्वीका न्ता क्रिया सा पूर्वा बल ा , स्वीकाररहिता तु पूर्वाऽपि न बलवतीति। स चाधिः प्रयत्नेन र थमाणोऽपि कालवशेन यद्यसारतामवि त एव सवृद्धिक लद्रव्यापर्याप्ततां गत त आधिरन्यः कर्तव्यो, धनिने धनं वा देयम् ।रक्ष्यमाणोऽप्यसा ता।मिति वदताऽऽधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापित ॥६०॥

बा० १। अपि चेति । अन्यदप्याधिविषये आहेत्यर्थः । सङ्कोचे मानाभावादुभयसाधारण्येन व्याचष्टे *आधेरिति । अत एव गोप्यस्य स्वीकरणमात्रत्वनिर्वाहेऽपि भोग्ये ऽनिर्वाहात्तदुप-लक्षणमित्याह *उपभोगेति । तथा च यथासंख्यमन्वयः । प्रकृत-साकाङ्क्षत्वादाह *आधीति । हेतुव्यवच्छेद्यमेवाह *न साक्षी-ति । भावपदेन विशिष्टस्य सिद्धिजनकत्वं सूचितम् । अत एव प्रा-गवधारणानुक्तिः । उद्देशो वस्तुसङ्कीर्तनम् । उपदेशेति पाठा-न्तरम् । भोग्यस्य भोगेनैव सिद्धिरित्यत्र मानमाह * यथाहेति ।

२। यद्वा स्वीकरणादित्यस्य व्याख्या * उपभोगादिति । भुज पालनाभ्यवहारयोरित्युक्तेर्गोप्याधावुपभोगः परिपालनं, भोग्यस्याभ्यवहरणं फलाद्युपभोग इति यावत् । उपशब्दस्तु सा-मीप्यसामर्थ्यव्याप्त्याचार्यकरणदोषख्यापनदाक्षिण्यवीप्सारम्भ-पूजोद्योगकार्याहत्यमरणखादनानशनेषु वर्त्तते इति यथासम्भवं योज्यः । अत्र पक्षे उभयत्र मानमाह * यथाहेति । *भोग इति । उक्तद्व्यर्थकामिदम् । * अन्यथा, उक्तभोगाभावे, साक्ष्यादिमा-त्रेण नेत्यर्थः ।

३। ननु किमनेन प्रकृते साधितमत आह * अस्य चेति । आधेः स्वीकरणात्सिद्धिरित्यस्येत्यर्थः । * इतीति । इत्युक्ता-र्थसिद्धिः फलमित्यर्थः । फलत्वमेव विशदयति * येति । स्वीकारपदप्रत्यायकम् ।

४। रक्ष्यमाणोऽपीत्यादि व्याचष्टे * सचाधिरिति । द्विविध इत्यर्थः । प्रकरणसामर्थ्यादाह * प्रयत्नेनेति । अविरोधायाह *कालेतिचेत्यर्थमाह * यदीति । असारत्यादिव्याख्या * अवि-कृत एवेति । विकृते मार्गत्वेनापौनरुक्त्यायेदमुक्तम् । * ततः, तदा । यद्वा तत इत्यस्यान्य इत्यत्रान्वयः । तदेति शेषः। तदेत्येव

पाठान्तरं । तदेति चिन्तायमाह रक्षणीय इति । अन्ययोक्ति-वैयर्थ्यं स्पष्टमेव ॥ ६० ॥

मि० आधिः प्रणश्येद् द्विगुणे इत्यस्यापवादमाह ।

या० चरित्रबन्धककृतं स वृद्ध्या दापयेद्धनम् ।
सत्यङ्कारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ६१ ॥

मि० चरित्रं शोभनचरित्रं चरित्रेण बन्धकं चरित्र-बन्धकं तेन यद्द्रव्यमात्मसात्कृतं पराधीनं वा कृत-म्, एतदुक्तं भवति— धनिनः स्वच्छाशयत्वेन बहु-मूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्म-सात्कृतम्; यदि वाऽधमर्णस्य स्वच्छाशयत्वेनाल्पमू-ल्यमाधिं गृहीत्वा बहु द्रव्यमेव धनिनाऽधमर्णाधीनं कृतमिति, तद्धनं स नृपो वृद्ध्या सह दापयेत् । अय-माशयः । एवंरूपं बन्धकं द्विगुणीभूतेऽपि द्रव्ये न न-श्यति किं तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा,स-त्यङ्कारकृतं— करणं कारः । भावे घञ् । सत्यस्य कारः सत्यङ्कारः । कारे सत्यागदस्येति मुम् । सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः । यदा बन्ध-कार्पणसमये एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्विगुणं द्रव्यमेव दातव्यं नाधिनाश इति तदा तत् द्विगुणं दापयेदिति ।

अन्योऽर्थः । चरित्रमेव बन्धकं चारित्रबन्धकम् । च-रित्रश० न गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते । यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतं तदा तत्र त-देव द्विगुणीकृतं दातव्यं नाधिनाश इति । आधिप्रस-

ज्ञादन्य उच्यते, सत्यङ्कारकृतमिति । क्रयविक्रयाविनिव्यवस्थादिनिर्णय यदङ्गुलीयकादि परहस्ते कृतं तद् व्यवस्थातिक्रमे द्विगुणं दातव्यम् । तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव व्यवस्थामतिवर्तते तेन तदेव हातव्यम् । इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदापयेदिति ॥ ६१ ॥

बा० १। * इत्यस्येति । इतिपूर्वाधिकस्याकृतकालमोप्याधिविषयकस्य तन्नाशस्येत्यर्थः । * शोभनेति । सदाचरणमित्यर्थः । सुप्सुपा साधनं कृतेति समासौ क्रमेणाह * चरित्रेणेत्यादिना । विनिगमकाभावादाह * पराधीनमिति ।

२। एवं पदस्य शाब्दमर्थमुक्त्वा तात्पर्यार्थमाह * एतदिति । तत्रात्मसात्कृतमाह * धनिन इति । द्वितीयमाह * यदिवेति । * बहिति । तत्पृथक्पदं भिन्नं पदं वा ।

३। एवं पदार्थमुक्त्वा वाक्यार्थमाह *तद्धनमिति । चरित्रबन्धककृतमित्यर्थः । स इत्यस्य व्याख्या *नृप इति । सहयुक्ते तृतीयेत्याह * सहेति ।

४। तदपवादस्त्वं स्पष्टयितुमाह * अयमाशय इति । *एवंरूपमिति । चरित्रहेतुकमित्यर्थः ।

५। उत्तरार्धं व्याचष्टे *तथेति । तत्रादौ सत्यामितिपदार्थमर्थान्तरस्याप्रयोगिनो निरासाय * [illegible] । *सत्यंकार इति । समयकरणमित्यर्थः । शपथकरणमिति यावत् । सूत्रे कार इति घञन्ताणन्तयोस्तन्त्रेण निर्देश इति भावः । शाब्दस्य वाक्यार्थस्यास्पष्टत्वादाह * अयमिति । आशय इत्यर्थः । *तत्, सत्यंकारकृतं द्रव्यम् ।

६। संभवादाह *अन्योऽर्थ इति । चरित्रेति पद्यस्येति भा-

वः। विशेषणसमासमा *चरित्रमिति। अत्र पक्षे चरित्र-
न सदाचरणं नोच्यते किं तु तज्जन्यं फलमित्या *चरित्रेति।
अग्रे समासः प्राग्वदेवेति चयन्वाक्यार्थमाह *यत्रेति। *तदे-
व, चरित्ररूपबन्धकमेव। * तदेव, आत्मसात्कृतं द्रव्यमेव।

७। प्रकृतासंबद्धत्वादाह *आधीति। पदार्थः प्रागुक्त एवेति
वाक्यार्थमाह * क्रयेति। आदिना दानप्रतिग्रहादि। निमित्ता-
भावे तथाकरणानौचित्यादाह * व्यवस्थातीति। विशेषमा
* तत्रापीति। तयोर्मध्येऽपीत्यर्थः। *व्यवस्थामिति। तामुल्लङ्घ्य
वर्त्तते इत्यर्थः। तदेति शेषः। *इतरः, ग्रहीता॥ ६१॥

मि० किंच।

या० उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत्।
प्रयोजकेऽसति धनं कुले न्यस्याधिमाप्नुयात्॥ ६२॥

मि० धनदानेनाधिमोक्षणायोपस्थितस्याधेर्मोक्त-
व्यो धनिना, न वृद्धिलोभेन स्थापयितव्यः। अन्यथा
अमोक्षणे स्तेनः चौरवद्दण्ड्यो भवति। असन्निहिते
पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधा-
याधमर्णः स्वीयं बन्धकं गृह्णीयात्॥ ६२॥

बा० १। *किं चेति। प्राग्वत्। योग्यतया आह * धनेति। अधमर्ण-
स्येति भावः। तत्तात्पर्यार्थमाह * न वृद्धीति। अन्यथेत्यस्य
व्याख्या * अमोक्षणे इति। तावन्मात्रे इष्टापत्तेरतिदेशपरतया
लभ्यं तात्पर्यार्थमाह * चौरवदिति।

२। असतीति च्छेदेन नाशाविवक्षया द्वितीयार्थमाह *अस-
न्निहितेइति। *पुनः, तु। प्रयोजके इत्यस्य व्याख्या * प्रयोक्त-
रीति। ऋणस्येति शेषः। धनदातर्युत्तमर्णे इत्यर्थः। यथाश्रुतार्थ-

बाधादिता ल न्यायमाह * तदासेति । अर्थादाह * सद्वीति । न्यस्येत्यस्य व्याख्या * निधायेति । अर्थादाह * अधमर्ण इति । आधिमित्या रथमाह * स्वीयमिति ॥ ६२ ॥

मि० अथ प्रयोक्ताऽप्यसन्निहितस्तदासाश्च धनस्य प्र तितारा न सन्ति, यदि वा असंनिहिते प्रयोक्तर्या- धि क्रयेण धनदित्साऽधमर्णस्य, तत्र किं कर्तव्य मि- त्यपेक्षिते आह ।

या० तत्कालकृतमूल्यो वा तत्र तिष्ठदवृद्धिकः ।

मि० तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेत्, न तत ऊर्ध्वं विवर्द्धते । यावद्धनी धनं गृहीत्वा तमाधिं मुञ्च- ति, यावद्वा तन्मूल्यद्रव्यमृणा न प्रवेशयाति ।

मि० यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रही- तव्यं न त्वाधिनाश इति विचारितं ऋणग्र णकाले एव तदा द्विगुणीभूते द्रव्ये असन्निहिते चाधमर्णे ध- निना किं कर्तव्यमित्यत आह ।

या० विना धारणिकाद्वापि विक्रीणीत ससाक्षिकम् ॥ ६३ ॥

मि० धारणिकादधमर्णाद्विना अधमर्णे असन्निहिते साक्षिभिस्तदासैश्च सह तमाधिं विक्रीय तद्धनं गृह्णी- याद्धनी । वाशब्दो व्यवस्थित विकल्पार्थः । यदृणग्र - णकाले द्विगुणीभूतेऽपि धने द्विगुणं ग्रहीतव्यं न त्वा- धिनाश इति न विचारितं तदा आधिः प्रणश्येद्द्विगुणो त्वाधिनाशः । विचारिते त्वयं पक्ष इति ॥ ६३ ॥

वा० १। उत्तरमवतारयति * अथेति । शङ्कायामयम् । श ान्तर-
माह * यदि वेति । *दित्सा,त ानेच्छा । पूर्वान्वयः ।
* तत्र, उभयत्र । वक्ष्यमाणवचने वाशब्देनार्थद्वय चनाच्छङ्का-
द्वयमत्र । फलतो व्याचष्टे * तस्मिन्निति । मोक्षणाद्यमकाल इत्यर्थः ।
षष्ठ्यर्थे बहुव्रीहिः, उभयत्राधिरन्यपदार्थ इति शब्दार्थः स्पष्ट-
एवेति सूचयन्नाह *यत्तस्येति । तत्रेत्यस्य व्याख्या सर्वं वाक्य-
मिति न्यायेन * तत्रैवेति । तस्याप्यर्थमाह * धनिनीति । अ-
स्यापि तात्पर्यमाह * न तत इति ।

२। स्थितेरवधिं सूचयन् अथ प्रयोक्तेत्याद्यशङ्कोत्तरं वाशब्द-
सूचितमाह * यावन्नीति । वाशब्दसूचितं तं कथयन्नेव यदि-
वेत्यादिद्वितीयश ोत्तरमाह * यावद्वेति । विक्रयेच्छात आह
* तन्मूल्येति । * ऋणी नेति । अधमर्णस्तदन्तिकं न प्राप-
यतीत्यर्थः ।

उ० ३। उत्तरावतरणमा * यदा त्विति । उत्तरा रोधेनोत्त-
मर्णस्यवेद ित्याह * ग्रहीतव्यमिति । त्वयेति शेषः । *विचारि-
तमिति । अधमर्णेनेति भावः । असान्निहिते चेति पाठः । वेति
पाठे स चार्थे । धारणकादिति पाठे बाहुलकात्कर्तृ न्तात्स्वा-
र्थे कः । आधिं धारयतीति धारणकस्तस्मा । यद्वा धारणं क-
रोतीति णिजन्ता ण्वुल् । धारणिकादिति पाठे आधेर्धारणं
यस्यास्तीति मत्वर्थे ठन् इति केचित् । तदर्थमाह *अधमर्णा-
दिति । मरणनिरासाय । * अधमर्णेऽसन्निहिते इति । अपी-
त्यस्य ससाक्षिकमित्यत्रान्वयेन तत्समुच्चितमाह * तदासैवेति ।
विक्रीणीतेत्यस्य तात्पर्यार्थमाह * विक्रीयेति ।

४। यथाश्रुतविकल्पस्य प्राग्वदसंभवात् वाशब्दस्याशयमा
* वाशब्दइति । तत्त्वमेवाह * यदर्णेति । * तदा,तस्मिन्काले एवे-

त्यर्थः । * धनमेव, तावत् । * प्रतीतव्यमिति । त्वयेति शेषः । *अयमिति । विनाधारणिकादिरिक्थ... इत्यर्थः । तथा च सिंहावलोकनन्यायेन व्यवहितमपि तत् ...बुद्धिस्थीकृत्य पक्षान्तरत्वेनेदमुक्तमित्यर्थः ॥ ६३ ॥

मि॰ भोग्याधौ विशेषमा... ।

या॰ यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥६४॥

मि॰ यदा प्रयुक्तं धनं कृतया वृद्ध्या द्विगुणीभूतं तदाऽऽधौ कृते तदु... आध्युत्पन्ने द्रव्ये द्विगुणे धनिनः प्रविष्टे धनिनाऽऽधिर्मोक्तव्यः । यदि वा, आदावेव आधौ दत्ते, "द्विगुणीभूते द्रव्ये त्वयाऽऽधिर्मोक्तव्य" इति परिभाषया का...णान्तरेण वा भोगाभावेन यदा द्विगुणीभूतमृणं तदाऽऽधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्वथा सवृद्धिकमूलर्णापाकरणार्थाध्युपयोगविषयमिदं वचनम् । तमेनं क्षयाधिमाचक्षते लौकिकाः । यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि याव...दानं तावदुपभुङ्क्ते एवाधिम् । एतदेव स्पष्टीकृतं—

बृहस्पतिना,

ऋणी बन्धमवाप्नुयात् ।
फलभोग्यं पूर्णकालं दत्त्वा द्रव्यं च सामकम् ॥
यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी च न लभेद् बन्धं परस्परमतं विना ॥ इति ।

अस्यार्थः। फलं भोग्यं यस्यासौ फलभोग्यः। बन्ध आधिः। स च द्विविधः, सवृद्धिमूलापाकरणार्थो वृद्धिमात्रापाकरणार्थश्च। तत्र सवृद्धिमूलापाकरणार्थं तं बन्धं, पूर्णकालं—पूर्णः कालो यस्य सः पूर्णकालस्तम् आप्नुयादृणी। यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टं तदा बन्धमाप्नुयादित्यर्थः। वृद्धिमात्रापाकरणार्थं तु बन्धं सामकं दत्त्वाऽऽप्नुयादृणी। समं मूलं सममेव सामकम्।

अस्यापवादमाह—

यदि प्रकर्षितं तत्स्यात्—

तद् बन्धकं प्रकार्षितमतिशयितं वृद्धेरप्यधिकफलं यदि स्यात्, तदा न धनभाग्धनी—सामकं न लभेत धनी। मूलमदत्त्वैवर्णी बन्धमाप्नुयादिति यावत्। अथ तु अप्रकर्षितं तद् बन्धकं वृद्ध्येऽप्यपर्याप्तं तदा सामकं दत्त्वापि बन्धं न लभेताधमर्णः। वृद्धिशेषमपि दत्त्वैव लभेतेत्यर्थः। पुनरुभयत्रापवादमाह, परस्परमतं विना। उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे यदि प्रकर्षितमित्याद्युक्तं, परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानं तावदुपभुङ्क्ते धनी, निकृष्टमपिमूलमात्रदानेनैवाधमर्णो लभेतेति ॥ ६४ ॥

इति ऋणादानप्रकरणम् ॥

बा॰ १। तुसूचितमाह *भोग्याधाविति। प्रयुक्तम्, उत्तमर्णेन केवलं ऋणत्वेन दत्तम्। *कृतया, स्वकृतया। क्वचित्तथैव पाठः। *तदा, द्विगुणीभवनकाले। *आधौ कृते, सति। तन्निर्वाहार्थमिति भावः। कृते इति शेषपूरणम्। तदुत्पन्ने इत्यस्य व्याख्या *आधी-

ति। फलभूते इत्यर्थः। धनिन इति शेषोऽयम्। अधिकरणस्य शेषत्वविवक्षायां षष्ठी। *प्रविष्टे,सति। न त्वन केवलं प्रयुक्ते धने वृद्ध्या सह द्विगुणे जाते पश्चादाधिर्दत्तो भोगार्थो यदा तदा आधेः सकाशादुत्पन्न धने द्विगुणे धनिनि प्राप्ते सति आधिर्मोक्तव्यस्तेनेत्यर्थः।

२। संभवात् व्याख्यानान्तरमाह *यदि वेति। *आदावेव, ऋणग्रहणकाले एव। भोगाभावे परिभाषारूपं हेतुमाह *द्विगुणीभूते इति। मोक्तव्य इति पाठः[1]। नेत आरभ्येति भावः। ऋणग्रहणकाले एवाधिं ददधमर्णः एवं ब्रवीति—यदा द्रव्यं वृद्ध्या द्विगुणीभूतं तदा आधिर्मोक्तव्य इति, उत्तमर्णोऽपि तथैवाङ्गीकुरुते इत्येवं परिभाषया बाधेन पूर्वं भोगाभावेन द्वैगुण्ये जाते ततो भोगे प्रारब्धे स्वीयद्विगुणधनलाभानन्तरमाधेरुपभोगाभावः किं तु मोचनम् इत्यर्थः। कारणान्तरेण भोगाभावसंभवादाह *कारणान्तरेण वेति। उत्तमर्णस्य स्वच्छाशयत्वेनालुब्धत्वेन च धने द्विगुणे ऽहमाधिं भोक्ष्ये नेत आरभ्येति प्रतिज्ञायाम् अधमर्णेन तथा कुर्वित्यङ्गीकृते उत्तमर्णस्य स्वच्छतारूपकारणान्तरेण बाधेन पूर्वं भोगाभावेनेत्याद्यर्थः। स्वरूपतः प्रवेशस्य पूर्वमेव सत्त्वादाह *भोगार्थमिति। *तदपि, अधिकमुपभुक्तमपि। अपिना ऽऽधिसमुच्चयः। तात्पर्यार्थमाह *सर्वथेति। पक्षद्वयेऽपीत्यर्थः। * आध्युपयोगेति। तदपाकरणार्थो य आध्युपभोगस्तद्विषयकमित्यर्थः। उपभोगेत्येव पाठो वा। *क्षयाधिमिति। तादृशधननाशकाधिमित्यर्थः। तथा च पक्षद्वयेऽपि द्वैगुण्ये सति भोगे कृते स्वीयद्विगुणलाभे एवाधिर्मोक्तव्यो

---

१ आधिदानकालादारभ्य न भोक्तव्यः किंतु वृद्ध्या द्विगुणीभवनोत्तरमेव भोक्तव्य इत्यर्थः।

न ततः प्रागिति सिद्धम् ।

३। विशेषमा * यत्र त्विति । वानुषङ्गायमाह । *ऋणीति । नरसता ऽर्थ यामतीतराह * अस्यार्थ इति । वाक्यार्थबोधोपक्रमादावाह * लमिति । मात्रपदेन ऽव्यवच्छेदः । वाक्यार्थमाह *तत्रेति । तयोर्मध्ये इत्यर्थः । अस्याप्यर्थमाह *यदेति । एवं चेदं प्रागुक्तार्थकमेव । धनिन इति प्राग्वत् । द्वितीयमाह * वृद्धीति । चार्थमाह * त्विति । सममित्यस्यार्थो * लमिति । स्वार्थे ऽ कावित्याह * सममेवेति ।

४। *अस्यापवादमिति । बृहस्पतिरेव दत्त्वा द्रव्यं च सामकमिति स्वोक्तमपवदतीत्यर्थः । प्रतीकमा *यदीति । व्याचष्टे * तदिति । न धनभागिनीत्यस्य व्याख्या * सामकं न लभेत धनीति । तत्तात्पर्यमाह * लमिति । ऋणी च न लभेत् बन्धमित्यंशं व्याचष्टे * अथ त्विति । अप्रकर्षितमित्यस्य व्याख्या * वृद्ध्येऽपीति । अपिना लसमुच्चयः । अपकर्षणाह * सामकमिति । चोऽप्यर्थ इत्याह * अपीति । व्युत्क्रमे इति भावः । सर्वथा लाभाभावो न प्रतिपाद्य इत्याह * वृद्धिशेषमिति । अपिना लशेषसमुच्चयः ।

५। * पुनरुभयत्रेति । यदि प्रेत्याद्यर्धोक्तम् ऋणी चेत्यंशं च स वापवदतीत्यर्थः । मतमित्यत्र भावे क्त इत्याह * अनुमत्यभावेइति । * उ मिति । इत्याद्युभय क्तमित्यर्थः । *यावन्मूलेति । वृद्धिदानमत्रोभयत्र न । अत एवाग्रे * मात्रेति । *विकृष्टम्, अपकृष्टम् । विप्रकृष्टमिति पाठान्तरम् । विगतप्रकर्षकमिति तदर्थः । निकृष्टमिति पाठः सुगम एव ॥ ६४ ॥

इति ऋणादानप्रकरणम् ।

अथ उपनिधिप्रकरणम् ॥ ४ ॥

मि० उपनिधिं प्रत्याह ।

या० वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते ।

द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ ६५ ॥

मि० निक्षेप्यद्रव्यस्याधारभूतं द्रव्यान्तरं वासनं करण्डादि तत्स्थं वासनस्थं द्रव्यं रूपसंख्यादिविशेषमनाख्याय अकथयित्वा मुद्रितमन्यस्य हस्ते रक्षणार्थं विस्रम्भादर्प्यते स्थाप्यते तद् द्रव्यमौपनिधिकमुच्यते ।

यथाह नारदः, (नोपलब्धम्)

असङ्ख्यातमविज्ञातं समुद्रं यन्निधीयते ।

तज्जानीयादुपनिधिं निक्षेपं गणितं विदुः ॥ इति ।

प्रतिदेयं तथैव तत्— यस्मिन् स्थापितं तेन यथैव पूर्वं मुद्रादिचिह्नितमर्पितं तथैव स्थापकाय प्रतिदेयं प्रत्यर्पणीयम् ॥ ६५ ॥

बा० १। * उपनिधिमिति। तत्सम्बन्धिनमित्यर्थः। उद्देशक्रमादिति भावः। निक्षेपोपनिध्योः स्वल्प एव भेद इति सूचयन्नाह *निक्षेप्येति। आदिना सम्पुटकादिः। वासनस्थं द्रव्यमिति पाठः। यत् द्रव्यमिति पाठे तदिति शेषः। अनाख्याने कर्माकाङ्क्षत्वादाह * रूपेति। तद्रूपविशेषमित्यर्थः। तस्याप्यर्थमाह * मुद्रितमिति। अर्पणे फलहेतू आह * रक्षणेति। अनेनोपनिधीयते इति निक्षिप्यते इति च व्युत्पत्तिः सूचिता। औपनिधिकमित्यत्र विनयादित्वात्स्वार्थे ठगिति भावः।

२। * असंख्यातम्, अगणितम्। * अविज्ञातम्, रूप-

तः । अत एवाह * समुद्रमिति । निक्षेपपदार्थमाह * निक्षेपमिति । * गणितं, संख्यातम् ।

३। तुर्यपादं व्याचष्टे * प्रतीति । * अर्पितं, स्थापकेन॥६५॥

मि० प्रतिदेयमित्यस्यापवादमाह ।

या० न दाप्योऽपहृतं तं तु राजदैवकतस्करैः ।

मि० तदुपानिधिं राज्ञा दैवेनोदकादिना तस्करैर्वाऽपहृतं नष्टं न दाप्योऽसौ यस्मिन्नुपहितम् । धनिन एव तत् द्रव्यं नष्टं, यदि जिह्मकारितं न भवति ।

यथाह नारदः, (व्य० प० २।९)

ग्रहीतुः सह योऽर्थेन नष्टो नष्टः स दायिनः ।

दैवराजकृते तद्वत् नचेत् तत् जिह्मकारितम् ॥

इति ।

मि० अस्यापवादमाह ।

या० भ्रेषश्चेन्मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम् ॥६६॥

मि० स्वामिना मार्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रेषो नाशः संजातस्तथापि तद्द्रव्यं मूल्यकल्पनया धनिने ग्रहीता दाप्यो, राज्ञे च तत्समं दण्डम् ॥ ६६ ॥

१। बा० तं तु राजदैवकतस्करैरिति पाठः।स्वार्थे कः । दैविकेति पाठे प्राग्वत् स्वार्थे ठक् । तदाह * तमिति । असावित्यस्यार्थमाह * यस्मिन्नुपहितमिति । विशेषं कथयन् तात्पर्यार्थमाह * धनिन एवेति । तदेति शेषः । * जिह्मेति । कपटप्रयोजितमपहरणमित्यर्थः। जिह्मस्य प्रयोजकत्वात् णिच् । * ग्रहीतुरिति । ग्रहीतुरर्थेन धनेन सह य उपनिध्यादिर्नष्टः स दायिनो

धनस्वामिन एव नष्टो नोपनिध्या[दे]रक्षकस्येत्यर्थः । एतच्च तस्करा[प]हारविषयमित्याशयेनाह * [दै]वराजकृते तद्वदिति । दैवराजभ्यां कृतेऽपहारे [ज्ञ]तव्येत्यर्थः । [ग्र]ही[त्रे]यत्न सहेति नाशस्य सत्यत्वमतिप[ा]नपरं न [ज्ञ]ापकपरमिति सूचयन् त्रित-[य]स्यनाह * न चेदिति । * तत्, अपहरणम् ।

उ० २। अदत्ते इति छेदः। भूतत्वमविवक्षित[म्], सतिस[प्त]मीति [सू]चयन्नाह * यदि न ददाति तदेति । सतिसप्तम्या सूचितमाह * तदुपरीति । क्रियाविशेषणमेतत् । चेदर्थमाह * यद्यपीति । साका[ङ्क्ष]त्वादाह * तथापीति । तस्याभावादाह * मूल्येति ॥ ६६ ॥

मि० भाक्तां प्रति दण्डमा[ह] ।

या० आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तं चापि सोदयम् ।

मि० यः [स्व]च्छया स्वाम्यन[नु]ज्ञयोपनि[हि]तं द्रव्यमाजीवत्युपभुङ्क्ते, व्यव[ह]रति वा प्रयोग[ा]दि[ि]ना लाभार्थम्, असौ उपभोगानुसारेण लाभानुसारेण वा दण्ड्यः । तं चोपानिधिं सोदयम् उपभोगे स[वृ]द्धिकं व्यव[हा]र सलाभं धनिने दाप्यः । [वृ]द्धि प्रमाणं च—

कात्यायनेनोक्त[म्],

निक्षेपं [वृ]द्धिशेषं च क्रयं [वि]क्रयमेव च ।

याच्यमानं न चेद्दद्याद्वर्द्धते पञ्चकं शतम् ॥ इति ।

एतच्च भक्षिते द्रष्टव्यम् । उपेक्षा[वि]नष्टे तु—

तेनैव [विशेष] दर्शितः,

भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितम् ।

किञ्चिन्न्यूनं प्रदाप्यः स्यात् द्रव्यमज्ञाननाशित[म्] ॥

इति ।

किञ्चि---नमिति च यावत्पठितम् ।

मि० उपनिधेर्धर्मा- याचिता- न्वाहितादिष्वाति ।

वा० याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ॥६७॥

मि० विवाहादिसमये अलङ्कारादि याचितं आनीतं याचितम् । यत् एकस्य हस्ते निहितं द्रव्यं तेनाप्य तु पश्चादन्यहस्ते स्वामिने देहीति निहितं तत् अन्वाहितम् । न्यासो नाम गृहस्वामिने अदर्शयित्वा तत्परोक्षमेव गृहजनहस्ते प्रक्षेपो, गृहस्वामिने समर्पणीयमिति । समक्षं तु समर्पणं निक्षेपः । आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः, प्रतिन्यासस्य च परस्परप्रयोजनापेक्षायां त्वयेदं मदीयं रक्षणीयं मयेदं त्वदीयं रक्ष्यते इति न्यस्तस्य ग्रहणम् ।

यथाह नारदः, (व्य० प० २।१४)

एष एव विधिर्दृष्टो याचितान्वाहितादिषु ।

शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च ॥ इति ।

एतेषु याचितादिष्वयं विधिः उपनिधेर्यः प्रतिदानादिविधिः स एव वेदितव्यः ॥ ६७ ॥

इति उपनिधिप्रकरणम् ॥

बा० १। यद्यपि सोदयोपनिधिदानरूपविशेषोऽपि वक्ष्यमाण इति "अथ भोक्तारं प्रत्याह" इत्येवोचितं तथापि पूर्वं तद्दानस्य मुख्यत्वं दण्डस्य गौणत्वमिति पश्चादुक्तदण्डसङ्गत्या वक्ष्यमाणेन वैपरीत्यं तत्र तथैव पाठादिति तेनैव सङ्गतिर्न तु तेनेति सूचयन्नाह * भोक्तारमिति । उक्तदण्डसङ्गतिरिति भावः । *दण्डं, तत्साहित्येन ।

२। तद् व्याख्याति *आधाः सत्त्वापात्यर्थिना *स्वाम्य-
न् नुमतेति । प्राग्वदिह * उपनिहितमिति । आजीवकमिति लक्ष-
णेनोपनिधिं दर्शयतेत्याह * आजीवतीति । तदर्थमाह * उपभुङ्-
क्ते इति । अर्थीत्यर्थः । यत्र नास्य संभवस्तत्रा * व्यवहरति
वा क्रयाणादिना लाभार्थमिति । एवं च व्यवहारिकल्पो बो-
ध्यः । विशेषान्तरे आह *उपभोगेति । द्वितीये आह
*लाभेति । वेति पाठः । चः पादपूरणे इत्याह * तं चेति ।
प्राग्वत् सोदयमित्यस्यार्थद्वयमाह * उपभोगे इति । * दाप्यः,
दाप्योऽपि । अपेरत्र सम्बन्धः ।

३। नात्र प्रागुक्ता वृद्धिरित्याह *वृद्धिप्रमाणं चेति। चस्त्वर्थे।
* वृद्धिशेषम्, अवशिष्टा वृद्धिः । * क्रयं, क्रीतसम्बन्धिद्रव्यम् ।
* विक्रयं, विक्रीतरूपद्रव्यम् । याच्यमानमिति पाठः । अस्याः
वृद्धेः सर्वत्र प्राप्तौ विशेषमाह * एतच्चेति । उक्तवृद्धिप्रमाणं चे-
त्यर्थः ।

४। * उपेक्षेति। उपेक्षा च अज्ञानं च ताभ्यां नष्टमित्यर्थः ।
* तेनैव, [illegible] । न्यासोऽप्येवमानुपूर्वीक एव । अव्य-
वस्थां निराचष्टे * किञ्चिदिति ।

५। तत्रादौ याचितादिपदार्थानाह * विवाहोत्सवेष्वित्या-
दिना तथैव नेतीत्यन्तेन । आनीतमिति छेदः । तत्र हेतुमाह
*स्वामिने इति। गृहस्वामिने [illegible] प्रश्लेषः । षष्ठी-
पक्षेऽप्येवम् । सा प्राग्वत् । * तादिति । गृहस्वामीत्यर्थः । *प्र-
क्षेपो, न्यसनम् । तत्र हेतुमाह * गृहेति । इतिर्हेतौ । * समक्ष-
मिति । दर्शनपूर्वकमित्यर्थः । अत एव निक्षेपं गणितं विदुरिति
मा० कनारदैकवाक्यतेति बोध्यम् । [illegible]माह *प्रतिन्यासं च-
चेति । त[त्]स्वरूपमाह * परस्परेत्यादिना न्यस्तस्येत्यन्तेन ।

६। आदिशब्देनोभयग्रहणे मानमाह * यथा ति । *एव एवेति ।

रहोदत्ते निधौ यत्र विसंवादः प्रजायते ।
विभावकं तत्र दिव्यमुभयोरपि च स्मृतम् ॥

इति मानुषरूप एवेत्यर्थः । *दृष्टइति । दिष्ट इति पाठान्तरम् । आदिना निक्षेपग्रहणम् । बहुवचनं व्यक्त्यभिप्रायम् । * शिल्पिषु, तन्न्यासेषु ।

७। एवं पदार्थानुक्त्वा वाक्यार्थमाह * एतेष्विति । मूलोक्तेषु इत्यर्थः । अयं विधिरित्यस्य व्याख्या * उपानिधेयेइति ॥ ६७ ॥

अथ साक्षिप्रकरणम् ॥ ५ ॥

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्—

इत्युक्तम् । तत्र भुक्तिर्निरूपिता । साम्प्रतं साक्षिस्वरूपं निरूप्यते । साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति ।

यथाह मनुः, (अ.८. श्लो.७४.)

समक्षदर्शनात्साक्ष्यं श्रवणाच्च सिद्ध्यति । इति ।

स च द्विविधः कृतोऽकृतश्चेति । साक्षित्वेन निरूपितः कृतः, अनिरूपितोऽकृतः । तत्र कृतः पञ्चविधोऽकृतश्च षड्विध इत्येकादशविधः ।

यथाह नारदः, (व्य० प० १।१४९)

एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः ।
कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते ॥ इति ।

तेषां च भेदस्तेनैव दर्शितः, (व्य० प० १।१५०)

लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च ।
गूढश्चोत्तरसाक्षी च साक्षी षड्विधः स्मृतः ॥ इति ।
लिखितादीनां च स्वरूपं कात्यायनेनोक्तम्,
अर्थिना स्वयमानीतो यो लेख्ये संनिवेश्यते ।
स साक्षी लिखितो नाम स्मारितः पत्रकादृते ॥ इति ।
स्मारितः पत्रकादृत इत्यस्य विवरणं तेनैव कृतम्,
यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः ।
स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते ॥ इति ।
यस्तु यदृच्छयाऽऽगतः साक्षी क्रियते स यदृच्छा-
ऽभिज्ञः । अनयोः पत्रानारूढत्वेऽपि भेदः—
तेनैव दर्शितः,
प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः ।
द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ ॥ इति ।
तथा,
अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् ।
यः श्रावितः स्थितो गूढो गूढसाक्षी स उच्यते ॥ इति ।
तथा,
साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते ।
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः ॥ इति ।
षड्विधस्याप्यकृतस्य भेदो—
नारदेन दर्शितः, (व्य० प० १।१५१।१५२)
ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् ॥
कार्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः ।
कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः ॥ इति ।
प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थम् ।

लेखकः मा[illegible] [illegible]कश्च सभ्याश्चैवानु[illegible]वशः ।
नृपे प[illegible]याति [illegible] साक्षिणः स[illegible]दाहृताः ॥ इति ।
ते साक्षिणः को[illegible]ाः [illegible]कथन्तश्च भ[illegible]त्यत आह ।

या० तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ।
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ६८ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्त्तक्रियापराः ।
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ ६९ ॥

मि० तपस्विनस्तपःशीलाः । दानशीला दाननिरताः । कुलीना मह[illegible]कुलप्रसूताः । [illegible]त्यवादिनः सत्यवदनशीलाः । धर्मप्रधानाः नत्वर्थकामप्र[illegible]नाः । ऋजवोऽकुटिलाः । [illegible]त्रवन्तो विद्यमान[illegible]त्राः । धन[illegible] व[illegible]सुवर्णादिधन[illegible]क्ताः । श्रौत[illegible]ातक्रियाप[illegible]ः नित्य[illegible]नमित्तका[illegible]ष्ठानरताः । एवंभूताः पुरुषाः त्र्यवराः साक्षिणो भवन्ति । त्रयः अवराः न्यूना येषां ते त्र्यवराः । त्रिभ्योऽर्वाङ् न भवन्ति, परतस्तु यथाकामं भवन्तीत्यर्थः । जातिमनतिक्रम्य यथाजाति । जा[illegible] मूर्द्धावसिक्तादयः, अ[illegible]लोमजाः प्रातिलोमजश्च । तत्र [illegible]र्द्धावसिक्तानां मूर्द्धावसिक्ताः साक्षिणो भवन्ति । एवमम्बष्ठा[illegible]ष्वपि द्रष्टव्य[illegible] । व[illegible]मनतिक्र[illegible] यथावर्णम् । वर्णा ब्राह्मणा[illegible]यः । तत्र ब्राह्मणान[illegible] ब्राह्मण[illegible]णा उक्त[illegible]क्ष्याकाः साक्षिणो भवन्ति । एवं क्षत्रियादिष्वपि द्रष्टव्य[illegible] ।

तथा, स्त्रीणां साक्ष्यं स्त्रिय एव कुर्युः ।

यथाह मनुः। (अ. ८. श्लो ६८.)

स्त्रीणां साक्ष्यं स्त्रियः कुर्युरिति।

सजातिसवर्णासंभवे सर्वे मूर्धावसिक्तादयो ब्राह्मणादयश्च सर्वेषु मूर्द्धावसिक्तादिषु ब्राह्मणादिषु च यथासंभवं साक्षिणो भवन्ति।

उक्तलक्षणानां साक्षिणामसंभवे प्रतिषेधरहितानामन्येषामपि साक्षित्वप्रतिपादनार्थम् असाक्षिणो वक्तव्याः। ते च पञ्चविधा—

नारदेन दर्शिताः, (व्य० प० १।१५७)

असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः।

वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्तरः॥ इति।

केपुनर्वचनादसाक्षिण इत्यत आह, (श्लो० १५८)

श्रोत्रियास्तापसा वृद्धा ये च प्रव्राजितादयः।

असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः॥ इति।

तापसा वानप्रस्थाः। आदिशब्देन पित्रा विवदमानादीनां ग्रहणम्।

यथाह शङ्खः,

पित्रा विवदमानगुरुकुलवासिपरिव्राजकवानप्रस्था निर्ग्रन्थाश्चासाक्षिण इति।

दोषादसाक्षिणो दर्शिताः, (श्लो० १५९)

स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा।

असाक्षिणस्ते दुष्टत्वात्तेषु सत्यं न विद्यते॥ इति।

चण्डाः कोपनाः। कितवा द्यूतकृतः।

भेदादसाक्षिणां च स्वरूपं—

तेनैव दर्शितम्,

साक्षिणां [illegible] च निर्दिष्टानां च वा[illegible]ना ।
तेषामेकोऽन्यथा[illegible]दी भे[illegible]त्सर्वे न साक्षिणः॥इति ।
तथा स्वयमुक्तिस्वरूपं चोक्तम्, (श्लो० १६१)
स्वय[illegible]क्तिरनिर्दिष्टः [illegible]वयमेवेत्य यो वदेत् ।
सूचो[illegible]क्तः स शास्त्रे[illegible] न स साक्षित्वमर्हति॥इति ।
मृतान्त[illegible]स्या[illegible]पि लक्षणमुक्त[illegible], (श्लो० १६२)
योऽर्थः श्रावयितव्यः स्यात्त[illegible]मिन्नसति वाऽर्थिनि ।
क तद्वदतु साक्षि[illegible]साक्षी मृतान्तरः ॥ इति ।

येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्राव-यितव्यो भवेत् [illegible]यमत्रार्थे साक्षिण इति तस्मिन्नर्थि-नि प्रत्यर्थिनि वाअसति मृते अर्थे वाऽनिवेदिते साक्षि-त्वं क[illegible]मिन्नर्थे कस्य वा कृते साक्ष्यं वदत्विति मृता-न्तरः साक्षी न भवति ।

यत्र तु मु[illegible]षुणा सुस्थेन वा पित्रा पुत्रादयः श्रा-विताः "अस्मिन्नर्थेऽमी साक्षिण" इति, तत्र मृता-न्तरोऽपि साक्षी ।

यथाह नारदः,
[2]मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्रावितादृते ।
तथा, (ना० व्य० प० १।९६)

---

१ अस्य श्लोकस्य स्थाने (व्य. प. १ । श्लो. १६०)
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिश्चये ।
वचनं यत्र भिद्येत ते स्युर्भेदादसाक्षिणः ॥
इति श्लोकः [illegible]तत्समानार्थकः नारद[illegible]तौ उपलभ्यते ।
२ अस्यार्धस्य स्थाने- (व्य. प. १ । ९४)
अन्यत्र श्रावितादस्मात् स्वयमासन्नमृत्[illegible]ना । इत्यर्धो दृश्यते ।

..चिताऽना..रणापि य..रवर्यो धमसं..तः ।
मृतेऽपि तत्र साक्षी स्यात् षद्सु चान्वा हृतादि.. ॥

इति ॥ ६८ ॥ ६९ ॥

बा० १। अथ साक्षिनिरूपणस्य अव्यवहितसङ्गत्यभावाद्व्यव..त-सङ्गतिकथनपूर्वकमुपयुक्तं मूलानुक्त..पोद्घातरूपमाह * प्रमाण-णमित्यादि..दाहृता..तीत्यन्तन । *तत्रेति । तेषां मध्ये । दृशे-र्ज्ञानसा..त्वेन साक्षाद्द्रष्टरीति..त्रसि..मवार्थमाह * सा-क्षादिति । *समक्षं दर्शनात्सा..यमिति । सम.......श्रवणे-ऽपि सम्बन्धः । समक्षदर्शनादिति पाठे तत् लुप्तविभक्त्यन्तं पृथक् पदम् । तथा च साक्षाद्दर्शनात्साक्षा.. श्रवणाच्च साक्ष्यं सिध्य-त्येवेत्यर्थः । साक्षादित्यनेन परम्पराव्यावृत्तिः ।

नारदापि, (व्य० प० १।१४७)

सन्दिग्धेषु तु कार्येषु ..योर्विवदमानयोः ।
दृष्टश्रुतानु..तत्वात्साक्षिभ्यो व्यक्तदर्शनः ॥ इति ।

* निरूपितः, प्रतिपादितः । * इतीति । मिलित इति शेषः । * एकादशेति ।

२। ..हस्पतिना तु द्वादशविध उक्तः,

लि..वो लेखितो गूढः स्मारितः ..ल्यदूतकौ ।
याहच्छिकश्चोत्तरश्च कार्यमध्यगतो ऽपरः ॥
नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः । इति ।

अर्थिना पत्रे निवेशितो लिखितः । ..त्यर्थि.. ऽर्थिप्रेर-णया निवेशितो लेखितः । ..ड्यादि व्यवधानेन श्रावितो गूढः । पुनः पुनः कार्ये स्मार्यमाणः स्मारितः । यदृच्छयैवागतः साक्षी क्रियमाणो ..दृच्छिकः । श्रवणाच्छ्रावणाद्वा साक्षिणा..पारि

भाषमाण उत्तरः । अध्यक्षः [illegible] । अन्यत् स्पष्टम् ।
अत्र [illegible]मनुपदमेव [illegible]टीमभिविष्यति । अत्र लेखितो ऽधिकः ।

३। * तेषां चभेदः, तेषां भेदश्च । * तेनैव, नार[illegible]नैव ।
*यदृच्छाऽभिज्ञ इति । यदृच्छया [illegible]च्छया अभिज्ञः मिश्रितः प्राप्त इति यावत् । यदृच्छाऽभिज्ञ इति पाठान्तरम् । तत्र यदृच्छया तत्[illegible]वक्ताप्यत्वा[illegible] स्मार्यते स इत्यर्थः । आतथेति कर्मण्यङ् । अत एव—

यदृच्छा[illegible]मारितः [illegible]ल्यास्तथा चा[illegible]रसा[illegible]णः ।

इति [illegible]हस्पतिः । पञ्चविधः कृत इतीति पाठः । * लिखितादीनां च [illegible]रूपमिति । तेषां स्वरूपं त्वित्यर्थः । * संनिवेश्यतेइति । वर्तमानसामीप्ये इति भूते लट् । संनिवे[illegible]त इत्यर्थः। * पत्रकात्, पत्रसन्निवेशा[illegible] । पौनरुक्त्यं परि[illegible]रति * स्मारित इति । * तेनैव, कात्यायनेनैव । एवमग्रेऽपि । पुनः पुनः कार्यं दृष्ट्वा कार्यप्रसि[illegible]र्थं यः स्मार्यते इत्यन्वयः । वचने स्मारित इति पाठे मतिबुद्धीति वर्तमाने क्तः । * इह, व्यव[illegible]ारे । आगत इति शेषः । * अनयोः, स्मारितयदृच्छाभिज्ञयोः । * भेद इति । मिथ इत्यादिः । * द्वाविति । तथा च तदैक्येऽप्याकारणानाकारणाकृतो भेद इति भावः । चतुर्थमाह स एवेत्याह * तथेति । एवमग्रेऽपि । * अर्थिनेति । अर्थिना साध्यवता स्वार्थसिद्ध्यर्थं प्रत्यर्थिनो वचनं स्फुटं यथा भवति तथा, गूढः स्थितः कुड्या[illegible]व्यवहितः प्रत्यर्थिना ऽविज्ञातः सन् स्थितो, यः पुमान् श्राव्यते स गूढसाक्षीत्युच्यते इत्यर्थः । * तथा साक्षिणामपी[illegible] । साक्षिणामप्युपरि ऊर्ध्वं यः पुमान् श्रवणात् श्रावणाद्वा साक्ष्यमुपरि उत्तानमुत्कृष्टं भाषते इत्याद्यर्थः । अत एव [illegible]तिः, अन्यथा [illegible]ः स्फुटैव ।

४। एवम् आद्यभेदं सस्वरूप क्त्वा द्वितीयभेदमात्रं स्वरूपस्य ९ टत्वादाह * यद्विष चापीति। अ तस्यापांत्यर्थः। चतुर्थमाह * [illegible] । व्यव ारिणां कार्य [illegible]कृतो यः स्यादित्यर्थः। पञ्चमं दूताख्यमाह। *आर्थिनेति। अर्थिप्रेरणया प्रत्यर्थिना संनिव ित इत्यर्थः। कुल्या इत्यस्य विषयावि षमाह * कुलेति। * तेऽपीति। प्रागुक्ताः सर्वेऽपीत्यर्थः। यद्यपि सभ्यस्य वनिपात उभयथोचित तथापि कात्यायनोक्तक्रमावि क्षयाऽऽह * लेखकेति। तयोरपीत्यर्थः। अत्र हेतुं कात्यायनमेवाह *लेखक इति। *समुदाहृता इतीति। सहपाठादिति शेषः। राजानि तत्कार्यं पश्यति साति ते लेखका यः,अनुपूर्वशः "स्वार्थे शस्" क्रमेण पूर्वाभावे परः परः इतिवत् अत्र साक्षिण इत्यर्थः।

५। एवमुपो घातमुक्त्वा लमवतारयति * ते साक्षिण इति। कीदृशा इति [illegible]पप्रश्नः। कियन्त इति संख्याप्रश्नः। * धर्मप्रधानाइति। पुरुषार्थानां त्रयाणां मध्ये इति भावः।

व्यासोऽपि,

धर्मज्ञाः पुत्रिणो मौलाः कुलीनाः सत्यवादिनः।
श्रौतस्मार्तक्रिया क्ता विगतद्वेषमत्सराः॥
श्रोत्रिया न पराधीनाः सूरयश्चाप्रवासिनः।
युवानः साक्षिणः कार्या ऋणादिषु [illegible]॥ इति।

श्रोत्रिया न पराधीना इत्यत्र नेति पूर्वोत्तरान्वयि। अतो न [illegible] इति बोध्यम्। पक्षान्तरमा *सर्वे इति। अत्र

१ एतच्छ्लोकव्याख्याने एव-
श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः।
असाक्षिणस्ते वचनात् नात्र हे दाहृतः॥
तिवक्ष्यमाणनार वचनविरोध इत्यर्थः।

ऽयवरा इति संख्याप्रश्नोत्तरम्, अन्यत्स्य मन्यस्य ।

६ । नित्ययोगे विनिरित्या * तपःशीला इति । शील-पदार्थमाह * निरता इति । कुलात्व इति सि विशिष्टतात्पर्यार्थमाह * महेति । ताच्छील्ये णिनिरित्या * वदनशीला इति । मोक्षसङ्ग्रहाय व्यतिरेकमाह * नत्वर्थेति । नार्थेति पाठान्तरम् । वर्त्तमानसत्तायां मतु त्पत्तेराह * विद्यमान आइति । विशिष्ट-सामर्थ्यलभ्यमाह * बाहिति । काम्यस्याकरणे प्रत्यवायाभावात्तदभावायाह *नित्येति । एवं पदार्थानुक्त्वा वाक्यार्थमाह *एवंभूता इति । शाब्दमुक्त्वा तात्पर्यार्थमाह * त्रिभ्य इति । यथा-वर्णमित्यनेनापौनरुक्त्यायाह *मूर्द्धेति । तत्तात्पर्यार्थमाह *तत्रेति । तेषां मध्ये इत्यर्थः । एवमग्रेऽपि । इदमग्रे ऽति ... *एवमम्बष्ठा...ष्वपीति । न्यूनतां निराचष्टे *तथेति ।*मनुरिति ।

द्विजानां ...जसत्तमाः ।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः ॥
इति वचनशेषः । कात्यायने ऽप्येवम् ।
नारदोऽपि, (व्य० प० १।१५५)
श्रेणीषु श्रेणिपुरुषाः स्वेषु वर्गेषु वर्गिणः ।
बहिर्वासिषु बाह्याः स्युः स्त्रियः स्त्रीषु च साक्षिणः ॥ इति ।
वर्गिण आह कात्यायनः,
लिङ्गिनः श्रेणिपूगाश्च वणिग्जाता तथाऽपरे ।
समूहस्थाश्च ये चान्ये वर्गास्तानब्रवी... भृगुः ॥
...सचारणमल्लानां ...स्त्यश्वरथवाजिना... ।
प्रत्येकैकसमूहानां नायका वर्गिणः स्मृताः ॥ इति ।

७ । सर्वे इति पक्षान्तरं व्याचष्टे * सजातीति । सजाति-सवर्णयोरसम्भवे इत्यर्थः । तयोः प्रक्रान्तत्वात् । सर्वेषां युगप-

दसम्भवादाह * यथासम्भवमिति ।

मनुरपि, (अ० ८ । श्लो० ६१।६२।६३)

यादृशा अर्थिभिः कार्या व्यवहार... साक्षिणः ।

तादृशान्संप्र... ...मि यथा वाच्य... त च तैः ॥

गृहिणः पुत्रिणो मौलाः क्षत्रवि... द्रयोनयः ।

अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः ।

सर्वधर्मविदोऽलुब्धा विपरीतां... वर्जयेत् ॥ इति ।

ऋतं सत्यम् । मौलाः मासे... कुलोद्भवा इति कल्पतरुः ।

८। अथ ... लभवतारयितुं प्राग्वत् तदुपोद्घाततयोद्धन्येनासा-क्षिस्वरूपमा... * उक्तल... णेत्या... ना साक्षी न भ... तात्यन्तेन । व...न्यत्व हेतुमाह * प्रतिषेधेति । प्रतिषिद्धेति पाठेऽपि भावे क्तः । अपिः कृतसाक्षिस... बाधकः । पञ्चम्यन्त... ये ऽसाक्षिण इति शेषः । अग्रे उभयत्र असाक्षीति शेषः । ...साक्षिणां स्वरूपं नार...नवोक्तमित्याह * के पुनरिति । * श्रोत्रिया इति। अत्र विरोधः परिहृतः । यद्यपि तापसा इति तप...न इत्यनेन तुल्यार्थं तथापि तदविरोधायैवाह * वानप्रस्थाइति । अत्रादि-शब्दग्राह्यं सूचयन्नुभयत्र मानमाह * यथाह शङ्ख इति । गुरुकु-लेत्यनेनोभयोरपि ग्रहणम्। *निर्ग्रन्था इति। पा...ण्डिन इत्यर्थः। * दर्शिता इति । नारदे...ति शेषः । * साहसिका ...ति । अ-विचारितकारिण इत्यर्थः । * वञ्चकाः, प्रतारकाः । दा...पमेवा * तेष्विति । * तेनैव, नार...नेव । एकेन येन मिथः समुच्चयो-ऽन्येन अन्येषाम् । *वा... वामिति । ...पमाणानाम् । *तेषाम्, अनेकेषां मध्ये इत्यर्थः । ना...ति पाठस्तु युक्त एव । तुर्योऽपि नार... नवोक्त इत्याह *तथेति । *अनिर्दिष्टः, साक्षित्वे इति

शेषः । * सूची, सूचकः ।
अनिर्दिष्टस्तु साक्षित्वे स्वयमेवेत्य यो वदेत् ।
स्वयमुक्तः स शास्त्रेषु न च साक्षित्वमर्हति ॥
इति पाठान्तरम् । अनेन स्वयमेवोक्तिर्यस्येति योगार्थोऽपि दर्शितः । * अनुक्तमिति । नारदेनैवेति भावः । * योऽर्थ इति । योऽर्थः श्रावितव्यस्तस्मिन् असति मध्यमानियोगेनाध्याहार्यात् आर्थीनि वादीनि प्रतिवादीनि वाऽसति तत् अङ्गीकृतं साक्षित्वं क कस्मिन्विषये साक्षी वदतु इति हेतोः सोऽसाक्षी मृतान्तर इति शाब्दोऽर्थः । तत्फलितं शेषपूरणेनाह * येनेति । अर्थिनीत्यस्य मध्यपदव्युत्पत्त्या साध्यवतीत्यर्थकत्वेनान्यपरत्वादाह * प्रत्यर्थिना वेति । अत एव—
कात्यायनः,
अर्थी यत्र विपन्नः स्यात्तत्र साक्षी मृतान्तरः ।
प्रत्यर्थी वा मृतो यत्र तत्राप्येवं प्रकल्पयेत् ॥ इति ।
तदाकारमाह * यूयम् इति । श्रावितादृते तत्साध्यादिविशेषपरिज्ञानस्य तेषामसम्भवादिति भावः । तच्छब्देनात्र त्रयाणां परामर्श इत्याह * अर्थिनामित्यादि । असतीत्यस्य व्याख्या * मृते इति । अस्याग्रेऽप्यन्वयः । वासूचितं पक्षान्तरमाह * अर्थे वा ऽनिवेदिते इति । निवेदितेऽर्थे ऽसति मृते वेत्यर्थः । असाक्षित्वे हेतुं सूचयन्नाह * केति । अस्याक्षपदानुरोधेनार्थमनुरोधेन व्याख्याव्युत्क्रमेणाह * कस्मिन्निति । साक्ष्यमित्यस्य तादित्यादिः, तस्य चाङ्गीकृतमित्यर्थः । इतिर्हेतौ । अनेन मृतः अन्यतमः अन्तरे साक्ष्यस्य स्वीकारभाषणयोर्मध्ये यस्य स मृतान्तर इति व्युत्पत्तिः सूचिता । एवमसाक्षिस्वरूपं प्रतिपादितम् ।

९। अनेन मृतान्तरस्य सर्वत्रासाक्षित्वे प्राप्ते प्रतिप्रसवमाह *यत्र त्वित्यादिना चान्वाहिताद्विष्वितीत्यन्तेन। *अस्मिन्निति। इदं द्रव्यमियत् एतया बुद्ध्या ऽस्मिन्काले देवदत्ताय दत्तमित्यत्रार्थे इत्यर्थः। अन्यथा तेषां साध्यादिविवेकासंभवादिष्टसिद्धिर्न स्यादिति भावः। तत्रादावाद्ये मानमाह *यथाहेति। मुमूर्षुश्राविते विनाऽर्थिनि प्रेते सति साक्षी मृतान्तर इति कथ्यते इत्यर्थः। मुमूर्षुणा श्रावितश्चेन्मृतान्तरोऽपि साक्षी भवतीति भावः। द्वितीयेऽपि स एव मानमित्याह * तथेति। * अनातुरेण, स्वस्थेन। अपिर्मुमूर्षुसमुच्चायकः। * धर्मसंहित इति। धर्माख्य इत्यर्थः। तत्स्वरूप इति यावत्। धर्मज्ञानविषयो वा। धर्मसंहित इति पाठान्तरम्। धर्मयुक्त इत्यर्थस्तदा। *तत्रेति। तस्मिन्दत्तान्वाहितेऽपि तत्रार्थे मृतान्तरोऽपि एतेषु षट्सु साक्षी स्यादित्यर्थः॥६८॥६९॥

मि० तानेतानसाक्षिणो दर्शयति।

या० स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः।
रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः॥ ७० ॥
पतितासार्थसंबन्धिसहायरिपुतस्कराः।
साहसी दृष्टदोषश्च निर्धूताद्यास्त्वसाक्षिणः॥ ७१॥

मि० स्त्री प्रसिद्धा। बालोऽप्राप्तव्यवहारः। वृद्धोऽशीतिकावरः। वृद्धग्रहणं वचनानेपिरानामन्येषामपि श्रोत्रिया दीनामुपलक्षणार्थम्। कितवोऽक्षदेवी। मत्तः मद्यादिना। उन्मत्त ग्रहाविष्टः। अभिशस्तोऽभियुक्तो ब्रह्महत्यादिना। रङ्गावतारी चारणः। पाखण्डिनो निर्ग्रन्थप्रभृतयः। कूटकृत् कपटलेख्यादिका-

री । विकलेन्द्रियः श्रोत्रादिरहितः । पतिता ब्रह्महादिः । आप्तः सुहृत् । अर्थसंबन्धी विप्रतिपद्यमानार्थसंबन्धी । सहाय एककार्यः । रिपुः शत्रुः । तस्करः स्तेनः । सा सो स्वबलावष्टम्भकारी । दृष्टदोषो दृष्टवितथवचनः । निर्धूतो बन्धुभिस्त्यक्तः । आद्यशब्दादन्येषामपि स्मृत्यन्तरोक्तानां दोषादसाक्षिणां भेदादसाक्षिणां स्वयमुक्तमृतान्तरस्य च ग्रहणम् । एते स्त्रीबालादयः साक्षिणो न भवन्ति ॥ ७० ॥ ७१ ॥

बा० १। एवमुपोद्घातमुक्त्वा सांप्रतं मूलमवतारयति * तानेतानिति । वक्तव्यानारम्भोक्तानित्यर्थः। पाषण्ड्यादिद्वन्द्वं कृत्वा पुना रङ्गावतारिणा सह, एवम् आप्तादिद्वन्द्वं कृत्वा पुनः पतितेन सहेति बोध्यम्। * अप्राप्तेति । व्याख्यातमिदम् । * अशीतिकेति । अशीतिः प[रिमाण]मस्य सः अवरो यस्येति विग्रहः । ततोऽर्वाक् न भवति तदारभ्य भवतीत्यर्थः । वैषम्ये बीजाभावात्तदेकवाक्यतया च न्यूनतां निराचष्टे * वृद्धेति । * पानादिनेति। आदिना भक्षणग्रहणम् । * अभियुक्त इति । तत्सम्बन्धारोपमात्रं यस्येत्यर्थः । * लेख्यादीति। आदिना भोगादिग्रहणम् । व्यवहारे श्रुतेः प्रा[धान्य]ात् * श्रोत्रादीति । योगनिरासायाह * सुहृदिति । यत्किञ्चिदर्थसम्बन्धित्वस्य सर्वत्र सत्त्वादाह * विप्रतिपद्यमानार्थसंबन्धीति। * एकेति। बहुव्रीहिः । पुत्रादिरित्यर्थः। * स्वबलावष्टम्भकारीति।तेन करोति न तु विचारेण। अविचारितकारीत्यर्थः । दोषाणां बाहुल्ये पि अत्र प्राधान्यादाह * वितथेति । * बन्धुभिरिति । ग्रामराजकुलश्रेण्यादिभिर्निस्सारित इति कल्पतरुः। नारदैकवाक्यत्वायाह * आद्येति । एवं पदार्थानुक्त्वा वाक्यार्थमाह * एते इति ॥ ७० ॥ ७१ ॥

मि० अवराः साक्षिणो ज्ञेया इत्यस्यापवादमाह ।

या० उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित् ।

मि० ज्ञानपूर्वकं नित्यनैमित्तिककर्मानुष्ठायी धर्मवित्। स एकोऽप्युभयानुमतश्चेत्साक्षी भवति । अपिशब्दाद् द्वावपि । यद्यपि श्रौतस्मार्तक्रियापरा इति त्र्यवराणामपि धर्मवित्त्वं समानं तथापि तेषामुभयानुमत्यभावेऽपि साक्षित्वं भवति, एकस्य द्वयोर्वोभयानुमत्यैव साक्षित्वं भवतीत्यर्थवत् त्र्यवरग्रहणम् ।

मि० तपस्विनो दानशीला इत्यस्यापवादमाह ।

या० सर्वः साक्षी संग्रहणे चौर्यपारुष्यसाहसे ॥ ७२ ॥

मि० संग्रहणादीनि वक्ष्यमाणलक्षणानि, तेषु सर्वे वचननिषिद्धास्तपःप्रभृतिगुणरहिताश्च साक्षिणो भवन्ति । दोषादसाक्षिणो भेदादसाक्षिणः स्वयमुक्तिश्चापि साक्षिणो न भवन्ति । सत्याभावादितिहेतोरत्रापि विद्यमानत्वात् ।

मनुष्यमारणं चौर्यं परदाराभिमर्शनम् ।

पारुष्यमुभयं चेति साहसं स्याच्चतुर्विधम् ॥

इति वचनात् यद्यपि स्त्रीसंग्रहणचौर्यपारुष्याणां साहसत्वं तथापि तेषां स्वबलावष्टम्भेन जनसमक्षं क्रियमाणानां साहसत्वम्, रहसि क्रियमाणानां तु संग्रहणादिशब्दवाच्यत्वमिति तेषां साहसात्पृथगुपादानम् ॥ ७२ ॥

बा० १। श्रौतस्मार्तेत्येकवाक्यतया आह * ज्ञानेति । तथा

च विदेशान ... भावः । अत एवोक्तं—

पठकाः ... ये चान्ये शास्त्रचिन्तकाः ।

सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ॥ इति ।

२। *उभयेति । ...मित्यर्थः । * ...पीति । तादृशौ चेमौ ... भवतः इत्यर्थः ।

३। ननु एवं धर्मवित्त्वं सर्वत्र तुल्यं, तथा च तत्र व्यवरपदमनर्थकं व्यावर्त्याभावात् अपिना तेषामपि सङ्ग्रहादित्याशङ्कते *यद्यपीति * इतीति । इत्युक्तेरित्यर्थः । धर्मवित्त्वप्रयुक्तवैलक्षण्याभावेऽप्युभया...मतत्वप्रयुक्तवैलक्षण्यमित्या...येन समाधत्ते * तथापीति । * द्वयोर्वा, द्वयोर्वा तु । * अर्थवत्, सफलम् ।

उ० ४। प्रत्यासत्तेः ...बालेत्यस्यैवोपस्थितेराह * तपस्वीति । * ...त्यस्येति । ...त्यस्यापीत्यर्थः । ... पाठः । अपिना-स्त्रीबालेत्यादिनिषिद्धसङ्ग्रहः । अत एव व्याख्यानवि...षो नेति बोध्यम् । ...त्यादिः समाहारद्वन्द्वः । * सङ्ग्रहणादीनि, चत्वारि । सवशब्दस्य बुद्धिस्थव...संख्याकावयवारब्धसमुदाये शक्त्या तस्यानुद्भू...तावयवभेदत्वेन यद्यपि सर्वलोक इतिवत् मूले ...कवचन तथापि स्पष्टार्थमुद्भूतावयवपरतया व्याचष्टे * सर्वे इति । तदर्थमेव व्युत्क्रमेणाह * वचनेति । मौलस्त्रीबालेत्यादिवचनेत्यर्थः । नन्वेवमतिप्रसङ्गोऽत आह * दोषादिति । एते त्रय इत्यर्थः । * अत्रापि, स्त्रीसंग्रहणादिष्वपि । ननु पूर्वं तेषामसाक्षित्वे उक्तेपि अस्य तदपवादत्वेनात्र तेषां साक्षित्वं स्यादेव अत आह *सत्याभावादितीति । एवं च येन हेतुना तत्रासाक्षित्वं तस्य अत्रापि सत्त्वं तुल्यमिति तदनपगमेन तेषामत्रापि असत्त्वमेवेति भावः । एवं च स्वयमुक्तिश्चेति चेनान्येषामपीदृशानां ग्रहणम् ।

तदाह नारदः, (व्य. प. १ । १८८ । १९०)

असाक्षिणो ये निर्दिष्टा दासनैकृतिकादयः ।
कार्यगौरवमासाद्य भवेयुस्तेऽपि साक्षिणः ॥
तेषामपि न बालः स्यान्नैकोन स्त्री न कूटकृत् ।
न बान्धवो न चारातिर्ब्रूयुस्ते साक्ष्यमन्यथा ॥ इति ।
नैकृतिको विम्बकः ।
व्यासोऽप्याह,
साक्षिदोषाः प्रवक्तव्याः संसदि प्रतिवादिना ।
पत्रेऽभिलिख्य तान् सर्वान्वाच्याः प्रत्युत्तरं तु ते ॥
प्रतिपन्ना न साक्षित्वमर्हन्ति तु कदाचन ।
अतोऽन्यथा भावनीयाः क्रियया प्रतिवादिना ॥
अभावयन् दमं दाप्यः प्रत्यर्थी साक्षिणां स्फुटम् ।
भाविताः साक्षिणो वर्ज्याः साक्षिधर्मानराकृताः ॥
जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा ।
यदि वादी निराकाङ्क्षः साक्षिसत्ये व्यवस्थितः ॥ इति ।

पत्रे लिखितान्साक्षिदोषानभिलक्षीकृत्य उत्तरमुत्तरं तत्तद्विषयं परिहारं ते साक्षिणः सभ्यैर्वाचनीया इत्यर्थः । पत्रे तान्सर्वानभिलिख्य उत्तरोत्तरं ते दोषा वाच्या इति कल्पतरुः । अतोऽन्यथा अप्रतिपत्तौ भावनीयाः अङ्गीकारयितव्याः । क्रियया प्रमाणेन स्फुटं यथा स्यात्तथा अभावयन्नित्यन्वयः ।

५ । ननु संग्रहणादित्रयाणामपि साहसशब्दवाच्यत्वाद्भेदेनोक्तिः कुत इत्याशङ्कते * मनुष्येति । * उभयं, वाक्पारुष्यं दण्डपारुष्यं च । पारुष्यत्वेनक्यात् * चतुर्विधमिति । उक्तसमाधिपस्यासाह * स्त्रीसंग्रहणेति । समाधत्ते * तथापीति । जनसमक्षं स्वबलावष्टम्भेन यत्करणं तेनोपाधिना क्रोडीकृतानामेषां साहसशब्दवाच्यत्वम् । एकान्ते यत्करणं तद्रूपो-

पर्यायैक्येऽपि विषयभेदेन भिन्नत्वात्तत्तद्विषयभेदघटितरहः-कृतोपाधिभेदात्स्तेयादीनामेकवाक्यत्वमिति भावः । *तेषां, त्रयाणाम् । *साहसात्ययिकिति । साहसात्ययिकेति पाठान्तरम् । तत्र ततोऽग्रे उपादाने सामान्यविशेषभावेनान्वयसम्भवेन त्रयाणामेव ग्रहणं स्यादिति तथेति भावः ॥ ७२ ॥

मि० साक्षिश्रावणमाह ।

या० साक्षिणः श्रावयेद्वादिप्रतिवादिसमीपगान् ।

मि० अर्थिप्रत्यर्थिसन्निधौ साक्षिणः समवेतान् । नासमवेताः पृष्टाः प्रब्रूयुरिति गौतमवचनात् । वक्ष्यमाणं श्रावयेत् । तत्रापि—

कात्यायनेन विशेषो दर्शितः,

सभान्तः साक्षिणः सर्वानर्थिप्रत्यर्थिसन्निधौ ।
प्राड्विवाकोऽनुयुञ्जीत विधिनाऽनेन सान्त्वयन् ॥
देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान् ।
उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे वै शुचिः शुचीन् ॥
आहूय साक्षिणः पृच्छेन्नियम्य शपथैर्भृशम् ।
समस्तान्विदिताचारान्विज्ञातार्थान्पृथक्पृथक् ॥

इति ।

तथा ब्राह्मणादेः श्रावणे—

मनुना नियमो दर्शितः, (अ. ८ श्लो. ११३)

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।
गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥ इति ।

ब्राह्मणम् "अन्यथा ब्रुवतः सत्यं ते नश्यतीति" शापयेत् । क्षत्रियं, वाहनायुधानि तव विफलानीति । गो-

बीजकाञ्चनानीनि तव [illegible] नि भविष्यन्तीति वै-श्यम् । शूद्रस्तु अन्यथा [illegible] तस्तव [illegible] पातकानि भविष्यन्तीति शापयेत् । अत्र चापवादः—

तेनैव दर्शितः, (मनु० अ० ८ श्लो० १०२)

गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान् ।
प्रेष्यान्वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥इति।

विप्रग्रहणं क्षत्रियवैश्ययोरुपलक्षणार्थम् । कुशी-लवा गायकाः । प्रतिवादिना साक्षिदूषणे दत्ते प्रत्य-क्षयोग्यदूषणेषु बाल्यादिषु तथैव निर्णयः । अयोग्येषु तु तद्वचनाल्लोकतश्च निर्णयो न साक्ष्यन्तरेणेति नान-वस्था । यदि साक्षिदोषं [illegible] साधयितुं न शक्नोति प्रतिवादी तदाऽसौ सारानुसारेण दण्ड्यः । अथ सा-धयति तदा न साक्षिणः ।

यथाह,

असाधयन् दमं दाप्यो दूषणं साक्षिणां स्फुटम् ।
भाविते साक्षिणो वर्ज्याः साक्षिधर्मानिराकृताः॥इति।

उद्दिष्टेषु च सर्वेषु साक्षिषु दुष्टेष्वर्थी यदा क्रिया-न्तरानिरपेक्षस्तदा पराजितो भवति ।

जितः स विनयं दाप्यः शास्त्रदृष्टेन कर्मणा ।
यदि वादी निराकाङ्क्षः साक्षिसभ्येष्ववस्थितः ॥

इति स्मरणात् । साकाङ्क्षश्चेत्क्रियान्तरमवलम्बेते-त्यभिप्रायः ।

मि० कथं श्रावयेदित्याह ।

या० ये पातककृतां लोका महापातकिनां तथा ॥७३॥

अग्निदानां च ये लोका ये च स्त्रीबालघातिनाम् ।
स तान्सर्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ॥ ७४ ॥
सुकृतं यत्त्वया किञ्चिज्जन्मान्तरशतैः कृतम् ।
तत्सर्वं तस्य जानीहि यं पराजयसे मृषा ॥ ७५ ॥

मि॰ पातकोपपातकमहापातककारिणामग्निदानां स्त्रीबालघातिनां च ये लोकास्तान् सर्वानसाववाप्नोति यः साक्ष्यमनृतं वदेदिति । तथा जन्मान्तरशतैर्यत्सुकृतं कृतं तत्सर्वं तस्य भवति, यस्ते अनृतवदनेन पराजितो भवतीति श्रावयेदिति सम्बन्धः । एतच्च शूद्रविषयं द्रष्टव्यम् । शूद्रं सर्वैस्तु पातकैरिति शूद्रे सर्वपातकश्रावणस्य विहितत्वात् । गोरक्षकादिद्विजातिविषयं च । गोरक्षकान् वाणिजकानित्युक्तत्वात् । अन्यानेकजन्मार्जितसुकृतसंक्रमणस्य महापातकादिफलप्राप्तेश्चानृतमात्रेणानुपपत्तेः साक्षिसन्त्रासार्थमिदमुच्यते ।

यथाह नारदः,   (व्य॰ प॰ १।२००)

पुराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्तनैः ।
अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमान् ॥ इति ॥ ७३ ॥ ७४ ॥ ७५ ॥

बा॰ १। श्रावणे तद्विधसामीप्यमात्रं विवक्षितं न तु तद्गमनमित्याह * संनिधाविति । विशेषमाह *समवेतानिति । मिलितानित्यर्थः । अत्र मानमाह * नासमवेता इति । पृष्टा अपि असमवेता नेत्याद्यर्थः । कर्मकाण्डयामाह * वक्ष्यमाणमिति । मुलकृतेति भावः ।

२। *तत्रापि,श्रावणेऽपि। *सभान्तः,सभामध्ये। *सर्वान्, उक्तोऽर्थः। अत एव समस्तानिति सफलम्। * अनुयुञ्जीत, पृच्छेत्। नियुञ्जीतेति पाठान्तरम्। तत्र मेलयेदित्यर्थः। विधिमेवाह *देवेति। *समस्तान्, मिलितान् पृथक्पृथक् विज्ञातार्थानित्यर्थः।

३। तत्रापि विशेषमाह * ब्राह्मणादिष्विति।*ब्राह्मणादि , त्रिषु। *नियम इति। विशेषमध्ये इति भावः। शूद्रे तु न नियम इत्याह *शूद्रमिति। अत एव तु ब्राह्मणमित्यस्य शापयेदित्यन्वयस्तस्य चाग्रे उभयत्रानुषङ्गः। अन्यथा ब्रुवत इत्यस्य सम्पुटीकरणेन मध्येऽप्युभयत्र सम्बन्धो ध्वनितः।

४। तत्रापि विशेषमाह * अत्र चेति। सत्येन शापयेदित्यत्रार्थे चेत्यर्थः। सम्बन्धिनोऽधिकरणत्वविवक्षया सप्तमी। * तेनैव, मनुनैव। कारुः शिल्पी। उक्तिताल्यादाह *विप्रम्रणामिति। तयोरपीत्यर्थः। एतच्च साक्षिसन्त्रासार्थमेव।

यथाह नारदः, (व्य० प० १।२००)

पौराणैर्धर्मवचनैः सत्यमाहात्म्यकीर्त्तनैः।

अनृतस्यापवादैश्च भृशमुत्त्रासयेदिमान्॥ इति।

सत्येन शापयेद्विप्रमित्यप्यपकृष्टब्राह्मणविषयं न ब्राह्मणमात्रविषयम्। तस्य गौतमेन शपथस्य निषिद्धत्वादिति कल्पतरुः।

५। ननु प्रतिवादिना साक्षिदोषे उक्ते तन्निर्णयाय साक्ष्यन्तरापेक्षायामनवस्था स्यात्। तदुक्तम्—

व्यासेन,

अन्यैस्तु साक्षिभिः साध्ये दूषणे पूर्वसाक्षिणाम्।

अनवस्था भवेत् दोषस्तेषामप्यन्यसम्भवात्॥ इति।

अतो विसंवादः *प्रतिवादिनेति । *दत्ते, सति । *बाल्यादिषु, सत्सु । चापल्यादिष्वित्यपपाठः । *तथैव, प्रत्यक्षेणैव । *अयोग्येषु, दूषणेषु सत्सु । *तद्वचनात्, साक्षिवचनात् ।

तदुक्तं व्यासेनैव,

सभासदां प्रसिद्धं यल्लोकसिद्धमथाऽपि वा ।

साक्षिणां दूषणं ग्राह्यमसाध्यं दोषवर्जनात् ॥ इति ।

असाध्यं साधनानर्हम् । *दोषवर्जनात्, अनवस्थादिराहितत्वात् ।

६। विशेषान्तरमाह * यदीति । सारो बलम् । * साक्षिण इति । ते इत्यादिः । क्वचित्तथा पाठ एव । कात्यायनमाह *यथाहेति । *असाधयन्निति । अभावयन्निति पाठान्तरम् । अर्थोऽभिन्नः । साक्षिणां दूषणं स्फुटं यथा तथाऽसाधयन्नित्याद्यन्वयः । *भाविते, साधिते सति । *साक्षिधर्मेति । साक्षित्वानर्हा इत्यर्थः ।

७। विशेषान्तरमाह।*उद्दिष्टेष्विति । कथितेष्वित्यर्थः । *दुष्टेषु, सत्सु । *क्रियान्तरेति । प्रमाणान्तरेत्यर्थः । व्यासं मानमाह * जित इति । यदि वादी साक्षिसभ्यविषये निराकाङ्क्षोऽवस्थितः सम्पन्नस्तदा जितः पराजितः सन् स वादी शास्त्रोक्तविधिना विनयं दमं दाप्य इत्यर्थः । साक्षिसभ्येष्ववस्थित इत्यत्र साक्षिसत्ये व्यवस्थित इति पाठान्तरम् । अर्थस्तद्वत् । सूचितार्थमाह *साकाङ्क्ष इति ।

उ० ८। वक्ष्यमाणमित्युक्तमेव वक्तुमाह * कथमिति । वाक्यमिति शेषः । * इत्याह, इत्यत आह । क्वचित्तथैव पाठः । सर्वानिति स्पष्टार्थम् । स तान् इत्येकवचनबहुवचनाभ्यामेव तदर्थलाभात् ।

९। एवं सामान्येनोक्त्वा विशिष्याह *सुकृतमिति । मूले पातकशब्देन वक्ष्यमाणभिन्नानां ग्रहणमित्याह * पातकोपेति ।

अ[illegible]प्यनेन वक्ष्यमाण[illegible]मिति बोध्यम् । स इत्यस्या-
र्थोऽसाविति । इति[illegible]समाप्तौ ।

१०। अत एवाह *तथेति। किं चेत्यर्थः।वदति तथेति पाठे
वदति किं च भवतीत्यर्थः । *सुकृतं, पुण्यम् । *तस्य, तदीय-
म् । तदर्थमाह *यस्ते इति । तवा[illegible]तवाक्येनेत्यर्थः । तवेत्येव
पाठान्तरम् । अस्य त्वत्र कर्मत्वमित्याह *इति श्रावयेदिति ।

११। मन्वविरोधायाह *एतच्चेति । तमेवाह * शूद्रमिति ।
तदेकवाक्यतयैवाह *गोरक्षेति । ननु स्वल्पतरानृतवदनरूपदो-
षात्तादृशपापोत्पत्तावपि कथमतिबहुलमीदृशं फलमत आह
*अन्यानेकेति । स्वयम् अनेकजन्मा[illegible]र्जितं यत्सुकृतं तस्यान्य-
त्र संक्रमणस्येत्यर्थः । मूले कृतशब्दोऽर्जितपरः, शतशब्दोऽनेक-
पर इति भावः । * उच्यते इति । इदमित्यादिः । क्वचित्तथैव
पाठः । तथा चार्थवादोऽयमिति भावः । अत एवाह * यथेति ।
*धर्मेति । [illegible] । [illegible]त्यसम्बन्धिमाहात्म्यस्य कीर्तनौ[illegible]-
त्याग्रिमार्थः । * भृशमिति । तथा चानृतवदनाभावे तात्प-
र्यम् ॥ ७३ ॥ ७४ ॥ ७५ ॥

मि० यदा तु श्राविताः साक्षिणः कथञ्चिन्न ब्रूयु-
स्तदा किं कर्तव्यमित्यत आह ।

या० अब्रुवन्हि नरः साक्ष्यमृणं सदशबन्धकम् ।
राज्ञा सर्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि ॥७६॥

मि० यः साक्ष्यमङ्गीकृत्य [illegible]वितः सन् कथञ्चिन्न वद-
ति स राज्ञा सर्वं सवृद्धिकमृणं धनिने दाप्यः । सद-
शबन्धकं,दशमांशसाहितम्। दशमांशश्च राज्ञो भवति।

राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शतम् ।

इत्युक्तत्वात् । एतच्च षट्चत्वारिंशकेऽहनि प्राप्ते

सति वोढव्य॰ । ततोऽर्वाग्व न दाप्यः । इदं च व्याख्या॰ पल्लवरहितस्य ।

यथाह मनुः, अ (८. श्लो. १०७.)

त्रिपक्षादब्रुवन् साक्ष्यमृणादिषु नरोऽगदः ।

तदृणं प्रा॰ यात्सर्वं ॰ शबन्धं च सर्वशः ॥ इति ।

अगद इति राजदैवोपप्लवविरहोपलक्षणम् ॥७६॥

बा॰ १। कथंचित्,कारणेन। *सः,नरः। सर्वमित्य य योग्यत्वादिना पूर्वार्द्धे ऽन्वय इत्याह * सर्वमिति। तदर्थमाह * स॰ ॰क-मिति। योग्यत्वादे॰॥॰ *धनिने इति। यद्यपि सदशेति ऋणविशेषणं तथापि धन्ययोग्यमिति तद्वाक्यात्पृथक् व्याचष्टे * सदशेति । दशबन्धकेन सहितं तथा। दशशब्दो दशमपरः। बन्धशब्दोंऽशपरः। स्वार्थे क इत्याह *दशमांशसहितेति। उक्तहेतोरेवाह * दशमांश इति। चस्त्वर्थे। ननु अयमपि वचना॰ निन एवास्तां किमित्येवं व्याख्यानं वैरूप्यापादकमत आह * राज्ञेति । तन्न्यायेनेत्यर्थः । तथा च तदेकवाक्यत्वतस्तल्लाघवमूलकमेव व्याख्यानमुचितमिति भावः ।

२। अस्य कालनियमम॰ * एतच्चेति । मन्वनुरोधेनैवाह *मासे सतीति। एतत्तात्पर्यम॰ * ततोऽर्वागिति । पक्षत्रयमध्ये इत्यर्थः । अत एव मूलवचने हिः प्रयुक्तः । स हि तत्रावदनस्य तद्धेतुत्वं प्रतिपादयति ।

३। विशेषमाह * इदं चेति । इदमपीत्यर्थः । आदिना राजदैवग्रहण॰ । * त्रिपक्षादिति । त्रयः पक्षा यस्मिन्निति बहुव्रीहिः । ल्यब्लोपे इति कर्मणि पञ्चमी । ऋ॰॰॰दि॰॰॰ये सार्द्धमासमभिव्याप्य साक्ष्यमब्रुवन् अगदो ऽपीडितशरीरो नरस्तदृणं सर्वं स॰॰क॰ प्राप्नुयात् दद्यात् । दशबन्धं च दशमं भागं च सर्व-

ज्ञः सर्वस्य, राज्ञे दद्यादित्यर्थः। सर्वत इति पाठान्तरम्। संख्यावाचिनः परो बन्धशब्दो दण्डविशेषांशप्रवचनः। नवग्रहणं सर्वतोग्रहणं श्लोकपूरणार्थमिति मेधातिथिः। युक्तिसाम्यादाह *अगद इति। विरहस्यापीत्यर्थः॥ ७६॥

मि० यस्तु जानन्नपि साक्ष्यमेव नाङ्गीकरोति दौरात्म्यात्तं प्रत्याह।

या० न ददाति हि यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि॥७७॥

मि० यः पुनर्नराधमो विप्रतिपन्नमर्थं विशेषतो जानन्नपि साक्ष्यं न ददाति नाङ्गीकरोति स कूटसाक्षिणां तुल्यः पापैः दण्डेन च। कूटसाक्षिणां च दण्डं वक्ष्यति। कूटसाक्षिणश्च दण्डयित्वा पुनर्व्यवहारः प्रवर्तयितव्यः। कृतोऽपि कूटसाक्ष्ये विदिते निवर्तनीयः।

यथाह मनुः (अ. ८. श्लो. ११७.)

यस्मिन् यस्मिन् विवादे तु कूटसाक्ष्यं कृतं भवेत्।
तत्तत्कार्यं निवर्तेत कृतं चाप्यकृतं भवेत्॥ इति॥७७॥

१। बा० *जानन्निति। विप्रतिपद्यमानमर्थमित्यादिः। *नाङ्गीकरोतीति। एवो व्युत्क्रमे। नाङ्गीकरोत्येवेत्यर्थः। अर्थमाह *पुनरिति। स त्वर्थे। *नराधम इति। अस्यैवार्थो दौरात्म्यादित्यनेनोक्तः। साकाङ्क्षत्वादाह *विप्रतिपन्नमिति। विवादास्पदमित्यर्थः। द्वितीयार्थमाह *विशेषतइति। लक्ष्यार्थमाह *नाङ्गीति। *तुल्यइति। तुल्यएवेत्यर्थः। एकस्यात्रान्वयात्। तत्प्रयोजकधर्मावाह * पापैरिति। ननु को दण्डस्तत्राह अत आह *कूटेति। *च दण्डं, दण्डं च। तेन कूटसाक्ष्यपरिग्रहः। अत एव विशेषमाह * कूटेति। इदमकृतव्य-

बहाराविषय. । अत एवाह * कृतोऽपीति । व्यव ।र इत्यस्यानुषङ्गः । पूर्वं तेषु तत्त्वाज्ञान।. । अतएवाह * कूटेति । कौटेति पाठान्तर.: । तत्र समस्ता. ।वप्रत्ययः । आद्ये तदन्तेन समासः । एवमग्रेऽपि । अ.तविषये उक्का .ताविषये आह * कृतं चापीति ॥ ७७ ॥

मि० साक्षिविप्रतिपत्तौ कथं निर्णय इत्यत आह ।

या० द्वैधे बहूनां वचनं समेषु गुणिनां तथा ।
गुणिद्वैधे तु वचनं ग्राह्यं ये गुणवत्तमाः ॥ ७८॥

मि० साक्षिणां द्वैधे विप्रतिपत्तौ बहूनां वचनं ग्राह्यम् । समेषु समसंख्ये. द्वैधे ये .ुणिनस्तेषां वचनं प्रमाण.: । यदा पुनर्गुणिनां विप्रतिपत्तिस्त. । ये गुणवत्तमाः .ताध्ययनतदर्था.ष्ठानधन.त्रादिगुणसंपन्ना. .षां वचनं ग्राह्यम् । यत्र तु गुणिनः कतिपये इतरे च ब. .वस्तत्रापि गुणिनामेव वचनं ग्राह्य.: ।

उभया.मतः साक्षी भ.त्ये.ोऽपि धर्मवित् ।

इति .णातिशयस्य .त्व्यत्वात् । यत्तु भेदाद्साक्षिण इ.ु.क्तं, तत् सर्वसाम्येनागृह्यमाणावि.ोषविषय.: ॥ ७८ ॥

बा० १। * साक्षीति। नन्वित्यादिः। योग्यतया साकाङ्क्षत्वादाह * साक्षिणामिति । वचनं ग्राह्यमित्यस्य सर्वत्र सम्बन्ध-दाह * .नामिति। उत्तरार्धोपात्तस्य पूर्वार्धेऽपि सम्बन्धादाह *.ाह्यमिति। समत्वं संख्याकृतमेवेत्याह * समसंख्येष्विति। अ.षङ्गेणाह * द्वैधे इति। तन्निष्ठद्वैधे इत्यर्थः। त्वर्थमाह *पुनरिति। प्रकर्षमाह * श्रुतेति। शेषमाह * तेषामिति।

२। विषमता * यत्र त्विति। * इति, इत्यनेन। * मुख्यत्वात्, तत्त्वप्रतिपादनात्।

३। ननु प्राक् भेदात् साक्षिण इत्युक्तं, इदानीं तु भेदेऽपि साक्षिण इत्युच्यत द्वैधे त्यनेनेति मिथो विरोधो ऽत आह * यस्त्विति। *तत् सर्वेति। यत्र संख्यागुणादिभिः सर्वैः साम्यं तत्र विशेषाभावाद्भेदादसाक्षित्वं, यत्र तु संख्यागुणादिभिर्वैषम्यं तत्र भेदेऽप्यनेन प्रकारेण साक्षित्वं भवत्येवेतिभावः॥७८॥

मि० साक्षिभिश्च कथमुक्ते जयः कथं वा पराजय इत्यत आह।

या० यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्।
अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः॥ ७९ ॥

मि० यस्य वादिनः प्रतिज्ञां द्रव्यजातिसंख्यादिविशिष्टां साक्षिणः सत्यां वदन्ति, सत्यमेव जानीमो वयमिति, स जयी भवति। यस्य पुनर्वादिनः प्रतिज्ञामन्यथा साक्षित्वेन मिथ्यतामिति वदन्ति तस्य पराजयो ध्रुवो निश्चितः। यत्र तु प्रतिज्ञार्थस्य विस्मरणादिना भावाभावौ साक्षिणो न प्रतिपादयन्ति तत्र प्रमाणान्तरेण निर्णयः कार्यः। न च राज्ञा साक्षिणः पुनः पुनः प्रष्टव्याः। स्वभावोक्तमेव वचनं ग्राह्यम्।

यथाह—

स्वभावोक्तं वचस्तेषां ग्राह्यं यद्दोषवर्जितम्।
उक्ते तु साक्षिणो राज्ञा न प्रष्टव्याः पुनःपुनः॥इति॥७९॥

१। वा० साक्षिभिरिति। नन्वित्यादिः। साक्षिभिरुक्ते जयः

ऽन्यथेत्याद्यन्वयः । उद्धृतस्यानृतस्यापि सम्भवात् । अत एव वक्ष्यति, यत्र त्वित्यादीति भावः । अन्यथेत्यस्य पुनरुक्तिः स्पष्टार्था । यस्येत्यस्य व्याख्या * वादिन इति । अस्य न साक्षिण इत्यत्रान्वय इत्याह * प्रतिज्ञामिति । सा च पत्रारूढा न केवलेत्या * द्रव्येति । लिङर्थो न विवक्षित इत्याह * वदन्तीति । तद ... ाह * सत्यमेवेति । एवेनासत्यत्वव्यवच्छेदः । * स इति । तदिष्टसिद्धेरिति भावः । प्राग्वदाह । *भवतीति ।

२। उत्तरार्द्धार्थमाह * यस्येति । पुनस्त्वर्थे । वैलक्षण्याय शेषपूरणमिदम् । साक्षिण इत्यस्यानुवृत्तिः । अन्यथावादिन इत्येकं पदम् । यस्य तु वादिनो ऽन्यथा प्रतिज्ञाविरुद्धार्थं वदन्ति तादृशाः साक्षिणो भवन्ति तस्येत्यादिः शाब्दोऽर्थः । तत्फलितमाह * प्रतिज्ञामिति । सर्वथा यस्येत्यस्य प्रतिज्ञादावन्वयो न साक्षिण इत्यत्रेति तात्पर्यम् । अत एव द्विरावृत्तितया पदद्वयेन चोक्तिः ।

३। विशेषमाह * यत्रात्विति । * प्रतिज्ञार्थेति । तद्रूपस्यार्थस्येत्यर्थः । प्रतिज्ञातार्थस्येति पाठान्तरम् । आदिना मोहादिः । * तत्र, तादृशे स्थले । तस्येति पाठान्तरम् । * प्रमाणान्तरेणेति । प्रकृतसाक्षिभिन्नेनेत्यर्थः । अत्र हेतुमाह * न चेति । न हीत्यर्थः । राज्ञेत्युपलक्षणमन्येषामपि । अत्र हेतुमाह * स्वभावोक्तमिति । यत इत्यादिः । मनुकात्यायनावाह * यथेति । * तेषां, साक्षिणाम् । अत्र हेतुमाह *यद्दोषेति । यतो दोषवर्जितमित्यर्थः । दोषविवर्जितमिति पाठेऽपि हेतुगर्भं विशेषणम् । अत एवाह * उक्तेत्विति । स्वभावोक्ते तु सतीत्यर्थः । दोषसम्भवादिति भावः ॥ ७९ ॥

मि० अन्यथावादिनो यस्य ध्रुवस्तस्य पराजयः-
इत्यस्यापवादमाह ।

या० उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ।
द्विगुणा वाऽन्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः ॥८०॥

मि० पूर्वोक्तलक्षणैः साक्षिभिः साक्ष्ये स्वाभिप्राये प्रतिज्ञातार्थवैपरीत्येनाभिहिते यद्यन्ये पूर्वेभ्यो गुणवत्तमाः द्विगुणा वा अन्यथा प्रतिज्ञातार्थानुगुण्येन साक्ष्यं ब्रूयुस्तदा पूर्वे साक्षिणः कूटा मिथ्यावादिनो भवेयुः।

नन्वेतदनुपपन्नम् । अर्थिप्रत्यर्थिसभ्यसभापतिभिः परीक्षितैः प्रमाणभूतैः साक्षिभिर्निगदिते प्रमाणान्तरान्वेषणेऽनवस्थादोषप्रसङ्गात् ।

निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो वापि पूर्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णिक्तव्यवहाराणां प्रमाणमफलं तथा ॥
इति नारदवचनाच्च । अ. १ । ६२ । ६३ ।

उच्यते । यदाऽर्थी प्रतिज्ञातार्थस्यान्तरात्मसाक्षित्वेनानाविष्कृतदोषाणामपि साक्षिणां वचनमर्थविसंवादित्वेनाप्रमाणं मन्यमानः साक्षिष्वपि दोषं कल्पयति तदा प्रमाणान्तरान्वेषणं केन वार्यते । उक्तं च, यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीन इति । यथा चक्षुरादिकरणदोषानध्यवसायेऽप्यर्थविसंवादावगतिरस्य ज्ञानस्य अप्रामा-

ण्येन करणदोषकल्पना, तथेहापि । साक्षिपरीक्षाति-रेकेण तद्वाक्यपरीक्षोपदेशाच्च ।

साक्षिभिर्भाषितं वाक्यं सह सभ्यैः परीक्षयेत्[1]

इति ।

कात्यायनेनाप्युक्तः,

यदा शुद्धा क्रिया न्यायात्तदा तद्वाक्यशोधनम् ।
शुद्धाच्च वाक्याद्यः शुद्धः स शुद्धोऽर्थ इति स्थितिः ॥

इति । क्रिया साक्षिलक्षणा, नार्थसंबन्धिनो नासा इति न्यायाद्यदा शुद्धा तदा तद्वाक्यशोधनं साक्षिवाक्यशोधनं कर्तव्यम् । वाक्यशुद्धिश्च सत्यार्थप्रतिपादनेन । सत्येन शुद्ध्यते वाक्यमिति स्मरणात् । एवं शुद्धायाः क्रियायाः शुद्धाच्च वाक्याद् यः शुद्धोऽवगतोऽर्थः स शुद्धः तथाभूत इति स्थितिः ईदृशी मर्यादा न्यायविदाम् । करणदोषबाधकप्रत्ययाभावे सति अवितथ एवार्थ इत्यर्थः ।

ननु स्वयमर्थिना प्रमाणीकृतान् साक्षिणोऽतिक्रम्य कथं क्रियान्तरं प्रमाणीक्रियते । नैष दोषः ।

यतः,

क्रियां बलवतीं मुक्त्वा दुर्बलां योऽवलम्बते ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात्क्रियाम् ॥

इति कात्यायनेन जयावधारणोत्तरकालं क्रियान्तरपरिग्रहनिषेधाद् जयावधारणात्प्राक् क्रियान्तरपरिग्रहो दर्शितः ।

---

१ तत्समानार्थकः– (ना० अ० २।३९)

शुद्धेषु साक्षिषु ततः पश्चात्साक्ष्यं विशोधयेत् । इत्यर्धो दृश्यते ।

नार॰नापि—

निर्णिक्ते व्यव॰ारे तु प्रमाणमफलं भवेत्।

इति वदता जयावधा॰णोत्तरकालमेव प्रम॰ा-न्तरं निषिद्धं, न प्रागपि। तस्मादुक्तेऽपि साक्षिभिः साक्ष्ये अपरि॰ष्यता क्रियान्तरमङ्गीकर्तव्यमिति स्थितम्। एवं स्थिते यथाभि॰तवचनेभ्यः साक्षिभ्यो गु-ण॰॰॰ः द्विगुणा वा पूर्वनिर्दिष्टा असन्नि॰ताः साक्षिणः सन्ति तदा ते एव प्रमाणीकर्तव्याः।

स्व॰॰॰॰ यद् ब्रूयुस्तद् ग्राह्यं व्यावहारिकम्।

इत्यस्य सर्वव्यव॰ारशेषत्वात्। (मनु० ८।७९)

निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत्।

लिखितं साक्षिणो वाऽपि पूर्वमावेदितं न चेद्॥

इति नारदवचनाच्च। पूर्वनिर्दिष्टानामसंभवे त्व-निर्दिष्टा अपि तथाविधा एव साक्षिणो ग्राह्या न दिव्यम्।

संभवे साक्षिणां प्राज्ञो वर्जयेद्दैविकीं क्रिया॰।

इति स्मरणात्। (ना० अ० २।२९)

तेषामसंभवे दिव्यं प्रमाणीकर्तव्यम्। अतः परमपरि॰ष्यताऽप्यर्थिना न प्रमाणान्तरमन्वेषणीय॰, म-॰॰॰॰॰ति परिसमापनीयो व्यवहारः।

यत्र तु प्रत्यर्थिनः स्वप्रत्ययवि॰वादित्वेन साक्षिवचन॰याप्रामाण्यं म॰न्यमान॰च साक्षिषु ॰षारोपण-॰ापा॰ तोष॰॰त्र प्रत्यर्थिनः क्रियोपन्यासावसराभा-॰॰॰॰ा ॰वधिक॰ ॰िकराजिकव्यसनोद्भवेन साक्षिपरीक्षणं कर्तव्यम्। तत्र च दोषावधारणे साक्षिणो

विवादास्पदी[illegible]तमृणं दाप्या: । सारा[illegible]सारेण दण्ड-
नीयाश्च। अथ दोषानवधा[illegible]णं तदा प्रत्यर्थिना तावता
संतोष्टव्य[illegible] ।

यथाह मनु: । (अ० ८ श्लो० १०८)

यस्य दृश्येत सप्ताहादुक्तवाक्यस्य साक्षिण: ।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमं च स:॥इति।

एतच्च—

यस्योचु: साक्षिण: सत्यां प्रतिज्ञां स जयी भवेत्-
इत्यस्यापरि[illegible]व्यत्प्रत्यार्थीविषयेऽपवादो द्रष्टव्य: ।

केचित्—उक्तेऽपि साक्षिभि: साक्ष्ये इत्येतद्वचन[illegible],
अर्थिना निर्दिष्टेषु साक्षिषु अथ्यनु[illegible]लमभिहितवत्सु
यदि प्रत्यर्थी गुणवत्तमान् द्विगुणान्वाऽन्यान् साक्षिण:
पूर्वोक्तविपरीतं संवादयति तदा पूर्वस्य वादिन: सा-
क्षिण: कूटा इति व्याचक्षते । तदसत् । प्रत्यर्थिन:
क्रिया[illegible]पपत्ते: ।

तथाहि । अर्थी नाम साध्यस्यार्थस्य नि[illegible]ष्टा ।
तत्प्रतिपक्ष: तदभाववादी प्रत्यर्थी । तत्राभावस्य भा-
वसिद्धिसापेक्षसिद्धित्वा[illegible]ावस्य चाभावनिरपेक्षसि-
द्धित्वाद्भावस्यैव साध्यत्वं युक्तम् । अभावस्य स्वरूपे-
ण साक्ष्यादिप्रमेयत्वाभावात् । अतश्चार्थिन एव क्रि-
या युक्ता । अपि चोत्तरानुसारेण सर्वत्रैव क्रिया
नियता स्मर्यते,

प्रा[illegible]तौ तु प्रत्यर्थी निर्दिशेत्क्रिया[illegible] ।
मिथ्योक्तौ [illegible]तु प्रतिपत्तौ न साभवेत्॥इति।
न चैकस्मिन्व्यव[illegible]ारे द्वयो: क्रिया ।

न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः ।

इति स्मरणात् । न [illegible]त्प्रतिवादिनः साक्षिणो [illegible]णवत्तमा द्विगुणा वाऽन्यथा ब्रूयुरित्यनुपपन्नम् ।

अथ मतम्– द्वावपि भावप्रतिज्ञावादिनौ मदीयमिदं दायादप्राप्तं मदीयमिदं [illegible] प्राप्तमेति पूर्वाप[illegible] कालविभाग [illegible] लेतमे[illegible] वदतः तत्र द्वयोः साक्षिषु सत्सु कस्य साक्षिणो ग्राह्या इत्याकाङ्क्षायां—

द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु ।
पूर्वपक्षो भवेद्य[illegible]च भवेयुस्तस्य साक्षिणः ॥

इति वचनेन (ना० व्य० प० १।१६३)

यः पूर्वं निवेदयति तस्य साक्षिणो ग्राह्या इति स्थिते—तस्यायमपवाद, उक्तेऽपि साक्षिभिः साक्ष्ये इति । अतश्च पूर्व[illegible]दिनोः समसंख्ये[illegible] समगुणेषु साक्षिषु सत्सु पूर्ववादिन एव साक्षिणः प्रष्टव्याः । यदा तु उत्तरवादिनः साक्षिणो गुणवत्तमा द्विगुणा वा तदा प्रतिवादिनः साक्षिणः प्रष्टव्याः । एवं च नाभावस्य साध्यता उभयोरपि भाववादित्वात् । चतुर्विधोत्तरविलक्षणत्वाच्च प्रकृतोदाहरणे न क्रियाव्यवस्था । एकस्मिन्व्यवहारे यथैकस्यार्थिनः क्रियाद्व[illegible] परमते तथा [illegible]दिनोः क्रियाद्वयेऽप्यविरोध इति ।

तदप्याचार्यो नानुमन्यते । उक्तेऽपि साक्षिभिः साक्ष्ये इत्यतः शब्दादर्थात्प्रकरणाद्वाऽस्यार्थस्यानवगमात् इत्यलं प्रसङ्गेन ॥ ८० ॥

बा० १ । [illegible]क्तलक्षणैरित्यनेन साक्षि[illegible] उक्ता। अनिषिद्धै-

स्तपस्वित्वादिगुणविशिष्टैरिति तदर्थः । स्वाभिप्रायविषये साक्ष्ये प्रतिज्ञातार्थवैपरीत्येनाभिहितेऽपीत्यन्वयः । यद्वा, अत्र साक्षी नामार्थी अभिमतार्थस्य सम्यक् ज्ञाता तस्य भावः साक्ष्यं तदेव स्वस्यार्थिनोऽभिप्रायस्तात्पर्यविषयः । एवं च साक्ष्यपदस्यैव व्याख्या स्वाभिप्राये इति यथाश्रुत एवान्वयः । यद्वा स्वाभिप्राये इत्यस्य व्याख्या * प्रतिज्ञातेति । पूर्वेभ्य इत्यस्य मध्यमणिन्यायेनान्वयः । अग्रेऽपि तथा । अर्थिनैव निर्दिष्टा इति भावः । * प्रातिज्ञातार्थानुगुण्येनेति । सत्यमेतदितीत्यर्थः । समासान्तराभ्रमायाह * पूर्वे इति ।

२। क्रमस्य विवक्षितत्वादाह * अर्थीति । परीक्षात एवाह * प्रमाणेति । प्रमाणभूत इतिवत्प्रयोगः। अत एव च्विर्न । * निगदिते, साक्ष्ये उक्ते । निगदे दत्ते इति पाठे सभ्यादिजनसमक्षमुच्चैर्निःसन्दिग्धं भाषणं निग[illegible]न्दत्ते कृते सतीत्यर्थः । [illegible]त्यन्तराविरोधमप्याह * निर्णिक्ते इति । शोधिते इत्यर्थः । * प्रमाणं, प्रमाणान्तरम् । तदेवाह * लिखितमिति । अपिना भुक्तिसमुच्चयः । तत्र विशेषमाह * पूर्वामिति । उक्तमेवार्थं दार्ढ्याय सदृष्टान्तमाह * यथेति । * पक्वेषु, पूर्णेषु पुष्टेषु । * प्रावृषइति । वर्षणरूपगुणा इत्यर्थः । निर्णिक्तव्यवहाराणामिति बहुव्रीहिः । * प्रमाणं, प्रमाणान्तरान्वेषणम् ।

३। * अन्तरात्मेति । स्वात्मेत्यर्थः । बहुव्रीहिरयम् । विसंवादित्वे हेतुरयम् । * अनाविष्कृतेति । शास्त्रप्रकटितदोषशून्यानामपीत्यर्थः । प्रसिद्धदृष्टदोषराहितानामपीति यावत् । स्वोपन्यस्तानामपीति भावः । * अर्थविसंवादित्वेनेति । स्वार्थविरुद्धत्वेनेत्यर्थः । अपिना वचनस[illegible]च्चयः । प्रतिज्ञातार्थस्य सत्यत्वेन स्वान्तःकरणेनासावर्थ एवमेवेति दृढतरप्रतीत्युत्पत्तेस्तदन्यथानु-

पपत्त्या साक्षिष्वपि दोषः कल्प्यते, न दृष्टमासीद्दोषस्तेषु। तथा च परिकल्पितदोषदुष्टत्वेन प्रमाणान्तरान्वेषणमुपपन्नमेव। अङ्गीकृते च प्रमाणान्तरे व्यवहारदर्शिभिरपि व्यवहारः प्रवर्त्तनीय एव। छलं निरस्य भूतेनेत्युक्तेरिति भावः। तथा च तथा ऽपरिकल्प्यतोऽर्थिनोऽयं साक्ष्यन्तरान्वेषणोपदेश इति नानवस्था, नापि स्मृत्यन्तरविरोध इति बोध्यम्।

४। ननु स्वप्रमित्या साक्षिष्वदृष्टदोषकल्पनं कथम्।अतो दृष्टान्तत्वेनोपपादयति *उक्तं चेति। गौतमेनेति भावः। यस्य च संप्रत्ययस्य करणं चक्षुरादिकं दुष्टं काचकामलदोषयुक्तं, यत्र च इदं रजतमित्यादिज्ञानविषये नेदं रजतमित्यादिबाधकप्रत्ययः, स एव द्विविधः प्रत्ययो ज्ञानरूपोऽसमीचीन इति दृष्टान्तवाक्यार्थः। तं प्रकृते योजयति * यथेति। अनध्यवसायेऽपि काचकामलादिप्रसिद्धदोषाणामनिश्चयेऽपि, एवं सत्यपि अर्थस्य शुक्तिरजतादेर्विसंवादादन्यथात्वात् तज्जनितस्येदं रजतमिति ज्ञानस्याप्रामाण्येन चक्षुरादिगतदोषकल्पना यथा तथेहापि दार्ष्टान्तिकेऽपीत्यर्थः।

५। न केवलं युक्तितः प्रमाणान्तरान्वेषणसाधनम् अपि तु वचनबलादपीत्याह * साक्षिपरीक्षेति। साक्षिपरीक्षोपदेशतो भेदेन तद्वाक्येत्याद्यर्थः। तमेवाह * साक्षिभिरिति।

उपास्थितान्परीक्षेत साक्षिणो नृपतिः स्वयम्।

इति अस्य नारदस्य पूर्वार्धम्। न केवलं साक्षिवचनमात्रेण निर्णयोऽपि तु तद्वचनपरीक्षयाऽपि। तथा च तस्यां क्रियमाणायां यदि तद्वचनमबाधितं तदा तस्य प्रामाण्यम् अन्यथा तु तेन साक्षिष्वपि दोषकल्पना स्यादेवेति तत्परीक्षाविधिबलाद्गम्यत। अन्यथा तन्नियमवैयर्थ्यं स्यादेवेति भावः।

६। अन्यदप्याह * कात्यायनेनेति। ९ टमितस्तदर्थाप्रतीतेः कात्यायनोक्तं व्याचष्टे * क्रियेत्यादि। क्रियेत्यस्य व्याख्या *साक्षीति। निषेधा व्याख्या न्याय इति तं क्रमेणाह *नार्येति।

इत्थं च मनुः, (अ० ८। ६३। ६४। ६५। ६६। ६७)

सर्वधर्मविदोऽलुब्धा विपरीतांस्तु वर्जयेत्॥

नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः।

न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः॥

न साक्षी नृपतिः कार्यो न कारुककुशीलवौ।

न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः॥

नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्।

न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः॥

नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।

न श्रमार्त्तो न कामार्त्तो न क्रुद्धो नापि तस्करः॥ इति।

आध्यधीनो बन्धके धृतः। *शुद्धेति। तदापरीतेत्यर्थः। *वाक्यशुद्धिश्चेति। चस्त्वर्थे। उत्तरार्धार्थमाह *एवमिति। उक्तप्रकारेणेत्यर्थः। पूर्वार्द्धाविरोधाय न्यूनतानिरासाय च शुद्धाद्वाक्याच्चेत्यन्वयेन चसमुच्चेयमाह * शुद्धाया इति। *च वाक्यादिति। वाक्याच्चेत्यर्थः। * य इति। योऽर्थः शुद्धो ऽवगतो निश्चित इत्यर्थः। * स शुद्ध इति। शुद्धपदस्य व्याख्या * तथा भूत इति।सत्य इत्यर्थः।एवं तदुक्तेः शब्दार्थमुक्त्वा प्रकृतसंगतये तात्पर्यार्थमाह * करणेति। करणदोषश्च बाधकप्रत्ययश्च तयोरभावे सति अर्थोऽवितथ एव सत्य एवेत्यर्थः। *इत्यर्थ इति। इति तात्पर्यार्थ इत्यर्थः। अत्र यदा शुद्धेति पूर्वार्द्धेन साक्षिलक्षणक्रियारूपकरणगतदोषाभाव उच्यते। शुद्धावत्युपरार्धेन तु

बाधकप्रत्ययाभाव इति बोध्यम् ।

७। स्वयं, स्वयमेवातथा च विरोधः स्पष्ट एव । *स इति। सभ्यैस्तयैव क्रियया तस्य जयेऽवधृते निश्चिते सति स दुर्बल-क्रियाऽवलम्बी पुनस्तां बलवतीं क्रियां नाश्रयादित्यर्थः। उक्त-कालमिति निषेधक्रियाविशेषणम् । *निषेधात्, तत्कथनात् । अयं दर्शने हेतुः । कात्यायनः कर्त्ता ।

८। *नारदेनोक्तमिति। इति वदता नारदेनोक्तमित्यस्य तृती-यान्तस्य निषिद्धमित्यत्रान्वयः । एवव्यवच्छेद्यमाह * न प्राग-पीति । अपिनोत्तरस्य समुच्चयः। * उक्तेऽपीति । उक्ततात्पर्यार्थमुप-संहरति *तस्मादिति । *अपरितुष्यता, अर्थिना ।

९। विशेषमाह *एवं स्थिते इति। *असन्निहिताइति। ईदृशाः साक्षिणो ऽसंनिहिताः सम्भवन्तीत्यर्थः। * ते एवेति । पूर्वनि-र्दिष्टा एवेत्यर्थः । एवेनाभिहितवचननिरासः। ननु तेषामेव पुनः कुतो न प्रश्नो ऽतो मनुमाह * स्वभावेनैवेति। साक्षिणो व्याव-हारिकं व्यवहारागतं यत् वचनं स्वभावेनैव ब्रूयुस्तत् ग्राह्यमित्यर्थः।

अस्योत्तरार्द्धं, (अ० ८।७८)

अतो यदन्यत् विब्रूयुर्धर्मार्थं तदपार्थकम् । इति ।

साक्षिप्रकरणस्य व्यवहारविशेषप्रकरणापाठादाह * सर्व-व्यवहारेति। तथा चात्रापि व्यवहारः समापनीयः। तेन अर्थिना स्वीयप्रतिज्ञाया अन्यथाभावमज्ञात्वैव प्रथममेवान्येषामपि साक्षि-त्वेन निर्दिष्टत्वात्स्वभावेनैव प्रकृते तेषां वचनस्य सत्त्वादिति भावः । नारदमपि साधकत्वेनाह * निर्णिक्ते इति । पूर्वावेदि-ततो व्यवहारशुद्धौ प्रमाणान्तरमफलं, तदशुद्धौ तु प्रमाणमेवाप-रम् । इदमपि गुणवत्प्रमादानां पूर्वावेदनाभावे। तच्छुद्धत्वे तु ततो व्यवहारशुद्धिर्भासमानप्रकारोत्या तेषामप्रामाण्येन पूर्वमुभयावेदनेन

सामान्यला ॰न विशेषाणामसंभवेन तेनैव निर्वाह इति भावः।

१०। * ॰र्वानिर्दिष्टा इति सफलयन्विशेषान्तरमाह *पूर्वानिर्दिष्टानामिति। * तथाविधाः, ततो गुणवत्तमा द्विगुणा वा। एवव्यवच्छेद्यमाह *न दि॰॰मिति। मनुमाह *सम्भवे इति। ततोऽपि विशेषमा * तेषामिति। साक्षिणामित्यर्थः। * असम्भवे, भवेत्। अन्यथाऽ॰ पपत्त्येति भावः।

११ पूर्वपक्षे उक्तमनवस्थारूपदोषमेवं सति प्राप्तं परिहरति *अतः परमिति।

१२। स्वप्रत्ययबलादपरितुष्यता अर्थिना प्रमाणान्तरमङ्गीकार्यमित्युक्तं, नैवं प्रत्यर्थिन इति विशेषान्तरमाह *यत्र त्विति। मन्यमानस्येति प्रत्यार्थिविशेषणम्। *अवसरेति। प्रसङ्गेत्यर्थः। मिथ्या क्रिया पूर्ववादे इत्युक्तेरिति भावः। अवतारेति पाठान्तरम्। * व्यसनोद्भवेनेति। दुःखनिष्पत्त्येत्यर्थः। * कर्तव्यमिति। पूर्ववत्प्रमाणान्तरान्वेषणाभावेनागत्या प्रत्यर्थ्यपरितोषपरिपालनायेति भावः। * तत्र च, सप्तसु दिनेषु। तावतैव अगतेरिति भावः। सप्ताहादिति ल्यब्लोपे पञ्चमी। सप्ताहमभिव्याप्येत्यर्थः। अर्वागित्यध्याहार इति तु मेधातिथिः। उक्तवाक्यस्येति बहुव्रीहिः। साक्षिविशेषणम्। रोगादेर्विकल्पो बोध्यः। * सः, साक्षी। रोगो ऽत्यन्तपीडाकरः। अग्निर्गेहधनदाहः। पुत्रदारादिप्रत्यासन्नमरणं ज्ञातिमरणम्। इदं च तस्य कूटसाक्षित्वे लिङ्गम्।

१३। एवं सति प्रसक्तं ॰॰ याज्ञवल्क्ययोर्विरोधं परिहरति *एतच्चेति। यस्य दृश्येतेत्येतन्मनूक्तं च यस्योचुरिति मूलस्यापवाद इत्यर्थः। क॰॰न्विषय इत्याशङ्कायामाह *अपरितुष्यदिति। एवेन ॰॰॰॰॰॰॰॰च्छेदः। साक्षिभिः वाद्यभिमते एव साध्ये उक्ते यदि प्रत्यर्थी परि॰ष्यति तदा मूलवाक्योक्तः अ-

र्थिजयः प्रत्यर्थिपराजयः। तदा समाई साक्षिपरीक्षणमावश्य। यदा तु प्रत्यर्थिनो ऽपि तोषेण तत्परीक्षणावश्यकतया तन्मध्ये साक्षिदोषावधारणेन ते दोषवन्तस्तदा यस्येति मूलवाक्येन मूलवाक्यमपोद्यते इति प्रत्यर्थिनो जयोऽर्थिनः पराजय इति भावः। इदं च ऋणं गृहीत्वा याचनाकथायां दत्तं नैव वा गृहीतमित्युक्त्वा विपरीतं धर्मस्थानं प्रविशति तद्विषयकं बोध्यम्।

१४। उक्तेऽपीति मूलवाक्यस्यैकदेशिव्याख्यानं दूषयितुमनुवदति *केचिदिति। व्याचक्षते इत्यत्रान्वयः। अस्य द्विकर्मकत्वादेः कर्माह *वचनमित्यन्तेन। द्वितीयमाह *अर्थिनेत्यादीतीत्यन्तेन। *अर्थानुकूलमिति। अर्थ्यर्थानुकूलमित्यर्थः। अर्थ्यनुकूलमिति पाठस्तु सुगम एव। *विपरीतमिति। अर्थ्यर्थविपरीतं स्वानुकूलम् इत्यर्थः। अत्र पक्षे मूले पूर्वसाक्षिण इत्यत्र षष्ठीतत्पुरुष इत्याह *पूर्वस्येति। तदर्थमाह *वादिन इति।

१५। दूषयति *तदसदिति। *क्रियेति। क्रियाया एवानुपपत्तेरित्यर्थः। सामान्योक्तां तां विविच्य दर्शयितुमादावर्थिप्रत्यर्थिस्वरूपं प्रागुक्तमपि दार्ढ्यायाह * तथाहीति। अर्थ्यते इत्यर्थः साध्यं तदस्यास्तीति व्युत्पत्तेराह * साध्यस्येति। प्रत्यर्थमाह * तत्प्रतिपक्ष इति। * तदभावेति। साध्याभावेत्यर्थः। ननु भवतु तदभाववादित्वं प्रत्यर्थिनः तथापि क्रियानुपपत्तौ तस्य किमायातमत आह। *तत्राभावस्येति। तयोर्मध्ये इत्यर्थः। अयम्भावः। न भावो ऽभाव इति व्युत्पत्त्या भावाधीनत्वमभावस्वरूपस्य, तथा अभाव इत्युक्ते कस्येत्याकाङ्क्षायां घटस्येत्यादेः प्रयोगेण तस्य सप्रतियोगिकत्वात्प्रतियोगिभूतघटादिनिरूपणाधीननिरूपणत्वं, प्रतियोग्यधिकरणाभ्यामभावो निरूप्यते इति। अत एव तन्त्रान्तरे उक्तं, प्रध्वंसाभावस्यापि भावस्वरूपसिद्ध्यु-

च कालिकत्वमिति । सर्वथा भावसि॰ सापेक्षसिद्धित्वमभाव-
स्य । भावस्य त्वेत परीत्याप्रच्छरीरे तद् ... तत्स्वरूप
सिद्धिर्न त्वभावापेक्षया सिद्धिरिति अभावसि॰ निरपेक्षसिद्धिक-
त्वं भावस्य । एवं च सापेक्षनिरपेक्षसिद्धिकयोरभाव॰ ।वयोमध्ये
निरपेक्षसि॰ कत्वेन भावस्यैव साध्यत्वं युक्तमिति । ननु अभा-
वस्य सापेक्षसिद्धिकत्वेऽपि साध्यता कुतो नास्ति इत्यत आह
* अभावस्येति । भावस्य साक्षात्साक्ष्यादिरूपप्रमाणप्रमेयत्वम्
अभावस्य तु न साक्षात्, अपि तु भावद्वारा । तथा च साक्षा-
त्प्रमेयस्यैव साध्यत्वं नातिभूयस्या परम्परया प्रमेयस्येति भावः।
फलितमा॰ *अतश्चेति । एवं च प्रत्यर्थिनस्तद॰पपत्तिस्तु सिद्धे-
ति भावः ।

१६। वाचानिकोऽप्ययमर्थ इत्याह *अपिचेति। *सर्वत्रैव, न
केवलमत्रैव। नन्वेवमपि व्यवहारभेदवदत्रा॰भयोरप्यत्र क्रिया
आस्तामिति न दोषो ऽत आह *न चैकस्मि॰ति । नापीत्य-
र्थः । कातीयमाह * न चैकस्मिन्निति । दूषणमुपसंहरति
* तस्मादिति ।

१७। पूर्वोक्तस्या... तस्यार्थान्तरप्रतिपाद॰-
भा॰ त्वेकदेश्युक्तिमेव दू॰यितुमुद्भावयति *अथ मतमिति । सामा-
न्योक्तं विशिष्याह *मदीयमिति। तत्र कालविशेषोक्तौ तत एव
निर्णयस्य प्रागुक्तरीत्या सम्भवादाह * पूर्वापरेति । प्राप्तौ त-
द्राहित्यमेवानाकलनम् । ननु एवमपि साक्षिभिस्तत्र निर्णयः
स्यादत आह * तत्रेति । अत एवाह * कस्येति । नारदमा
*द्वयोरिति । व्याख्यातमिदं प्राक् । ... काला॰करा॰
* यः पूर्वं निवेद॰... प्राप्तिपूर्वत्वाज्ञानेऽपि निवेदन॰त्वज्ञाने-
न तत्र निर्णय इति भावः । * स्थिते इति । सि॰न्त इत्यर्थः ।

तस्यायमपवाद इत्युक्तं, तत्र क्वायमपवाद इत्याकाङ्क्षायामपवादविषयं वक्तुमादावुत्सर्गवि-
षयमाह * अतश्चेति । अस्य तदपवादत्वाच्चेत्यर्थः । समेत्या-
दिना ऽपवादविषयता सूचिता । अपवादविषयमाह * यदा तू-
त्तरेति । अयमेव प्रतिवादी । तथा चास्मिन्नेव विषये ऽपवादत्व-
मिति भावः । एवं व्याख्याय प्रागुक्ताद्यदोषाभावमाह * एवं
चेति । ... चेत्यर्थः । ननु एवमपि पूर्वोत्त-
रयोर्वादिनोः ... समत्वे पूर्ववादिनः साक्षिणः प्रष्टव्या
इत्याद्युक्त्या एकस्मिन्विवादे द्वयोः क्रियाप्रसङ्गाभावेन प्राङ्न्या-
येति न चैकस्मिन्विवादे इति च कात्यायनविरोध इत्यग्रिमदो-
षद्वयं तदवस्थमेव, अत आह * चतुर्विधोत्तरेति । चोऽन्ते यो-
ज्यः । सत्यमिथ्याकारणप्राङ्न्यायोत्तरेष्वेव क्रियाव्यवस्था वा-
दिप्रतिवादिनोर्द्वयोः क्रियाऽभावश्च, ... तु द्वयोरपि प्र-
तिज्ञावादित्वेन तद्विलक्षणत्वाच्च क्रियाव्यवस्था द्वयोः क्रियाभा-
वश्चेति न द्वितीयतृतीयदोषाविति भावः । तृतीयदोषं प्रतिब-
न्द्या ... अन्तरेणापि खण्डयति * एकस्मिन्निति । स्थलविशेषे
प्रागुक्ते इत्यर्थः । * परमते, सिद्धान्तिमते । * तथेति । अत्र
पक्षे इति शेषः । यथा सिद्धान्तिमते साक्षिभिः साक्ष्ये उक्ते स-
ति यत्र प्रति...तायस्यान्यथात्वेन स्वान्तःकरणप्रत्ययाभावात्प्र-
माणान्तराङ्गीकरण... वमस्मिन्मतेऽपि ...वादिप्रतिवादिनोः क्रि-
याद्वयम्, ना... वचने जा...त्यपि यथा स्वान्तःकरणप्रत्ययाविसंवा-
दित्वेनाङ्गीकरीत्या तत्र मते प्रमाणान्तराङ्गीकरणं तथास्मिन्मतेपि
न चैकस्मिन्निति कात्यायनवचन जा...त्यपि ... विवा-
दे तयोः क्रिया...यमिति भावः । ...तिमतसमाप्ता ।

१८। इदमपि दूषयति * तदपीति । * आचार्यः, विश्वरूपा-

र्थः।विश्वरूपविरुद्धोक्तिविस्तारात्मकत्वेनास्य ग्रन्थस्य तदनुपयोगित्वात् । * इत्यतः शब्दादिति । अस्मा वचनादित्यर्थः । एवं शाब्दत्वं निरस्य व्य त्वं निराच * अर्थादिति । प्रयोजनादित्यर्थः। * प्रकरणं, वक्तृश्रोतृ इत्यता। किं च प्रकृतोदाहरणे ताभ्यां तथो वपि साक्षिणां साम्येऽपि प्र कारत्या कालादिनिश्चयद्वारा निर्णयसम्भवेन न तदर्थम चोपयोगः । किं च नक दाहरणमिति न्यायेन सामान्यशा प्रणयनानर्थक्यमिति तथैवोचितमिति दिक् । तदाह * त्यलमिति ॥ ८० ॥

मि० कूटसाक्षिणो दर्शिताः, तेषां दण्डमा ।

या० पृथक्पृथग्दण्डनीयाः कूटकृत् साक्षिणस्तथा ।
विवादाद् द्विगुणं दण्डं विवास्यो ब्राह्मणः स्मृतः॥८१॥

मि० यो धनदानादिना कूटान् साक्षिणः क तीति स कूटकृत् साक्षिणश्च ये तथा कूटाः ते विवादाद्विवादपराजये यो दण्डस्तत्र तत्रोक्तः तं दण्डं द्विगुणं पृथक्पृथक् एकैकशः दण्डनीयाः। ब्राह्मणस्तु विवास्यो राष्ट्रान्निर्वास्यो न दण्डनीयः । एतच्च लोभा कारणविशेषापरिज्ञाने अनभ्यासे च द्रष्टव्यः । लोभादिकारणविशेषपरिज्ञाने अभ्यासे च—

मनुनोक्तम्, (अ० ८ श्लो० १२०।१२१)

लोभात्सहस्रं दण्ड्यः स्यान्मो त्पूर्वं तु साहसम्।
भयात् द्वौ मध्यमौ दण्ड्यो मैत्र्या पूर्वं च गुणम्॥
कामात् दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञाना द्वे शते पूर्णे बाल्या तु ॥इति।
तत्र लोभोऽर्थलि । मोहो विपर्ययज्ञान ।

भयं त्रासः । मैत्री स्न ातिशयः। कामः स्त्रीव्य-
तिकराभिलाषः। क्रोधोऽमर्षः।अज्ञानमस्फुटं ज्ञानम्।
बालि यं ज्ञाना त्पादः। सहस्रादिषु तास्ते काः पणा
गृह्यन्ते ।

तथा, (मनु० अ० ८. श्लो० १२३.)

तत्सकृं तु कुर्वाणांस्त्रीन्वर्णान्धार्मिको नृपः ।
प्रवासये दण्डयित्वा ब्राह्मणं तु विवासयेत् ॥इति।

एतच्चाभ्यासाविषयम् । कुर्वाणानिति वर्तमानका-
लनिर्देशात् । त्रीन्वर्णान् क्षत्रियादीन् पूर्वोक्तं दण्ड-
यित्वा प्रवासयेत् मारयेत् । अर्थशास्त्रे प्रवासशब्दस्य
मारणे प्रयोगात् । अस्य चार्थशास्त्रस्वरूपत्वात् । त-
त्रापि प्रवासनमोष्ठच्छेदनं जिह्वाच्छेदनं प्राणवियोजनं
च कौटसाक्ष्यविषयानुसारेण द्रष्टव्यम् ।

ब्राह्मणं तु दण्डयित्वा विवासयेत् स्वराष्ट्रान्नि-
ष्कासयेत् । यद्वा । वाससो विगतो विवासाः विवा-
ससं करोतीति णिचि कृते णाविष्ठवत्प्रातिपदिकस्ये-
ति टिलोपे रूपम् । नग्नीकुर्यादित्यर्थः । अथवा । वस-
न्त्यस्मिन्निति वासो गृहं विवासयेत् भग्नगृहं कुर्यादि-
ति । ब्राह्मणस्यापि लोभादिकारणविशेषापरिज्ञाने
अनभ्यासे च तत्र तत्रोक्तो दण्ड एव । अभ्यासे त्व-
र्थदण्डो विवासनं च । तत्रापि जातिद्रव्याद्यनुबन्धाद्य-
पेक्षया विवासनं नग्नीकरणं गृहभङ्गो देशान्निर्वासनं
चेति व्यवस्था द्रष्टव्या । लोभादिकारणविशेषापरि-
ज्ञाने अनभ्यासे चाल्पविषये कौटसाक्ष्ये ब्राह्मणस्या-
पि क्षत्रियादिवदर्थदण्ड एव । महाविषये तु देशान्नि-

वा धनमेव । अब्राह्मणानां तु शारीरमेव मनूक्तं द्रष्ट-
व्यम् । न च ब्राह्मणस्यार्थदण्डो नास्तीति मन्तव्यः ।
अर्थदण्डाभावे शारीरदण्डे च निषिद्धे स्वल्पेऽप्यप-
राधे नग्नीकरणमङ्काङ्करणविप्रवासनं दण्डाभा-
वो वा प्रसज्येत ।

चतुर्णामपि वर्णानां प्रायश्चित्तमकुर्वताम् ।
शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥

इति स्मरणाच्च । (मनु० ९।२३६)

तथा, (मनु० अ० ८ श्लो० ३७८)

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन् ।

इति स्मरणात् ।

यत्तु शङ्खवचनम्,

त्रयाणां वर्णानां धनापहारवधबन्धक्रिया विवा-
सनाङ्ककरणं ब्राह्मणस्येति,

तत्र धनापहारः सर्वस्वापहारो विवक्षितो वध-
साहचर्यात् ।

शारीरस्त्ववरोधादिर्जीवितान्तः प्रकीर्तितः ।
काकिण्यादिस्त्वर्थदण्डः सर्वस्वान्तस्तथैव च ॥ इति-
वधसर्वस्वहरणयोः सह पाठात् ॥ (ना० परि० ५४)

यदप्युक्तम्, (मनु० ८।३८० उ०)

राष्ट्रादेनं बहिः कुर्यात्समग्रधनमक्षतम् । इति,

तत् प्रमत्तसाहसविषयं, न सर्वविषयम् । शा-
रीरस्तु ब्राह्मणस्य न कदाचिद्भवति ।

(अ० ८ श्लो० ३८० पू०)

न जातु ब्राह्मणं हन्यात्सर्वपापेष्वपि स्थितम् ।

इति सामान्येन मनुस्मरणात् ।

तथा, (मनु. अ. ८. श्लो. ३८१)

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि ।

तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत् ॥इति॥८१॥

बा० १। *दर्शिता इति । अनुपदमेवेति भावः। अन्येऽपि ते ऽन्यत्र स्पष्टाः। यद्यपि कूटकृतश्च ते साक्षिणश्चेति व्याख्यानं संभवति तथापि तथेत्यस्यावैयर्थ्याय भेदेन व्याचष्टे *य इति । आदिना सामादिपरिग्रहः । कूटान्साक्षिण इति पाठः । मिथ्याभूतानिति तदर्थः । साक्षिण इति विशेष्यस्य प्रकरणाल्लाभः । अत एवाह * साक्षिणश्चेति । तथेत्यस्य व्याख्या *कूटा इति । *ते, प्रागुक्ताः सर्वे । विवादादित्यस्य सांनिध्यात् द्विगुणमित्यत्रान्वयेन तदास्पदद्रव्यादित्यर्थे तस्यानियमेन अनियतदण्डापत्तिः, तस्य स्वल्पत्वेन च बहुदण्डापत्तिः, अतोऽन्यथा व्याचष्टे * विवादादिति । हेतौ पञ्चमी । पराजये तस्य लक्षणा । पूर्वत्रापि तस्याः सत्त्वेनात्राविशेषात्। दण्डे चान्वयः। तदाह *विवादपराजये इति। सतीति शेषः। [१]प्रत्येकन्यायेन समुदाये दण्डविश्रान्तिवारणायाह *पृथगिति । इदं द्वितीये सफलम् । दण्डं दण्डनीया इति धनपेषं पिनष्टीतिवत् प्रयोगः । लक्षणा वा ।

२। तुर्यपादार्थमाह * ब्राह्मणस्त्विति। तुर्वैलक्षण्ये। निर्वासनं बहिष्कारः । अत एव विवासव्यतिरेकमाह । *न दण्ड्य इति । उक्तदण्डाविषयो नेत्यर्थः ।

३। मन्वविरोधाय संकोचेन विषयविशेषपरत्वमाद्यार्थस्या-

---

१ पृथक् पृथक् दण्डनीया इति कथनं द्वितीये साक्षिविषये सार्थकम्। तेषां बहुत्वात् । न तु श्लोके प्रथमोक्ते कूटकृति। तस्यैकत्वात् इत्यर्थः।

ह * एतच्चेति । पादत्रयोक्तं चेत्यर्थः । तत्र आद्ये आह *लोभादिति । दण्ड्य इत्यस्याग्रे ऽनुषङ्गः । *पूर्वं तु साहसं, स पणशतद्वयम् । भयात् द्वौ मध्यमौ दण्ड्य इति पाठः । साहसावित्यर्थः । पणसहस्रामिति यावत् । भयाद्वै मध्यमो दण्ड्या इति त्वपपाठः । असम्बद्धत्वात् । * पूर्वं, पूर्वसाहसम् । *चतुर्गुणं, पणसहस्र । एवमग्रेऽपि । *परम्, उत्तमसाहस । *त्रिगुणम्, पणसहस्रत्रयम् । पूर्वापेक्षया परो मध्यमसाहसस्तस्मिन् त्रिगुणे पञ्चदश शतानि संपद्यन्ते इति कल्पतरुः । पौनरुक्त्याभावाय हेतून् व्याचष्टे *लोभ इत्यादि । मैत्र्या इति पाठ इत्याह * मैत्रीति । मैत्र्यादिति पाठान्तरम् । ष्यञन्तो ऽञन्तश्चायम् । व्यतिकरः संबन्धः । नञो ऽल्पार्थत्वेनाह *अस्फुटमिति । एतेन व्यवहारकाले एव विपरीतं ज्ञानमिति कल्पतरूक्तमपास्त । मोहेन पौनरुक्त्यापत्तेः । *बालिश्यं ज्ञानेति । तदुत्पत्तिप्रागभाव इत्यर्थः । बालिश्यमत्राप्राप्तमात्रयौवनत्वं न बाल्यम् । तस्य साक्ष्यनिषेधादिति मेधातिथिकल्पतर्वादयः । पूर्वाध्यायान्तोक्तावष्टम्भेनाह *सहस्रादिष्विति । तथा च पणानां सहस्रामित्याद्यन्वयः ।

४। एवं लोभादिकारणविशेषपरिज्ञाने दण्डमुक्त्वा कौटसाक्ष्याभ्यासे दण्डविशेषं तदुक्तमेवाह *तथेति । शब्दतस्तद्विषयत्वाप्रतीतेस्तत् स्पष्टयति * एतच्चाभ्यासेति । यद्यपि सकृदपराधे पूर्वमुक्तत्वात् अर्थादेवेदमभ्यासविषयं दण्डाधिक्योक्त्या परिशिष्यते, तथापि शाब्दत्वमप्यस्येति सूचनायाह *कुर्वाणानितीति । वर्त्तमानार्थकलट्स्थानिकशानजादिनिर्देशादित्यर्थः । अयंभावः । अनभ्यासे एकदैव कृतत्वेन भूतार्थकक्तवत्वन्तेन कृतवत इति निर्देष्टव्ये वर्त्तमानार्थकलट्स्थानिकशानजन्तेन कुर्वाणानि तथा क्रियायाः प्रारब्धापरिसमाप्तत्वरूपवर्त्तमानत्वेन पुनः पुनः कौट-

सा याभिधानस्यापरिसमाप्तत्वाद्धृतकानत्वमेव तस्येत्यभ्य ा -
यत्वस्यैवास्य चना ादिति । अत्र यतः कौटसाक्ष्यं तत एव पुनः
नराभिधानं न तु पुनःपुनः प्रश्नपूर्वकमिति न पूर्वविरोध इति
बोध्यम् ।

५। इदं व्याचष्टे विशेषं वक्तुं * ीन्वणानिति । ब्राह्मणस्य
दण्डान्तरविधाना ाह * क्षत्रियादीनिति । दण्डस्यात्रा कत्वा-
दाह * पूर्वोक्तमिति ।

एताना ः कौटसाक्ष्ये प्रोक्तान्दण्डान्मनीषिभिः ।
धर्म या व्यभिचारार्थमधर्मनियम य च ॥

इतिश्लोकमात्रव्यवहितेन लोभादित्यादिनोक्तमित्यर्थः । न-
नु प्रवासयेदित्यस्य कथमयमुक्तोऽर्थोऽत आह * अर्थेति ।
*प्रवासेति । उपसर्गान्तरासंसृ स्येत्यर्थः । अतः—

सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासये —(याज्ञ० २।२७०)

इतिस्तेयप्रकरणस्य लविरोधो नेति बोध्यम् । नन्वस्य
धर्मशा त्वेन कथं तथा, अत आह *अस्य चेति। कौटसा ्यमिति
वचनस्येत्यर्थः । एतदन्त तमपि तदस्तीति प्राक् प्रतिपादित ।

६। मा णमव केवलं सर्वत्र नार्थः किं त्वन्योऽपीति तस्या-
नेकविधत्वमाह * तत्रापीति । अर्थशास्त्रेऽपीत्यर्थः । *कौटसा-
ाविषयेति । तत्र नेत्यर्थः ।

७। एतत्पुर्यपा ायमाह *ब्राह्मणं त्विति । ासनस्य मू-
लेऽ कत्वेनाभ्यासे आधिक्यस्यापे ितत्वेन मध्यपातिद -
ायित्वेत्य च मध्यमणिन्यायनान्वयादाह * ण्डयित्वेति ।

८। अथान्तरमा *यद्वेति । एवमग्रेऽपि । व श्रीहेलाघवा-
त्तर रूपमाह । *वासस इति । *वासो गृहमिति । हलश्चेत्यधि-
करणे घञ् । अग्रे प्रक्रिया पूर्ववत् । इतिः मन्वर्थसमाप्तौ ।

९। ननु मूलेन विवासनस्य तस्योक्तत्वेन ब्राह्मणस्य किं सर्वत्र सा ··विषये । ·वासनमेव नार्थदण्ड इति चेन्न, सोऽपि हि अस्तीत्याह * ब्राह्मणस्यापीति । प्रकृत··विषयत्वाभावा··ह * तत्र तत्रोक्त इति । * अभ्यासे त्विति । लोभा··कारणविशेषपरिज्ञाने इत्यादिः ।' अत्रापि एतद्विषयत्वादव्यवहितम··क्तमाह *अर्थदण्डो विवासनंचेति । तदुक्तार्थदण्ड इत्यर्थः ।

१०। अत एव विशेषं प्रा··क्तमेवाव्यवस्थया व्यवस्थितमा *त··पीति । ··सनांशेऽपीत्यर्थः । अनुबन्धो गुणः । नग्नीक··णमिति पाठः ।

११। एवं तत्परि··न उक्त्वा तदपरिज्ञाने आह *लोभादीति । अत्र कस्यापि प्रा··क्तस्यांशमात्रविशेष्या··क्त्वाप्याह * क्षत्रियादिवदिति । एवेन ··लोक्तविवासननिरासः । विषयस्याल्पत्वात्त··ण्डस्य महत्त्वात् ।

१२। नन्वेवं ··ल्तृयपादस्य निर्विषयतापत्ति··त आह *म··विषयेत्विति । ··निमित्त एवेति भावः । विषयभेदमात्र·· अन्यत्सर्वं प्राग्वत् । *निवासनमे··ति । मूलेन तस्यवोक्तत्वा· । मनूक्ताविषयत्वा· । विशिष्य दण्डानुक्तत्वा· सामान्योक्तस्थानेन बाधाचेति भावः । ··वेनार्थदण्डनिरासस्तथासतीति तात्पर्य· ।

१३। *अ··पीति । लोभा··कारणविशेषापरिज्ञाने म··विषयेऽपीत्यर्थः । *सर्वेषां, ब्राह्मणादीना· । एवेन दण्डांशे व·· न्यूनिरासः । ··विषयत्वादा·· * मनूक्तमिति । ···सा··· नेनोक्तमित्यर्थः । यद्वा । म··क्तत्वेन साम्यादुभयांशेऽप्येव··ऽप्यं बोध्यम् । यद्वा एवो व्युत्क्रमे । म··क्तमेवेत्यर्थः । अन्याविषयक··सूचक एवकार इति बोध्यम् ।

१४। न चेति । समग्रधनवत्त्वाभित्या··क्तोविध्य··फलाभावेति भा-

वः। तथा च मानवे दण्डयित्वेति व्याख्यानेनेति बोध्यम्। तत्रा-दौ युक्तिमाह *अर्थदण्डाभावे इति। यत इत्यादिः। *निषिद्धे इति। न शारीरो ब्राह्मणस्य दण्ड इति गौतमादिनेति भावः। मूलस्य मनुतुल्यार्थकत्वेन तद्भाष्यमाह * नग्नीकरणेति। अन्य-त्राङ्कनस्याशक्तत्वादाह *अङ्ककरणेति। समाहारद्वंद्वः। एतदन्य-तममित्यर्थः। ननु दण्डस्य महत्त्वेनापराधस्याल्पत्वेन वैषम्येणा-योग्यतया कथमतत्प्रसक्तिरत आह *दण्डाभावो वेति। अन्यदण्ड-स्यानुक्तत्वात्। न चेदं युक्तं, दण्ड्यादण्डने राज्ञो दोषस्योक्त-त्वात्। अधर्मव्याप्तेश्चेति भावः।

१५। ननु धिग्दण्डवाग्दण्डावुक्तावेवेति तौ यथासंभवं तत्र भ-विष्यतोऽत आह * चतुर्णामिति। मनूक्तिरियम्। अत्र शारीर-मिति क्षत्रियादिपरम्। धनसंयुक्तमिति साधारणम् इति भावः। धर्मादनपेतं धर्म्यम्।

१६। ननु—

ब्रह्महा च सुरापश्च स्तेयी च गुरुतल्पगः।

एते सर्वे पृथक् ज्ञेया महापातकिनो नराः॥

चतुर्णामपि चैतेषां प्रायश्चित्तमकुर्वताम्।

शारीरमित्यादिः तत्र पाठो दृश्यते। एवं चाब्राह्मणपरतया-ऽप्युपपत्तिरस्य। अत एव शारीरं धनसंयुक्तमित्यस्य स्वरसतस्सं-गतिः। तस्य च दश स्थानानि उपस्थमुदरमित्यादिनोक्तमित्यत इति नेदं साधकम्। अत एव—

यमस्मृतिरपि,

सर्वेषामेव वर्णानामन्योन्यस्यापराधिनाम्।

शारीरं कारयेदिति। तादृशानां क्षत्रियादिवर्णानां सर्वेष्वपि ब्रह्महननादिष्वित्याद्यर्थः। अधिकब्राह्मणस्य संबन्धित्वेन विवक्ष-

या षष्ठी । एवोऽप्यर्थे । अत आह *स [illegible]मिति । [illegible] प्रकरण म- [illegible]करियं च । *स्मरणादिति । स्म [illegible] णावेत्यर्थः । आदौ तथेति पाठे ऽत्रापपाठः ।

१७। नन्वेवं शङ्खविरोधः। तत्र त्रयाणां क्षत्रादी[illegible] धनाप[illegible]रादि-त्रय[illegible]क्त्वा ब्राह्मणस्य विवासना [illegible]करणयोरेवोक्तत्वात् । तथा च स्थलविशेषे तथा सत्त्वेऽपि सामान्येनार्थदण्डस्तस्य नैव युक्तो ऽत आह *यत्तु शङ्खेति । *त्रयाणां, क्षत्रियादीना[illegible] । *धना-पहारेति । वधश्च बन्धक्रिया च तौ। धनापहारश्च ते च ता इत्यर्थः। विवासनेति समाहारे द्वंद्वः । * सर्वस्वेति । तथा च तयोक्त्या ब्रा-ह्मणस्य [illegible]करणं तात्पर्यतो निषिध्यते, [illegible] भावः । ननु प्रकृते वधशब्दसान्निध्येऽपि सर्वस्व[illegible]रणस्य तत्साहचर्यस्यान्यत्रादृष्टत्वा[illegible] प्रकृते तत्स[illegible]पाठमात्रेण कथं तस्य तत्परत्वमत आह * शारीरस्त्विति । मानवमेवेद[illegible] । *जीवितान्तः, तद्ग्रहणान्तः। एवमग्रेऽपि। प्रकीर्त्तित इत्यस्योभया-न्वयो मध्यमणिन्यायेन । तथा च अर्थदण्डस्तु तदा[illegible]दिस्तद[illegible]ः प्रकीर्तितः । * च, किञ्चायं * तथैव, तत्सदृश एवेत्यर्थः ।

१८। मनुविरोधं परिहरति * यद[illegible]क्तमिति । *प्रकृतेति । स्त्रीस[illegible]हणाख्यप्रक्रान्तसाहसविषयकमित्यर्थः । प्रकरणादेवेति भावः ।

१९। ननु सहपाठेन तथा साधनवत् शारीरस्यापि ब्राह्मण[illegible]य प्राप्तिः स्यादत आह * शारीरस्त्विति । * कदाचि[illegible], कदाचि-दपि । राष्ट्रादित्यस्य प्राचीनं मानवमा[illegible] * न जात्विति । स-र्वपापेषु स्थितमपि ब्राह्मणं [illegible] न हन्यादित्यर्थः । *सामान्येनेति । घातकसामान्येनेत्यर्थः ।

२०। अक्षतमित्या[illegible]ममपि मानवं हेत्वन्तरतया आह *तथेति ।

... । * ब्रूयात्, अधिकः । * इतीति । सामान्य- मनु-
स्मरणादित्यस्या- र्थः । अपश्रितमिदं प्राक् तत एव बोध्यम् ॥८१॥

मि० अपिच ।

या० यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत् तमोवृतः।
स दाप्योऽष्टगुणं दण्डं ब्राह्मणं तु विवासयेत् ॥ ८२ ॥

मि० यस्तु साक्षित्वमङ्गी- त्यान्यैः साक्षिभिः सह
साक्ष्यं श्रावितः सन् निग- काल तमो- तो रागाद्याक्रा-
...ः तत् साक्ष्य- अन्येभ्यः साक्षिभ्यो निह्नुते,
ना- मत्र साक्षी भव- मीति,

स विवा- पराजये यो- ण्डस्तं दण्डमष्टगुणं दाप्यः।
ब्राह्मणं - नरष्टगुणद्रव्यदण्डदाना- मर्थं विवास-
येत् । विवा- नं च नग्नीकरणम् . मङ्ग- शानिवासनल-
क्षणं विषया- सारेण द्रष्टव्यः । - तरेषां त्वष्टगु-
णद्रव्य- ण्डासंभवे स्वजात्- चितकर्मक- र्मानगडबन्ध-
नकाराग्- प्रवेशादि द्रष्टव्यम् ।

एतच - वक्ष्लोकेऽप्यनुसर्तव्यम् । यदा सर्वे सा-
क्ष्यं निह्नुवते तदा सर्वे समान- षाः। यदा तु साक्ष्य-
मुक्त्वा पुनरन्यथा वदन्ति तदाऽनुबन्धाद्यपेक्षया दण्ड्याः।

यथाह क- त्यायनः,

उक्त्वाऽन्यथा ब्रुवाणाश्च दण्ड्याः स्युर्वा- छलान्विताः।
इति ।

न चान्येनोक्ताः साक्षिणोऽन्येन रहस्य- सर्तव्याः।
यथाह नारदः, (व्य० प० १ । १६५)
न परेण स- दिष्टमुपेयात्साक्षिणं रहः ।

भेदयेच्चैव चान्येन हीयेतैवं समाचर ॥इति॥८२॥

बा॰ १।*अपिचेति।साक्षिणा कृदोषान्यदोषे ण्डान्तरमाहेत्यर्थः। अत एव तुरुक्तवैलक्षण्ये।न ददातीतिभागुक्त ल पानरुक्त्वायाह* अङ्गीकृत्येति। ल्यबन्तस्य निह्नुते त्यत्रान्वयः। अन्यैरित्यादे रपेणान्वयः। * साक्ष्यमिति। यत्यादिः। *निगदकाले, भाषणकाले। इदमर्थलब्धम्। तेषां तमःकार्यत्वादाह * रागादीति। हेतुगर्भविशेषणमिदम्। तदित्यस्यार्थे प्रक्रान्तत्वादाह * साक्ष्यमिति। प्रकृतत्वादेवान्यशब्दार्थमाह * साक्षिभ्य इति। निह्नवमेव। * ... । विवादादित्यस्योक्तार्थकस्या तेराह * विवादेति। ननु यः स इति सामान्योक्त्या पादत्रयोक्तदण्डस्य सर्ववर्णविषयत्वं सकृदपराधे नाभ्यासे, त...वात्। तमोवृत इति हेतूक्त्या तत्रापि लोभा कारणसामान्यपरि...नविषयत्वेऽपि न तद्विशेषपरिज्ञानविषयत्वम्। गमकाभावात्। एवं साक्ष्याङ्गीकारादि वकानिह्नवदोषस्य पूर्वत आधिक्येन द्वि णदण्डादष्टगुणदण्डोक्तावपि तद्वदस्याप्यर्थलोभादिविषयत्वं न महाविषयत्वम्। एवं सति अत्र थपादेन सामान्यप्र साष्ट णदण्डापवादेन विप्रस्य कथं विवासनविधिः। न हि पूर्वदण्डोऽपि महाविषयक एवेति वक्तुं शक्यम्। तत्र विवासनस्यैव व्यवस्थापितत्वा अत आह * ब्रा णमिति।

२। त्वर्थमाह * पुनरिति। स्वल्पे ऽपराधे व दण्डस्यायोग्यत्वात् ब्राह्मणेऽर्थदण्डस्या पदमेव व्यवस्थापितत्वादाह * अष्टगुणेति। अयं भावः। यद्यपि साम न्येनार्थदण्ड उपदिष्टो योगिना तथापि त नसमर्थे मत्येवाय पदेशो नासमर्थे मतीत्य वक्तव्यम्। अन्यथा मुनेर्भ्रान्तत्वापत्तिः। तथाच ब्राह्मणस्यापि तत्सामर्थ्ये तद्विषयेऽयमेव मुख्यः। एतत्सम्भवेऽनुकल्पो विवास ।

एतद्वैलक्षण्यसूचक एव तुः । सर्वथा तस्य शारीरदण्डाभावेन सेवादिनिषेधेनच अनुकल्पान्तरस्यासम्भवात् सर्वथा दण्डाभावे राज्ञो दोषश्रवणात् प्रागुक्तविवासनमेव तस्यानुकल्प इति । एतेन प्रधानक्रियानिरूपितवैलक्षण्यसूचकतुशब्दविरोधात् अष्टगुणेत्यादि चिन्त्यमिति वीरमित्रोदयोक्तमपास्तम् ।

३। पुनः स्पष्टार्थमाह * विवासनं चेति । एतत्त्रितयस्वरूपमित्यर्थः ।

४। नन्वेवं क्षत्रादेरपि तदसम्भवेऽनुकल्पो वाच्योऽन्यत्रात्र चानुक्तत्वात्, अतः प्रागुक्तरीत्या न्यूनतां निराचष्टे * इतरेषां त्विति । क्षत्रियादीनामित्यर्थः ।

५। सिंहावलोकनन्यायेन तत्रापि न्यूनतां निराचष्टे * एतच्चेति। विप्रस्य दण्डदानासमर्थस्य विवासनं क्षत्रादीनां तदसमर्थानां कर्मकरणादीति यदुक्तं तदित्यर्थः ।

६। य इत्याद्युक्तेरेकस्यैवेदम् इति भ्रमनिरासायाह*यदेति । *समानेति । प्रागुक्तरीत्या पृथक् पृथक् दण्ड्या इत्यर्थः । तथाच मूलमुपलक्षणं, ग्रहं संमार्ष्टीतिवत् उद्देश्यविशेषणमेकत्वमविवक्षितं वेति न न्यूनतेति भावः ।

७। विशेषमाह *यदात्विति । *तदाऽनुबन्धेति । जातिद्रव्यगुणाद्यपेक्षयेत्यर्थः । *उक्त्वेति । उक्तेति पाठे समस्तम् । तत्र हेतुमाह * वागिति । वाचश्छलमन्यथात्वं तदन्विता इत्यर्थः ।

८। विशेषान्तरमाह *न चेति । नापीत्यर्थः । प्रकारान्तरमपि न कार्यमित्याह * भेदयेदिति । स्वयं रहसि अगमनेऽपि अन्यद्वारा भेदोऽपि न कारणीय इत्यर्थः । अत एव चोक्तिः । मूले रह इत्यव्ययम् । एतत्फलमाह * हीयेतैवमिति ॥ ८२ ॥

मि॰ साक्षिणामवचनमसत्यवचनं च सर्वत्र प्रतिषिद्धं, तदपवादार्थमाह ।

या॰ वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ।

मि॰ यत्र वर्णिनां शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधः संभाव्यते तत्र साक्ष्यनृतं वदेत्, सत्यं न वदेत् । अनेन च सत्यवचनप्रतिषेधेन साक्षिणः पूर्वप्रतिपन्नस्यावचनमनृतवचनं चाभ्यनुज्ञायते । यत्र शङ्काभियोगादौ सत्यवचने वर्णिनो वधोऽनृतवचने न कस्यापि तत्रावचनानृतवचनाभ्यनुज्ञायते । यत्र तु सत्यवचनेऽर्थिप्रत्यर्थिनोरन्यतरस्य वधोऽसत्यवचने चान्यतरस्य वधस्तत्र तूष्णींभावाभ्यनुज्ञा, राजा यद्यनुमन्यते । अथ राजा कथमप्यकथने न मुञ्चति तदा भेदात् असाक्षित्वं कर्तव्यम् । तस्याप्यसंभवे सत्यमेव वदितव्यम् । असत्यवचनेन वर्णिवधदोषोऽसत्यवचनदोषश्च । सत्यवचने तु वर्णिवधदोष एव । तत्र च यथाशास्त्रं प्रायश्चित्तं कर्तव्यम् ।

मि॰ तर्ह्यसत्यवचने तूष्णींभावे च शास्त्राभ्यनुज्ञया प्रत्यवायाभाव इत्यत आह ।

या॰ तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ॥८३॥

मि॰ तत्पावनाय अनृतवचनावचननिमित्तप्रत्यवायपरिहाराय सारस्वतश्चरुर्द्विजैरेकैकशो निर्वाप्यः कर्तव्यः । सरस्वती देवता अस्येति सारस्वतः । अन्नमस्रावितान्तरूष्मपक्वौदने चरुशब्दः प्रसिद्धः ।

इहायमभिसन्धिः । साक्षिणामनृतवचनमवचनं

च यन्निषिद्धं तादर्थ्याभ्यनुज्ञातम्। यत्तु नानृतं वदेत्,

अब्रुवान्विब्रुवन्वापि नरो भवति किल्बिषी।

इति च सामान्येनानृतवचनमवचनं च निषिद्धं त-दतिक्रमनिमित्तमिदं प्रायश्चित्तम्। न च मन्तव्यम्,सा-क्षिणामनृतवचनावचनाभ्यनुज्ञानेऽपि साधारणानृत-वचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्य तादव-स्थ्यात् अनृतवचनावचनाभ्यनुज्ञावचनमनर्थकमिति।

यतः साक्ष्यनृतवचनावचनयोर्भूयान्प्रत्यवायः,सा-धारणानृतवचनावचनयोरल्पीयान्, इत्यर्थवदभ्यनु-ज्ञावचनम्। यद्यपि भूयसः प्रत्यवायस्य निवृत्त्या आ-नुषङ्गिकस्याल्पीयसः प्रत्यवायस्य निवृत्तिरन्यत्र, त-थापीहाभ्यनुज्ञावचनात्प्रायश्चित्तविधानाच्च भूयसो निवृत्त्यानुषङ्गिकोऽपि प्रत्यवायो न निव-र्तते इति गम्यते। एतदेवान्यत्र प्रश्नेषु वर्णिवधाश-ङ्कायां पान्थादीनामनृतवचनावचनाभ्यनुज्ञानं वेदित-व्यम्। न च तत्र प्रायश्चित्तमस्ति। प्रतिषेधान्तराभा-वात्। निमित्तान्तरेण कालान्तरेऽर्थतत्त्वावगमेऽपि साक्षिणामन्येषां च दण्डाभावोऽस्मादेव वचनादव-गम्यते इति॥ ८३॥

इति साक्षिप्रकरणम्॥

बा० १। उपस्थितेऽपवादं क्रमेणाह * अवचनमिति। *सर्वत्र, व्यवहारे। पूर्वोक्तमूलाभ्यामिति भावः। अग्रे एकस्यैवोक्तत्वा-दाह * तदपवादार्थमिति। अन्यथा ऽपवादमित्येव ब्रूयात्। व-र्णशब्दस्य धर्मपरत्वस्यापि सत्त्वादाह * वर्णिनामिति। अर्था-न्तराभ्रमायाह * शूद्रेति। अत्र प्रातिलोम्येन कथनं हीनस्यापि

वधो गर्हितः किन्तु अन्यत्रापि एवं बोध्यम् इति ज्ञापनार्थम्। हिंसाचेतमाह * सत्येति। तदानीं तस्याभावमाह * संभाव्यते इति।

२। अन्यसंग्रहाय तात्पर्यार्थमाह * सत्यमिति। तदेवाह *अनेन चेति। चो वाक्यालंकारे। मा क्रमेणाह * असत्यवचनमिति।

३। उभयाभ्यनुज्ञान उक्तेऽपि कुत्र किमित्याकाङ्क्षायां तयोर्व्यवस्थां दर्शयितुमुक्तक्रमेणैवादावसत्यवचनाभ्यनुज्ञाविषयमाह * यत्र शूद्रेति। एतत्स्वरूपमादावुक्तम्।

४। अवचनाभ्यनुज्ञाविषयमाह * यत्र त्विति। * असत्यवचने च, तत्रापि। तत्र विशेषमाह * राजेति। यस्य तात्पर्यमाह * अथेति। कथमपि न मुच्यतामिति यः। साक्षिण इति शेषः।

५। * तस्यापि, भेदस्यापि। तत्र बीजमाह * असत्यवचनेनेति। ननु तत्र दोषैक्येऽपि दुष्टत्वं तदवस्थमेव अत आह *तत्र चेति। तद्दोषनिरासार्थं चेत्यर्थः।

उ० ६। * तर्हीति। उभयाभ्यनुज्ञायामित्यर्थः। किमिति शेषोऽग्रे नन्वित्यादिः। तच्छब्देन तयोरुक्तक्रमेण परामर्श इत्याह *अनृतेति। द्विजेत्यनेन शूद्रनिरासः, तस्याग्निसाध्यत्वात् तस्य तु प्रायश्चित्तं विष्णुनोक्तं, शूद्रश्चैकाहिकं गोदशकस्य ग्रासं दद्यादिति। एकेति एकदिनभक्षणपर्याप्तम् इत्यर्थः। ब्राह्मणगोन्यायेनाह * एकैकस इति। सरस्वद्देवताकत्वनिरासाय *सरस्वतीति। अत्र शास्त्रेऽपरिभाषणान्* अनवगीतेति।

७। ननु साक्ष्यनृतवचनावचनयोः स्थलविशेषे शास्त्राभ्यनुज्ञाने यदि सत्यवाचाभावस्तर्हि प्रायश्चित्तोक्तिरफला, अथ प्र-

त्यवायस्तदभ्यनुज्ञानं व्यर्थमिति मिथो विरुद्धमिद , अत आह * ह्यमभिसंधिरिति । अभिप्राय इत्यर्थः । अ- तवचनावच- ननिषेधौ द्विविधौ, साधारणावसाधारणौ च । तत्राद्यौ नानृतं व दित्यनारभ्याधीतः, अब्रुवन्विब्रु वेत्यादि । द्वितीयौ तु-

स तान्स निबाप्नोति यः साक्ष्यमनृतं वदेत् ।

इति, अब्रुवन् हि नरः साक्ष्यमिति च । एवं सति प्रकरणा द्वितीययो शास्त्राभ्यनुज्ञावशात्तयोर्न प्रायश्चित्त , आद्ययो- र्व्यवहितत्वात्तयोरव्यवहितत्वादित्याह * साक्षिणामिति । *तं- दिहेति । अत्र मूले वार्थेनेति भावः ।

८ । नन्वेवं प्रायश्चित्तविधानं व्यर्थमिति चेन्न । साधारणनि- षेधापवादाभावा तत्राभ्यनुज्ञानाभावात्तदतिक्रमजन्य दोषपरि- हारायास्य साफल्या , तच्छब्देन बुद्धिस्थवाचिना तयोः परा- मर्शसंभवादित्याह * यस्त्विति ।

९ । नन्वेवं वर्णिनामित्यभ्यनुज्ञापरवचनमनर्थकं, सामान्यत निषि नृतवचनावचनातिक्रमजन्यदोषयोस्तथाप्यवस्थितत्वादि- त्याह * न च मन्तव्यमिति । * निमित्तेति । निमित्तकेत्यर्थः । पूर्वं मूले तथा क्रमस्य सत्त्वात्पद रोधेनात्र सवत्रा तवचनस्य वनिपातः । * प्रत्यवायस्येति । जातावेकवचन । एवमग्रेऽपि । तत्र प्रत्येकाभिप्रायं वा । हेतुमाह * यत इति । साधारणनिषेध - तिक्रमजन्यप्रत्यवाययो यस्त्वाभावप्रतिपादकत्वा तस्य सार्थ- क्यमिति भावः ।

१० । ननु ब्रह्म त्याविचार पापं भवति, तथोद्योगे ततो धिकं, तद्धनने कृते तु महत्पापमिति पूर्वपूर्वापेक्षयोत्तरोत्तरस्य पातक धिक्येऽपि हत्यानिमित्तकमहाप्रायश्चित्ते कृते आनुष- ङ्गिकविचारोद्योगा जन्यानामल्पीयसामपि पापानां यथा निवृ-

त्तिस्तथेहापि तस्याभ्यनुज्ञावचनेन महतः प्रत्यवायस्य निवृत्ते-रनुषङ्गासिद्ध साधारणानृतवचनावचननिषेधातिक्रमजन्यस्वल्पप्र-त्यवाययोरपि निवृत्तिः स्यादिति तदर्थं प्रायश्चित्तोपदेशो व्यर्थ एवेत्याशयेन शङ्कते *यद्यपीति। *प्रत्यवायस्य, तस्यापि। *त-थापीहेति। वचनद्वयकरणादिह तथा न, अन्यथाऽन्यतरवैयर्थ्यं स्पष्टमेव। अभ्यनुज्ञावचनात्तथासिद्धावेव प्रायश्चित्तवचनात्त-स्मिन्नुभयोरुल्लेखः।

११। साक्षिग्रहणमुपलक्षणमित्याह *तत्रेवेति। पान्तस्य-णानुक्तत्वात्। *अन्यत्र, साक्षिभिन्नेषु। *अनृतेति। सामा-न्यवचननिषिद्धेत्यादिः। अत एव तत्र प्रत्यवायाभावात् एवं तौल्येऽपि कश्चन विशेषः। *न चेति। मूलोक्तं तु साक्षि-विषयकमिति भावः। प्रकृतवैषम्यमाह *प्रतिषेधेति। ननु भव-त्करीत्या तदभावः तथाप्यनृतवचनादिप्रयुक्तो राजदण्डः स्यादेव, अत आह *निमित्तान्तरेणाति। *अन्येषां च,पान्थादी-नाम्। *अस्मादेव, अभ्यनुज्ञावचनादेव। अपराधे सति दण्ड-शास्त्रतस्तदभ्यनुज्ञानेऽपराधाभावेन तदभावः। यदि तु दण्डः स्यात्तदा तत्रैवापराधकल्पना स्यादिति वचनवैयर्थ्यं तदवस्थ-मेवेति भावः॥ ८३॥

इति साक्षिप्रकरणम्॥

अथ लेख्यप्रकरणम् ॥ ६ ॥

मि० भुक्तिसाक्षिणौ निरूपितौ। सांप्रतं लेख्यं निरूप्यते। तत्र लेख्यं द्विविधं, शासनं जानपदं चेति। तत्र शासनं निरूपितं, जानपदमभिधीयते। तच्च द्विविधम्, स्वहस्तकृतमन्यकृतं चेति। तत्र स्वहस्तकृतमसाक्षिकम्, अन्यकृतं ससाक्षिकम्। अनयोश्च देशाचारानुसारेण प्रामाण्यम्।

यथाह नारदः, (व्य० प० १।१३५)

लेख्यं तु द्विविधं ज्ञेयं स्वहस्तान्यकृतं यथा।
असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः॥ इति।

तत्रान्यकृतमाह।

या० यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्।
लेख्यं वा साक्षिमत् कार्यं तस्मिन्धनिकपूर्वकम् ॥८४॥

मि० धनिकाधमर्णयोर्योऽर्थो हिरण्यादिः परस्परं स्वरुच्या इयता कालेन एतावद्धनं इयती प्रतिमासं वृद्धिरिति निष्णातो व्यवस्थितः तस्मिन्नर्थे कालान्तरे विप्रतिपत्तौ वस्तुतत्त्वनिर्णयार्थं लेख्यं साक्षिमत् उक्तलक्षणसाक्षियुक्तं धनिकपूर्वं धनिकः पूर्वो यस्मिंस्तत् धनिकपूर्वकं धनिकनामलेखनपूर्वकमिति यावत् कार्यं कर्तव्यम्। उक्तलक्षणाः साक्षिणो वा कर्तव्याः।

कर्त्रा तु यत्कृतं कार्यं सिद्ध्यर्थं तस्य साक्षिणः।
प्रवेष्टव्या विवादेषु स्वकृतं वाऽथ लेख्यकम्॥

इति स्मरणात् ॥ ८४ ॥

बा० १। व्यवहितसङ्गतिं प्रदर्शयन् स्वल्पमुपोद्घातमाह * भुक्तीति। * तत्र, निरूपणीये लेख्ये। तत्र शासनमिति पाठः। तयोर्मध्ये इत्यर्थः। * तच्च, जानपदं च। अन्यकृतमिति पाठो नारदानुरोधात्। * तत्र, तयोर्मध्ये। * असाक्षिकं, साक्षिनिरपेक्षम्। देशव्यवहाराविरोधाय व्यवस्थामाह * अनयोश्चेति। क्रमस्य विवक्षितत्वात् स्वहस्तेत्यस्य पूर्वनिपातो द्वन्द्वे, मध्यमपदलोपिसमासो वा। यथेति पाठः। लेख्यं तु यथा स्वहस्तकृतमन्यकृतं चेत्येवं द्विविधं ज्ञेयं, तथा यथाक्रमम् असाक्षिमत्साक्षिमच्चेत्येवं तदुभयं ज्ञेयमित्यर्थः। तथेति पाठे पूर्वत्र तथेतिवत् यथेत्यस्याध्याहारेणोक्त एवार्थः। * सिद्धिरिति। तयोर्देशस्थितेस्तदाचारात्प्रामाण्यमित्यर्थः। अथ मूलमवतारयति * तत्रेति। तयोर्मध्ये इत्यर्थः। तस्य प्रामाण्यस्य बहूपायसाध्यत्वादादावुक्तिः।

२। * यः कश्चिदिति। उक्तनारदाद्वक्ष्यमाणमूलाच्चास्य अन्यकृतपरत्वम्। कश्चिदर्थमाह * हिरण्येति। तामेवाह * इयतेति। रुच्यन्तरमाह * इयतीचेति। निष्णात इत्यस्य व्याख्या * व्यवस्थित इति। तस्मिन्नित्यस्य व्याख्या * अर्थे इति। विषयसप्तमीयं, विप्रतिपत्त्यन्वयः। यथाश्रुतेऽनुपपत्तेः शेषमाह * कालान्तरे इति। * विप्रतिपत्तौ, सम्भावितायाम् इति शेषः। लेख्ये साक्षियुक्तत्वं तन्नामवैशिष्ट्येन। अत एवाग्रेऽपि यथाश्रुतासम्भवादाह * नामेति। कार्यमित्यस्य व्याख्या * कर्तव्यमिति। लेख्यं वेतिवाशब्दसूचितं लाघवाद्विशेषपक्षान्तरमाह * उक्तलक्षणा इति। ते एव वेत्यर्थः। नामैवाह * कर्त्रात्विति। * विवादेषु, सत्सु। पक्षान्तरमाह * स्वकृतामिति। * वाऽथ, अथवा ॥ ८४ ॥

अपिच ।

या० समामासतदर्धाहर्नामजातिस्वगोत्रकैः ।

सब्रह्मचारिकात्मीयपितृनामादिचिह्नितम् ॥ ८५ ॥

मि० समाः संवत्स ः । मासश्चैत्रादिः । तदर्धः पक्षः, शुक्लः कृष्णो वा । अ ःस्तिथिः प्रतिपदा ि ः । नाम ...मर्णयोः । जातिर्ब्राह्मणत्वादिः । स्वगोत्रं वासिष्ठादिगोत्रं । एतैः समादिभिश्चिह्नितम् । तथा ...बहृ्चादिशाखाप्र ...कं गुणनाम बह्वृचः कठ इति । आत्मीयपि नाम धनिकर्णिकापि ना-म । आदिशब्दा द्रव्यजातिसंख्यावारादेर्ग्रहणम् । एतैश्च चि ितं, लेख्यं कार्यमिति गतेन संबन्धः ॥८५॥

बा० १। नैताव मात्रेण तस्य पूर्त्तिरित्याह *अपि चेति। अत्र समादीनां व्याप्यव्यापकभावः । अत एव क्रमस्य प्रतिपाद्यत्वात्तस्य प्रागुक्तिः। एवं क्रमो नामादावपि बोध्यः । समाशब्दः स्त्रीलिङ्गो ब वचनान्त इत्याह *समा इति । तदर्द्धः पक्ष इति पाठः । अक्लीबत्वादे ...भावात्षष्ठीतत्पुरुषः। अविनिगमकत्वादाह *कृष्णोवेति । अहःशब्दोऽत्राहोरात्रपर इत्याह * तिथिरिति।प्राग्वदाह *धनिकेति । स्वार्थे क इत्याह *वासिष्ठादीति । अयं द्वन्द्वः, तदाह *एतैरिति । अग्रे सत्त्वादत्रापि अध्याहरति *चिह्नितमिति । अन्यदप्याह *तथेति । सब्रह्मेत्यस्य तत्साधारणमित्यर्थः । तदाह *बह्वृचेति । बह्वृचादेर्या शाखा तदध्ययनप्र ...कामित्यर्थः । अत एवाह *गुणेति । प्राग्वदाह *धनिकेति । एतैश्चिह्नितमिति पाठः । वाक्य ...न्वये आह *लेख्यमिति ॥ ८५ ॥

मि० किञ्च ।

या० समासेऽथ ऋणी नाम स्वहस्तेन निवेशयेत् ।
मतं मेऽमुकपुत्रस्य यदत्रोपरि लेखितम् ॥ ८६ ॥

मि० धनिकाधमर्णयोर्योऽर्थः स्वरुच्या व्यवस्थितस्तस्मिन्नर्थे समासे लिखिते ऋणी अधमर्णो नाम आत्मीयं स्वहस्तेनास्मिल्लेँख्ये यदुपरि लेखितं तत् ममामुकपुत्रस्य मतमभिप्रेतमिति निवेशयेत्पत्रे लिखेत् ॥ ८६ ॥

बा० १। प्राग्वदाह * किञ्चेति । अर्थोऽत्र प्रागुक्त एवेत्याह * धनिकेति । यथाश्रुतासङ्गतेराह * लिखिते इति । अत्रेत्यस्य व्याख्या * अस्मिन्निति । प्रकृतत्वादाह * लेखितमिति । अमुकपुत्रस्येत्यार्षम् । एवमग्रेऽपि । * इतीति । एवं प्रकारेण नाम निवेशयेदित्यर्थः । यथाश्रुतासङ्गतेराह * लिखेदिति ॥ ८६ ॥

मि० तथा ।

या० साक्षिणश्च स्वहस्तेन पितृनामकपूर्वकम् ।
अत्राहममुकः साक्षी लिखेयुरिति ते समाः ॥८७॥

मि० तास्मिल्लेँख्ये ये साक्षिणो लिखितास्तेऽप्यात्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थेऽहममुको देवदत्तः साक्षीति स्वहस्तेनैकैकशो लिखेयुः । ते च समाः संख्यातो गुणतश्च कर्तव्याः । यद्यधमर्णः साक्षी वा लिपिज्ञो न भवति तदाऽधमर्णोऽन्येन साक्षी च साक्ष्यन्तरेण सर्वसाक्षिसन्निधौ स्वमतं लेखयेत् ।

यथाह नारदः,

अलिपिज्ञः ऋणी यः स्यात्स्वमतं तु स लेखयेत्।
साक्षी वा साक्षिणाऽन्येन सर्वसाक्षिसमीपतः॥
इति ॥ ८७ ॥

बा० १। प्राग्वदाह * तथेति। साक्षिमति पत्रे प्रतिपादितमथ-माह * तस्मिन्निति। चार्थमाह * तेऽपीति। स्वार्थे कः। लिखने नाम पत्वाभावादाह * लेखनेति। अत्रार्थमाह * अस्मिन्निति। समुदायनिरासायाह * अमुक इति। अमुक इत्यस्य स्वारस्या-दाह *एकैकश इति।

२। वैषम्ये च प्राप्तत्वादत्र विषये विशेषमाह *ते चेति। विनिगमनाविरहादाह *संख्यात इति। एतेन असमा इत्यकार-प्रश्लेष इत्यपास्तम्।

३। उभयत्र स्वपक्षीयेऽपि विशेषमाह * यस्त्वधमर्ण इति। * साक्षीवा साक्षिणेति। अलिपिज्ञ इति भावः। स्वमतमित्यत्रा-रनुषङ्गः। * समीपतः, समीपे॥ ८७ ॥

मि० अपि च।

या० उभयाभ्यर्थितेनैतन्मया ह्यमुकसूनुना।
लिखितं ह्यमुकेनेति लेखकोऽन्ते ततो लिखेत् ॥८८॥

मि० ततो लेखको धनिकाधमर्णिकाभ्यामुभाभ्यां प्रार्थितेन मयाऽमुकेन देवदत्तेन विष्णुमित्रसूनुना एत-त् लेख्यं लिखितमित्यन्ते लिखेत्॥ ८८ ॥

बा० १। प्राग्वदाह *अपि चेति। *ततः, साक्षिलिखनान-

१ तत्समानार्थकः अर्धः– (व्य० प० १।१६७)
आत्मनैव लिखेज्जानन् न चेदन्येन लेखयेत्।
इति नारदस्मृतावुपलभ्यते।

न्तरम्। * अन्ते, सर्वार्थः। तदुपरि ॥ ८८ ॥

मि० साम्प्रतं स्वकृतं लेख्यमाह।

या० विनाऽपि साक्षिभिर्लेख्यं स्वहस्तलिखितं तु यत्।
तत्प्रमाणं स्मृतं लेख्यं बलोपधिकृतादृते ॥ ८९ ॥

मि० यल्लेख्यं स्वहस्तेन लिखितमधमर्णेन, तत् साक्षिभिर्विनाऽपि प्रमाणं स्मृतं मन्वादिभिः। बलोपधिकृतादृते—बलेन बलात्कारेण, उपधिना छललोभक्रोधभयमदादिलक्षणेन यत्कृतं तस्माद्विना।

नारदोऽप्याह, (व्य० प० १।१३७)

मत्ताभियुक्तस्त्रीबालबलात्कारकृतं च यत्।
तदप्रमाणं लिखितं भयोपाधिकृतं तथा ॥ इति।

तच्चैतत्स्वहस्तकृतं परहस्तकृतं च यल्लेख्यं देशाचारानुसारेण सबन्धकव्यवहारेऽबन्धकव्यवहारे च युक्तम् अर्थक्रमापरिलोपेन लिप्यक्षरापरिलोपेन च लेख्यमित्येतावता, न पुनः साधुशब्दैरेव। प्रातिस्विकदेशभाषयाऽपि लेखनीयम्।

यथाह नारदः, (व्य० प० १।१३६)

देशाचाराविरुद्धं यद्व्यक्ताधिविधिलक्षणम्।
तत्प्रमाणं स्मृतं लेख्यमविलुप्तक्रमाक्षरम् ॥ इति।

विधानं विधिः आधेर्विविधाधिस्वीकरणं तस्य लक्षणं गोप्याधिभोग्याधिकालकृतमित्यादि, तद् व्यक्तं विस्पष्टं यस्मिंस्तद् व्यक्ताधिविधिलक्षणम्। अविलुप्तः क्रमः, क्रमश्चाक्षराणि च क्रमाक्षराणि अविलु-

स्तानि क्रमा...राणि यस्मिंस्त... अवि...सक्रमाक्षरम् ।
तदेवं...तं लेख्यं प्रमाण... । राजशासनव... न सा...शा-
ब्दानियमोऽत्रेत्यभिप्रायः ॥ ८९ ॥

बा० १। *विनापीति। ... । यत् लेख्यं स्वहस्त-
लिखितं तत्तु लेख्यं साक्षिभिर्विनाऽपि प्रमाणं स्मृतं मन्वा... मेरि-
त्यन्वयः । ... नरुक्तिः स्पष्टार्था । अग्रे तत्र सर्वमि-
ति पाठस्तु युक्त एव । तदाह * यदिति । ...ल्यमुपाधेशब्दार्थ-
माह * छलेति । न्यूनतानिरासायेद...पलक्षण... इत्याह * लो
भेति । एत...चनार्थमेव नारदमाह *नारद इति । * मत्तेति ।
अत्र स्त्र्यादेर्द्वंद्वं कृत्वा पुनः सः । * मत्तः, पानादिना । * अ-
भियुक्तः, आक्षिप्तः । चः त्वर्थे । प्रा...क्तमेव सविशेष...पपादयन्ना-
ह * तच्चतादिति । तदेतच्चेत्यर्थः । इदमेव ...त्यासस्था व्युत्क्रमे-
णाह * स्व...स्तेति । * अबन्धकव्यव...र च ...क्रामिति । तत्र
च यथाक्रमं नियतं सम्बन्ध्यम् इत्यर्थः । अग्रेऽन्वयः । ...त्यतावदि-
ति व्याचष्टे *न...नारिति । सा...शब्दैरेवेति । किन्...ति शेषः ।
* प्रातिस्विकेति । प्रतिनियतेति पाठान्तरम् । अपिना तेषामपि
समुच्चयः । व्यक्ताधीति विशेषमेव व्याकर्त्तुं क्रमप्रत्ययेऽर्थ स-
ङ्गतेराह * विधानमिति । भावे किरिति भावः । गोप्याधीति
समाहारद्वन्द्वः । आदिनाऽकालकृतादिपरिग्रहः । सबन्धकव्यव-
हारविषयमिदम् । स्पष्टं बन्धकप्रकारलक्षणं यत्र तत् तथेति तु क-
ल्पतरुः । क्रमस्य साकाङ्क्षत्वादाह * अर्थानामिति । अविलुप्ते-
ति व्याचष्टे * क्रमश्चेति । एवं पदार्थमुक्त्वा वाक्यार्थमाह * त-
देवमिति । नारदतात्पर्यार्थं प्रागुक्तमेवाह * राजेति । व्यतिरे-
के दृष्टान्तः ॥ ८९ ॥

मि० लेख्यप्रसङ्गेन लेख्या...लक्षण...णं त्रिभिरेव दे-

यामत्या ।

या० ऋणं लेख्य तं देयं पुरुषैस्त्रिभिरेव तु ।

मि० यथा साक्ष्यादि तमृणं त्रिभिरेरेव देयं तथा लेख्यकृतमप्याहर्तत्पुत्रतत्पुत्रैस्त्रिभिरेव देयं, न चतुर्थादिभिरिति नियम्यते ।

ननु अपौत्रैर्ऋणं ेयमित्यविशेषेण णमात्रं त्रिभि व ेयामिति नियतमेव । बाढम् । अस्यवोर ारस्य पत्रा ऋणविषये स्मृत्यन्तरप्रभवामपवादशङ्कामपन मिदं वचनमारब्धम् ।

तथा हि । पत्रलक्षणमभिधाय—

कात्यायनेनाभि तम्,

एवं क ान्तं पि णां ाप्यत ऋणम् इति।

इत्थं पत्रा ऋणमतिक्र न्तं कालमपि पि णां संबन्धि ... । अत्र पितॄणामिति ब वचननि शात्कालमतिक्रान्तमिति वचनाच्च चतुर्थादिदाप्यते इति ग यत ।

तथा पि,

लेख्यं यस्य भवेद्धस्ते लाभं तस्य विनिर्दिशेत् । इति ।

अत्रापि यस्य हस्ते लेख्यमस्ति तस्य ऋणल भ इति सामान्येन चतुर्थादिभ्योऽप णला मो ोति प्रतीयते । अतश्चतदाश ाने स्यथमेत चनमिति युक्तम् । वचनद्वयं च योगीश्वरवचना सारेण योजनीयम् ।

मि० अस्यापवादमा ।

या० आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ॥९०॥

मि० तत्त्वचनेऽपि पत्रा ऋणे त्रिभिरेव देयमिति

नियमा॰ ऋणापाक णानधिकारेण आध्या रणऽप्य-
नाधिका प्रासाविद्रयते । यावत् च॰ येन मन
वा ऋणं न दीयते ताव वाधिर्भुज्यते इति वदता
ऋणापाकरणे चतुर्थादेरप्यधिकारो दर्शितः।
नन्वेतद्‌ ऋमेव, फलभोग्यो न न॰याति इति । स-
त्यम् । तदपि एतस्मिन् अपवादवचनेऽसति पुरुषत्र-
यावि यमेव स्यादिति सर्वमनवद्य॰ ॥ ९० ॥

बा० १।स॰ तिमाह *लेख्येति। प्रागुक्तं ह॰ न्तयति *यथेति।
एवंच तत्सजातीय एवायमर्थो नत्वपूर्व इति भावः । अतएवा-
ह * आहर्त्रिति । व्यवच्छेद्यमाह * न चतुर्थादिभिरिति ।
एवोक्तिं सफलयति * नियम्यतइति ।

२। अतएवाह* नन्विति । *अविशेषेणेति । सा॰-
साध॰ न्येनत्यर्थः । * नियतं, नियमित॰ । ॰चित्तयेव पाठः ।
* अस्यैव, पुत्रपौत्रैरित्युक्तस्यैव सामान्यस्य । *प्रभवां, जन्या-
म् । * इदम्, ऋणलख्य॰तामिति ।

३।तदेव ॰त्यन्तरं प्रकरणशुद्धिपूर्वकमाह *तथाहत्या॰-
ना । तद्व्याचष्टे * इत्थमिति । ॰वमित्यस्य व्याख्येयम्। एतदर्थ-
मेव तदुक्तं प्राक् । अतिक्रान्तं कालमपीति पाठः।कालम् अति-
॰न्तमपीत्यर्थः । ॰चित्समस्तपाठः । अन्यथा॰ तान्वयनिरासा-
याह * सम्बन्धीति । * दाप्यते, राज्ञेति शेषः । दापयेदिति
पाठान्तर॰ मयत्र ।

४। इतो यथा तदाशङ्का तामाह * अत्रेति । तदुक्त॰वित्य-
र्थः । प्रतीयते ॰त्यत्रान्वयः । पत्रारूढऋणविषये पुत्रपौत्रैरेव दे-
यमिति नास्यार्थः । किं तु बहुवचना॰ अवरतः ऋणे त्रितयस-
म्बन्धित्वे सति ॰॰॰॰॰ ऽप्यात्मपौत्रा॰ भिरेव ॰यमिति

प्रतीयते। तथा पौत्रे मृते त[द]स्य तेनादातृत्वप्राप्तावपि अतिक्रान्तामित्युक्तेस्तेषां दातृत्वप्राप्तिर्भवतीति भावः।

५। * तथा, तद्वत्। अभिहितामित्यस्या[न]ङ्गः। प्राग्वदाह *अत्रापीति। प्रतीयते इत्यत्रान्वयः। सामान्योक्त्यैवात्र प्राग्वत्ता-वधारणमित्याह * चतुर्थादिभ्योऽपीति। आक्षेपसमाधिमुक्तमुपसंहरति * अतश्चेति। नन्वेवं हारीतकात्यायनयोः का गतिरत आह * वचनद्वयंचेति। चस्त्वर्थे। आद्ये पि[तॄ]णामिति बहुत्वमविवक्षितम्। उद्देश्यगतत्वा[त्]। कालातिक्रमस्यापि ताव-त्पर्यन्तस्यैव सम्भवेन ग्रहणं नत्वग्रिमस्य। द्वितीयमपि ताव-त्परमेवेति भावः।

उ० ६। नन्वेतदभावे कथं पूर्वप्राप्तिरतआह *सबन्धके इति। अपिना द्वितीयसमुच्चयः। अस्य नियमेऽन्वयः। अयौगपद्या-याह * क्रमेणेति। ऋणापाकरणेति। चतुर्थादेरित्यादिः। नन्वे-तावताऽपि स्फुटं न तत्त्वप्रतीतिः, अतः अपवाद[म]ुपपादयति *यावदिति। अस्यार्थमाह * चतुर्थेनेति। [illegible]मिदम्। तत्पदार्थमाह * ऋणमिति। सर्वमिति न्यायेनाह * तावदेवेति।

६। प्राग्वत्प्राप्तपौनरुक्त्यं निराचष्टे * नन्वित्यादिना। * स्यादिति। अत इद[illegible] तस्य त[illegible]र्थमिति भावः॥ ९० ॥

मि० प्रासाङ्गिकं प[illegible] प्र[कृ]तमेवानुसरति।

या० देशान्तरस्थे दुर्लेख्ये नष्टोन्मृष्टे हृते तथा।
भिन्ने दग्धेऽथवा छिन्ने लेख्यमन्यत्तु कारयेत् ॥९१॥

मि० [illegible]मे पत्रे पत्रान्त[रं] कुर्यादिति विधीयते। व्यव[हा]राक्षमत्वं चात्यन्तव्यवहितदेशान्तर-

स्थे पत्रे, दुर्लेख्ये—दुष्टानि सं· समानानि अ वाचकानि वा लेख्यानि लिप्यक्षराणि पदानि वा यस्मिंस्तत् दुर्लेख्यं तस्मिन्दुर्लेख्ये, नष्टे कालवशेन, उन्मृष्टे मषी-दौर्बल्यादिना मृदितलिप्यक्षरे, हृते तस्करादिभिः, भिन्ने विदलिते, दग्धे प्रज्वलिते, छिन्ने द्विधाभूते सति भवति। एतच्चार्थिप्रत्यर्थिनोः परस्परानुमतौ सत्याम्। विमत्यां तु व्यवहारप्राप्तौ देशान्तरस्थपत्रानयनाय अध्वापेक्षया कालो दातव्यः । दुर्गदेशावस्थिते नष्टे वा पत्रे साक्षिभिरेव व्यवहारनिर्णयः कार्यः।

यथाह नारदः, (व्य. प. १ । १४२)

लेख्ये देशान्तरन्यस्ते शीर्णे दुर्लिखिते हृते ।
सतस्तत्कालकरणमसतो द्रष्टृदर्शनम् ॥ इति ।

सतो विद्यमानस्य पत्रस्य देशान्तरस्थस्यानयनाय कालकरणं कालावधिर्दातव्यः । असतः पुरा विद्यमानस्य पूर्वं ये द्रष्टारः साक्षिणस्तैर्दर्शनं व्यवहारपरिसमापनं कार्यम् । यदा तु साक्षिणो न सन्ति तदा दिव्येन निर्णयः कार्यः ।

अलेख्यसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ।

इति स्मरणात् ।

एतच्च जानपदं व्यवस्थापत्रम् । राजकीयमपि व्यवहारपत्रमीदृशमेव भवति । इयांस्तु विशेषः,

राज्ञः स्वहस्तसंयुक्तं स्वमुद्राचिह्नितं तथा ।
राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत् ॥इति।

तथाऽन्यदपि राजकीयं जयपत्रकं वसिष्ठेनोक्तम्,

यथोपन्य[illegible]ध्यायसं[illegible]क्तं सोत्तरक्रिय[illegible] ।
सावधा[illegible]णकं चैव ज[illegible] ॥
प्राड्विवाकादिहस्ताङ्कं मुद्रितं राज[illegible]या ।
सिद्धेऽर्थे वादिने [illegible]याज्ञायेत जयपत्रक[illegible] ॥इति ।

तथा, सभास[illegible]ोऽपि मतं मे[illegible]मुक[illegible]अस्येति स्व[illegible] दद्युः ।

सभासदश्च ये तत्र स्मृतिशास्त्रवि[illegible]ः स्थिताः ।
यथा लेख्यविधौ तद्वत्स्व[illegible] स्तं दद्युरेव ते ॥

इति स्मरणा[illegible] ।

सभासदां च परस्परा[illegible]मतिव्यतिरेकेण न व्यवहारो निःशल्यो भवति ।

यथाह नारदः, (अ. ३ । १७)

यत्र सभ्यो जनः सर्वः साध्वेतदिति मन्यते ।
स निःशल्यो विवादःस्यात्सशल्यस्त्वन्यथा भवेत् ॥
इति ।

एतच्च च[illegible]पाद्व्यवहारे एव ।

साधयेत्साध्यमर्थं यत् च[illegible]पा[illegible]न्वितं च यत् ।
राज[illegible]तं चैव जयपत्रकमि[illegible]ते ॥

इति [illegible]त् ।

यत्र तु हीनता, यथा, (ना. अ. २ । ३३)

अन्यवा[illegible] क्रियाद्वेषी नोपस्थाता [illegible] ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥इति,

तत्र न जयपत्रकम[illegible], अपि तु हीनपत्रकमेव । तच्च कालान्त[illegible] दण्डप्राप्त्यर्थ[illegible] । जयप[illegible] तु [illegible]यविधिसिद्ध्यर्थमिति विशेषः ॥ ९१ ॥

भा०१। संगतिमा *मासा. कमिति नष्ट. ट्टे इति समाहा-रद्वंद्वः । नन्वत्र दष्टान्तरस्या उद्दिश्य पत्रान्तरकरणविधिः प्र-तीयते।तत्र किं तेषां प्रत्येकं निमित्तत्व त स दायस्य । तत्र न ताव ाद्यः । तथाशब्दासंगतेः । सकृ तस्य विषयस्य सर्वैरन्व-यासंभवाच । नचाद्यस्या तथा । प्रधानानुरोधेन गुणानामपि वैपरीत्यस्य सकलतन्त्राविरु त्वा । वाक्यभेदापत्तेश्च । न द्वि-तीयः । अय त्यस्यासंगतेः । स्मृत्यन्तरविरोधेनापास्त न्ता । अतआह * व्यवहाराक्षमे ति ।* पत्रे, पूर्वपत्रे सति । अन्यथा-ऽपपत्त्या सकलसाधारणानुगतधर्मारोपेणास्योद्देश्यत्वं, न त-स्येति न कोऽपि उक्तदोष इति भावः । णिजर्थाविवक्षयाऽऽह * यादितीति। पादत्रयार्थस्यैवं सति अन्वयं कथयन्व्यव ाराक्ष-मत्वमेव विवृ यति * व्यव ाराक्षमत्वंचेति । एतेन तदेव कथ-मिति शङ्का निरस्ता ।*अक्षमत्वं च, अक्षमत्वं तु। अस्य भवतीत्य-त्रान्वयः। क्रमेण निमित्तानि व्याचष्टे *अ ति। निकटे आन-यनस्य करत्वाद्धस्यार्थोऽयम् । पत्रे त्यस्यात्र स य। ष्ठानांत्यस्यार्थद्वयं, लब्ध्वा नीत्य चापितयोः यथासंख्यमन्वयः। नष्टो पाधिकमाह * कालेत्यादि । आदिना जलपाता ना । * वि लित, संचूर्णिते । * दग्धे प्रज्वलिते । दग्धेऽग्निने-ति पाठान्तर । सर्वपाठोऽपि क चित्त्य यः। तेषामपि विकल्पो बोध्यः । अतएव अथवेत्य य संगतिः । तथेतितु सादृश्ये, न तु समुच्चये ।

२। नारदविरोधं मूलस्य परिहरन् विशेषमाह * एतच्चेति। पत्रान्तरकरणं चेत्यर्थः। तत्र तस्यावश्यकत्वादाह * व्यव र-माहावेति । तादृशे स्थले आह * ति । * नदेशान्-स्थित ति । दुःखेनापि न- नाप्यदेशत्वर्थः । दुर्देशेति पाठा-

न्तरम् । अयं प्रकारोऽन्यत्रापीत्या * नष्टे वेति । वा चार्थे । तेनान्येषामपि समुच्चयः । उत्तरार्द्धं व्याचष्टे * सत्र इति । तेषां मध्ये इत्यादिः । तत्पदार्थमाह * आनयनायेति । समासस्तु संबन्धसामान्यषष्ठ्या कार्यस्तत्र । * पुनः, तु । अन्यनिरासायाह * पूर्वमिति । तत्कर्मकं दर्शनमिति नार्थ इत्याह * तैरिति । लब्धार्थमाह * व्यवहारपरिसमापनमिति ।

३। विशेषान्तरमाह * यद्वात्विति । कात्यायनमा * अलेख्येति । लेख्यसाक्षिभयरहिते व्यवहारे इत्यर्थः । * दैवीं, क्रियाम् ।

४। विशेषान्तरं प्रसङ्गमेवाह * एतच्चेति । जानपदमिति लौकिकमित्यस्यैव नामान्तरम् ।

लौकिकं राजकार्यं च लेख्यं कुर्यात् द्विलक्षणम् ।

इति वसिष्ठोक्तेः,

राजकीयं जानपदं लिखितं द्विविधं स्मृतम् ।

इति संग्रहोक्तेश्च । अत्रोभयत्र राजकार्यं राजकीयमिति त्याभ्यां प्रत्येकं त्रयाणां ग्रहणमिति न न्यूनता । अत एवाह * राजकीयमपीति । कात्यायनमा * राज्ञ इति ।

५। तथेति समुच्चये ।

राजकार्ये तथा राजा आत्मदेह लिखेत्स्वयम् ।

मतं मेऽमुकपुत्रस्य अमुकस्य महीपतेः ॥

इति व्यासः ।

अर्थेष्विति विषयसप्तमी । साक्षिमदिति साधारणोक्तिः । * यथापन्यस्तेति । येन प्रकारेणोपन्यस्ता यः साध्यार्थः प्रतिज्ञातार्थस्तेन संयुक्तम् । अनेन प्रमादप्रदर्शनम् । उत्तरं च क्रिया च ताभ्यां सहितं, क्रिया पत्रादिरूपा । अनेन द्वितीयतृतीयपा-

दमदर्शन० । अथवा णं निःशल्यत्वेन सहितम्। स्वार्थे कः। अनेन तुथपादमदर्शन० । * हस्ताङ्कं, तदक्षरा० । एवमग्रेऽपि। *का-दिनेइति।

पूर्वोत्तरक्रियावादनिर्णयान्ते यदा नृपः ।
मद राजाङ्कितं लेख्यं जयपत्रं तदुच्यते ॥

इति बृहस्पत्युक्तेरिदमुपलक्षण० ।

६ । अत्रादिग्राह्यं सूचयन्नेवाह * तथेति । कात्यायन-माह * सभासदश्चेति। * तत्र, व्यवहारे । * यथेति । क्रियमाणे राजकीयव्यवस्थापत्रे यथा तद्वज्जयपत्रेऽपीत्यर्थः । एवेन तस्या-वश्यकता सूचिता ।

७ । व्यवहारस्य निःशल्यत्वोपायं प्रतिपादयन्नत्र हेतुभूतं विशेषान्तरमाह * सभासदांचेति । चेनान्येषामपि तत्रत्यानां समुच्चयः । * यत्र, निर्णयविवादे ।

८। विशेषान्तरमाह * एतदिति । जयपत्र० इत्यर्थः । का-त्यायनमाह * साधयेदिति । साध्यार्थसाधकं तदन्वितं च य-द् व्यव०।रस्वरूपं यत् यतोऽतस्तदेव तदङ्कितं तदिष्यते इत्यर्थः। चेनान्यसमुच्चयः । यद्यपीदं सभासदां चेत्यतः प्रागुचितं तथापि सभासदां प्रसङ्गात्तद्विषयकं तद् आदावुक्तम् । एवव्यव०च्छेद्यमा। *यत्रत्विति । त्वयोपयोगमाह *तथेति । हीनपत्रं चेत्यर्थः । *विशेषः, ।नपत्रतः ॥ ९१ ॥

मि० लेख्यसन्दे निर्णयनिमित्तान्या० ।

या० सन्दिग्धलेख्यशुद्धिः स्यात्स्वहस्तलिखितादिभिः।
युक्तिप्राप्तिक्रियाचिह्नसंबन्धागमहेतुभिः ॥ ९२ ॥

मि० शुद्धम०द्धं चेति सा०ग्धस्य लेख्यस्य शु-

द्धिः स्व स्तलिखितादेभिः स्यात् । स्व स्तन लिखि-
तं यल्लेख्यान्तरं तेन शुद्धिः । यदि स[illegible]न्य [illegible]रा-
णि भवन्ति तदा शुद्धिः [illegible]त्यर्थः । आ[illegible]
स्साक्षिलक स्तलिखितान्तरसंवादा[illegible]द्धिरिति ।
युक्त्या प्राप्ति[illegible]क्तिप्राप्तिः । [illegible]काले [illegible]व्याणां द्रव्येण
सह संबन्धः प्राप्तिः । अस्मि[illegible]स्य पु-
रुषस्ये[illegible] द्रव्यं घटते इति युक्तिः । क्रिया तत्सा[illegible]प-
न्यासः । [illegible]असाधारणं श्रीकारादि । संबन्धः अ-
र्थिप्रत्य[illegible]र्थिनोः पूर्वमपि परस्परावि[illegible]वासेन दानप्र[illegible]णा-
[illegible] संबन्धः । आगमोऽस्यैतावतोऽर्थस्य संभावितः प्रा-
[illegible]पायः । एते एव हेतवः । एभिर्हेतुभिः ला[illegible]
लख्य[illegible]द्धिः स्यादित्यर्थः । यदा तु लेख्यसन्दे[illegible]
[illegible] न जायते तदा साक्षिभि[illegible]ः कार्यः ।

यथाह क[illegible]त्यायनः,

दूषिते पत्रके वादी तदा[illegible] निर्दिशे[illegible] । इति।

सा[illegible]संभवविषयमि[illegible] वचन[illegible] । साक्ष्यसंभ-
[illegible]विषयं तु—

हारीतवचनम्,

न[illegible]मयत[illegible]तं पत्रं [illegible] कारितम् ।

अधरी[illegible]त्य तत्पत्रमथ[illegible]व्येन निर्णयः ॥इति॥९२॥

बा० १ । संशयका[illegible]यमाह * शु[illegible]मिति । कृत्रिमम[illegible]त्रिमं
वेत्यर्थः ।

तथाच नारदः, (व्य. प. १ । १४३ । १४४)

य[illegible]ल्संशया लेख्ये [illegible]तामूतकृत कचित् ।

तत् स्वहस्तक्रियाचिह्नयुक्तिप्राप्तिभिरुद्धरे[illegible] ॥

लेख्यं यत्रान्यनामाङ्कं हेत्वन्तरकृतं भवेत् ।
वि[illegible]मत्यय परीक्षेत संबन्धागमहे[illegible]भिः ॥ इति ॥

* विप्रत्यये, वि[illegible]तिपत्तौ । लिखितमिति कर्मणि भूते निष्ठा । तेने[illegible]र्नीतनव्याख्यातः । तदाह * स्व[illegible]स्तेनेति । तत्त्वस्यात्रापि सत्त्वादाह * लेख्यान्तरमिति । पत्रान्तरमित्यर्थः । ननु द्वयोर्भेदेन तेनास्य कथं शुद्धिः, अत आह * यदीति । * साक्षीति । सा[illegible]लेखकयोर्ये स्वहस्ताभ्यां लिखितान्तरे एतदपेक्षया भिन्ने लिखिते तत्संवादात् एतल्लेख्यीयाक्षरस्य तदक्षरसादृश्यादेतत्पत्रस्य शुद्धिरित्यर्थः । तथाचेदमन्यकृतविषयम् । श्रौतं तु स्वकृतविषयमिति भावः । इतिः पूर्वार्धार्थसमाप्तौ ।

२ । देशकाले इति समाहारद्वंद्वात्सप्तमी । कालपुरुषाणामिति पाठे सम[illegible]त्रयाणा तेन सम्बन्ध इति यावत् । तदेवाह * अस्मिन्निति । युक्तिपदार्थमाह * घटतेइति । योग्यं भवतीत्यर्थः । सम्भवतीति यावत् । कल्पतरुरप्येवम् । युक्तिरर्थापत्तिः, प्राप्तिर्द्वयोरेकत्रावस्थानमित्यन्ये । * तत्साक्षीति । प्राप्तिसाक्[illegible]पन्यास इत्यर्थः । अतएव वक्ष्यमाणविरोधो न । कल्पतरुरप्येव[illegible] । संव्यव[illegible]रः क्रियेत्यन्ये । श्रीकारादीति आदिना स्वस्तिक[illegible]द्रादिपरिग्रहः । * पूर्वमिति । [illegible]वाद[illegible]ित्यर्थः । * दानेति । धनस्येत्यादिः । आदिनाऽऽध्यादिपरिग्रहः *। * अर्थस्य, धनस्य । आगमः क्रयादिरित्यन्ये । आगमान्तद्वन्द्वस्य हेतुशब्देन कर्मधारय इत्याह एते एवेति । उत्तरार्धस्य [illegible]ध्याहारेणान्वयभ्रमनिरासायाह * एभिरिति । सोऽप्येवं, हेतुर[illegible]मानमित्यन्ये ।

३ । विशेषमाह * यदात्विति । * तद[illegible]ति । पत्रारू[illegible]र्थः । पत्रके इत्यत्र स्वार्थे कन् ।

१ संदिग्धलेख्यशुद्धिः स्यादितिमूलवचनोपात्त[illegible] इत्यर्थः ।

४। अस्य वक्ष्यमाणविरोधं परि[illegible]रति * साक्षिसंभवविषयमिति। *इदं, कातीयम्। तदेवाह * न मयैतदिति।*एतेन, अन्येन केनचित्। अतएवाह * कारितमिति। * तत्प[illegible]मिति। तत्पत्रं प्रमाणत्वेनानाश्रित्य अथ अनन्तरं दिव्येन निर्णयः कार्य इत्यर्थः। अथ दिव्येनेति पाठः। अर्थे इति पाठे तद्विषये इत्यर्थः॥ ९२॥

मि० एवं शोधिते पत्रे ऋणे च दातव्ये प्राप्ते यदा कृत्स्नमेव दा[illegible]मृणमसमर्थस्तदा किं कर्तव्यमित्यत आह।

या० लेख्यस्य पृष्ठेऽभिलिखेद्दत्त्वा दत्त्वर्णिको धनम्।
धनी चोपगतं दद्यात्स्वहस्तपरिचिह्नितम्॥ ९३॥

मि० यदाऽधमर्णिकः सकलमृणं दातुमसमर्थस्तदा शक्त्य[illegible]सारेण दत्त्वा पूर्वकृतस्य लेख्यस्य पृष्ठेऽभिलिखेत्, एतावन्मया [illegible]त्तमिति। अधमर्णो वा उगपतं प्राप्तं धनं तस्यैव लेख्यस्य पृष्ठे दद्यादभिलिखेत्, एतावन्मया लब्धमिति। कथं, स्वहस्तपरिचिह्नितम्। स्वहस्तलिखिताक्षरचिह्नितम्। यद्वा उपगतं प्रवेशपत्रं स्व[illegible]स्तलिखितचिह्नितमधमर्णायोत्तमर्णो दद्यात्॥ ९३॥

बा० १। अवतरणमाह * एवमिति। *दातुमिति। युगपदिति शेषः। एवमग्रेऽपि। आर्थिकमाह * शक्त्यनुसारेणेति। उत्तरार्धार्थमाह *उत्तमर्णो वेति। स्वहस्तशब्दो [illegible] इत्याह * लिखितेति। तथाच क्रियाविशेषणमिदमिति भावः।

२। अत्र पक्षे तत्पृष्ठभागे तल्लिखने ऐच्छिकविकल्पो लब्धः। स च न युक्तः। तस्याष्टदोषदुष्टत्वात्। प्रकारान्तरेणोत्तरा[illegible]स्य

साफल्ये तथोक्तेरयुक्तत्वा । लक्षणाद्यापत्तेश्च । अत आह * य द्वोपगतमिति । भावक्तान्ताद् आद्यजित्याह *प्रवेशपत्रमिति । परः उत्कर्ष इतरव्यावर्तकत्वरूपो यस्यास्तीति परि, लिखनं स्वहस्तस्य परि, तेन चिह्नितमिति पत्रविशेषणं, तादृशं लेख्यान्तरं कृत्वेति भावः । तदाह * स्वहस्तलिखितेति । भावे क्तः । * उत्तमर्ण इति । प्राप्तात्पधन इति भावः । तथाचात्र न लक्षणा कापि ।

३ । लेख्यासन्निधिविषयं चेदम् ।

तदाह विष्णुः, असमग्रदाने लेख्यासन्निधाने चोत्तमर्णः स्वहस्तलिखितं दद्यादिति ।

नान्यवहितमात्राविषयमिदं, किन्तु साधारणमिति ॥ ९३ ॥

मि० ऋणे तु कृत्स्ने दत्ते लेख्यं किंकर्तव्यमित्यत आह ।

या० दत्त्वर्णं पाटयेल्लेख्यं शुद्ध्यै वाऽन्यत्तु कारयेत् ।

मि० क्रमेण सकृदेव वा कृत्स्नमृणं दत्त्वा पूर्वकृतं लेख्यं पाटयेत् । यदा तु दुर्गदेशावस्थितं लेख्यं नष्टं वा तदा शुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यं कारयेदुत्तमर्णम् अधमर्णः । पूर्वोक्तक्रमेणोत्तमर्णो विशुद्धिपत्रमधमर्णाय दद्यादित्यर्थः ।

मि० ससाक्षिके ऋणे कृत्स्ने दातव्ये किं कर्तव्यमित्यत आह ।

या० साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ॥ ९४ ॥

यच्च ससाक्षिकमृणं तत् पूर्वसाक्षिसमक्षमेव द-

ष्यात् ॥ ९४ ॥

इति लेख्यप्रकरणम् ॥

बा० १। सान्निध्यात् व्युत्क्रमेणाह * क्रमेणेति । द्वितीयपादं व्याचष्टे*यदात्विति । वा चार्थे । तेनान्येषामपि संग्रहः । मौल-स्तु विकल्पे एव । * अधमर्णत्वेति । स्वाधमर्णत्वेनेत्यर्थः । *अन्यत्, वक्तात् भिन्नम् । णिजर्थमाह * उत्तमर्णम् इति । उत्तमर्णेनेति पाठान्तरम्। हृक्रोरिति वा कर्मत्वम् । तात्पर्यार्थमाह * पूर्वोक्तेति । प्रागुक्तरीत्येत्यर्थः ।

उ० ३। एवं लेख्यस्थले उक्त्वा साक्षिमात्रप्रमाणकऋणप्रदानविषये आह * ससाक्षिके इति । साक्षिणां सर्वदा सांनिध्यासंभावादिदं यौगपद्यविषयकमित्याह * कृत्स्ने इति । चस्य व्युत्क्रमान्वयादाह * यच्चेति । यत्त्वित्यर्थः । क्वचित्तथैव पाठः । पूर्वेति बहुव्रीहिः । तत्साक्षिसमक्षमित्यर्थः । क्वचिदेवमेव पाठः । वा एवार्थे व्युत्क्रमे चेत्याह * एवेति ॥ ९४ ॥

इति लेख्यप्रकरणम् ।

अथ दिव्यप्रकरणम् ॥ ७ ॥

मि॰ लिखितसाक्षिभुक्तिलक्षणं त्रिविधं मानुषप्रमाणमुक्तम् । अथावसरप्राप्तं दिव्यं प्रमाणमभिधास्यन् तुलाग्न्यापस्त्यादिभिराद्यैः पञ्चभिः श्लोकैर्दिव्यमातृकां कथयति । तत्र तावद्दिव्यान्युपदिशति ।

या॰ तुलाग्न्यापो विषं कोशो दिव्यानीह विशुद्धये ।

मि॰ तुलादीनि कोशान्तानि पञ्च दिव्यानीह धर्मशास्त्रे विशुद्धय संदिग्धस्यार्थस्य संदेहनिरासाय ज्ञातव्यानीति ।

ननु अन्यत्रान्यान्यपि तण्डुलादीनि दिव्यानि सन्ति ।

घटोऽग्निरुदकं चैव विषं कोशस्तथैव च ।
तण्डुलाश्चैव दिव्यानि सप्तमस्तसमाषकः ॥

इति पितामहस्मरणात् । अतः—

कथमेतावन्त्येवेत्यत आह ।

या॰ महाभियोगेष्वेतानि

मि॰ एतानि महाभियोगेष्वेव नान्यत्रेति नियम्यते, न पुनरिमान्येव दिव्यानीति । महत्त्वावधिं च वक्ष्यति । नन्वल्पाभियोगेऽपि कोशोऽस्त्येव । कोशमल्पेऽपि दापयेदिति स्मरणात् । सत्यम् । कोशस्य तुलादिषु पाठो न महाभियोगेष्वेवेति नियमार्थः,

किंतु सावष्टम्भाभियोगेऽपि भवन्तीत्यर्थः । अन्यथा शङ्काभियोगे एव स्यात् ।

अवष्टम्भाभियुक्तानां घटादीनि विनिर्दिशेत् ।
तण्डुलाश्चैव कोशश्च शङ्कास्वेव न संशयः ॥

इति स्मरणात् ।

महाभियोगेषु शङ्कितेषु सावष्टम्भेषु चाविशेषेण प्राप्तावपवादमाह ।

या० शीर्षकस्थेऽभियोक्तरि ॥ ९५ ॥

मि० एतानि तुलादीन्यभियोक्तरि शीर्षकस्थेऽभियुक्तस्य भवन्ति । शीर्षकं शिरः, व्यवहारस्य चतुर्थः पादो जयपराजयलक्षणः । तेन च दण्डो लक्ष्यते । तत्र तिष्ठतीति शीर्षकस्थः । तत्प्रयुक्तदण्डभागित्यर्थः ॥ ९५ ॥

बा० १ । सङ्गतिमाह * लिखितेति । अभ्यर्हितत्वात्सप्तत्रिक्रमस्य विवक्षितत्वाच्चास्य पूर्वनिपातः । अथेत्यस्य कथयतीत्यत्रान्वयः । प्रतिबन्धकाशिष्यजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वप्रसङ्गसङ्गतिमाप्तमित्यर्थः । दिव्यमिति जातावेकवचनं, तुलाधारणेत्यादिना । *दिव्यमातृकां, दिव्योपोद्घातम् । तत्राद्यश्लोकमवतारयति * तत्रेति । दिव्यमातृकायां कथनीयायामित्यर्थः । * तावत्, आदौ । नाम्ना वस्तुसंकीर्तनमुद्देशः । कर्मत्वस्य विवक्षितत्वात्तुलाशब्दस्य पूर्वनिपातः । त्रयाणामितरेतरद्वन्द्वः । समासान्तविधेरनित्यत्वान्न सः । विषयादिपदार्थमाह *संदिग्धस्येत्यादिचतुर्थ्यन्तेन । नित्यसापेक्षत्वादाह *सन्देहनिवृत्त्यर्थमिति । पञ्चम्यतयाऽऽकाङ्क्षाशान्तये आह * दातव्यानीति ।

२ । एतान्येव दिव्यानीत्याशयेनावतरणमाह * नन्विति ।

*घट इति । घटः स्यात्तु तुलाकाष्ठमिति कोशः । *पितामहेति ।

बृहस्पतिरपि,

घटोऽग्निरुदकंचैव विषं कोशश्च पञ्चमः ।

षष्ठं च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकः ॥

अष्टमं फाल इत्युक्तं नवमं धर्मजं स्मृतम् ।

दिव्यान्येतानि सर्वाणि निर्दिष्टानि स्वयंभुवा ॥ इति ।

अतएव शङ्कायां बहुवचनसङ्गतिः । * तावन्ति, पञ्च।

यद्यपि त्रेधा नियमः सम्भवति, अपराधविशेषे दिव्यस्वरूपे उभयत्रापि, तद्यथा महाभियोगरूपापराधेष्वेव दिव्यानीत्याद्यः, इयन्त्येव दिव्यस्वरूपाणीति द्वितीयः, मिलितस्तृतीयः, तथाप्याद्य एव नियमः स्वीक्रियते, न द्वितीयतृतीयौ, पितामहोक्तिविरोधादित्याह * एतानीति । तुलेत्यत्र निर्दिष्टानि दिव्यानि महाभियोगेष्वेवेति नियम इत्यर्थः। नपुनरित्यनेनार्थात्तृतीयस्यापि निरासः । पुनःशब्देन तन्निरास इतित्वयुक्तं । उदक्षरत्वात् । * नपुनरिति । नत्वित्यर्थः । अनेन शङ्का समाहिता । नियम्यते इत्यस्यानुषङ्गः । ननु महत्त्वस्य सावधिकत्वेनानियम-प्रसिरत आह * महत्त्वेति । नासहस्रादित्यादिनेति भावः । तथाच नानियम इति बोध्यम् ।

३। स्मृत्यन्तरविरोधापत्त्या प्रोक्तनियमो न घटते इत्याशङ्कां परिहरति * नन्वल्पेत्यादि । पितामहमाह * कोशमल्पेऽपीति । *सत्यमिति । उक्तवचनाविरोधाय विधिनियमयोर्वैधेर्ज्यायस्त्वेन तथैव स्वीक्रियते, न तु तस्य नियमशरीरे प्रवेशः। तथाच तस्य तैः सह पाठो न तदर्थोऽपितु यथा तुलादीनि सावष्टम्भाभियोगेषु एवमयमपीत्येवमर्थ इति भावः । * सावष्टम्भेति । अवष्टम्भेन सहितः सावष्टम्भः । स्वोपरि दण्डाङ्गीकारश्चावष्टम्भः ।

निश्चयः स इति व्यतरः । * अन्यथा, मूले कोशस्या पादा-
ने । कोश इति शेषः । लानुक्तत्वात्स्मृत्यन्तरमाह *अवष्टम्भे-
ति । सावष्टम्भेति पाठान्तरम् । पितामहोक्तिरिय । *घटा ानि,
चत्वारि । *श ास्वेवेति । श ास्वेतानि योजयेदिति पाठान्तर ।

४। तथाच महाभियोगो महाभिशापः । स च द्विविधः, श-
ङ्कितःसावष्टम्भश्च। स्वोपरि ाकृत्य लापितः सावष्टम्भः ।
वमल्पाभियोगेऽपि बोध्यम् । अत एवाह *म ाभियोगेष्विति ।
तश्रदमाह *श ितेष्विति।उभयविधमहाभियोगेष्वविशेषेण प्रोक्त-
तृतीयपादे विशेषानादरेणैतेषां तुलादिच र्णा मा ावित्यर्थः ।
अनुक्त्या आह* तानीति । ा त्यर्थः । अर्थादाह *अभि-
कस्येति । *शिर इति । प्रकृते व्यवहार स्य
तदाह * व्यव ारस्येति । स्पष्टार्थं नस्तत्स्वरूपमाह *जयेति ।
प्रकृते तु पराजय एव विवक्षितः । अतएव तत्संबन्धा ार्थ-
माह *तेनचेति । अहानौ । समये तिष्ठ सुग्रीवेतिव ।
अ कृतदण्डनं न जहातीत्यर्थः । अतएवाह * तदिति । परा-
जयेत्यर्थः । *इत्यर्थइति । त िन्सतीत्यादिः । अभिशापदातरि
शीर्षकस्थे पराजयहेतुकदण्डभाजि सत्येव एतानि भवन्ति। यच्च-
नेनेदं न कृतं स्यात्तदा मह्यं दण्डो देय इति वादी शीर्षकस्थस्ता-
दृशे ितात्यर्थः । तथाच सावष्टम्भेष्वेव तेषु एतेन शङ्किते-
ष्विति विशेषोक्त्या तदप्रवादत्वमित्यर्थः ॥ ९९ ॥

मि० ततोऽर्थी ः प्रति ार्थसाधनम्—
इति भावप्रतिज्ञावादिन एव क्रियेति व्यवस्था
दर्शिता । तदपवा माह ।

या० रुच्या वाऽन्यतरः कुर्यादितरो वर्तयेच्छिरः ।

---

१ अस्य वि ोषोक्त्या त्यन्वयः ।

मि० रुच्या ऽभियोक्त्रभियुक्तयोः परस्परसंप्रति-पत्त्याऽन्यतरोऽभियुक्तोऽभियोक्ता वा दिव्यं कुर्यात्। इतरोऽभियुक्तः शिरः शारीरमर्थदण्डं वा वर्तये-दङ्गीकुर्यात्। अयमभिसन्धिः। न मानुषप्रमाणवद्दि-व्यं प्रमाणं भावैकगोचरम्, अपितु भावाभावाव-विशेषेण गोचरयति। अतश्च मिथ्योत्तरे प्रत्यव स्क-न्दने प्राङ्न्याये वाऽर्थिप्रत्यर्थिनोरन्यतरस्येच्छया दि-व्यं भवतीति।

मि० अल्पाभियोगे महाभियोगे शङ्कावष्टम्भयोर-विशेषेण कोशो भवतीत्युक्तम्। तुलादीनि विषा-न्तानि तु महाभियोगेष्वेव सावष्टम्भेष्वेवेति च नियमो दर्शितः। तत्रावष्टम्भाभियोगेष्वेवत्यस्यापवादमाह।

या० विनापि शीर्षकात्कुर्यान्नृपद्रोहेऽथ पातके ॥९६॥

मि० राजद्रोहाभिशङ्कायां ब्रह्महत्यादिपातका-भिशङ्कायां च शिरःस्थायिना विनाऽपि तुलादीनि कु-र्यात्, महाचौर्याभिशङ्कायां च।

यथाह,

राजभिः शङ्कितानां च निर्दिष्टानां च दस्युभिः।
आत्मशुद्धिपराणां च दिव्यं देयं शिरो विना॥ इति।

तण्डुलाः पुनरल्पचौर्यशङ्कायामेव।

चौर्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः।

इति पितामहवचनात्। तस्मादपरः महाचौर्या-भिशङ्कायामेव।

चौर्यशङ्काभियुक्तानां तप्तमाषो विधीयते।

इति स्मरणात् । अन्ये पुनः शपथा अल्पार्थविषयाः ।

सत्यवाहनशस्त्राणि गोबीजकनकानि च ।
देवतापितृपादांश्च दत्तानि सुकृतानि च ॥
स्पृशेच्छिरांसि पुत्राणां दाराणां सुहृदां तथा ।
अभियोगेषु सर्वेषु कोशपानमथापि वा ॥
इत्येते शपथाः प्रोक्ता मनुना स्वल्पकारणे ।

इति नारदादिस्मरणात् । यद्यपि मानुषप्रमाणानिर्णेयस्य निर्णायकं यत् तद्दिव्यमिति लोकप्रसिद्ध्या शपथानामपि दिव्यत्वं तथापि कालान्तरनिर्णयनिमित्तत्वेन समनन्तरनिर्णयनिमित्तेभ्यो घटादिभ्यो दिव्येभ्यो भेदेन व्यपदेशो ब्राह्मणपरिव्राजकवत् । कोशस्य तु शपथत्वेऽपि घटादिषु पाठो महाभियोगविषयत्वेनावष्टम्भाभियोगविषयत्वेन च घटादिसाम्यात्, न तु समनन्तरनिर्णयनिमित्तत्वेन । तण्डुलानां तप्तमाषस्य च समनन्तरनिर्णयनिमित्तत्वेऽप्यल्पविषयत्वेन शङ्काविषयत्वेन च घटादिवैलक्षण्यात्तेष्वपाठ इति सन्तोष्टव्यम् ।

एतानि च दिव्यानि शपथाश्च यथासंभवमृणादिषु विवादेषु प्रयोक्तव्यानि ।

यत्तु पितामहवचनम्,

स्थावरेषु विवादेषु दिव्यानि परिवर्जयेत् ।

इति, तदपि लिखितसामन्तादिसद्भावे दिव्यानि परिवर्जयेदिति व्याख्येयम् । ननु विवादान्तरेष्वपि प्रमाणान्तरसंभवे दिव्यानामनवकाश एव । सत्यम् ।

ऋणादिषु विवादेषु उक्तलक्षणसाक्ष्युपन्यासे अर्थिना कृतेऽपि प्रत्यर्थी यदि दण्डाभ्युपगमावष्टम्भेन दिव्यमवलम्बते तदा दिव्यमपि भवति । साक्षिणामाशयदोषसंभवात्, दिव्यस्य च निर्दोषत्वेन वस्तुतत्त्वविषयत्वात्, तल्लक्षणत्वाच्च धर्मस्य ।

यथाह नारदः,

तत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिणि ।
दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत् ॥इति।

स्थावरेषु विवादेषु प्रत्यर्थिना दण्डावष्टम्भेन दिव्यावलम्बने कृतेऽपि सामन्तादिप्रमाणसद्भावे न दिव्यं ग्राह्यमिति विकल्पनिराकरणार्थं स्थावरेषु विवादेष्वित्यादिपितामहवचनं, नात्यन्तिकदिव्यनिराकरणार्थम् । लिखितसामन्ताद्यभावे स्थावराविवादेष्वनिर्णयप्रसङ्गात् ॥ ९६ ॥

बा० १। यद्यप्यव्यवहितसङ्गतिस्तत्र विकल्पमात्येवं सम्भवति तथापि विशेषोपादानाय व्यवहितसङ्गतिमाह * तत इति । वस्तुतस्तदपवादत्वाभावादाह * तदपवादार्थमिति । तदर्थमुक्तापेक्षया विकल्पमाहेत्यर्थः। रुचिरत्र न प्रसिद्धेत्याह * अभियोक्त्रभियुक्तयोरिति । अन्यतरः इत्यत्र अल्पाद्यूतरमितिवत्स्वार्थे तरप् । उक्तादन्य इत्यर्थः। तदाह *अभियोक्ता वा दिव्यं कुर्यादिति । मौलविकल्प एवायम् । अतएवाह *इतरोऽभियुक्तइति। दण्डविकल्पमाह * अर्थदण्डं वेति। एतेन तरपो यथाश्रुतत्वेन तस्याभियोक्ताऽभियुक्तो वेति व्याख्यानम् अग्रेचैवमेवेति क्वचिदुपलभ्यमानमयुक्तं वेदितव्यम् ।

२। ननु दिव्यतत्त्वे शीर्षकस्थे इत्यनेनाभियोक्तुः शिरोवर्ति-

त्वाभिधानादभियुक्तस्य दिव्यमित्युक्तं, रुच्येत्यनेन तु अभियुक्ते शिरोवर्त्तिनि तदिच्छया अभियोक्तापि दिव्यं कुर्यात इत्युक्तमिति तथैव कुतो नोक्तम्, अत आह * अयमभिसंधिरिति । अभिप्राय इत्यर्थः । * भावैकेति । भावमात्रेत्यर्थः । इतिः तत्समाप्तौ । अयं भावः । अयं च विकल्पोऽभियोक्त्रिच्छायामेव । तदनिच्छायां त्वभियोज्यस्यैव दिव्यम् ।

न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥
इति दिव्यतत्त्वे कातीयोक्तेरिति ।

ऊ० ३। उत्त पद्यमवतारयि मुक्तसर्ववचनसिद्धमर्थमनुवदति * अल्पाभियोगेइति । यथाक्रमं कोशमल्पेऽपीत्यनेन, महाभियोगे ध्वेतानीत्यनेन, शङ्कास्वेव न संशय इत्यनेन, तुलान्यापि इत्यत्र तुलादिसहपाठेन च चतुर्षु स इत्युक्तमित्यर्थः । यथासंख्याभावाय व्याससमासाभ्यामुक्तिः । एतत्सूचक एव अपिः । *नियम इति । जातावेकवचनम् । चो व्युत्क्रमे, दर्शितेत्यर्थः । तत्राद्यो महाभियोगे ध्वेतानीत्यनेन, शीर्षकस्थे इत्यनेन द्वितीयो दर्शित इति बोध्यम् । अल्पेऽपीत्येवकारस्तु तत्कालान्वयाशयक इत्यपि बोध्यम् । * तत्र, तयोर्मध्ये ।

४। मूले अथशब्दः समुच्चये पातकपदं महापातकपरमित्याह * ब्रह्महत्यादीति । शीर्षकादित्यस्य व्याख्या * शिरःस्थायिनेति । तथाच राजद्रोहमहापातकयोः अल्पत्वेऽपि तुलादीनि कार्याणीति तदपवादत्वमिति भावः । अथसमुच्चयमेवाह* महाचौर्याभिशङ्कायामिति। तन्मध्ये तत्रेत्यर्थः।पितामहनारदावाह * यथाहेति । साजात्यादेकवचनम् । * राजाभिरिति । अत्र राजाभिरिति शङ्का पञ्चम्यात्मकापि पराणां च दिव्यमित्य-

नेन निरवष्टम्भाभियोगे च दिव्यदानस्योपसंहाराच्चाभ्यपातिनिर्दिनामित्यस्यापि शङ्काविषयत्वं बोध्यम्।

व्यतत्त्वे कालिकापुराणे,

परदाराभिशापे च चौर्यागम्यागमे च।
महापातकशस्ते च स्याद्दिव्यं नृपसाहसे॥
विप्रतिपत्तौ विवादे अवर्णास्थापने कृते।
तत्रैव त्पयेद्दिव्यं शिरःपूर्वं महीपतिः॥
परदाराभिमर्शे च बहवो यत्र वादिनः।
शिरोहीनं शोधितमात्रः शुद्धिकारणात्॥ इति।

*अगम्याः, परदारभिन्नाः साधारणवेश्याद्याः। *शस्ते, अभिशस्ते। साहसं बलादन्यायः। विप्रतिपत्तौ परदाराभिशापादिविषयायाम्। विवादे ऋणादानादिविषये। अवर्णो निन्दा। परेति विशेषणमविवक्षितम्। अभिशापस्याबाधत्वात्। एवं बहव इत्याद्यपि। परदाराभिमर्शेचेति चौर्यादीनामुपलक्षणम्। तेन बाधभावेऽपि सर्वाभिशापे दिव्यं भवति। अत एव शुद्धिकारणादिति हेतूक्तिः, विनापीति मांलसामान्योक्ति सङ्गच्छते।

विष्णुरपि,

राजद्रोहे साहसेषु विनापि शीर्षकार्पणमिति।

नारदोपि, (व्य० प० १।२७०)

आधिरांसि च दिव्यानि राजा भृत्येषु दापयेत्।
अभियोगाभिशस्तानामन्येषां तु यथाक्रमम्॥ इति।

८। शङ्कास्वेवेत्येवकारं सफलयन्विरोधपरिहाराय विशयमा

*तण्डुलाः पुनरिति। तण्डुलास्त्वित्यर्थः। *चौर्येत्विति। यद्यप्यत्र चौर्ये त्येवोक्तं तथापि तण्डुलरूपाल्पदिव्याभिरोधेन

निमित्तस्याप्यल्पत्वकल्पनमिति भावः ।

६। प्राग्वदाह * तप्तेति । * चौर्यशङ्केति पितामहोक्तिः । यद्यप्यत्र चौर्यशङ्केत्यविशेषेणोक्तं तथापि तप्तमाषस्य तीक्ष्णत्वेन महादिव्यत्वात्तन्मितिकतप्तमाषानुसारेण निमित्तस्य चौर्यस्यापि महत्त्वं युक्तमिति भावः । इदं च तृतीये व्यक्तीभविष्यति ।

७। *अन्ये, उक्तेभ्यः । *पुनः, तु । *वाहनम्, अश्वादि । *बीजं, धान्यम् । देवता च पिता च तयोश्चरणान् । *दत्तानि, भूम्यादीनि । *सुकृतानि, सदाचरणानि । स्पृशेदित्यस्य सर्वत्रान्वयः । *सह्येषु, सहनयोग्येषु । स्वल्पेष्विति यावत् । *कोशपानम्, कोशस्य जलविशेषस्य भक्षणम् ।

८। ननु तुलादीनां दिव्यत्वमुक्तं मूलादौ, सत्यादीनां तु शपथत्वमुक्तं नारदेन, तदयुक्तं, तेषामपि दिव्यलक्षणाक्रान्तत्वादित्याशङ्कते * यद्यपीति । दिव्यलक्षणमाह * मानुषेति । * अनिर्णयस्य, अर्थस्य । लोकेत्यनेन शास्त्रोक्तत्वव्यवच्छेदः । उक्तलक्षणं दिव्यं द्विविधं, तत्कालनिर्णायकं कालान्तरनिर्णायकं च । तत्राद्यं तुलादि, द्वितीयं सत्यादि । तत्राद्यस्य अनामान्तरत्वेऽपि द्वितीयस्य नामान्तरं शपथ इति । एवं सति भेदेनोक्तिर्विशेषधर्मानिमित्तिकेत्याशयेन समाधत्ते * तथापीति । निर्णयनिमित्तेत्यादिः पूर्वोक्तः । गोबलीवर्दन्यायस्यासत्त्वादाह * ब्राह्मणेति । ब्राह्मणानामन्त्रयस्वेत्यत्रैव तत्त्वस्य तत्राविशिष्टत्वात्तदामन्त्रणेऽपि प्राप्ते पुनः परिव्राजकमामन्त्रयस्वेति कथनं तत्प्राधान्यप्रतिपादनार्थं यथा तथा तुलादीनां सत्यादीनां च दिव्यत्वे तुल्येऽपि ततस्तेषां भेदेन कथनं कालान्तरनिर्णयनिमित्तत्वद्योतनार्थम् इत्यर्थः । यथा तस्य तत्फलान्तरानुरोधेनैवमपीति यावत् । यद्वा ब्राह्मणानामन्त्र

परिव्राजकं चेत्युक्ते प्रोक्तरीत्या सिद्धे पुनस्तदुक्त्वा यथा तस्य तदन्यपरत्वं तथाऽत्रापीत्यर्थः ।

९। ननु यदि कालान्तरनिर्णयनिमित्तानि शपथास्तर्हि कोशस्य सद्योनिर्णयनिमित्तेषु तुलादिषु पाठोऽनुपपन्नः, तस्य तदन्तर्गतत्वात्, अतः प्रा॰ क्तमनुस्मृत्यैवाह * कोशस्यात्विति । *विषयत्वेन चेति साम्ये हेतुः । * निमित्तत्वेनेति । घटा॰ साम्यादित्यनुषज्यते ।

१०। ननु एवमपि तण्डुलतप्तमाषयोः सद्योनिर्णयनिमित्तत्वेन मूले तुलादिषु पाठः स्मृत्यन्तरवदुचितोऽत आह * तण्डुलानामिति । * अल्पेति । अल्पाभियोगेत्यर्थः । नन्वैकरूप्यमेव सर्वत्रोचितं न तु क्वचित् किञ्चित्कृतं वैलक्षण्यं क्वचित् किञ्चित् कृतं साम्यमिति वैरूप्यम्, अत आह * सन्तोष्टव्यमिति । सिद्धस्य गतिश्चिन्तनीयेति भावः । कोशस्याल्पशङ्काभयाविषयत्वेऽपि तन्मात्राविषयकत्वाद्युक्तस्तेषु पाठ इति तात्पर्यम् ।

११। विशेषं वक्तुं प्रतिजानीते * एतानि चेति । चो वाक्यालङ्कारे । *ऋणादिष्विति । ऋण॰ ॰नादिरूपाष्टादशविवादेष्वित्यर्थः । नन्विदमयुक्तं, पितामहाविरोधादित्याशङ्क्य प्रागुक्तरीत्यैव परिहरति *यत्त्वित्यादि । स्थावरेष्विति विषयसप्तमी । ॰॰मन्तास्तत्राग्रे स्फुटीभविष्यन्ति । *व्याख्येयमिति । स्थावरविवादेषु ॰त्यन्तिकदिव्या॰॰॰र्थमिदम् । ॰॰ प्रमाणाभावेऽनिर्णयप्रसङ्गात् । किन्त्वर्थिनो दृष्टप्रमाणसत्त्वे प्रत्यर्थिनि दण्डावष्टम्भेन दिव्यमवलम्बत्यपि दृष्टेन अदृष्टेन वा निर्णय इति प्रा॰ क्तरीत्या प्राप्तविकल्पनिरासेन दिव्यनिषेधार्थं, विवादान्तरे तु विकल्प एवेति भावः ।

१२। इदमेव ध्वनयन्स्थावरपदानर्थक्यमुक्त्वापुन॰॰॰व्यत्वात्मा-

तं परिहर्तुं शङ्कते *नन्विति । * विषा न्तरेष्वपीति । स्थावर-
विषयान्येष्वपीत्यर्थः । *प्रमाणेति । दिव्यान्यमा नुषप्रमाणेत्य-
र्थः । ऋणा दिष्विति विषयसप्तमी । * दण्डा पगमाति ।
व्याङ्गीकारनिश्चयनेत्यर्थः । आपिना तस्यापि समुच्चयः । ननु
सम्भवती ति व्यापारि रयोऽत आह *सांसि आत्मेति आत्मयोऽन्तः-
करणम् । हेत्वन्तरमाह *दिव्यस्यचेति । योऽन्ते योज्यः ।
हेत्वन्तरमा *तल्लक्षणत्वादिति । धर्मस्य व तत्त्वाविषयकत्वा-
देत्यर्थः ।

१३। अत्र हेतौ मानमाह *यथाहेति । *तत्र, दिव्ये । *स-
त्ये, तद्रूपे । *सा णि व्यवहार तन्मात्रं तु । * दैवसाध्ये,
दैविकसाध्ये । *पौरुषेयीं, क्रियां सा रूपा । नेत्युभयान्व-
यि । अयं च दैवसम्भावनामात्रेण साक्ष्या निषधो, न वा-
स्तव इति बोध्यम् ।

१४। वमन्यत्राप्य स्थावरे कथयन् स्थावरपदसार्थक्यं
तत्राह *स्थावरेष्विति । *सामन्तादिदृष्टेति । तद्रू पेत्यर्थः ।
नेत्युत्तरान्वयि । * विकल्पेति । स्थावरे मानुषदिव्यप्रमाण-
योर्न विकल्प इति विकल्पानरा करणार्थः स्थावर ब्द इति
भावः । *आत्यन्तिकेति । सर्वथेत्यर्थः । निषेधे हेतुमाह *लि-
खितेति ॥ ९६ ॥

मि० किंच ।

या० सचैलस्नातमाहूय सूर्योदयउपोषितम् ।
कारयेत्सर्वदिव्यानि नृपब्राह्मणसन्निधौ ॥ ९७ ॥

मि० पूर्वे द्युपोषितमुदिते सूर्ये सचैलस्नातं दिव्यप्रा-
र्थनाकालमाहूय नृपस्य सभ्यानां च ब्राह्मणानां सन्निध

सर्वाणि दिव्यानि कारयेत्प्राड्विवाकः।
त्रिरात्रोपोषिताय स्यादेकरात्रोषिताय वा।
नित्यं दिव्यानि देयानि शुचये चार्द्रवाससे॥

इत्युपवासविकल्पः पितामहेनोक्तो बलवदबलवन्महाकार्याल्पकार्यविषयत्वेन व्यवस्थितो द्रष्टव्यः। उपवासनियमश्च कारयितुः प्राड्विवाकस्यापि।

दिव्येषु सर्वकार्याणि प्राड्विवाकः समाचरेत्।
अध्वरेषु यथाऽध्वर्युः सोपवासो नृपाज्ञया॥

इति पितामहवचनात्। अत्र च यद्यपि सूर्योदये सर्वत्याविशेषेणोक्तं तथापि विशेषाभावादनुवारे दिव्यानि देयानि। तत्रापि—

पूर्वाह्णेऽग्निपरीक्षा स्यात्पूर्वाह्णे च घटो भवेत्।
मध्याह्ने तु जलं देयं धर्मतत्त्वमभीप्सता॥
दिवसस्य तु पूर्वाह्णे कोशशुद्धिर्विधीयते।
रात्रौ तु पश्चिमे यामे विषं देयं सुशीतलम्॥

इति पितामहोक्तो विशेषो द्रष्टव्यः। अनुक्तकालविशेषाणां तण्डुलतसमाषप्रभृतीनां पूर्वाह्ण एव प्रदानम्।

पूर्वाह्णे सर्वदिव्यानां प्रदानं परिकीर्तितम्।

इति सामान्येन नारदस्मरणात्॥ (व्य. प. १।२६८)

अहनि त्रिधा विभक्ते पूर्वो भागः पूर्वाह्णो मध्यो मध्याह्नः उत्तरोऽपराह्णः। तथाऽपरोऽपि कालविशेषो विधिप्रतिषेधमुखेन दर्शितः।

विधिमुखस्तावत्—
अग्नेः शिशिरहेमन्तौ वर्षाश्चैव प्रकीर्तिताः।

शरद्ग्रीष्मे तु सलिलं हेमन्ते शिशिरे विषम् ॥
चैत्रो मार्गशिरश्चैव वैशाखश्च तथैव च ।
एते साधारणा मासा दिव्यानामविरोधिनः ॥
कोशस्तु सर्वदा देयस्तुला त्वाम्बुदकालिकी। इति।

कोशग्रहणं सर्वशपथानामुपलक्षणम् । तण्डुला-
नां पुनर्विशेषानभिधानात्सार्वकालिकत्वम् ।

प्रतिषेधमुखोऽपि, (ना. व्य. प. १ । २५९)

न शीते तोयशुद्धिः स्यान्नोष्णकालेऽग्निशोधनम् ।
न प्रावृषि विषं दद्यात्प्रवाते न तुलां तथा ॥
नापराह्णे न सन्ध्यायां न मध्याह्ने कदाचन । ३२० इति।

न शीते तोयशुद्धिः स्यादित्यत्र शीतशब्देन हे-
मन्तशिशिरवर्षाणां ग्रहणम् , नोष्णकालेऽग्निशोधन-
मित्यत्रोष्णकालशब्देन च ग्रीष्मशरदोः । विधानलब्ध-
स्यापि पुनर्निषेध आदरार्थः । प्रयोजनं तु वक्ष्यते ॥९७॥

बा० १। * किश्चेति। दिव्यादि कालाद्युच्यते इत्यर्थः । * स-
चैलस्नातमिति बहुव्रीहिः । सचैलं स्नातामिति पाठान्तरम् ।
कृतमत्ययादिसूचितमाह * पूर्वेद्युरिति । अर्धबिम्बनिरासाय।
*उदिते इति । सूर्योदये इति बहुव्रीहिरिति भावः । ब्राह्मण-
पदार्थमेवाह * सभ्यानां चेति । नृपस्योक्तत्वेनार्थादाह * प्रा-
ड्विति । अत्रोपोषित इति सामान्येनोक्तावपि पितामहोक्तं वि-
शेषमाह * त्रिरात्रोपोषितायेति । * शुचये, कृतस्नानाय। * आर्द्र-
वाससे, सचैलस्नाताय । त्रिरात्रोपोषिताय अथवा एकरात्रोपो-
षिताय नित्यमवश्यं दिव्यानि देयानि इत्यर्थः । नित्यमित्यने-
अदाने प्रत्यवायः सूचितः। त्रिरात्रोपोषित एकेति पाठान्तरम् ।
एकरात्रोपोषिताय त्रिरात्रोपोषिताय वा ।

इति न[illegible]स्वादिधृतपाठस्तु मुनिशैलीविरुद्धत्वादुपेक्ष्यः । ननु बलवदिति न युक्तं, का[illegible]थता तम्येऽपि तथापत्तेः । अत आह * महेति ।

२। विशेषमाह * उपवासनियमश्चेति । चेनार्द्र[illegible]स[illegible]दिसमुच्चयः।

तदाह नारदः,

प्राड्विवाकस्ततो विप्रो वदवेद[illegible]पारगः ।

श्रुतवृत्तोपसम्पन्नः शान्तचित्तो [illegible]ः ॥

सत्यसन्धः शुचिर्दक्षः सवप्रा[illegible]णि[illegible]ते रतः ।

उपोषितश्चार्द्रवासाः कृतदन्ता[illegible]धावनः ॥

सर्वासां देवतानां च पूजां कृत्वा यथाविधि । इति ।

* शिष्टेति । वस्तुतस्तु सूर्यस्य तद्वारस्योदयो यत्रेति, सूर्ये तद्वारे उदयेऽर्थाद्रवेरिति वाऽर्थ इति स्मार्त्तमेवेदमिति बोध्यम् ।

३ । * तत्रापि, भानुवारेऽपि । विशेष इत्यत्रान्वयः । दिवसस्थत्वस्य सर्वत्र सम्बन्धः । स्पष्टार्थं विषान्यादिव्यमात्रे दिवसस्य प्राधान्यसूचनार्थमिदं विशेषणम् । सुशीतले इति हेतुगर्भं यामविशेषणम् । तु शीतले इति पाठान्तरम् । सुशीतलमिति पाठस्त्वयुक्तः ।

४। विशेषमाह * अनुक्तेति । एतेन न्यूनता निरस्ता । कालस्योक्तत्वादाह * वेलेति । प्रभातिशब्दे[illegible] कालादिग्रहणम् । * पूर्वाह्णे इति ।

अहो[illegible]त्रोषिते स्नाते त्वार्द्रवाससि मानवे—(ना.व्य.प.१।२६८)

इति अस्य पूर्वार्द्धम् । पूर्वाह्णादीनामनेकत्वादाह * अहनीति ।

५ । पितामहोक्तमेव विशेषान्त माह * तथेति । मासादिरित्यर्थः । * मुखेन, तदुभयद्वारा । * विधीति । तत्रेत्यादिः । बहुव्रीहिः । एवमग्रेऽपि । शिशिर[illegible]मन्ताविः-

त्यार्षम् । ऋतुनक्षत्राणामानुपूर्व्येणेत्युक्तेः । एवं चरणग्रीष्मे इत्यपि बोध्यम् । अतएवाग्रे तथैव प्रयोगद्वयम् । अन्त्ये समाहारद्वन्द्वः । वर्षाण्येवेति कल्पतरुधृतोऽपपाठः । तस्य क्लीत्वात् । प्रकीर्तित इति पाठे काल इत्यस्य विशेष्यत्वं बोध्यम् ।

योो यस्य विहितः कालो विधिर्यस्य च यो यथा ।
तं प्रवक्ष्यामि तत्त्वेन वादिनश्च बलाबलम् ॥

इति इतः प्रागुक्तेः । अतएव—

अग्निः शिशिरहेमन्तवर्षासु परिकीर्तितः ।

इति मयूखधृतपाठोऽप्ययुक्तः । * कोशस्त्विति । अस्य स्थाने—

घटः सर्वर्तुकः प्रोक्तो ऽवाते वाति विवर्जयेत्— इति पाठः कल्पतर्वादौ । इदं नारदीयमिति केचित् ।

६ । न्यूनतां निराचष्टे * कोशेति । चतुर्णां दिव्यानां प्रत्येकमुक्तत्वात्तन्मध्यपाठसत्त्वादिति भावः । तत्रापाठात् भेदेनाह * तण्डुलेति । अतएव पुनस्त्वर्थः । * विशेषेति । अग्न्यादेरिवेति भावः । शङ्काविषयतया सहपाठाच्चेत्यपि बोध्यम् । तप्तमाषादेस्तु चैत्रादिरेव काल इति बोध्यम् ।

७ । द्वितीयमाह * प्रतिषेधेति । * नशीते इति ।

विचार्य धर्मनिपुणैर्धर्मशास्त्रविशारदैः ।
धर्मं सर्वर्तुकं प्रोक्तं पण्डितैर्घटधारणम् ॥ (२६०)
वर्षासु समये वह्निर्हेमन्ते शिशिरे तथा ।
ग्रीष्मे सलिलमित्युक्तं विषं काले तु शीतले ॥ (२५४)

इति इतः प्राक् नारदोक्तिः । * प्रवाते, प्रकृष्टे वाते स-

---

१ न शीते इत्यनन्तरं विचार्यधर्मनिपुणैरिति श्लोक उपलभ्यते । वर्षासुसमये इति तु श्लोकचतुष्टयव्यवहितं पूर्वमुपलभ्यते । तत्रापि- वर्षासु वह्निरित्युक्तः शिशिरेतु घटः स्मृतः—इति पूर्वार्धे पाठः ।

ति। न मध्याह्ने इति निषेधो जलान्यपरः। अतः प्रा[illegible]काष्ठिता-
महविरोधो न।

८। विध्येक[illegible]क्यतायं विरोधा[illegible]न[illegible]साय चाह * नवीते
इत्यादि। * हेमन्तेति। मार्गशीर्षान्येत्यादिः। * उष्णकाल[illegible]-
न च, उष्णकालशब्दनापि। * ग्रीष्मशरदोः, ग्रहणमित्य[illegible]च्य-
ते। एवं प्रावृट्शब्दो ग्रीष्मशरदो[illegible]पलक्षणमिति बोध्यम्।

अव्य[illegible]स्थितमर्यादं विषं प्रावृषि जायते। इति पितामहः।

९। ननु ग्रीष्मादिकालविधेरेवान्यकालानि[illegible]त्तौ सत्यां पुन-
र्निषेधोऽफलोऽतआह * विधानलब्धस्यापीति। निषेध[illegible]विषयका-
ल[illegible]चेत्यर्थः। यथाश्रुते[illegible]पपत्तिः स्पष्टैव।

१०। ज्योतिःशास्त्रे विशेष उक्तः,

सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा।
मलमासे न कर्त्तव्या परीक्षा जय[illegible]णा॥
[illegible] गुरोश्चैव न शुक्रेऽस्तं गते पुनः।
सिंहस्थे च रवौ नैव परीक्षा शस्यते बुधैः॥
नाष्टम्यां न च[illegible]दश्यां प्रायश्चित्तपरीक्षणम्।
न परीक्षाधिवासश्च शनिभौमदिने भवेत्॥
नो शुक्रास्तेऽष्टमार्के [illegible]सहितरवौ [illegible]ऽष्टमेन्दौ।
विष्टौ मासे मलाख्ये कुजशनिदिवसे जन्मतारासु चाथ॥
नाडीनक्षत्रहीने गुरुर[illegible]जनीनाथताराविशुद्धौ।
प्रातः कार्या परीक्षा [illegible]चरग्रहांशोदये शस्तल[illegible]॥

इति। * वक्ष्यतइति। अ[illegible]पदमव कालान्तरे[illegible]त्यादि[illegible]॥९७॥

मि० अधिका[illegible]व्यव[illegible]थामाह।

या० तुला स्त्रीबालवृद्धान्धपङ्गुब्राह्मणरोगिणाम्।

अग्निर्जलं वा, शूद्रस्य यवाः सप्त विषस्य वा॥९८॥

मि० स्त्री स्त्रीमात्रं जातिवयोऽवस्थाविशेषामादरेण। बाल आषोडशाद्वर्षाज्जातिवि ेषाना रेण। वृद्धोऽशी-तिकावरः। अन्धो नेत्रविकलः। पङ्गुः पा विकलः। ब्राह्मणो ज तिमात्रम्। रोगी व्याधितः। एतेषां शो-धनार्थं लवेति नियम्यत । अग्निः फाल तसमाषश्च ।त्रियस्य। जलमेव वैश्यस्य। वाशब्दोऽवधारणे। वि-षस्य यवा उक्तपा माणाः सप्तैव शूद्रस्य शोधनार्थं भवन्ति। ब्राह्मणस्य लाविधानात्, शूद्रस्य यवाः सप्त विषस्य वेति विषविधाना , अग्निर्जलं वेति ।त्रियवैश्यविषयं युक्तम्। एतदेव स्पष्टीकृतम्—

पिताम न,

ब्राह्मणस्य घटो देयः ।त्रियस्य ताशनः।

व यस्य सलिलं प्रोक्तं विषं शूद्रस्य दापयेत्॥ इति।

यत्तु स्त्र्या नां दिव्याभावस्मरण , (ना. व्य. प. १।२५६)

सव्रतानां ार्तानां व्याधितानां तपस्विना ।

स्त्रीणां च न भ दिव्यं यदि धमस्त्वपे ितः॥ इति,

तद् स्त्र्या वाऽन्यतरः कुर्यादिति विकल्प-निवृत्त्यर्थम्। एत क्तं भवति। अव भ्माभियो-गेषु स्त्र्या ीनामभियोक्तृत्वेऽभियोज्यानामेव दिव्य-म्, तेषामभियोज्यत्वेऽप्यभियाक णामेव दिव्य । प स्परा भियोगे तु विकल्प एव। तत्रापि लवेत्यनेन वनन नयम्यते। तथा, म ापातकादिशङ्काभियोगे स्त्र्यादीनां तुलैवेति। एतच वचनं सर्वा व्यसाधा -

णेषु मार्गशिरश्चैत्रवैशाखेषु स्त्र्यादीनां सर्वासां व्यसम-वधाने नियामकत्व ऽर्थवत् । न च सर्वकालं स्त्रीणां तुलैवेति ।

स्त्रीणां च न विषं प्रोक्तं न चापि सलिलं स्मृतम् ।
घटकोशादिभिस्तासामन्तस्तत्त्वं विचारयेत् ॥

इति विषसलिलव्यतिरिक्तघटकोशाग्न्यादिभिः शुद्धिविधानात् । एवं बालादिष्वपि योजनीयम् । तथा, ब्राह्मणादीनामपि न सार्वकालिकतुलादिनियमः ।

सर्वेषामेव वर्णानां कोशशुद्धिर्विधीयते ।
सर्वाण्येतानि सर्वेषां ब्राह्मणस्य विषं विना ॥

इति पितामहवचनात् । तस्मात्साधारणे काले बहुदिव्यसमवधाने तुलादिनियमार्थमेवेदं वचनम् । कालान्तरे तु तत्तत्कालविहितं सर्वेषाम् । तथाहि । वर्षास्वग्निरेव सर्वेषाम् । हेमन्तशिशिरयोरपि क्षत्रियादिष्वग्न्यादिविकल्पोऽपि स्यात् । ब्राह्मणस्य त्वग्निरेव न कदाचिद्विषम् । ब्राह्मणस्य विषं विनेति प्रतिषेधात् । ग्रीष्मशरदोस्तु सलिलमेव । येषां तु व्याधिविशेषेणाग्न्यादिनिषेधः—

कुष्ठिनां वर्जयेदग्निं सलिलं श्वासकासिनाम् ।
पित्तश्लेष्मवतां नित्यं विषं तु परिवर्जयेत् ॥ इति,

तेषामग्न्यादिकालेऽपि साधारणं तुलाद्येव दिव्यं भवति ।

तथा—

तोयमग्निर्विषं चैव दातव्यं बालिनां नृणाम् ।

इति वचनाद् बलानामपि । सर्वथा विधिप्रतिषेधात् क्रमकालानातिक्रमेण जातिवयोवस्थाश्रितानि दिव्यानि देयानि ॥ ९८ ॥

बा० १ । * अधीति । वर्णादीत्यर्थः । तथोक्तिस्वारस्यादाह *स्त्रीमात्रमिति । मात्रार्थं यावत्त्वं विशदयति * जातीति । एवमग्रेऽपि । ब्राह्मणत्वादिर्जातिः । वर्षादिर्वयः । तत्कृता एवावस्थाः बाल्याद्यः । * नेत्रेति । लोकमांसच्युतरोधेनेदम् । यथातु भाष्यं तथा अपूर्णेत्यादिः । महाभियोगेषु सावष्टम्भेषु भा० क्तवाक्येभ्यः सर्वेषां प्राप्तेराह * तुलैवेतीति ।

२ । तायपादार्थं व्याचष्टे * अग्निरिति । एवकारनियमेन वासम्बन्धात्स्मृत्यन्तराविरोधाच्चेदमुपलक्षणमित्य । * फाल इति । कालावधिग्रहणात् * जलमिति । ननु जलंवेत्यस्य जलमेवेति कथमर्थो ऽत आह * वाशब्द इति ।

वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये । इति कोशात् ।

तस्याग्रेऽप्यन्वयो बोध्यः । अतएव सप्तैवेत्युक्तिरग्रे ।

३ । अवशिष्टं व्याचष्टे * विषस्येति । * उक्तेति । पूर्वाध्यायान्ते इति भावः । नन्वग्निजलविषाणां श्रौतानां श्रौतशूद्रे एव विकल्पोऽस्तु किमित्यश्रौतक्षत्रवैश्यविषयतास्वीकारोऽतआह *ब्राह्मणस्येति । *उक्तमिति । परिशेषादिति, अन्यथा न्यूनतापत्तेरेकस्य वाशब्दस्याधिक्यात्स्मृत्यन्तराविरोधाच्चेति भावः । एतेन विषस्य चेति काचित्कः पाठः प्रत्युक्तः । एतदेवाह * एतदेवेति । * दापयेत्, नृप इति शेषः । नारदोऽप्येवम् । गोरक्षकादिदिव्यतामप्येवं बोध्यम् । तेषां तत्तत्त्वस्याक्तत्वात् ।

४ । विरोधं परिहरति * यस्त्विति । नारदमाह * सव्रतानामिति । * मृषेति । अतिशयितातिप्रस्तानामित्यर्थः । कुष्ठार्ता-

सूत्रमिति पाठस्तु कल्पत । स्थितौ न युक्तः । पौनरुक्त्यापत्तेः । * अपेक्षित इति । अपेक्ष्यते इति द्वितीयः पाठः । अवेक्ष्यतेइति तृतीयः पाठः । * इति विकल्पेति । इतिपक्षप्राप्तदिव्येत्यर्थः ।

५। ननु कथमनेन तन्निवृत्तिरतआह * एतदिति । स्त्र्यादीनामिति सर्वान्वय्यपि । अन्यैः सहेति शेषस्तत्र । वैपरीत्ये ऽप्याह * एतेषामिति । स्त्र्यादीनामित्यर्थः । ननु स्त्र्यादीनामन्यैः सह तदभियोगे पक्षद्वयेऽपि तदन्येषामेव दिव्यमित्यस्तु अन्यतरविकल्पः, तथापि तेषां मिथोऽभियोगे कथम्, अत आह * परस्परेति । * विकल्प इति । ऐच्छिकविकल्प इत्यर्थः । ननु दिव्यकर्तृविकल्पवद्दिव्यविकल्पोऽप्यास्त्विति चेन्न । तस्य न्यायतः प्राप्तत्वेऽपि तुलास्त्रीति वाक्येन नियामकेन बाधात् । * तत्रापीति । दिव्यानां मध्येऽपीत्यर्थः । * अनेन, तुलास्त्रीति मूलवचनेन । नायं नियमः सावष्टम्भाभियोगे एव, किंत्वन्यत्रापीत्याह * तथेति । अयं समुच्चये, न सादृश्ये । तच्छङ्काभियोगे सर्वथा सावष्टम्भाभियोगसाम्याभावात् । तुलानियमसाम्यभावाशयको वा तथाशब्दः । नियम्यते इत्यस्यानुषङ्गः ।

६। नन्वेवं तुलानियमस्य स्त्रीणां सार्वकालिकत्वापत्तिः, तथाप्यनेन बाधात्, अत आह * एतच्चेति । स्त्रीबालेत्यादिमूलवाक्यं चेत्यर्थः । अर्थवदित्यत्रान्वयः । मासक्रमस्य विवक्षितत्वादाह * मार्गेति । अयमकारान्तः शब्दः । * अर्थवत्, सफलं सम्भावितम् । अन्यथा सार्थक्यं निराचष्टे * नचेति । नत्वित्यर्थः । * लैवेतीति । नियामकतयेत्यादेरनुषङ्गः । नारदमा * स्त्रीणान्त्विवति ।

[illegible]स्त्वहीनान् परितश्चार्दितान्तरान् ।
बालवृद्धांस्त्रीश्च परीक्षेत घटे सदा ॥ इति-

अस्य पूर्वपद्यम् । * अतः, यतो विषयस्तयोः अत इत्यर्थः। अन्त तत्त्वमिति पाठे आन्तरं वस्तु तत्त्वमित्यर्थः । आदि सप्त... माह *अग्न्यादिभिरिति । आदिना तण्डुलादि ।

७। वर्णविषये विशेषमाह * तथेति । उक्तं सर्व उपसंहरति स्पष्टार्थं * तस्मादिति । चैत्रादिमासत्रये इत्यर्थः । *वृद्धिव्येति । पात्रादित्वात् स्त्रीत्वं न । * वचनमिति । स्त्रीबालेत्यादिमूलवाक्यमित्यर्थः ।

८। व्यवच्छेद्यं दर्शयन् प्रयोजनं तु वक्ष्यते इति प्रागुक्तं प्रयोजनं दर्शयति *कालान्तरे त्वित्यादि । *सलिलमेवेति । सर्वेषामिति भावः ।

९। अयं च कालविशेषेऽग्न्यादिनियमः कुष्ठाद्युपतापविषये इति विशेषान्तरमाह *येषां त्विति । अपिना साधारणकालसमुच्चयः । वर्ण्याधिशयेन । *लाघवेति ।

१०। किञ्च स बलिविषयक इत्याह *तथेति । * दुर्बलानामपीति । अग्न्यादीत्यादेरनुषङ्गः । उक्तं प्रयोजनमुपसंहरति *सर्वथापीति । विधिप्रतिषेधाद्युक्तकालानतिक्रमेणेति पाठः॥९८॥

मि० महाभियोगेष्वेतानीत्युक्तं, तत्राभियोगस्य च यदपेक्षं महत्त्वं तदिदानीमाह ।

या० नासहस्राद्धरेत्फालं न विषं न तुलां तथा ।

मि० पणसहस्रादर्वाक् फालं विषं तुलां वा न कारयेत् । मध्यवर्ति ...मपि ।

यथोक्तम्,

तुलादीनि विषान्तानि गुरुष्वर्थेषु दापयेत् । इति ।

अत्र कोशस्यापहरणं । का...मल्पेऽपि दापयेदि-

स्वल्पाभियोगेऽपि तस्य स्मरणा... । ...तानि चत्वा... ...व्यानि पणसहस्रा... ...र्वमेव भवन्ति, ना... ...ित्यर्थः । नन्वर्वागप्यग्न्यादीनि पिताम...ेन दर्शितानि,

सहस्रे तु घटं दद्यात्स...ार्द्धे तथाऽऽयसम् ।
अर्धस्यार्द्धे तु सलिलं तस्यार्द्धे तु विषं स्मृतम् ॥ इति ।

सत्यम् । तत्रेत्थं व्यवस्था । यद्द्रव्यापहारे पातित्यं भवति ...ेयं पितामहवचन..., इतरद्र...ेयं योगीश्वरवचनामिति । एतच्च वचनद्वयं स्तेयसाहसविषयम् । अपह्नवे तु विशेषो दर्शितः—

कात्यायनेन,

दत्तस्याप...वो यत्र प्रमाणं तत्र कल्पयेत् ।
स्तेयसाहसयोर्दिव्यं स्वल्पेऽप्यर्थे प्रदापये... ॥
सर्वद्रव्यप्रमाणं तु ज्ञात्वा हेम प्रकल्पये... ।
हेमप्रमाण...तं तु तदा दिव्यं प्रयोजयेत् ॥
ज्ञात्वा संख्यां सुवर्णानां शतना...े विषं स्मृतम् ।
अशीतेस्तु विना...े वै दद्यादेव हुताशनम् ॥
षष्ट्या नाशे जलं देयं चत्वारिंशति वै घटम् ।
विंशद्दशविना...े तु कोशपानं विधीयते ॥
पञ्चार्धिकस्य वा नाशे ततोऽर्द्धार्द्धस्य तण्डुलाः ।
ततोऽर्द्धविनाशे हि स्पृशेत्...ादिमस्तका... ॥
ततोऽर्द्धार्द्धविनाशे तु लौकिक्यश्च क्रियाः स्मृताः ।
एवं विचारय... राजा धर्मार्थाभ्यां न हीयते ॥ इति ।

ज्ञात्वा संख्यां सुवर्णानामित्य...त्र सुवर्णशब्दः षोडश माषाः सुवर्ण इत्...रूपा... माणवचनः । नाशश...-...ाव...वचनः । नाल...आ...रेत्कालमित्यत्र तु ता-

त्रिकपणसमत्वं बोद्धव्यम् ।

मि० ननु नृपद्रोहे महापातके चैतानि दिव्यान्युक्तानि, तत्कथं नासहस्राद्धरेत्फालमित्यत्राह ।

या० नृपार्थेष्वभिशापे च वहेयुः शुचयः सदा ॥९९॥

मि० नृपद्रोहेषु महापातकाभियोगे च सदा द्रव्यसंख्यामनपेक्ष्यैवैतानि दिव्यानि कुर्युरुपवासादिना शुचयः सन्तः । तथा देशविशेषोऽपि—

नारदेनोक्तः, (व्य० प० १।२६५)

सभाराजकुलद्वारदेवायतनचत्वरे ।
निखेयो निश्चलः पूज्यो धूपमाल्यानुलेपनैः ॥ इति ।

निखेयो घटः । व्यवस्था च—

कात्यायनेनोक्ता,

इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् ।
नृपद्रोहे प्रवृत्तानां राजद्वारे प्रयोजयेत् ॥
प्रातिलोम्यप्रसूतानां दिव्यं देयं चतुष्पथे ।
अतोऽन्येषु च कार्येषु सभामध्ये विदुर्बुधाः ॥
अस्पृश्याधमदासानां म्लेच्छानां पापकारिणाम् ।
प्रातिलोम्यप्रसूतानां निश्चयो न तु राजनि ॥
तत्प्रसिद्धानि दिव्यानि संशये तेषु निर्दिशेत् ।
इति ॥ ९९ ॥

इति दिव्यमातृका ॥

बा० १। व्यवहितसङ्गतिमाह * महेति । *तत्र, महाभियोगेषु । पञ्चम्युपपत्तये आह * अर्वागिति । * फालमिति । सादृश्यादग्निमित्यर्थः । तस्य मूलकृता नवोक्तत्वात् ।

तथैव वाच्ये एवमुक्तिः तस्यापि प्रसक्तोऽभिमतत्वज्ञापनाय । एकेनैवेष्टसिद्धावधिकं स्पष्टार्थमिति सूचयितुमाह * नेति । हरेदित्यस्यान्तर्भावितण्यर्थतया लक्ष्यार्थमाह * कारयेदिति । न्यूनतानिरासाय आह *मध्येति । अग्नेस्तु ... लत्वेनैव ग्रहणसम्भवस्योक्तत्वादाह *जलमिति । तुलाग्न्यापि इत्यत्र तुलाविषयोर्मध्ये स्थितत्वात्तस्यापि तत्त्वमित्यर्थः । नेत्यादेरनुषङ्गः । *यथोक्तमिति । पितामहेनैवेति भावः । *अत्र, नासहस्रादित्यत्र । तदेकवाक्यतापत्तेः । *अग्रहणमिति । न ग्रहणमित्यर्थः । *अल्पेऽपीति । तथाचैतेषां गुरुष्वेवेत्यादिनियमात्तस्य च साधारण्याद्वैलक्षण्येनाग्रहणमिति भावः ।

२। तमेव नियमं फलितमाह * एतानि चत्वारीति । तुलाग्निजलविषाणीत्यर्थः । संज्ञायाः प्रागुक्तत्वादाह * पणेति । सहस्रादिति आभिव्याप्तौ आङो योगे पञ्चमी । तमभिव्याप्येत्यर्थः । तत्राग्रिमानिरासाय अर्वागिति शेषो व्याख्याने उक्तः । तथाच व्युत्क्रमः सूचितः । तदाह * सहस्रादूर्ध्वमेवेति । * नार्वागिति । तदूर्ध्वतो नार्वागित्यर्थः ।

३। अत एव सहस्रेऽपि नेत्याशयेनाह * नन्विति । अर्वागपीति । ऊर्ध्वत एवार्वागपीत्यर्थः । आयसं फालम् । * तत्र, विरोधे सति । * यद्द्रव्येति । सुवर्णेत्यर्थः ।

४। तथासति फलितं विशेषमाह *एतच्चेति । नासहस्रादिति मौलम्, सहस्रेत्विति पैतामहं चेत्यर्थः । *स्तेयेति । स्तेयसाहसोभयविषयमित्यर्थः । ननु कल्पतरुणा नासहस्रादिति वाक्यं पणसहस्रादूर्ध्वमेवापह्नवे फालादिक्रियेत्येवमपह्नवविषयतया व्याख्यातमिति तथैव कुतो नोक्तमिति चेन्न । उपस्थितत्वोक्तसम्भावितमेवेऽनुपस्थितपरतया व्याख्यानस्यानौचित्यात् । त-

याप स विषयो मूले मोक्ष एव।

५। तदेतत् ध्वनयन्नाह *अपह्नवेत्विति।* प्रमाणम्, अपह्नुतद्रव्यानुसारेण दिव्यान्। *स्तेयेति। अत्र ब्राह्मणवसिष्ठन्यायेन स्तेयान्यसाहसपरं साहसपदम्। स्वल्पेऽप्यर्थे इत्यपिना महतः समुच्चयः। तत्प्रकारमेव। *सर्वेति। * युक्तं, तत्सम्बद्धं मासंबद्धं, तत्तुल्यमिति यावत्। *ज्ञात्वा संख्यामिति पूर्वान्वयि। *संख्यां, प्रमाणम्। सुवर्णानामित्यस्य मध्यमणिन्यायेन [illegible]यः। *चत्वारिंशतीति। तत्संख्याकेषु सुवर्णेषु अपह्नुतेष्वित्यर्थः। *विंशेति। विंशतिः प्रमाणमस्येति विंशं तच्च दश च तेषां विनाशे इत्यर्थः। विंशद्दशेति पाठान्तरम्। विंशतिदशेति तृतीयः पाठः। पञ्चार्धिकस्येति पाठः। पञ्चैवार्धं, स्वार्थे ठक्, तस्येत्यर्थः। पूर्वान्वयीदं, वाशब्दस्वारस्यात्। तदर्धेत्यत्र तच्छब्देन दश परामृश्यन्ते। तत इत्यनेन पञ्च। अग्रे तत इत्यनेन पूर्वतदर्धम्। * लौकिक्यः, लोकभवा अन्ये शपथादयः। * विचारयन्, तत्पूर्वकं कुर्वन्नित्यर्थः। कल्पतरौ तु पाठान्तरम्।

प्रयोजयेदित्यग्रे—

शते विषं तु पादोने हुतभुक् तत्र दृश्यते।
आपत्त्रिभागहीने तु शतार्द्धे तु तुला स्मृता॥
कोशपानं तदर्धे वा दशपञ्चकसप्तके।
तदर्धे तण्डुला [illegible]र्धे तप्तमाषकः॥ इति।

*शते, [illegible]णस्येति शेषः।

[illegible],

ज्ञात्वा संख्यां सुवर्णस्य शतनाशे विषं स्मृतम्।
अशीतेस्तु विनाशे तु दद्याच्चैव हुताशनम्॥
षष्ट्या नाशे जलं देयं चत्वारिंशतो घटम्।

त्रिंश शाविनाश्च वा कोशपानं इत्यतः ॥
पञ्चा...कस्य वा नाशे तदर्धस्य च तण्डुलाः ।
*पञ्चा...कस्य, पञ्चार्धं सार्धद्वयम् इति ।

६। म...त्यसम्पत्तय आह * ज्ञात्वेति । तत्पदस्वारस्या... । नन्वत्र मात्रपदोक्त्या कथमस्यापह्नवविषयत्वमित्यत आह * ना-स्तीति । मिथोऽनयोर्विरोधं परिहरति * नासहत्वादिति । सा-मान्योक्त्या सामान्यपरिभाषासञ्चारात् ।

अन्योऽपि विशेषः कात्यायनेनोक्तः,
...काल...रोधे तु यथायुक्तं प्रकल्पये... ।
अन्येन हारयेद्दिव्यं विधिरेष विपर्यये ॥ इति ।

*हारयेत्, कारयेत् । *विपर्यये, दिव्यकारिणोऽभियु-...थासामर्थ्ये ।

काल...व्यविरोधे तु यथायुक्तं विरोधयेत् ।
अन्येन ...रयेद्दिव्यं विधिरेष विवर्जयेत् ॥

इति तु कल्पतरौ पाठः । अतएव महापातक्यादीनाम-न्यद्वारा—

दिव्यमाह स एव,
मातापितृद्विजगुरुबालस्त्रीराजघातिनाः ।
महापातक...कानां नास्तिकानां विशेषतः ॥
लिङ्गिनां प्रसवानां तु मन्त्रयोगक्रियाविदाः ।
वर्णस...रजातानां पापाभ्यासप्रवर्तिनाः ॥
एतेष्वेवाभियोगेषु निन्द्येष्वेव प्रयत्नतः ।
दिव्यं प्रकल्पये...व राजा धर्मपरायणः ॥
एतैरेव नि...कानां साधूनां दिव्यमर्हति ।
केच...ि साधवो यत्र तत्र शोध्याः स्वकैर्नरः ॥ इति ।

तथाच दि[illegible] अयं प्रतिनिधिर्विपर्यये इ[illegible]न्तेनोक्तः। *अन्येन हारयेत्, प्रतिनिधिना कारयेत्। माता-पि[illegible] पूर्वं [illegible] न [illegible]तामिति निश्चये कालान्तरे चार्थान्तरसन्देहेऽपि प्रतिनिधिद्वारैव [illegible]। वृ-[illegible]स्त्रीबालेति पाठान्तरम्। प्रसवानां तु इत्यत्र प्रमदानां चेति पाठान्तरम्। नेच्छन्ति इत्यत्र नसन्तीति, तत्र शोध्यः स्वकैर्नर इत्यत्र स्वकैर्नरैः इति च पाठान्तरम्। *स्वकैः, आप्तैः।

उ० ७। नृपार्थेष्वित्यस्य नृपोऽर्थो विषयो येषां द्रोहाणां तेष्वित्यर्थः। तदाह *[illegible]पद्रोहेष्विति। अभिशापे चेत्यस्य वास्तवे तत्रेत्यर्थः। तदाह *महेति। सदेति व्याचष्टे *द्रव्येति। प्रक्रान्तत्वादाह *एतानीति। शुचित्वं तत्र निमित्तमित्या[illegible] *उपवासादिनेति। आदिना स्नानादिपरिग्रहः।

८। विशेषमाह *तथेति। सभा च राजगृहद्वारं च देवायतनं च [illegible]ति समाहारद्वन्द्वः। व्यस्तपाठे तत्र द्वन्द्वः[illegible]। *कुलं, गृहम्। चत्वरश्चतुष्पथः। साकाङ्क्षत्वात्प्रकृतमाह *घटइति। व्यवस्थाचेति चस्त्वर्थे। उक्तदेशानामिति भावः। इन्द्रस्थानमिन्द्रप्रतिमा यत्र तत्रेत्यर्थ इति केचित्। इन्द्रध्वजयूपस्थानामिति कल्पतरुः। इन्द्रध्वजपूजास्थानमित्यन्ये। इन्द्रस्य परेश्वरस्य स्थानं तत्रेति वयम्। अभिशस्तानामित्य यैव व्याख्या *म[illegible]पातकिनामिति। चस्त्वर्थो तथापाठ एववा। दिव्यमित्यस्यानुषङ्गः। [illegible] च। देशव्यवस्थामुक्त्वा दिव्यव्यवस्थामाह *अस्पृश्येति। अस्[illegible]श्याश्चाण्डालादयः। अधमाः शूद्रादयः। *न तु, न हि। *तत्प्रसिद्धानि, घटसर्पादीनि।

नारदः, (व्य० प० १।२५५)

नार्तानां तोयशुद्धिः स्यान्न विषं पित्तरोगिणः।

स्त्रिव्यन्ध नखादीनां नाग्निकर्म विधीयते ॥
न ... वा: ... विचक्षणैः ।
रोगिणो ये च वृद्धाः स्युः पुमांसो ये च दुर्बलाः ॥(३१३)
निरुत्साहान् व्याधिक्लि ... ताः तोये निमज्जयेत् ।
सद्यो म्रियन्ते मज्जन्तः ... ल्पमाणा हि ते स्मृताः॥(३१४)
... तोये निमज्जयेत् ।
नचापि हारयेदग्निं न विषेण विशोधयेत् ॥ (३१५)
विष्णुः,
न ... कव्याधितानां भीरूणां श्वासकासिनां ।
न लो ... शिल्पिनामाग्निः सलिलं नाम्बुसेविनाम् ॥
मन्त्रयोगविदां चैव विषं दद्यात्तु न क्वचित् ।
तण्डुलैर्न नि ... ज्जीत व्रतिनं मुखरोगिणम् ॥
व्रती ... व्रता ... मान् ।
पितामहः,
मद्यप ... व्यसनिनां कितवानां तथैवच ।
कोशः मा ... ने दातव्यो ये च नास्तिक ... चयः ॥
नारदः, (व्य० प० १।३३२)
म ... पराध निर्धर्मे कृतघ्ने क्लीव ... त्सित ।
नास्तिके दृष्टदोषे च ... दानं विवर्जये ... ॥
नारद ... हस्पतिकात्यायनाः,
यथोक्तविधिना देयं दिव्यं दिव्यविशारदैः ।
अयथोक्तं प्रदत्तं चेत् न दत्तं साध्यसाधने ॥
अदेय ... बहिवा ... तानि च ।
व्यभिचारं सदाऽयेषु कुर्वन्तीह न संशयः ॥

वा ... यथोक्ता ... । * ... काति । पारेन ...

त्यर्थः ॥ ९९ ॥

इति दिव्योपोद्घातः ।

मि० एवं सर्वदिव्योपयोगिनीं दिव्यमातृकामभिधायेदानीं घटादिदिव्यानां प्रयोगमाह ।

या० तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः॥१००॥
त्वं तुले सत्यधामाऽसि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि संशयान्मां विमोचय॥१०१॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्ध्वं मां तुलामित्यभिमन्त्रयेत्॥१०२॥

मि० तुलाया धारणं तोलनं ये विदन्ति सुवर्णकारप्रभृतयः तैः प्रतिमानेन मृदादिना समीभूतः समीकृतस्तुलामाश्रितोऽधिरूढोऽभियुक्तोऽभियोक्ता वा दिव्यकारी रेखां कृत्वा येन सन्निवेशेन प्रतिमानसमीकरणदशायां शिक्यतलेऽवस्थितस्तस्मिन् पाण्डुलेखेनाङ्कयित्वाऽवतारितस्तुलामभिमन्त्रयेत् प्रार्थयेत अनेन मन्त्रेण । हे तुले त्वं सत्यस्य स्थानमसि । पुरा आदिसृष्टौ देवैर्हिरण्यगर्भप्रभृतिभिर्विनिर्मितोत्पादिता । तत्तस्मात्सत्यं संदिग्धस्यार्थस्य स्वरूपं वद दर्शय । कल्याणि शोभने अस्मात्संशयान्मां विमोचय । हे मातः यद्यहं पापकृत् असत्यवाद्यस्मि ततो मां त्वमधो नय । अथ शुद्धः सत्यवाद्यस्मि ततो मामूर्ध्वं गमयेति । प्राड्विवाकस्य तुलाभिमन्त्रणमन्त्राः स्मृत्यन्तरोक्ताः ।

अयं तु दिव्यकारिणः। जयपराजयलक्षणं तु मन्त्रलिङ्गादेवावगम्यते इति न पृथगुक्तम्। इदानीमेणं पुनः आरोहणाद्यर्थसिद्धमेव पितामहनारदादिभिः स्पष्टीकृतम्।

तद्यथा,

छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्वकम्।
प्रणम्य लोकपालेभ्यस्तुला कार्या मनीषिभिः॥
मन्त्रः सौम्यो वानस्पत्यच्छेदने जप्य एव च।
चतुरस्रा तुला कार्या दृढा ऋज्वी तथैव च॥
कटकानि च देयानि त्रिषु स्थानेषु चार्थवत्।
चतुर्हस्ता तुला कार्या पादौ चोपरि तत्समा॥
प्रान्तरं तु तयोर्हस्तौ भवेदध्यर्धमेव वा।
हस्तद्वयं निखेयं तु पादयोरुभयोरपि॥
तोरणे च तथा कार्ये पार्श्वयोरुभयोरपि।
धटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः॥
अवलम्बौ च कर्तव्यौ तोरणाभ्यामधोमुखौ।
मृन्मयौ सूत्रसंबद्धौ धटमस्तकलम्बिनौ॥
प्राङ्मुखो निश्चलः कार्यः शुचौ देशे धटस्तथा।
शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि॥
प्राङ्मुखान्कल्पयेद्दर्भान् शिक्ययोरुभयोरपि।
पश्चिमे तोलयेत्कर्तॄनन्यस्मिन्मृत्तिकां शुभाम्॥
पिटकं पूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः।

अत्र च मृत्तिकेष्टकाग्रावपांसूनां विकल्पः।

परीक्षका नियोक्तव्यास्तुलामानविशारदाः।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च॥

कार्यः परी .कैर्नित्यमवलम्बसवो घटः ।
उदकं च प्र ातव्यं घटस्योपरि च मितः ॥
यो नित्य स्रवते तोयं स विज्ञेयः समो घटः ।
त लायित्वा नरं पूर्वं प ता य तु ॥
घटं तु कारयेन्नित्यं पताकाध्वजशोभित ।
तत आवा येद्वान् विधिनाऽनेन मन्त्रवित् ॥
वादित्र ध्वघोषैश्च गन्धमाल्या लेपनैः ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्रा वाकस्ततो वदेत् ॥
एह्येहि गवन्धर्म ह्यस्मि दिव्ये नमाविश ।
ना तो लो लश्च यस्वा ित्यलक्षणः ॥
आवाह्य तु घटे धर्मं पश्चादङ्गानि विन्यसे ।
इन्द्रं पूर्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ॥
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ।
अग्न्यादि लोकपालांश्च कोणभागेषु विन्यसे ॥
इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ।
कुबेरस्तु सुवर्णाभो वह्निश्चापि सुवर्णभः ॥
तथैव नि तिः श्यामो वायुर्धूम्रः प्रश स्यते ।
ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् ॥
इन्द्रस्य दक्षिणे भागे वसूनाराधये घः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ॥
प्रत्यूषश्च प्रभातश्च वसवोऽष्टौ प्रकीर्तिताः ।
वेशेशानयोर्मध्ये आ ित्यानां तथाऽर्चनम् ॥
धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वा पा च न्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो वि रजघन्यो जघ जः ।

इत्येते द्वा ... आदित्या न ... भिः परिकीर्तिताः ॥
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च म ... यशाः ॥
अजैकपादहि ... ध्न्यः पिनाकी चाप ... जितः ।
... भुवनाधीश्वरश्चैव कपाली च विशां पतिः ॥
स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः ।
... कोष्ठे तु मातृस्थानं प्रकल्पयेत् ॥
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ॥
गगनः स्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्तिताः ॥
घटस्योत्तरभागे तु दुर्गामावाहयेद् बुधः ।
एतासां देवतानां तु स्वनाम्ना पूजनं विदुः ॥
... पावसानं धर्माय दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् ॥
गन्धादिकां निवेद्यान्तां पारिचर्यां प्रकल्पयेत् ॥ इति ।

अत्र च तुलां पताकाध्वजालङ्कृतां विधाय तस्यां ... एह्येहीति मन्त्रेण धर्ममावाह्य धर्मायार्घ्यं कल्पयामि नम इत्यादिना प्रयोगेणार्घ्यपाद्याचमनीयस्नानीयपुनराचमनीयस्नानवस्त्रयज्ञोपवीताचमनीयमुकुटकटकादिना ... न्तं दत्त्वा ... ... गान्तानां प्रणव ... नमोऽन्तैः ... ध्यान्तैर्नमोऽन्तैरर्घ्यादि ... न्तं पदार्थानुसमयं दत्त्वा धर्माय गन्धपुष्पधूपदीपनैवेद्यानि

दत्त्वा इन्द्रादीनां मन्त्राणि पूर्ववत्पठेत् । गन्धपुष्पाणि च घटपूजायां रक्तानि कार्याणि ।

यथाह नारदः,

रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः ।

अर्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेत् ॥ इति ।

इन्द्रादीनां तु विशेषानभिधानाद्यथालाभं रक्तैरन्यैर्वा पूजनमिति पूजाक्रमः ।

एतच्च सर्वं प्राड्विवाकः कुर्यात् ।

यथोक्तम्,

प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।

श्रुतवृत्तोपसंपन्नः शान्तचित्तो विमत्सरः ॥

सत्यसन्धः शुचिर्दक्षः सर्वप्राणिहिते रतः ।

उपोषितः शुद्धवासाः कृतदन्तानुधावनः ॥

सर्वासां देवतानां च पूजां कुर्याद्यथाविधि ।

तथा,

ऋत्विग्भिश्चतुर्भिश्चतसृषु दिक्षु लौकिकाग्नौ होमः कार्यः ।

यथा,

चतुर्दिक्षु तथा होमः कर्तव्यो वेदपारगः ।

आज्येन हविषा चैव समिद्भिर्होमसाधनैः ॥

सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत् ।

प्रणवादिकां गायत्रीमुच्चार्य पुनः स्वाहाकारान्ते प्रणवमुच्चार्य सोमसमिदाज्यचरून्प्रत्येकमष्टोत्तरशतं जुहुयादित्यर्थः । एवं देवतान्तां देवपूजां विधायानन्तरमभियुक्तमर्थं वक्ष्यमाणमन्त्रसहितं पत्रे विलिख्य

तत्पत्रं शोध्यशिरोगतं कुर्यात् ।

यथाह,

यं चार्थमभियुक्तः स्यात्लिखित्वा तं तु पत्रके ।

मन्त्रेणानेन सहितं तत्कार्यं तु शिरोगतम् ॥

मन्त्रश्च,

आदित्यचन्द्रावनिलोऽनलश्च

द्यौर्भूमिरापो हृदयं यमश्च ।

अहश्च रात्रिश्च उभे च सन्ध्ये

धर्मश्च जानाति नरस्य वृत्तम् ॥ इति ।

एतच्च धर्मावाहनादि शिरसिपत्रारोपणान्तमनु-

ष्ठानकाण्डं सर्वदिव्यसाधारणम् ।

यथोक्तम्,

इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् ।

आवाहनं च देवानां तथैव परिकल्पयेत् ॥ इति ।

अनन्तरं प्राड्विवाको घटमामन्त्रयेत् ।

घटमामन्त्रयेच्चैव विधिनाऽनेन शास्त्रवित् ।

इति स्मरणात् । मन्त्राश्च दर्शिताः,

त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ।

धकाराद्धर्ममूर्तिस्त्वं टकारात्कुटिलं नरम् ॥

धृतो भावयसे यस्माद्घटस्तेनाभिधीयसे ।

त्वं वेत्सि सर्वजन्तूनां पापानि सुकृतानि च ॥

त्वमेव देव जानीषे न विदुर्यानि मानवाः ।

व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ॥

तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि । इति ।

शोध्यस्तु,

त्वं तुले त्यादिना यौक्तन मन्त्रे लामा-मन्त्रये । अनन्त प्रा वाकः शि गतपत्रकं शोध्यं यथा यान यथा निवर्णा च पटमा पयाति ।

नरारोपयत्तस्मिन् शिरोऽवास्थितपत्रक ।

इति स्मरणा । आरोपितं च विनाडीप कं यावत्तथैवावस्थापयेत् । तत्कालपरी ां च ज्योतिःशा- ःाः कुर्यात् ।

ज्योतिर्वि ाह्मणश्रेष्ठः कुर्यात्कालपरीक्षणम् ।

विनाड्यः पञ्च वि याः परीक्षाकालकोविदैः ॥

इति स्मरणा । गुरुव रोच्चारणकालः प्राणः । षट्प्राणा विनाडी ।

उक्तं च,

गुरुवर्णः प्राणः, षट् प्राणाः स्याद्विनाडिका, तासां । षष्ट्या घटी, घटीनां षष्ट्याऽहः, त्रिंशद्भिर्मासः ॥ इति ।

तस्मिंश्च काले शुद्ध्य द्धिपरीक्षणार्थं शुचयः पुरुषा राज्ञा नयोक्तव्याः । ते च शुद्ध्य द्धी कथयन्ति ।

यथोक्तं पिता न,

साक्षिणां ब्रा णाः श्रेष्ठा यथादृष्टार्थवा नः ।

शुचयोऽलुब्धा नियोक्तव्या नृपेण तु ॥

शंसन्ति साक्षिणः श्रेष्ठाः शुद्ध्य द्धी नृपे तदा । इति ।

शुद्ध्यशुद्धिनिर्णयकारणं चोक्त ,

लितो यदि वर्द्धेत स शुद्धः स्यान्न संशयः ।

समो वा यमानो वा न स शुद्धो भवेन्नरः ॥

इति ॥ (ना० व्य० प० १।२८३)

यत्तु पितामहवचनम्,

अल्पदोषः समो ज्ञेयो बहुदोषस्तु हीयते। इति,

तत्र यद्यपि आभियुक्तस्यार्थस्याल्पत्वं बहुत्वं च न दिव्येनावधारयितुं शक्यते तथापि सम्यग्दमातिपूर्वत्वेनाल्पत्वम् असम्यग्दमातिपूर्वत्वेन च महत्त्वमिति दण्डप्रकारेणाल्पत्वमहत्त्वमवधार्यते। यदा चानुपलक्ष्यमाणदृष्टकारण एव कक्ष्यादीनां छेदो भङ्गो वा भवति तदाऽप्यशुद्धिरेव।

कक्ष्यच्छेदे तुलाभङ्गे धटककटयोस्तथा।
रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमादिशेत्॥

इति स्मरणात्। कक्ष्यं शिक्यतलम्। कर्कटौ तुलान्तयोः शिक्याधारावीषद्वक्रावायसकीलकौ कर्कटशृङ्गसन्निभौ। अक्षः पादस्तम्भयोरुपरि निविष्टस्तुलाधारपट्टः। यदा तु दृश्यमानकारणक एषां भङ्गस्तदा पुनरारोपयेत्।

शिक्यादिच्छेदभङ्गेषु पुनरारोपयेन्नरम्।

इति स्मरणात्। ततश्च ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिश्च तोषयेत्।

एवं कारयिता राजा भुक्त्वा भोगान्मनोरमान्।
महतीं कीर्तिमाप्नोति ब्रह्मभूयाय कल्पते॥

यदा तु तत्क्षणं घटं तथैव स्थापयितुमिच्छति तदा वायसाद्युपघातनिवारणार्थं कपाटादिसहितां शालां कुर्यात्।

विशालां सुकृतां शुभ्रां घटशालां तु कारयेत्।
यत्रस्थो नोपहन्येत श्वभिश्चाण्डालवायसैः॥

तत्रैव लोकपाला[...]न् सर्वान् दिक्षु निवेशयेत् ।
त्रिसन्ध्यं [...]जयेत्तान् गन्धमाल्या[...]लेपनः ॥
कपाटध्वजसं[...]क्तां परिचारकर[...]ताम् ।
[...]त्पानीयाग्निसं[...]क्तामशून्यां कारयेन्नृपः ॥
इति स्मरणात् । बीजानि यवव्री[...]ाम् ।
इति घटविधिः ॥ १०० ॥ १०१ ॥ १०२ ॥

बा० १। सङ्गतिमाह *एवमिति ।* मातृकां, तत्परिभाषाम्। *प्रयोगमिति । सर्वसाधारणमित्यर्थः । यद्वा जातावेकवचन[...] । प्रयोगानित्यर्थः । क्रमेणेत्यादिः । ईदृशोऽवतारितः प्राड्विवाककृत्योत्तर[...] इति अनेन मन्त्रेण तुलामभिमन्त्रयेदित्यन्वय इत्याह *तुलाया इत्यादिना । तृतीयान्तस्य व्यवहितान्वय इत्याह * तैः प्रतिमानेनेति । अन्तर्भावितण्यर्थत्वेनाह * समीकृत इति । इदमुक्तरीत्योपलक्षणमित्या[...] * अभियोक्ता वेति । तात्पर्यार्थमाह *दिव्येति। *रेखामिति । लेखामिति पाठान्तरम्। किञ्चिच्चिह्नविशेषमित्यर्थः । तमेवाह *येनेति ।पाण्डुति । अपक्वलेखेनेत्यर्थः । खडीति भाषाप्रसिद्धः। अभिमन्त्रयेदित्यस्य व्याख्या *प्रार्थयेतेति । इतीत्यस्यार्थमाह *अनेनमन्त्रेणेति। त्वमित्यादि[...]न्तेनेत्यर्थः । तदर्थमाह *हे इत्यादि । धामार्थः *स्थानमिति । तदित्यस्य व्याख्या *तस्मादिति । सत्यमित्यस्यार्थः *सन्दिग्धेति। [...]षणासंभवादाह * दर्शयेति । प्रकृतत्वाद[...] * अस्मादिति । अस्मीत्युक्तेरध्याहारेण तस्य तदर्था[...]व्यय[...]न वाऽऽह * अहमिति । प्राग्वदाह *असत्येति । एवमग्रेऽपि । निपातानामनेकार्थत्वात् चेदर्थमाह * अथेति । मामस्मी[...]क्तिस्वारस्याद[...]न्तेराह * प्राडिति । धर्माधिकारिण इत्यर्थः । इदम[...] पदमेव स्फुटीभविष्यति । न्यूनतां निराचष्टे * जयेति । तयोः स्वरूपे

इत्यर्थः । जातावेकवचनम् । लिङ्गमूर्ध्वगमनादिकम् ।

२। एतदर्थमेवाह *घटेत्यादिना। पुनस्त्वर्थे । आरोहणादीति आदिना अवतारणम् । नारदादीति आदिना व्यासादिपरिग्रहः। तत्रादौ पितामहमाह *छित्त्वात्वित्यादिना । *यज्ञियं, खदिरादिकम् ।* मन्त्रेति । ओषधे त्रायस्वैनमित्यादिमन्त्रपूर्वकम् इत्यर्थः । छेदनक्रियाविशेषणमिदम्। यूपवदित्यस्य तुला कार्येत्यत्रान्वयः । यूपवदित्यातिदशसिद्धमन्त्रवादित्युक्तमेवानुवदति * मन्त्र इति । वानस्पत्यच्छेदे इति समस्तम् । तच्छेदकाले सोमदेवताकः सोमो धेनुं सोमो अर्वन्तमित्यादिमन्त्रो जप्य एवेत्यर्थः । व्यस्तपाठे वानस्पत्यो मन्त्रो वनस्पते शतवल्शो वि रोहेति । अनयोर्जपमन्त्रत्वेनादृष्टार्थत्वात्समुच्चयः । चो भिन्नक्रमः । छेदने तुलाकाष्ठच्छेदने स स च जप्य एवेत्यर्थ इत्यन्ये । तुलास्वरूपमाह * चतुरस्रेति । * त्रिषु, पार्श्वद्वये मध्ये च । तत्फलमाह * अर्थवदिति । क्रियाविशेषणमेतत् । यथा तुलायाः सामर्थ्यं भवेत्तथा देयानीत्यर्थः। यत्नत इति पाठान्तरम्। तत्प्रमाणमाह *चतुर्हस्तेति । भूमेः *उपरि, ऊर्ध्वम् । *तत्समौ, तुलासमौ । चतुर्हस्तौ प्रादौ कार्यावित्यर्थः । पादौ कार्यौ तथाविधाविति पाठान्तरम् । तयोः पादयोरन्तरं व्यवधानं तु हस्तौ हस्तद्वयपरिमितं भवेदित्यर्थः । स्वैरन्यत्रानियमाभ्यानुपपत्तिः । पक्षा-

---

१ ननु आरोप्यविशेष्यार्थकपदसमानवचनकत्वमाख्यातस्य,

"गृह्णाति वाचकः संख्यां प्रकृतेर्विकृतेर्न हि"

इत्यनुशासनात् । अत एव एको वृक्षः पञ्च नौका भवति इत्यादौ एकवचनं सङ्गच्छते । ततश्च-

"प्रान्तरं तु तयोर्हस्तौ भवेद्व्यर्द्धमेव वा"

इत्यत्रैकवचनोपपत्तावपि, षष्ठो भागो दश माषा दश यवाश्च भवन्तीति स्वविषेत्युत्तरश्लोकव्याख्याने बहुवचनं नोपपद्येत। यदि पुनः "स्वर्ण-

न्तरमाह * अध्य ... मेवचेति । ता हस्तो वेस्वर्था । उप इत्येत- ... चितमेवाह * हस्त मिति । उभया पि पा ... थं ह- स्तच ... ष्टत्वादवशिष्टं भूम्यन्तः प्रवेशनीयमित्यर्थः । * तोरणे चे- ति । तयेत्यनेन हस्तद्वयान्तरालतोक्ता । भूमेरुपरि समता स- मागतैव । तदन्तर्निखात ... यथासंभवम् । अतएव विशेषना ... *घटादिति । तथाच तुलायाः पार्श्वद्वये हस्तद्वयान्तरालं दक्षि- णोत्तरयोः स्तम्भस्य द्वयं निखाय तयोरुपरि उत्तराग्रं काष्ठं देयं, तदेतत्तोरणमिति बोध्यम् । तस्य फलं कथयन् तथा ... र्थं घ- टादशा ... लोबामित्याह * अवलम्बाविति । तोरणाभ्यां सम्बद्धौ तदधः प्रदेशे लम्बमानौ अधोमुखौ मृन्मयौ त ... लकरूपौ सू- त्रसम्ब ... । घटमस्तकचुम्बिनौ तुलाप्रान्त ... थापरिभागस्पृशौ अव- लम्बौ वत्संज्ञकौ कार्यावित्यर्थः । घटमस्तकचुम्बिताविति पाठा- न्तरे बहुव्रीहिः । सम्यग्ज्ञानार्थमेवावलम्बद्वयकरण ... । तत्फल- मनुपदमेवाग्रे स्फुटीभविष्यति, स विज्ञेयः समो घट इति । त- स्याग्रं तदाधारदेशं चाह * प्रागिति । * कल्पयेत्, स्थापयेत् । आस्तरणमिदम् । *पश्चिमे, शिक्ये । * अन्यस्मिन्, पूर्वे । *शुभा- मिति । इष्टकाभस्मपाषाणकपाल ... दिविवर्जितामित्य- र्थः । पिटकं शिक्यम् । * तस्मिन्, उपविष्टे सति । चयनीय ... -

---

पिण्डः खादिराङ्गुलदशो कुण्डले भवत" इति भाष्यप्रयोगात् व्यन्ता- तिरिक्तस्थले आरोप्यार्थकपदसमानवचनत्वमाख्यातस्योच्येत, तदा एको वृक्ष इत्यादौ प्रान्तरं तु तयोरित्या ... । च एकवचना ... पपत्तिः, अत आह *व्वेरन्यत्रेति । व्यन्तस्थले सङ्क्षीभवन्ति ब्राह्मणा इत्यादौ आख्यातस्य प्रकृत्यनुरोधित्वेऽपि अ ... नियमः । तेन न कश्चिद् ... प- पत्तिः । अनियमे च ... ः खादिराङ्गुलदशो कुण्डले भवत इति पस्पशास्थः, अत्वं त्वं सम्पद्यते इति ... अनुपपदे इति सूत्रस्थश्च भाष्यप्रयोगौ मानम् । ध्वनितं चेदं कृभ्वस्तिसूत्रे शेखरे ।

नाभ्यर्हितत्वा... ...निपातः । समुच्चये फलाभावा ... ...त्याह * अत्रचेति । ...त्येव सत्यमिति श्रुतेः ... ...ह * ...केत्युक्तेतिपरीक्षाप्रकारमाह *परीक्षका इति। *पश्चा...ति । तस्मा...ति पाठान्तरम् । * ...ते। पताकासहितध्वजशोभितमित्यर्थः । अल्पत्वम ...ता ऽनयोर्भेदः । एवमग्रेऽपि । परित इति भावः । *मन्त्रवि..., धर्मविदिति पाठान्तरम् । ...पलक्षणे । *अनुलेपनं, स्नानचूर्णम् । अनेन विधिने... ...विधिमेवाह * एहेहीति । अनेन धर्मदे... ...कथितम् । * अस्मिन्, तुलाख्ये । वसवश्चादित्याश्च मरुतश्च गणाश्चेति द्वन्द्वः । *अङ्गानि, लोकपालादीनि । तत्प्रकारमेवाह *इन्द्रमित्यादिना। एतेषां ध्येयरूपाण्या... *इन्द्र इत्यादि। *भागे इति । पार्श्वे व...नावाहयेदिति पाठान्तर... ।तेषां संख्यामाह * धर इति । देवेश इन्द्रः । * तथाऽर्चनम् । तथा...नामिति पाठान्तर... । प्राग्वदाह *धातेति । वरुणोंऽश इति पाठः । अन्योऽपपाठः । अजघन्येत्यादि क्रमादुभयविशेषण... । गणपदार्थानाह * अग्री...त्यादि । *अयनं, स्थानम् । तानाह * वीरेति । अत्र महायशा इति गिरिविशेषण... । विशांपतिरिति कपालिविशेषण... । द्वौ विशौ वैश्यम...जाविति कोशः । ...ति भवविशेषणम् । भग इति पाठान्तर... । क्रमस्य विवक्षितत्वात्प्रेतेशस्य ... । मातृस्थानमिति समस्तपाठः । ता आह * ब्रा...मीत्यादि । गणसं...तेति विशेषणं चा...ध्यायाः । तथाच सप्त बोध्याः । गणेश एक एव । * मरुतां, वा...नाम् । तानाह * गगन इति । प्राणश्जीवा...त्यार्षम् । धसमुच्चयमाह * धटस्योत्तरेति । पूजाक्रममाह *भूपेति । अर्घ...रान्तं क्रमेण धर्माय प्रधानदेवताय दत्वा पश्चादिन्द्रादीनां तथैव ...थादित्यर्थः । निवेद्यो नैवेद्यः । सर्वतो-

[illegible]णेति भावः ।

३। अस्यार्थमाह *अत्रेति। [illegible]लाल्यादिव्यावेषये इत्यर्थः । पूजाक्रम त्यत्रान्वयः । काण्डा[illegible]समयस्याभावादाह * पद्मार्थेति । तद्वीत्येत्यर्थः । गन्धादौ विशेषम। * गन्धेति । * शिष्टान्, शेषभूतान् । [illegible] यावत् । * अन्यैर्वा, गन्धपुष्पैः ।

४। * यथोक्तमिति।नारदेनेति भावः । *ततः, तस्याः पताकाद्यलंकारविधानानन्तरम्।* श्रुतं, वेदशास्त्रे । *वृत्तम् आचचरणम् । *सत्यसंधः, सत्यसंकल्पः। *शुद्धवासाः, [illegible] इति पाठान्तरम् ।

५ । अन्यदप्याह * तथेति । * यथाहेति । पितामह इति शेषः । *प्रतीति । चतुर्दिक्षु इति पाठान्तर[illegible] । तथेति समुच्चये। कथं कार्य इत्याकाङ्क्षायां तत्र द्रव्याण्याह * आज्येनेति । उभयत्र इतरनिरासाय सामान्यनपुंसकत्वेन समिद्विशेषणतया[illegible] सार्थक्यं ध्वनयन्नाह * होमेति । एतात्रितयरूप[illegible]मसाधनैरित्यर्थः फलितः । उत्तरार्द्धेऽन्वयोऽस्य । मन्त्रमाह * सावित्र्येति । अथशब्द आनन्तर्ये। एवेन तदभावव्यवच्छेदः । प्रणवेनेत्यस्य मध्यमणिन्यायेनान्वयः। आदियुक्तत्वं तृतीयार्थः। तदाह *प्रणवादीति।अथशब्दार्थः, * पुनरिति। पश्चादित्यर्थः। * स्वाहाकारेणेति। उच्चैस्तरां वा वषट्कार इत्यनेन सामान्यापेक्षज्ञापकेनाय साधुः । प्रसिद्धत्वाद्धविःशब्दार्थमाह * चरूनिति । चर्वाज्यसमिध इत्युचितम् ।

६। अत्राज्य[illegible]विःसामिधां संप्रतिपन्नदेवताकत्वा[illegible] मिलितानमेव होमः साक्षाच्ययो[illegible]वेति कश्चित्।तन्न। आज्ये [illegible]वणावद्यतीति स्रुवस्य, चरौ सकृदुपस्तृणाति मध्या[illegible]र्वार्द्धाच्च द्विर्हविषोऽवद्यति अभिघारयति हविः अवत्तं चैषोऽवदानधर्म इत्याश्वलाय-

नादिमन्त्रा स्रुचः, समित्सु असामर्थ्यात्तस्यैव तत्कारि - सा-
धनकत्वात्तन्त्रताऽनुपपत्तेः । सान्नाय्यहोमयोः जुहू एव
साधनत्वात्तन्त्रता युक्ता । तदेतत् ध्वनयन्ना * प्रत्येकमिति ।

७ । अन्यदाह * वमिति । * शोध्येति । दिव्यकारिणः
शिरसि बध्नीयादित्यर्थः । * यथाहेति । पितामह इति शेषः ।
* यच्चार्थमिति । यदर्थकर्मकाभियोगविषयीकृतो दिव्यकारी
स्यात् इत्यर्थः । पितामहोक्तमेव मन्त्रमाह * मन्त्रश्चेति । * आ-
दित्येति । अभ्यर्हितत्वात्पूर्वनिपातः ।

८। यथोक्तमिति । पितामहेनेति भावः । आदित्येत्यादिम-
मिदं पद्यम् । चेनाग्निमसर्वस्वन्वयः ।

९ । पितामहमेवाह * धटमिति । * दर्शिताः, तेनैव ।
*धृतः, शुचौ देशेऽवस्थापितः। त्वं यस्मात् कुटिलं नरं भावयसे
प्रतिपादयसि तेनेत्याद्यन्वयः । तमेवाह * पुनरिति ।

१०। विशेषमा *आरोपितं चेति। *तत्कालेति। विनाडिकाव-
केत्यर्थः। तमेवाह *ज्योतिरिति। ज्योतिःशास्त्रविदो ये ब्राह्मणास्ते
श्रेष्ठ इत्यर्थः । पदमपित्यन्ये । * परीक्षाकालेति । कालस्य
परीक्षा परीक्षाकालः । राजदन्तादिः। तत्र कोविदैरित्यर्थः । प-
रीक्ष्याः कालेति पाठान्तरम् । तैः परीक्ष्याः सत्या एव विज्ञेया ना
न्यथेत्यर्थस्तत्र । * दशेति। तथाचात्र विनाडीशब्देन पलमुच्यते।
*अहः स्वामिभिर्दिनैरिति । अघोरात्रं शता दिनैरिति पाठा-
न्तरम् । *तस्मिन्निति । पलपञ्चकरूपे इत्यर्थः । अलुब्धा इति
पाठान्तरम् ।

११ । *चोक्तमिति । नारदेनेति शेषः । * स शुद्ध इति ।
विशुद्ध इति पाठान्तरम् । अत्र वृद्धिरूर्ध्वं गतिः । हानिरधो-
गतिः । अतो न पूर्वविरोधः । अतएवान्यविरोधं परिहर-

ति * यस्त्विति। * न [illegible]ध्येनेति। तथा [illegible] *मह-
त्त्वमिति। इदं च शिरः[illegible]गतमिति भावः। एवं
चैतत्परं तत्, न तत्परमिति न विरोध इति भावः। [illegible]
* यदा[illegible]ति। चस्त्वर्थे। अ[illegible]पलक्ष्यमाणेति बहुव्रीहिः।
छेदादिविशेषणं। तमेवाह * कक्ष्येति। अस्पष्टत्वा[illegible]ना भेदा-
नाह * कक्ष्यमिति। घटस्य कक[illegible]ति समासः। अन्यथा दोषा-
पत्तेरित्या[illegible] * [illegible]कटाविति। * [illegible]लान्तयोः, संबद्धौ।

१२। वैलक्षण्यादाह * यदास्त्विति। तमेवाह * शिक्या[illegible]ति।
अतएव [illegible]क्यमिति व्याख्यातं व्यक्त्यभिप्रायं बहुवचनं।
अन्यथाऽनयोर्मिथोवि[illegible]धः स्पष्ट एवेति भावः।

व्यासोऽपि,

कक्ष्यच्छेदे तुलाभङ्गे घटककटयो[illegible]था।

रज्[illegible]च्छेदेऽक्षभङ्गे च दद्या[illegible]द्ध पुनर्नृपः॥ इति।

[illegible]यनोऽपि,

शिक्यच्छेदे तुलाभङ्गे तथावापि गुणस्य वा।

शुद्धेश्च संशये चैव परीक्षेत पुनर्नरम्॥

अनेन कारणान्तरमप्युक्तम्। आ[illegible]स्तालनमात्रस्य न
सा[illegible]मयोगस्येति प्राच्याः। एवं तु वै[illegible]व्यपापापरिहारात्साङ्गः
प्रयोग आवर्तनीय इति मदनः। अत्राद्यमेव मूलसंमतम्। शेषं
[illegible]व पूरयितुं [illegible]र्णिकामाह * ततश्चेति। [illegible]व्यकारीत्यर्थः।
उपसं[illegible]रति * एवमिति। * ब्रह्मभूयाय, ब्र[illegible]त्वाय।

१३। * इच्छति, राजा। पितामहमाह * विशालामिति। विस्तृता-
मित्यर्थः। * [illegible]च्छ्रिता[illegible], उन्नताम्। * यत्रस्थः, घटः। * तत्रैव,
[illegible]लायामेव। * एतान्, लोकपाला[illegible]न्। [illegible] शाक-
पार्थिवादिः। कपाटेत्यत्रार्षआद्यम्, ततः कर्मधारये वा।

परमतात्पर्यमाह * अशून्यामिति । * व्रीह्यादीनाम्। व्रीह्यादीनीति पाठान्तरम्॥१००॥ १०१॥१०२॥

इति घटविधिः।

मि० इदानीं क्रमप्राप्तमग्निदिव्यमाह।

या० करौ विमृदितव्रीहेर्लक्षयित्वा ततो न्यसेत्।
सप्ताश्वत्थस्य पत्राणि तावत्सूत्रेण वेष्टयेत्॥ १०३॥

मि० दिव्यमातृकोक्तसाधारणधर्मेषु सत्सु तुलाविधानोक्तधर्मावाहनादिशिरःपत्रारोपणान्ते च विधौ सति अयमग्निविधौ विशेषः। विमृदितव्रीहेः-विमृदिता विघर्षिता व्रीहयः कराभ्यां येनासौ विमृदितव्रीहिस्तस्य करौ लक्षयित्वा तिलकालकव्रणकिणादिस्थानेष्वलक्तकरसादिनाऽङ्कयित्वा।

यथाह नारदः, (ना.व्य.प. १। ३०१)
हस्तक्षतेषु सर्वेषु कुर्याद्धंसपदानि तु। इति।

अनन्तरं सप्ताश्वत्थस्य पर्णानि हस्तयोरञ्जलीकृतयोर्न्यसेत्।

पत्रैरञ्जलिमापूर्य आश्वत्थैः सप्तभिः समैः।

इति स्मरणात्।

तानि च हस्तसहितानि सूत्रेण तावद्वेष्टयेत् यावन्त्यश्वत्थपत्राणि, सप्तकृत्वा वेष्टयेदित्यर्थः। सूत्राणि च सप्त शुक्लानि भवन्ति।

वेष्टयीत सितैर्हस्तौ सप्तभिः सूत्रतन्तुभिः।

इति नारदवचनात्।

तथा सप्त शमीपत्राणि सप्तैव दूर्वापर्णानि अक्ष-

तांश्च व्यक्तानक्षतांश्चाश्वत्थपत्राणा पारे विन्यसे ।
सप्त पिप्पलपत्राणि शमीपत्राण्यथाक्षतान् ।
दूर्वायाः सप्त पत्राणि दध्यक्तांश्चाक्षतान्न्यस ॥
इति स्मरणात् । (ना.व्य.प. १।२८७)
तथा कुसुमानि च विन्यसेत् ।
सप्त पिप्पलपत्राणि अक्षतान् मनोदधि ।
हस्तयोर्निक्षिपेत्तत्र सूत्रेणावेष्टनं तथा ॥
इति पिताम वचनात् । सुमनसः पुष्पाणि ।
यदपि स्मरण,
अयस्तप्तं तु पाणिभ्यामर्कपत्रैस् सप्तभिः ।
अन्तर्हितं हरन् शुद्धस्त्वदग्धः सप्तमे पदे ॥ इति,
त श्वत्थपत्राभावे अर्कपत्रविषयं वेदितव्य ।
अश्वत्थपत्राणां पितामहप्रशं ावचनेन श्यत्वाव-
गमात् ।

पिप्पलाज्जायते वह्निः पिप्पलो वृक्षराट् स्मृतः ।
अतस्तस्य तु पत्राणि हस्तयोर्विन्यसेद्बुधः ॥ इति ॥१०३॥

बा० १ । स तिमाह *इदानीं क्रमेति । उद्देशक्रमेत्यर्थः । अत्र प्रागुक्तं सर्वं सामान्यमपेक्षितमित्याह *दिव्येति । पत्रारोपणान्ते च विधौ सतीति पाठः । विधिः प्रकारः । पत्रारोपणा विध्यन्ते सति अयमिति पाठान्तरम् । लक्षयित्वेत्यस्य व्याख्या *तिलकाल-केति । लक्ष दर्शनाङ्कनयोरिति धात्वर्थानुसारादाह *अङ्केति । अङ्कयित्वेति तत्र पाठान्तरम् । हंसपदानीति पाठः । तदाकारा-णि चिह्नानीत्यर्थः । तत इत्यस्य व्याख्या * अनन्तरमिति । पूर्वं द्विवचनस्यैव सत्त्वादाह * स्तयोरिति । तत्र विशेषमा-ह * अञ्जलीति । नारदमेवाह * पत्रैरिति । तावदिति क्रिया-

विशेषणमित्या० * तावदिति। तात्पर्यार्थमाह * सप्तकृत्वइति। तावतां सूत्राणां समाहारः तावत्सूत्रं, पात्रादिः। तेन तावत्सूत्र्या सकृद्वेष्टयेदित्यर्थ इति मदनः। वेष्टनसंख्यामुक्त्वा तथैव च स्पष्टार्थं सूत्रस्य संख्यां वर्णं चाह * सूत्राणि चेति। वेष्टननिष्ठसंख्यारोपेण सप्त सूत्राणि चेत्यर्थः।

२। विशेषमा० * तथेति। नारदमेवाह * सप्तेति। अथशब्दः समुच्चये। सप्तेत्यस्योभयत्रान्वयः। अक्षतानां स्पष्टं द्वैविध्यमुक्तमनेन। अत एव * दधि, दध्यक्षतान्। तथाच पूर्वैकवाक्यता। आवेष्टितमित्यत्र भावे क्तः। आवेष्टनमिति पाठान्तरम्। सुमनइति जातावेकवचनमित्या० * पुष्पाणीति।

३। पितामहविरोधं मूलस्य निराचष्टे * यदपीति। अतुल्यार्थत्वेन विकल्पो नेति सूचयन्नाह * अश्वत्थेति। *पितामहप्रशंसेति। पितामहकर्तृकतत्प्रशंसावचनेनेत्यर्थः। तदेवाह * पिप्पलादिति॥ १०३॥

मि० कर्तुरग्न्यभिमन्त्रणमाह।

या० त्वमग्ने सर्वभूतानामन्तश्चरसि पावक।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम॥ १०४॥

मि० हेअग्ने त्वं सर्वभूतानां जरायुजाण्डजस्वेदजोद्भिज्जानां अन्तः शरीराभ्यन्तरे चरसि उप० क्ताऽन्नपानादीनां पाचकत्वेन वर्त्तसे। हेपावक शुद्धिहेतो कवे क्रान्तदर्शिन् साक्षिवत्पुण्यपापेभ्यः सत्यं ब्रूहि। पुण्य-

१ अक्षतानां स्पष्टं द्वैविध्यस्यात्र प्रतिपादितत्वादेव उत्तरत्र पितामहवचने दधिपदं दधिसंसृष्टाक्षतार्थपरम्। अतएव पितामहवचनस्य पूर्वोक्तेन नारद० नैकवाक्यता इत्यर्थः।

पापेभ्य इति ल्यब्लोपे पञ्चमी । पुण्यपापान्यवेक्ष्य सत्यं ब्रूहि शपथ इत्यर्थः । अयःपिण्डे त्रिभिस्तापैः संतप्ते संदंशेन पुरत आनीते कर्ता पश्चिममण्डले प्राङ्मुखस्तिष्ठन् अनेन मन्त्रेण अग्निम् अभिमन्त्रयेत् ।

यथाह नारदः, (व्य० प० १ । २८९)

अग्निवर्णमयःपिण्डं सस्फुलिङ्गं सुरञ्जितम् ।

तापे तृतीये संताप्य ब्रूयात्सत्यपुरस्कृतम् ॥ इति ।

अस्यार्थः । लोहशुद्ध्यर्थं सुतप्तं लोहपिण्डमुदके निक्षिप्य पुनः संताप्योदके निक्षिप्य तृतीये तापे संताप्य संदंशेन गृहीत्वा पुरत आनीते सत्यपुरस्कृतं सत्यशब्दयुक्तं त्वमग्ने सर्वभूतानामित्यादिमन्त्रं कर्ता ब्रूयादिति ।

प्राड्विवाकस्तु मण्डलभूभागाद्दक्षिणप्रदेशे लौकिकमग्निमुपसमाधाय अग्नये पावकाय स्वाहेति आज्येनाष्टोत्तरशतवारं जुहुयात् ।

पावकाय जुहुयादग्नौ घृतमष्टोत्तरं शतम् ।

इति स्मरणात् ।

हुत्वा च तस्मिन्नग्नावयःपिण्डं प्रक्षिप्य तस्मिंस्ताप्यमाने धर्मावाहनादि वनान्तं पूर्वोक्तविधिं विधाय तृतीये तापे वर्तमाने अयःपिण्डस्थमग्निमेभिर्मन्त्रैरभिमन्त्रयेत् ।

त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे ।

त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनाम् ॥

जठरस्थो हि भूतानां ततो वेत्सि शुभाशुभम् ।

पापं पुनासि वै यस्मात्तस्मात्पावक उच्यसे ॥

पापेषु दर्शयात्मानमर्चिष्मा भव पावक।
अथवा शुद्धभावेषु शीतो भव ुताशन॥
त्वमग्ने सर्व ्तानामन्तश्चरासि साक्षिवत्।
त्वमेव देव जानी े न विदुर्यानि मानवाः॥
०्यव ।राभि ास्तोऽयं मानुषः ुद्धिमिच्छति।
तदेनं संशया ्स्माद्धर्मतस्त्रा ्महसि॥ इति॥१०४॥

बा० १। *कर्त्तुरिति। प्राड्विवाकस्य तु अग्रे वक्तव्यमिति भावः। ममे ्क्तिरत्र बीजम्। सर्वपदोक्तेराह *जरायुजेत्यादि। च-
्साल्यस्य लक्ष्यार्थमाह *उपयुक्तेति। ुक्तादीत्यर्थः। साभिप्रायं विशेषणद्वयमित्याह * पावकेत्यादि। * साक्षिव , साक्षिणो यथा ्यति। अनेनास्याग्रे एवान्वयो न ुर्वत्रापीति सूचितम्। यथाश्रुते पञ्चम्य ्पपत्तेराह * पुण्येति। साक्ष्यनुरोधेन तथोक्तावपि प्रकृते तदर्थासम्भवादाह * दर्शयेत्यर्थ इति। ममेतितु शेषत्वविवक्षायां षष्ठी।

२। विशेषमाह * अयःपिण्डे इति। * तापैः, क्रियारूपैः। *अनेन, प्रा ्क्तेन। तापत्रयफलमाह *लोहेति। तृतीये इति करणस्याधिकरणत्वविवक्षया सप्तमी। सत्यपुरस्कृतत्वमविवक्षि-
तमित्याह * सत्यशब्द ्क्तमिति। मन्त्रो विशेष्य इत्याह *त्वमिति। अत्र सुरञ्जितत्वम् अतिशयिततप ्तमेव। अतएव तस्य सस्फुलिङ्गत्वम्। सुरक्षितमिति पाठान्तरम्।

जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि।
द ्प्रयोगश्चान्यत्र तेनायोऽग्नौ प्रतापये ॥

इति अग्निवर्णमित्यतः पूर्बपद्यम्।

३। विशेषान्तरमाह *प्रादिति। मण्डलेति। यावति भूप्रदेशे मण्डला नि तत इत्यर्थः। नारदमेवा *शान्त्यर्थमिति। तापत्रयम -

त्रैवाग्नावित्याह * त्वाचेति । * विधिमिति । वाक्मकारं कृत्वे-त्यर्थः । सतिसप्तम्युभयत्र । अयः पिण्डस्थमिति विशेषणेन मुख्याग्नि-निरासः । प्राड्विवाक एवात्र कर्ता, क्त्वाबलात् नारदमेवाह * त्वमग्ने वेदा इत्यादि । *त्वंमुखं ब्रह्मेति । त्वयि होमेन देववत्तेषामपि तृप्तेरिति भावः । पापेषु पुरुषेषु चरसि वर्तसे । *साक्षिवत्, अन्तर्या-मिवत् । * देवेति । तानीतिशेषः । तत्स्थाने तत्पाठो वा ॥१०४॥

मि० अपिच ।

या० तस्येत्युक्तवतो लौहं पञ्चाशत्पालिकं समम् ।
अग्निवर्णं न्यसेत्पिण्डं हस्तयोरुभयोरपि ॥ १०५ ॥

मि० तस्य कर्तुः इत्युक्तवतः त्वमग्ने सर्वभूतानामि-त्याद्यभिमन्त्रणं कृतवतो लौहं लोहविकारं पिण्डं पञ्चा-शत्पलिकं पञ्चाशत्पलसम्मितम् । समम् अस्त्रिरहितम्, सर्वतश्च समं वृत्तं श्लक्ष्णं च । तथाऽष्टाङ्गुलायामम् ।

अस्त्रिहीनं समं कृत्वा अष्टाङ्गुलमयोमयम् ।
पिण्डं तु तापयेदग्नौ पञ्चाशत्पलिकं समम् ॥

इति पितामहस्मरणात् । अग्निवर्णमाग्निसदृशम् । उभयोः तयोरश्वत्थपत्रदधिदूर्वाद्यन्तारितयोर्न्यसेत् निक्षिपेत्प्राड्विवाकः ॥ १०५ ॥

बा० १। लक्षकृदन्यदप्याहेत्याह * अपि चेति । सममित्यस्य व्याख्या * अस्त्रिराहितमिति । कोणराहितमित्यर्थः । अर्थान्तरमाह * सर्वतश्च सममिति । तदर्थद्वयमाह * वृत्तं श्लक्ष्णं चेति ।

२। विशेषमाह * तथेति । पैतामहे सममित्यस्य द्विरुक्तिः अस्त्रि-हीनमित्यस्य चोक्तिरिति प्रागुक्तार्थलाभः । अत्राग्निहीनमिति

१ तस्मिन्नाप्यमान इत्यत्र तृतीये तापे वर्तमाने त्यत्रचत्यर्थः ।

पाठं धृत्वाऽग्निकोपरञ्जितामिति व्याख्यातवान्कल्पतरुः। अग्निवर्णत्वस्य प्रकारान्तरेणापि संभवादाह * अग्निसदृशमिति। दाहकतया तत्तुल्यमित्यर्थः। न्यासस्यासंभवादाह * निक्षिपेदिति। प्राड्विवाक एवात्र कर्तव्या * प्राडिति॥ १०५॥

मि० ततः किं कुर्यादित्यत आह।

या० स तमादाय सप्तैव मण्डलानि शनैर्व्रजेत्।

मि० स पुरुषस्तं तप्तं लोहपिण्डम् अञ्जलिना गृहीत्वा सप्त मण्डलानि शनैर्व्रजेत्। एवकारेण मण्डलेष्वेव पदन्यासं मण्डलानतिक्रमणं च दर्शयति।

यथाह पितामहः,

न मण्डलमतिक्रामेन्नाप्यर्वाक् स्थापयेत्पदम्। इति।

मि० सप्तैव मण्डलानि शनैर्व्रजेदित्युक्तं, तत्रैकैकं मण्डलं किंप्रमाणं मण्डलयोरन्तरं च कियत्प्रमाणकमित्यत आह।

या० षोडशाङ्गुलकं ज्ञेयं मण्डलं तावदन्तरम्॥१०६॥

मि० षोडश अङ्गुलानि यस्य तत् षोडशाङ्गुलकम्। षोडशाङ्गुलप्रमाणं मण्डलं बोद्धव्यम्। मण्डलयोरन्तरं मध्यं च तावदेव षोडशाङ्गुलकमेव। सप्त मण्डलानि व्रजेदिति वदता प्रथममेव स्थानमण्डलमेकमुक्तम्। अतश्चाष्ट मण्डलानि षोडशाङ्गुलानि, मण्डलान्तराणि तु सप्त तावत्प्रमाणानि। एतदेव—

नारदेन परिसंख्यातम्,

द्वात्रिंशदङ्गुलं प्राहुर्मण्डलात् मण्डलान्तरम्।

अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम्॥

चत्वारिंशत्समधिकं भूमरेखलमानतः । इति ।

अयमर्थः। अवस्थानमण्डलात्षोडशाङ्गुलात् मण्डलान्तरमन्यन्मण्डलं द्वितीयाद्येकैकं द्वात्रिंशदङ्गुलं सान्तरालम् । तत्रैवमवस्थानमण्डलं षोडशाङ्गुलम्, गन्तव्यानि च सप्त मण्डलानि सान्तरालानि द्वात्रिंशदङ्गुलानि। एवमष्टाभिर्मण्डलैश्चत्वारिंशदधिकं शतद्वयं भूमेः अङ्गुलमानतोऽङ्गुलमानमिति। सार्वविभक्तिकस्तसिः। अस्मिंस्तु पक्षेऽवस्थानमण्डलं षोडशाङ्गुलं विधाय द्वात्रिंशदङ्गुलप्रमाणानां सप्तानां सान्तरालमण्डलभागानामेकमेकं भूभागं द्विधा विभज्यान्तरालभूभागान् षोडशाङ्गुलप्रमाणान् विहाय मण्डलभूभागेषु षोडशाङ्गुलप्रमाणेषु गन्तृपदप्रमाणानि सप्त मण्डलानि कार्याणि ।

यथा तेनैवोक्तम्,

मण्डलस्य प्रमाणं तु कुर्यात्तत्पदसंमितम् । इति ।

यत्तु पितामहेनोक्तम्,

कारयेन्मण्डलान्यष्टौ पुरस्तान्नवमं तथा ।
आग्नेयं मण्डलं चाद्यं द्वितीयं वारुणं स्मृतम् ॥
तृतीयं वायुदैवत्यं चतुर्थं यमदैवतम् ।
पञ्चमं त्विन्द्रदैवत्यं षष्ठं कौबेरमुच्यते ॥
सप्तमं सोमदैवत्यं सावित्रं त्वष्टमं तथा ।
नवमं सर्वदैवत्यामिति दिव्यविदो विदुः ॥
द्वात्रिंशदङ्गुलं प्राहुर्मण्डलान्मण्डलान्तरम् ।
अष्टाभिर्मण्डलैरेवमङ्गुलानां शतद्वयम् ॥
षट्पञ्चाशत्समधिकं भूमेस्तु परिकल्पना ।

कर्तुः पदसमं कार्यं मण्डलं तु प्रमाणतः ॥
मण्डले मण्डले देयाः कुशाः शास्त्रप्रचोदिताः ।
इति, तत्र नवमं सर्वदैवत्यमपरिमिताङ्गुलप्रमाणं मण्डलं विहायाद्यैरभिमण्डलैरष्टाभिश्चान्तरालैः प्रत्येकं षोडशाङ्गुलप्रमाणैरङ्गुलानां षट्पञ्चाशदधिकं शतद्वयं सम्पद्यत । तत्रापि गन्तव्यानि सप्तैव मण्डलानि । यतः प्रथमे तिष्ठति नवमे क्षिपतीति न विरुध्यते ।

अङ्गुलप्रमाणं च—
तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ।
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः ॥
हस्तो वितस्तिद्वितयं दण्डो हस्तचतुष्टयम् ।
तत्सहस्रद्वयं क्रोशो योजनं तच्चतुष्टयम् ॥
इति बोद्धव्यम् ॥ १०६ ॥

बा० १। * तत इति । तत्र ताभिक्षेपानन्तरमित्यर्थः । कर्त्रेति शेषः । एवाधिक्यं परिहरति * एवकारेणेति ।

उ० २। संगतिमाह * सप्तैवेति । * किंप्रमाणं, कियत्प्रमाणम् । तस्योपयमातियौगिकत्वादाह * मण्डलयोरिति । प्रमाणार्थकाङ्गुलशब्दोऽदन्तो नित्यक्लीबः । सर्वमिति न्यायेनाह * तावदेवेति ।

३। न्यूनतां विरोधं च परिहरति * सप्तेति । * उक्तम्, उक्तप्रायम् । फलितमाह * अतश्चेति । * मण्डलान्तराणीति । मण्डलानामन्तराणीत्यर्थः । तुरुक्तवैलक्षण्ये । तदेवाह * सप्तेति । तेषामेव सप्तत्वादिति भावः । * परिसंख्यायेति । उभयसंख्यमेकीकृत्येत्यर्थः । मण्डलान्तरम्, अन्यत् मण्डलम् । उक्तरीत्या मण्डलस्य द्वात्रिंशदङ्गुलत्वस्य बाधितत्वादाह * अयमर्थ इति । उक्तहेतोरेवाह * सान्तरालमिति । पर्यवसितमाह * तदेवमि-

ति । अ०ामिरित्याद्यस्याह * एवमिति । उक्तमकारेणेत्यर्थः । चत्वारिंशदधिकमिति व्रीहिः । विभक्त्यन्तरायोग्यत्वादाह * अ लमानमिति । इतिरर्थसमाप्तौ । तदुपपातमा । * सार्वविभक्तिक इति । आद्यादित्वा । * अस्मिन् पक्षे इति । द्वितीयादिमण्डलानां द्वात्रिंशद लत्वमिति नारदोक्तपक्षे त्वित्यर्थः । * कार्याणीति । अन्यथा प्रागपि ततः पादप्रक्षेपसंभवा लोक्तपक्षतो तद्विरोधापत्तिरिति भावः । * तेनैव, नारदेनैव । *संमितं, तुल्यम् । यदि शोध्यपदं षोडशा लाधिकं तदाऽन्तरालं षोडशाङ्गुलन्यूनमेव भवति, यदि शोध्यपदं षोडशाङ्गुलादल्पं तदा विपरीतं कार्यम् इति भावः । एवं मूलोक्तपक्षेऽपि पदप्रमाणमेव आन्तरमण्डलं तन्मध्ये कार्यमिति बोध्यम् ।

४। अन्यविरोधं परिहरति * यत्त्विति । * कारयेदिति ।

अग्नेर्विधिं प्रवक्ष्यामि यथावच्छास्त्रचोदितम् ।

इत्यादिः । मदनरत्ने तु—

अष्टमं सर्वदैवत ।
रस्तान्नवमं यत्तु तन्म त्पार्थैवं विदुः ॥
मृ गोमयेन कृतान्येतान्यद्भिः पर्युक्षितानि च ।

इति पाठः । मण्डलानां परिमाणमाह * द्वात्रिंशदिति । इदं प्रागुक्तरीत्या बोध्यम् । * प्रचोदिता इति ।

नियतं पदं तेषु कर्ता नित्यमिति स्थितिः । इति शेषः ।

५। ननु नवानां मण्डलानां स्वय क्तत्वादष्टाभिरित्ययुक्त । किं च प्रा क्तरीत्या योजने चत्वारिंशदधिकमित्युचित । अन्यथा ततोऽप्याधिक्यापत्तिः, अतआह * तत्र नवममिति । तत्संख्या क्तेः पाठान्तरा रोधाच्चाह *अपरिमिता लेति ।

६। लादिविरोधं समाधत्ते *तत्रापीति नवस्वपीत्यर्थः ।

एवंच गत्वाऽग्निमादिति नारदीये अ नवममण्डलान्तरालं भूभागं विहाय बोध्यम्। तस्य गमनानर्हत्वा । एवं—

चतुःविंशतिः अंगुल्यात् भूमेस्तुपरिकल्पना।

इति कल्पतरुः पाठऽपि आद्यमवस्थानमण्डलं विहायाङ्गुलपरिमाणं योज्यम्। * अङ्गुलप्रमाणं चेति । वो व्यामित्यत्रान्वयः ॥ १०६ ॥

मि० सप्त मण्डलानि गत्वा किं कर्तव्य मित्यत आह।

या० मुक्त्वाऽग्निं मृदितव्रीहिरदग्धः शुद्धिमाप्नुयात्।

मि० अष्टमे मण्डले स्थित्वा नवमे मण्डले अग्निं तप्तमयःपिण्डं त्यक्त्वा कराभ्यां व्रीहीन्मर्दयित्वा अदग्धहस्तश्चेच्छुद्धिमाप्नुयात्। दग्धहस्तश्चेद शुद्ध इत्यर्थसिद्धम्। यस्तु सन्त्रासात्प्रस्खलन् हस्ताभ्यामन्यत्र दह्यते तथाप्यशुद्धो न भवति।

यथाह कात्यायनः,

प्रस्खलन्नभिशस्तश्चेत्स्थानादन्यत्र दह्यते।

अदग्धं तं विदुर्देवास्तस्य भूयोऽपि दापयेत्॥ इति।

मि० किंच

या० अन्तरा पतिते पिण्डे संदेहे वा पुनर्हरेत्॥१०७॥

मि० यदा गच्छतोऽन्तराऽष्टममण्डला र्वागेव पिण्डः पतति दग्धादग्धत्वे वा संशयस्त । पुनर्हरेदित्यर्थप्राप्तमुक्तम्। तत्र चायमनुष्ठानक्रमः। पूर्वेद्युर्भूतशुद्धिं विधाय परेद्युर्मण्डलानि यथाशास्त्रं निर्माय मण्डलाधिदेवताश्च मन्त्र तत्र तत्र संपूज्याग्नेः पसमा-

धाय शान्ति ... र्निर्वर्त्य उपोषित च ... वा-
सस: पश्चिमे मण्डले तिष्ठतो व्रीहि ... दिकं करसं-
स्कारं विधाय प्रति ... पत्रं ... मन्त्रकं कर्तुः शि ... बध्वा
प्रा ... वाकस्तृतीये तापेऽग्निमभिन्त्र्य त ... अयःपिण्डं
सन्दंशेन गृहीत्वा कर्त्राभिमन्त्रितं तस्याञ्जलौ निद-
ध्यात् । सोऽपि मण्डलानि सप्त गत्वा नवमे मण्डले
... शुद्धो भवतीति । ... त्यग्निविधिः॥ १०७॥

बा० १। *सप्तेति । नि ... यादिः । सप्त मण्डलानीति भिन्ने
पदे । मुख्यस्य तस्याभावादाह *अग्निं तप्तमयःपिण्डमिति ।
तात्पर्यार्थमा ... * व्रीहीनिति । शाब्दस्तु प्रागुक्त एव । प्रकृत-
त्वादाह * अदग्धहस्तश्चेदिति । विनापि प्रत्ययमिति मूले त-
स्य साधुत्वम् ।

२। विशेषमा ... य ... ति । * प्रस्खलन्निति । अभिश-
स्तः संत्रासात् प्रस्खल ... सन् यदि हस्ताभ्यामन्यत्रत्य ...
यः । मूले हस्तादिति जातावेकवचन ... । तस्येति शेषत्वविव-
क्षया षष्ठी । अयःपिण्डमिति शेषः । राजेति भावः ।

उ० ३। ... लोक्तमन्यदप्याह *किं चेति । *गच्छत इति । हस्ता-
भ्यामिति शेषः । नायमपूर्वो विधिरित्याह * अर्थमा ... मिति ।
स्पष्टार्थमाह * तत्र चेति । अग्निविधिविषये इत्यर्थः । अधिदे-
वताः अग्न्यादयः । * विधाय, कारयित्वा । * गृ ... त्वेति ।
तत्पुरतः समानीतमिति शेषः । * सोपि, कर्त्ताऽपि । एवं प्राग-
पि ॥ १०७ ॥ इत्यग्निविधिः ॥

मि० संप्र ... दकाविधिमाह ।

या० सत्येन माऽभिरक्ष त्वं वरुणेत्यभिशाप्य कम् ।

नाभिदघ्नो कस्यस्य गृहीत्वा जलं विशेत् ॥१०८॥

मि० हे वरुण सत्येन मामभिरक्ष त्वम् इति अनेन मन्त्रेण कमुदकमभिमन्त्र्याभिमन्त्र्य नाभिदघ्नो कस्यस्य नाभिप्रमाणोदकास्थितस्य पुरुषस्योरू गृहीत्वा शोध्यो जलं प्रविशेत् जले निमज्जेत् । एतच्च वरुणपूजायां सत्याम् ।

गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः ।
वरुणाय प्रकुर्वीत पूजामादौ समाहितः ॥

इति नारदस्मरणात् ।

तथा साधारणधर्मेषु धर्मावाहनादिसकलदेवता-पूजाहोमसमन्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु च ।

तथा,

तोय त्वं प्राणिनां प्राणः सृष्टेराद्यं तु निर्मितम् ।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा ॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे ।

इति प्राड्विवाकेनोदकाभिमन्त्रणे कृते शोध्यः सत्येन माभिरक्ष त्वं वरुणेत्युदकं प्रार्थयते । उदकस्थानानि च—

नारदेनोक्तानि, (व्य० प० १।३०५)

नदीषु तनुवेगासु सागरेषु वहेषु च ।
ह्रदेषु देवखातेषु तडागेषु सरःसु च ॥ इति ।

तथा पितामहेनापि,

स्थिरतोये निमज्जेत्तु न ग्राहिणि न चाल्पके ।

पङ्कशैवालरहिते जलौकामत्स्यवर्जिते ॥
देवखातेषु यत्तोयं तस्मिन् कुर्याद्विशोधनम् ।
आहार्यं वर्जयेन्नित्यं शीघ्रगासु नदीषु च ॥
आविशेत्सलिले नित्यं ऊर्मिपङ्कविवर्जिते । इति ।
आहार्यं तडाग दिभ्य आहृतं ताम्रकट । दीक्षि-
प्तं जलम् । नाभिप्रमाण कस्थश्च याज्ञिय क्षो वा
धर्मस्थ णामवष्टभ्य प्राङ्मुखास्तिष्ठेत् । *
उदके प्रविशेत्स्थूणां प्रगृह्य च ।
इति स्मरणा ॥ १०८ ॥

बा० १। सङ्गतिमाह * संप्रतीति। मामित्य च मेत्यादेश इत्याह
*मामिति । अत एव कर्तुरयं मन्त्रः । तात्यस्य व्याख्या
*अनेन मन्त्रेणेति, कमित्यस्य च *उदकमिति। धातूनामनेकार्थ-
त्वादाह * अभिमन्त्र्येति । * पुरुषस्येति । यस्यकस्यापि ।
बलीयस इत्यर्थः । अतएव— (व्य० प० १।३०८ उ०)
ब्राह्मणः क्षत्रियो वैश्यो रागद्वेषविवर्जितः ।
नाभिमात्रे जले स्थाप्यः पुरुषः स्थाणुवद् बली ।।इति नारदः।
त ग्रहणात्परं प्रवेशस्यासंभवादाह * निमज्जेदिति ।
२। क्रममाह प्राग्वत् *एतच्चेति। कार्यमिति शेषः। एवमग्रेऽपि ।
*प्रकुर्वीतेति । दद्यादित्यर्थः। अतएव वरुणायेति चतुर्थी। उक्त-
हेतोरेवोक्तम् * आदाविति।समाहित इति । प्राड्विवाक इत्यर्थः ।
प्राग्वदेवाह * तथेति । अत एव—
स्थापयेत्प्रथमं तोये स्तम्भवत् पुरुषं नृपः ।
आगतं मानुषं कृत्वा तोयमध्ये तु कारिणः ॥
ततस्त्वावाहयेद्देवान् सलिलं चानुमन्त्रयेत्। इति पितामहः।
देवान् धर्मादीन् । धर्मावाहनादिशिरःपत्रारोपणान्तं कुर्या-

दित्यर्थः । अन्य आह *तथेति । *इति, अनेन मन्त्रेण । उदकस्थानानि चेति चस्त्वर्थे । *वहेषु, प्रस्रवणे । चेति पाठः । वेति पाठेऽग्रिमचोऽपि तत्रैव ।

३। *तथा, तद्वत् । * ग्राहमत्स्येनापि, उक्तानां त्यस्या- ग्राः । ग्राहो मकरः । अल्पक इति कुत्सायां कन् । ० ल्लकेति मध्यमपदलोपी समासः । * नित्यं, सर्वथा । * आहृतम्, आनीतम् ।

४। विन्यस्य *नाभीति । *धर्मस्थूणां, धर्मायःप्रतिमाम् । सूर्मी स्थूणा ऽयः प्रतिमेत्यमरः । अवष्टम्भश्च धा णात्मकः संयोगविशेषः । नारदमाह * उदके इति । नाभिदघ्ने इत्यर्थः । तथाच साऽपि कृत्वा तत्रादौ स्थाप्येति भावः ॥ १०८ ॥

मि० ततः किं कर्तव्यमित्यत आह ।

या० समकालमिषुं मुक्तमानीयान्यो जवी नरः ।
गते तस्मिन्निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयात् ॥१०९॥

मि० निमज्जनसमकालं गते तस्मिन् जविन्येकस्मिन्पुरुषे अन्यो जवी शरपातस्थानास्थितः पूर्वमुक्तमिषुमानीय जले निमग्नाङ्गं यदि पश्यति तदा स शुद्धो भवति ।

एतदुक्तं भवति । त्रिषु शरेषु मुक्तेष्वेको वेगवान् मध्यमशरपातस्थानं गत्वा तमादाय तत्रैव तिष्ठति । अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति । एवं स्थितयोस्तयोस्तृतीयस्यां करतालिकायां शोध्यो निमज्जति । तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपातस्थानं गच्छति ।

शरश्चा । च तस्मिन्नपि द्रुततरं तावच्च । लं प्राप्या-
न्तर्जलगतं यदि न पश्यति तदा शुद्धो भवतीति ।
एतदेव स्पष्टीकृतम्—

पितामहेन,

नरश्चापि च कर्तुश्च समं गमनमज्जनः ।
गच्छेत्तोरणमूलात्तु लक्ष्यस्थानं जवी नरः ॥
तस्मिन्गते द्वितीयोऽपि वेगादादाय सायकम् ।
गच्छेत्तोरणमूलं तु यतः स पुरुषो गतः ॥
आगतस्तु शरग्राही न पश्यति यदा जले ।
अन्तर्जलगतं सम्यक्तदा शुद्धिं विनिर्दिशेत् ॥ इति ।

जविनोश्च पुरुषयोर्निर्धारणं कृतम्—

नारदेन,

पश्चाज्जाता धावकानां यौ ख्यातावधिकौ जवे ।
तौ च तत्र नियोक्तव्यौ शरानयनकारणात् ॥ इति ।

तोरणं च निमज्जनसमीपस्थाने समे भूम्यौ कर्ण-
प्रमाणामुच्छ्रितं कार्यम् ।

गत्वा तु तज्जलस्थानतटे तोरणमुच्छ्रितम् ।
कुर्वीत कर्णमात्रं तु भूमिभागे समे शुचौ ॥
इति नारदस्मरणात् ।

शरत्रयं वैणवं च धनुर्मङ्गलद्रव्यैः इवतपुष्पादि-
भिः प्रथमं सम्पूजयेत् ।

शरान् सम्पूजयेत्पूर्वं वैणवं च धनुस्तथा ।
मङ्गलैर्दीपपुष्पैश्च ततः कर्म समाचरेत् ॥
इति पितामहवचनात् ।

धनुषः प्रमाणं लक्ष्यस्थानं च—

नारदेनोक्तः, (व्य० प० १)

क्रूरं धनुः सप्तशतं मध्यमं षट्शतं स्मृतम्।
मन्दं पञ्चशतं ज्ञेयमेष ज्ञेयो धनुर्विधिः॥ (३०७)
मध्यमेन तु चापेन प्रक्षिपेच्च शरत्रयम्। (३०८)
हस्तानां तु शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः।
न्यूनाधिके तु दोषः स्यात्क्षिपतः सायकांस्तथा॥ इति।

अङ्गुलानां सप्ताधिकं शतं सप्तशतं क्रूरं धनुः। एवं षट्शतं पञ्चशतं च। एवं चैकादशाङ्गुलाधिकं हस्तचतुष्टयं क्रूरस्य धनुषः प्रमाणम्, मध्यमस्य दशाङ्गुलाधिकम्, मन्दस्य नवाङ्गुलाधिकमित्युक्तं भवति। शराश्चानायसाग्रा वैणवाः कार्याः।

शरांश्चानायसाग्रांस्तु प्रकुर्वीत विशुद्धये।
वेणुकाण्डमयांश्चैव क्षेप्ता तु सुदृढं क्षिपेत्॥

इति स्मरणात्। क्षेप्ता तु क्षत्रियस्तद्वृत्तिर्वा ब्राह्मणः सोपवासो नियोक्तव्यः।

यदाह,

क्षेप्ता च क्षत्रियः प्रोक्तस्तद्वृत्तिर्ब्राह्मणोऽपि वा।
अक्रूरहृदयः शान्तः सोपवासस्ततः क्षिपेत्॥ इति।

त्रिषु मुक्तेषु मध्यमः शरो ग्राह्यः।

तेषां च प्रेषितानां च शराणां मध्यमोऽक्षतात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥

इति वचनात्। तत्रापि पतनस्थानादानेतव्यो न सर्पणस्थानात्।

शरस्य पतनं ग्राह्यं सर्पणं तु विवर्जयेत्।
सर्पन् सर्पन् शरो यायाद् दूराद् दूरतरं यतः॥

इति वचनात् । वाते च प्रवाति विषमादिदेशे च शरमोक्षो न कार्यः ।

इषुं न प्रक्षिपेद्विद्वान्मारुते वाति वायति ।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले ॥
तृणगुल्मलतावल्लीपङ्कपाषाणसंयुते ।

इति पितामहवचनात् । निमग्नाङ्गं पश्येच्चेच्छुद्धिमाप्नुयादिति वदता उन्मज्जिताङ्गस्याशुद्धिर्दर्शिता । स्थानान्तरगमने चाशुद्धिः—

पितामहेनोक्ता,

अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात् ।
स्थानाद्वाऽन्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः ॥ इति ।
एकाङ्गस्यापि दर्शनादिति च कर्णाद्युपलक्षणम् ।

शिरोमात्रं तु दृश्येत न कर्णौ नापि नासिका ।
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत् ॥

इति विशेषाभिधानात् ।

अयमत्र प्रयोगक्रमः । उक्तलक्षणजलाशयसन्निधावुक्तलक्षणं तोरणं विधाय उक्तप्रमाणे देशे लक्ष्यं निधाय तोरणसन्निधौ सशरं धनुः सम्पूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्मादींश्च देवान् हवनान्तमिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रमाबध्य प्राड्विवाको जलमभिमन्त्रयते, तोय त्वं प्राणिनां प्राण इत्यादिना मन्त्रेण । अथ शोध्यः सत्येनेत्यादिना मन्त्रेण जलमभिमन्त्र्य गृहीतस्तम्भस्य नाभिमात्रोदकावस्थितस्य बलीयसः पुरुषस्य समीपमुपसर्पति । अथ शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने

मध्यम ारं गृ ीत्वा जविन्येकस्मिन् रुषे स्थिते अन्यस्मिंश्च तोरण ूले स्थिते प्रा विवाकेन तालत्रये दत्ते युगपद् गमनमज्जन अथ शरानयनमिति । इत्युदकविधिः ॥ १०९ ॥

बा० १। समकालमिति गमनादिक्रियाविशेषणम् । तच्च साकाङ्क्षमिति म तत्वादाह *निमज्जनेति । * गते इति । मध्यमशरपातस्थानं प्रतीति भावः । तस्मिन्नित्यस्य व्याख्या *जविन्येकस्मिन्पुरुषे इति । नर इति लब्धमिदम् । अत एवाह * अन्य इति । तदर्थमाह *शरेति । तानिष्ठालब्धमाह *पूर्वामिति । *आनीयेति । यतः स गतस्तत्रानीयेत्यर्थः । * जलनिमग्नाङ्गमिति । सप्तम्यर्थे बहुव्रीहिः । जले निमग्नाङ्गमिति पाठेऽपि अर्शआद्यच् । तत्र तथा तद्विशिष्टं जलं पश्यतीत्येवार्थः । यद्वा निमज्ज कर्णाद्यभिप्रायं दर्शनं मस्तकाभिप्रायमित्यनुपदं स्फुटीभविष्यति ।

२। स्प तया सर्वाप्रतीतेराह *एतादिति । *त्रिष्विति । अतएव—

अप्सु प्रवेश्य पुरुषं प्रक्षिपेत्सायकत्रयम् ।

इति बृहस्पतिः । * एकः, पुरुषः । पञ्चम्यर्थबहुव्रीहिणा लब्धं स्थानं विशिनष्टि * तो णेति । तोरणोऽस्त्री बहिर्द्वारमित्यमरः । * स्थितयोरिति । तयो सतोरिति भावः । * तृतीयामिति । तोरणमूलस्थितप्राड्विवाकसंबन्धितृतीयकरतालिका मकालमित्यर्थः । *तत्समकालमिति ।

नारदोऽपि,

क्षिप्तेषु मज्जनं कार्यं गमनं समकालिकम् । इति ।

क्षिप्तेषु शरेषु सत्सु मज्जनं गमनं च तृतीयकरतालिकास कालिकं कार्यमित्यर्थः । * प्राप्ते, सति । * प्राप्य, लब्ध्वा ।

अदर्शने हेतुमाह *अन्तर्जलगतमिति। सम्यगन्तर्जलगतमित्यर्थः। मस्तकस्यापि निमज्जनादिति भावः । एतदाशयेनैव यदि न पश्यतीत्युक्तम् । अतएव मूलविरोधो नेति भावः।

नारदोपि, (व्य० प० ११३०९।३१०)

परमक्षेपणस्थानाद्गुरुः जवसमन्वितः।
गच्छेत्परमया शक्त्या यत्रासौ मध्यमः शरः ॥
मध्यमं शरमादाय पुरुषो यस्तथाविधः।
प्रत्यागच्छेत्तु वेगेन यतः स पुरुषो गतः ॥
आगत इत्यादि प्राग्वत् इति ।

३। विशेषानेवाह *जविनोश्चेत्यादिना । चस्त्वर्थे । एवमग्रेऽपि । तत्र हेतुमाह *शरेति फलमपीह हेतुः । तद्रूपहेतोस्तावेव नियोक्तव्यावित्यर्थः। *संशोध्येति। तस्य यौ कर्णावित्यर्थः। शोध्यकर्णेति पाठान्तरम् । *तज्जलेति। दिव्यजलसमीपभूप्रदेशमित्यर्थः। अतएवाह *तटे इति। शोध्यकर्णप्रमाणचिह्नितमित्यर्थः । विशेषमाह * शरेति । वैणवं धनुश्चेत्यर्थः । मङ्गलेत्यस्य व्याख्या *श्वेतेति । एवमग्रेऽपि । *तत इति । अतएव प्रथममिति पूर्वमुक्तम् ।

४। विशेषमाह * धनुषः प्रमाणमित्यादिना । *विधिः, प्रकारः । त्रैविध्यफलमाह * मध्यमेनेति । चस्त्वर्थे । एवमग्रेऽपि। एवार्थो वा। द्वितीयः पादपूरणे । किं कृत्वेत्यत आह *हस्तानामिति । * तथा, किञ्च । न्यूनाधिके तस्मिन् सति सायकान् क्षिपतो दोषः स्यादित्यर्थः । सप्तशतमित्यादेर्भिन्नपदत्वे बहुवचनापत्तिः, समाहारद्विगौ क्लीबापत्तिः, असंभवापत्तिश्च, अतः सप्ताधिकशताङ्गुलप्रमाणकमित्यादिः वाच्योऽर्थः। तत्फलितमाह *अङ्गुलानामिति। *शतमिति । यस्य तादिति शेषः । ता-

‑स्यार्थमाह *एवंचेति । *अनायसाग्रा इति । अयोविकाररूपाग्रभागरहिता इत्यर्थः । कात्यायनमाह * शरांश्चेति । सुदृढमिति ‑चितं विशेषमा‑ * क्षेप्तेति । पितामहमाह * यथाहेति । *ततः क्षिपेदिति । तथा शुचिरिति पाठान्तरम् । विशेषमुक्तमेवाह *त्रिष्विति । एवमग्रेऽपि । अग्रे सर्वा पितामहोक्तिरेव । *प्रेषितानां, प्रक्षिप्तानाम् । *तेषामिति । उक्तलक्षणानाम् । *तत्रापि, मध्यमशरविषयेऽपि । सर्पन्निति शत्रन्तम् । वीप्सायां द्वित्वम् । अतिवायतीत्यार्षम् । अतिव्ययतीति पाठो वा । स्थाणुर्वृक्षविशेषः । स्थाणुर्वा ना ध्रुवः शङ्कुरित्यमरः । उत्तरस‑तत्र आह *निमग्ना‑मिति । *वदता, ‑लकृता । चोऽप्यर्थे । *अन्यथेति ।

आगतस्तु शरग्राही न पश्यति तथा जले ।
अन्तर्जलगतं सम्यक् तदा शुद्धं विनिर्दिशेत् ॥ इत्यादिः ।

४। अन्यथेत्यस्यैवार्थमाह * एकाङ्गेति । स्थानपन्त्यर्थमाह *यस्मिन्निति । मिथोऽविरोधायाह *एकाङ्गेति । चस्त्वर्थे । अपिरुक्तस‑च्चय । *विशेषाभिधानादिति । तेनैवेति भावः । *सन्निधौ, पश्चिमतीरदेशे । *तत्तीरे, अक्षतपुञ्जादौ । *अथ, तदभिमन्त्रणानन्तरम् । *गृहीतस्‑णस्येति । मा‑‑लस्येति शेषः । *प्रादिति । तोरण‑लरि‑तेत्यादिः । *दत्ते इति । ‑तायतालिकासप्रकालपिति भावः ॥ १०९ ॥

मि० इदानीं विषविधिमा‑ ।

या० त्वं विष ब्रह्मणः पुत्रः सत्यधर्मे व्यवस्थितम् ।
त्रायस्वास्मादभीशापात्सत्येन भव मेऽमृतम् ॥ ११० ॥

एवमुक्त्वा विषं शार्ङ्गं भक्षयेद्धिमशैलजम् ।
यस्य वेगैर्विना जीर्येच्छुद्धिं तस्य विनिर्दिशेत् ॥११॥

मि० त्वं विषेत्यादिमन्त्रेण विषमाभिमन्त्र्य कर्ता विषं हिमशैलजं शृङ्गप्रभवं भक्षयेत् । तच्च भक्षितं यस्य विषं वेगैर्विना जीर्यति स शुद्धो भवति । विषवेगो नाम धातोर्धात्वन्तरप्राप्तिः ।

धातोर्धात्वन्तरप्राप्तिर्विषवेग इति स्मृतः ।

इति वचनात् । धातवश्च—

त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणीति सप्त । एवं च सप्तैव विषवेगा भवन्ति । तेषां च लक्षणानि पृथगेव विषतन्त्रे कथितानि ।

वेगो रोमाञ्चमाद्यो रचयति विषजः स्वेदवक्त्रोपशोषौ तस्योर्ध्वस्तत्परौ द्वौ वपुषि जनयतो वर्णभेदप्रवेपौ । यो वेगः पञ्चमोऽसौ नयति विवशतां कण्ठभङ्गं च हिक्कां षष्ठो निश्वाससमोहौ वितरति च मृतिं सप्तमो भक्षकस्य ॥ इति ।

अत्र च महादेवस्य पूजा कर्तव्या ।

यथाह नारदः,

दद्याद्विषं सोपवासो देवब्राह्मणसन्निधौ ।
धूपोपहारमन्त्रैश्च पूजयित्वा महेश्वरम् ॥ इति ।

प्राड्विवाकः कृतोपवासो महादेवं पूजयित्वा तस्य पुरतो विषं व्यवस्थाप्य धर्मादिपूजां हवनान्तां विधाय प्रतिज्ञापत्रं शोध्यस्य शिरसि निधाय विषमभिमन्त्रयते ।

त्वं विष ब्रह्मणा सृष्टं परीक्षार्थं दुरात्मनाम् ।
पापानं दर्शयस्मानं शुद्धानाममृतं भव ॥
मृत्युमूर्ते विषं त्वं हि ब्रह्मणा परिनिर्मितः ।
त्राय वनं नरं पापात्सत्येनास्यामृतं भव ॥ इति ।
एवमाभिमन्त्र्य दक्षिणाभिमुखाय स्थिताय दद्यात् ।
नारदवचनात् ।
विषमादं [illegible] दक्षिणाभिमुखे स्थिते ।
उदङ्मुखः प्राङ्मुखो वा विषं दद्यात्समाहितः ॥
इति ।
विषं च वत्सनाभादि ग्राह्यम् ।
शृङ्गिणो वत्सनाभस्य हिमजस्य विषस्य वा ।
इति पितामहवचनात् । वर्ज्यानि च तेन प्रोक्तानि,
चारितानि च जीर्णानि कृत्रिमाणि तथैव च ।
भूमिजानि च सर्वाणि विषाणि परिवर्जयेत् ॥ इति ।
नारदेनापि, (व्य० प० १।३२१)
सृष्टं च चारितं चैवं धूपितं मिश्रितं तथा ।
कालकूटमलाबुं च विषं यत्नेन वर्जयेत् ॥ इति ।
कालः नारदेनोक्तः, (व्य० प० १।३१९)
तोलयित्वेप्सितं काले देयं ताद्धि हिमागमे ।
नापराह्णे न मध्याह्ने न सन्ध्यायां तु धर्मवित् ॥ इति ।
कालान्तरे तूक्तप्रमाणादल्पं देयम् ।
वर्षे चतुर्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता ।
हेमन्ते सा सप्तयवा शरद्यल्पा ततोऽपि हि ॥
इति स्मरणात् । अल्पेति षड्यवेत्यर्थः । मन्त्रग्र-
हणेन शिरःपत्रस्यापि ग्रहणम् । मन्त्रशिरसि योः स-

मा नेनाति श्रुतेः । व न्तस्य च सर्वा व्यलाघारण-
ता जहा पे त्समथवा । विषं च तत्प्लुतं देयम् ।

नारदवचनात् । (व्य० प० १।३२३)

विषस्य पलष भागाद्भागो विंशतिमस्तु यः ।

तमष्टभागहीनं तु शोध्ये दद्याद् घृतप्लुतम् ॥ इति ।

पलं चात्र चतुःसुवर्णिकम् ।

तस्य षष्ठो भागो दश माषाः दश यवाश्च भवन्ति । त्रियवं त्वेककृष्णलम् पञ्च कृष्णलका माषः त्येको माषः पञ्चदश यवा भवन्ति । एवं दशानां माषाणां यवाः सार्द्धं शतं भवन्ति । पूर्वे च दश यवा इति षष्ट्यधिकं शतं यवाः पलस्य षष्ठो भागः । तस्माद्विंशतितमो भागोऽष्टौ यवाः । त चाष्टमभागहीनः एकयव नः, तं विंशतितमं भागं सप्तयवं घृतप्लुतं दद्यात् । घृतं च विषात् त्रिंशद्गुणं ग्राह्यम् ।

पूर्वाह्णे शीतले देशे विषं देयं तु देहिनाम् ।

घृतेन योजितं श्लक्ष्णं पिष्टं त्रिंशद्गुणान्वितम् ॥

इति कात्यायनवचनात् । त्रिंशद्गुणेन घृतेनान्वितं विषम् । शोध्यश्च कुहकादिभ्यो रक्षणीयः ।

त्रि रात्रं पञ्चरात्रं वा पुरुषैः स्व धिष्ठितम् ।

कुहकादिभयाद्राजा रक्षयेद्दिव्यकारिणम् ॥

ओ षधीमन्त्रयोगांश्च मणीनथ विषाप हान् ।

कर्त्तुः शरीरसंस्थांस्तु गूढोत्पन्नान्परीक्षयेत् ॥

इति पितामहस्मरणात् । तथा विषमपि रक्षणीयम् । (व्य० प० १।३२२)

शार्ङ्गं हैमवतं शस्तं गन्धवर्णरसान्वितम् ।

अकृत्रिममसं दुष्टममन्त्रोपहतं च यत् ॥

इति नारदस्मरणात् । तथा, विषे पीते च करतालिकाशतपञ्चकं तावत्प्रतीक्षणीयोऽनन्तरं चिकित्सनीयः ।

यथाह नारदः,

पञ्चतालशतं कालं निर्विकारो यदा भवेत् ।

तदा भवति संशुद्धस्ततः कुर्याच्चिकित्सितम् ॥ इति ।

पितामहेन तु दिनान्तोऽवधिरुक्तोऽल्पमात्राविषयः ।

भक्षिते तु यदा स्वस्थो मूर्च्छाछर्दिविवर्जितः ।

निर्विकारो दिनस्यान्ते शुद्धं तमपि निर्दिशेत् ॥ इति ।

अत्र च प्राड्विवाकः सोपवासो महादेवं संपूज्य तत्पुरतो विषं स्थापयित्वा धर्मादीनिष्ट्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं निधाय विषमभिमन्त्र्य दक्षिणाभिमुखाय स्थिताय विषं प्रयच्छति । स च शोध्यो विषमभिमन्त्र्य भक्षयतीति क्रमः । इति विषविधानम् ॥ ११० ॥ १११ ॥

बा० १। सङ्गतिमाह *इदानीमिति । व्यवस्थितमिति पाठः। विषशब्दस्य क्लीबत्वात् । एवमग्रेऽपि । विषमित्यस्य मध्यमणिन्यायेनान्वयेन एव क्त्वेत्यस्यार्थमाह *विषमभीति । अकृतत्वादाह *विषं वेगैरिति । लिङ्गार्थाविवक्षया आह *जीर्यतीत्यादि । वेगैरितिबहुवचनोचितमाह *विषवेग इति । पितामहमाह *धातोरिति । *च लक्षणानीति । लक्षणानीति[illegible]ः। तदेवाह *वेग इति। तस्योर्ध्व इति पूर्वान्वयि । तस्येति शेषत्वविवक्षया षष्ठी । *तत्पराविति । यथाक्रममिति भावः । *मय-

तीति । तनोर्वि…तामातवञ्चलतां कण्ठभङ्गं हिकां चेत्यर्थः । वितरतिचेति चस्त्वर्थे व्युत्क्रमे च ।

२। विशेषमा… *अत्रचेति । तदानन्तर्यामावा… यथाश्रु-तास…तेनार्रदार्थं सम्प्रयोगक्रमम। *प्रादित्यादि । तद्दिने उप-वासाभ्रमाय सोपवास इत्यस्य व्याख्या * …तापवास इति । शेषमाह * त…त्यादि । *निधाय, बध्वा । पूर्वमन्त्रः कर्तुरिति अत्र पैताम…मेव तन्मन्त्रमाह * त्वं विषेति । विशेषोक्तौ हेतुमाह *नारदेति । तदेवाह * द्विजानामिति । स्थिते इति उद्देश्य-स्यानि…सप्तमी। * प्राङ्मुखो वा, प्रा…विवाकः।

विषस्येत्यस्य प्रत्येकं सम्बन्धः, विकल्पे वा ।

यवाः सप्त प्रदातव्याः शु…हेतोरसंशयः ।

इति अस्य पूर्वार्द्धम् । भेदस्तु—

कात्यायनेनोक्तः,

अजाशृङ्गनिभं श्यामं सुपीतं शृङ्गसम्भव… ।
भङ्गे च शृङ्गवेराभं ख्यातं त…णां विषम् ॥
…स्यमासितं …र्यात्कठिनं चैव तत्क्षणा… ।
अनेन विधिना ज्ञेयं विषं दिव्यविशारदैः ॥
वत्सनाभनिभं पीतं वर्णज्ञानेन निश्चयः ।
…किन्शृङ्गाकाविभङ्गे विद्यात्सद्वत्सनाभकम् ॥
म…लीरसमायुक्तं स्वच्छं कुर्वीत तत्क्षणात् ।
ब्राह्ममेवं समाख्यातं लक्षणं धर्मसाधकैः ॥ इति ।

३। *तेनैव, पिताम…नैव। एवः भा… ता। …दभ्यस्यासचौ । *चारितानि, सम्बा… तानि कस्मैचि…चानि । *च… जीर्णानि, अतिजीर्णानीति पाठान्तर… । उक्तहेतोरेवाह *नारदेनेति । उ-क्तार्थात्यस्या… पक्षः। तथाच ना… नापीति पाठे तद्वत् तना… …

नीत्यर्थः। *ईप्सितं, सञ्चयवात्मकः।

४। *हिमेति। हेमन्तशिशिरयोरित्यर्थः। नारदमेवाह *व-र्षे इति। इदमाह।

वर्षासु षड्यवा मात्रा ग्रीष्मे पञ्चयवा स्मृता।
हेमन्ते सा सप्तयवा शरद्यास्ततोऽपिहि॥

इति कल्पतरौ पाठः। मात्राशब्दः परिच्छिन्नपरिमाणक वर्तते। सा मात्रा अल्पा त्रियवेति कश्चित्। न्यूनतां निराचष्टे *हेमन्तेत्यादि।

५। नारदमेवाह *विषस्येति। शोध्ये इति तस्य तत्त्वविवक्षया। तदर्थमाह *पलं चेत्यादिना। पक्षान्तरनिरासायाह *अत्रेति। षडादिशब्दाः षष्ठादिपरा इत्याह * षष्ठ इत्यादि। ... नियमात् दोषः। अतएवात्र मिथो विरोधो न। तस्मा-दिति संबन्धिनस्तत्त्वविवक्षया पञ्चमी तत्रेति भावः। शोध्ये इति प्राग्वत्। तामित्यस्य व्याख्या * विंशतीति।

६। विशेषं तत्राह *घृतंचेति। देहिनामित्यादि तस्य तत्त्ववि-वक्षया। *श्लक्ष्णं पिष्टमिति। तद् यथा स्यात्तथा पिष्टमित्यर्थः। सम्यक् पिष्टमिति पाठान्तरम्। घृतपरिमाणमाह *त्रिंशदिति। यथाश्रुतासंगतेः तदर्थमाह * त्रिंशादिति। त्रिंशद्गुणेन त्विति कल्पतरौ पाठः।

७। विशेषमाह * शोध्यमित्यादिना। * कुहकेति। तन्त्रादिभ्य इत्यर्थः। कुहकादीनामेकमेव विशदयति * ओषधी-रिति। *गूढोत्पन्नानिति। गुप्ततया संजातानित्यर्थः। विषमिति पाठे तथाशब्दः समुच्चये। अपीति पाठे तद्वदित्यर्थे।

८। विशेषमाह *तयेति। पञ्च तालशतानि यस्मिन्निति बहुव्रीहिः। कालविशेषणम्। कालाध्वनोरिति द्वितीया। *चिकि-

त्सितमिति । चिकित्सनमिति पाठान्तरम् । अनर्थान्तरम् । विरोधं परिहरति * पितामहेनेति । तमेवाह * भक्षितेत्विति । विषे इति भावः । स्वस्थ इत्यस्यैव व्याख्या * मूर्छेति । सर्वसंग्रहायाह *निर्विकार इति ।

९। कंचन विशेषं कथयन्प्राग्युक्तमपि किंचित् स्पष्टत्वायाह *अत्र चेति । क्रमेऽन्वयः । *निधाय, आबध्य ॥११०॥१११॥

इति विषाविधिः ॥

मि० अथ कोशविधिमाह ।

या० देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् ।
संश्राव्य पाययेत्तस्माज्जलं तु प्रसृतित्रयम् ॥ ११२ ॥

मि० उग्रान्देवान् दुर्गादित्यादीन् समभ्यर्च्य गन्धपुष्पादिभिः पूजयित्वा संस्लाप्य तत्स्नानोदकमाहरेत् । आहृत्य च "तोय त्वं प्राणिनां प्राण" इत्यादिना तत्तोयं प्राड्विवाकः संश्राव्य शोध्येन च तत्तोयं पात्रान्तरे कृत्वा सत्येन माऽभिरक्ष त्वं वरुणेत्यनेनाभिमन्त्रितं पाययेत्प्रसृतित्रयम् । एतच्च साधारणधर्मेषु धर्मावाहनादिसकलदेवतापूजाहोमसमन्त्रकप्रतिज्ञापत्रशिरोनिवेशनान्तेषु सत्सु च । अत्र च स्लाप्यदेवतानियमः कार्यनियमोऽधिकारिनियमश्च पितामहादिभिरुक्तः ।

भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य तु पाययेत् ॥
दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् ॥
दुर्गायाः स्लापयेच्छूलमादित्यस्य तु मण्डलम् ।

अन्य ।मपि देवानां स्नापयद्‌ ुधानि तु ॥
इति देवतानियमः।
विस्रम्भे सर्वशङ्कासु सन्धिकार्ये तथैव च।
एषु कोशः प्रदातव्यो नित्यं चित्तवि ुद्धये ॥
इति कालनियमः। (ना० व्य० प० १।३२८)
पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च।
स२ कस्याव्यसनिनः कोशपानं विधीयते ॥
सशूक आस्तिकः।
मद्यप ोव्यसनिनां कितवानां तथैव च।
कोशः प्राज्ञैर्न दातव्यो ये च नास्तिक यः ॥
महापराधे निर्धर्मे कृतघ्ने क्लीब ुत्सिते।
नास्तिकव्रात्यदाशेषु कोशपानं विवर्जयेत् ॥ इति।

महापराधो महापातकम्। निर्धर्मो वर्णाश्रमधर्मरहितः पाखण्डी। कुत्सितः प्रतिलोमजः। दाशाः कैवर्ताः। इत्यधिकारिनियमः।

तथा, गोमयस्य मण्डलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेदिति नारदवचना -वगन्तव्य ः।

यथाह,

तमाहूयाभिशस्तं तु मण्डलाभ्यन्तरे स्थितम्।
आदित्याभिमुखं कृत्वा पाय ॥ इति॥ ११२॥

बा० १। *कोशेति। कोशोऽर्थदिव्ययोरित्यनेकार्थः। कोशः कोष इवाण्डजे। कुड्मले चषके दिव्येऽर्थचये योनिशम्बयो ः। जातीकोशे ऽसिपिधाने इति हैमश्च। तत्रापि प्रकृतेऽपां वाचकत्वा. तत्र रूढिः। *संश्राव्य, अभिमन्त्र्य। *तस्मात् आहृतात् जलात्।

वि रूपम् । सर्वो व्यसाधारणं च धर्मोवा प्राग्वि
वाहादापि कर्तव्यः । इति तप्तमाषविधिः ।

तप्तमाषविधिः पितामहेनोक्तः । तथाहि ।
सौवर्णं राजतं वापि ताम्रं वा षोडशाङ्गुलम्
चतुरङ्गुलखातं तु मृन्मयं वाऽथ मण्डलम् ॥
वर्तुलमित्यर्थः ।
पूरयेद् घृततैलाभ्यां विंशत्या तु पलैस्तु तत् ।
सुवर्णमाषकं तस्मिन् सुतप्ते निक्षिपेत्ततः ॥
अङ्गुष्ठाङ्गुलियोगेन उद्धरेत्तप्तमाषकम् ।
कराग्रं यो न धुनुयाद्विस्फोटो वा न जायते ॥
शुद्धो भवति धर्मेण निर्विकारकराङ्गुलिः ।
तदूर्ध्वेतिनि [illegible] चनात्पात्रादुत्क्षेपणमात्रं न बहिः
प्रक्षेपणमादरणीयम् । अपरकल्पः ।
सौवर्णे राजते ताम्रे आयसे मृन्मयेऽपि वा ।
गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥
सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोधिताम् ।
सलिलेन सकृद्धौतां प्रक्षिपेत्ताम्रमुद्रिकाम् ॥
[illegible] च तरङ्गाढ्ये ह्यनखस्पर्शगोचरे ।
परीक्षेतार्द्रपर्णेन [illegible]कारं सुघोषकम् ॥
ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत् ।
परं पवित्रममृतं घृत त्वं यज्ञकर्मसु ॥
दह पावक पापं त्वं हिमशीतं शुचौ भव ।
उपोषितं ततः स्नातमार्द्रवाससमागतम् ॥
ग्राहयेन्मुद्रिकां तां तु घृतमध्यगतां तथा ।
प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः ॥

इस्य विस्तादेचा न स्युः शुद्धोऽसावन्यथा विः।

अत्रापि धर्मा नाद्यनुसन्धातव्यः । घृतानु-
श्रणं प्रा वाक्यस्य । त्वमग्ने सर्व तानामिति शो.
ाग्न्य भमन्त्रणमन्त्रः । प्रदेशिनीं परीक्षेयुरिति
वचनात मुद्रिकोद्धरणम् ॥

इति त माषविधिः ॥

धर्मोधर्माख्या व्यावविधिश्च पितामहेनोक्तः ।

तथाच—

अधुना संप्रवक्ष्यामि धर्माधर्मपरीक्षणम् ।
ह णां याचमानानां प्रायश्चित्तार्थिनां नृणाम् ॥
हन्तृणामिति साहसाभियोगेषु । याचमानान-
मिति अर्थाभियोगे । प्रायश्चित्तार्थिना मिति पा-
तकाभियोगेषु ।

राजतं धर्ममयं सीसकायसम् ।
इति । प्रतिमाविध नं सी कं वा आयसं वेति ।
पक्षान्तरमाह,
लिखेद् भूर्जे पटे वापि धर्माधर्मौ सितासितौ ।
अ क्ष्य पञ्चगव्येन गन्धमाल्यैः समर्चयेत् ॥
सित धर्मः ऽसितपुष्पधृक् ।
वंविधायापलिख्य पिण्डयो निधापयेत् ॥
गोमयेन मृदा वापि पिण्डौ कार्यौ समं ततः ।
मृद्भाण्डकेऽनुपहते पलक्षितौ ॥
पिते शुचौ देशे वब्राह्मण
आवा येत्ततो देवान् लोकपालांश्च पूर्ववत् ॥

धर्माधा नपूर्व तु प्रति पत्रकं क्षिपेत् । ततो-
यदि पापाव- कोऽहं धमस्त्वायातु मे करे ।
अ धर्मन्मम करे पापमायातु धर्मतः ॥ इति-
अभि त्त्वा
अभि स्तयोश्चैकं प्र तामिलाम्बतः ।
धर्मे गृहीते शुद्धः स्या धर्मं तु स हीयते ॥
एवं समासतः प्रोक्तं रणम् । इति ।
इति धर्माधर्म व्यविधिः ॥
अन्ये च शपथा द्रव्याल्पत्वम स्वावेषया जाति-
वि षाविषयाश्च मन्वादिभिरुक्ताः ।
यथा,
निष्के तु त्यवचनं द्विनिष्के पादलक्कन ।
त्रिकादर्वाक् पुण्यं स्यात्को पामतः परम् ॥
(मनु. अ. ८. श्लो. ११३)
सत्येन ापयेद्विप्रं क्षत्रियं वाहना धैः ।
गावीजक श्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥
इत्यादयः ! अत्र च शुद्धिविभा —
मनुनोक्ता, (अ. ८. श्लो. ११५ इ०)
न चार्ति च्छति क्षिप्रं स ज्ञेयः शपथे शुद्धिः । इति ।
आर्तिरपि यस्य नो राजदैविकं व्यसनं जायते
घोरमित्य व । कालनियम त्रिरात्रम तिः कार्य
लाघवगौ द्रष्टव्यः । एवं व्यवहारेजज-
यपराजयावधा णे दर्शितः—
कात्य ,
शतार्धं दापयेच्छुद्धं दो दण्डमाग्भवेत् । इति ।

तं दण्डमाह,

विषे तोये हुताशे च तुलाकोशे च तण्डुले ।
तप्तमाषकदिव्ये च क्रमाद्दण्डं प्रकल्पयेत् ॥
सहस्रं षट्शतं चैव तथा पञ्चशतानि च ।
चतुस्त्रयेकमेवं च हीनं हीनेषु कल्पयेत् ॥ इति ।
निह्नवे भावितो दद्यादित्येकदण्डेनायं दिव्यानिबन्धनो दण्डः समुच्चीयते ॥

इति दिव्यप्रकरणम् ॥

बा० १। मूलमवता यतीति *नन्विति। अर्वागित्यस्यार्थः *पूर्वमिति । राजदैविकमित्यत्र द्वन्द्वान्तस्य निमित्तमिति ठगित्याह * राजिकामित्यादि । महदित्यस्य फलमाह * अल्पस्येति । आर्थिकमाह * ऊर्ध्वमिति । अनेन नारदीये ऽपि ऊर्ध्वमित्यवधेरिति शेषो द्विसप्ताहादित्यत्र प्रभृतीति सूचितम्, अतो न विरोध इति बोध्यम्।*वैकृतं, विकृतमेव वैकृतं विकार इत्यर्थः । *कृतेति । कृतावधीत्यर्थः । इतिर्नारदसमाप्तौ । ननु नेदमवश्यवाच्यम् अत आह * अर्थेति । मौलावध्युपादानसिद्धमेव नारदेनोक्तमित्यर्थः ।

२। विरोधं परिहरति * अर्वागिति । *प्रस्तुत्य, प्रक्रम्य । *अवध्यन्तराणि, तानि तु । [illegible] *त्रिरात्रादिति । कानिचित् तानि चेति अस्यादिः। नन्वेवमनयोर्व्यवस्थायाम् [illegible] तदुक्तानाम्[illegible] व्यवस्था कथम्, अत आह *महेति । *अर्वाचीनं, न्यूनकेन सहस्रान्न्यूनम् ॥ ११३ ॥

३। न्यूनतां विराचष्टे *[illegible]दानीति। यथो[illegible]मिति। उद्देशानतिक्रमेणेत्यर्थः । नाम्ना वस्तुसंकीर्तनमुद्देशः । *भक्षणचोदितमिति । भक्षणे चोदितं शास्त्रविहितं विधिं प्रकारमित्यर्थः । क-

क्षणबोधितामिति पाठान्तरम्, भक्षणवर्जने इति च । कृत्वेत्
संमिश्रानित्यत्रान्वयः । स्नानोदकञ्चादित्यस्यैव, प्रत्यासत्
* ततः, भक्षणकारणानन्तर । * शीर्यते, विशीर्णं भवा
हनुजालं च सो [illegible] पाठः । हनुजालम् उत्तराध
क्षिणं हनुजाल [illegible] ह इति तदर्थः । क [illegible] पादानादर्थमाह *
रोपितेति । *तं, शोध्यम् । असम्ब [illegible] त्वानिरासायाह * भ
यित्वेति । [illegible] भावः । इति तण्डुलविधिः ॥

४ । * तथाहि, तदेवोच्यते । विस्तारमाह *षोडशेति ।
न्नताम । *च [illegible] रिति । बहुव्रीहिः । अथेत्यस्याग्रेऽन्वयः । अ
न का यित्वेति तत्र शेषः सूचितः । मण्डलमित्य यार्थ
*वर्त्तुलमिति। घृततैलयोरेकार्थ [illegible] ः।*धुनुयात्, कम्प
त् । सर्वसंग्रहाय तत् उपसंहरति * निर्विकारेति । बहुव्रीहि
यावद्वचनं वाचानिकमिति न्यायेनाह * उद्धरेदिति । तत्स
ऽप्याह * आदरणीयामिति । स्थलविशेषे इति भावः ।

५ । तदुक्तमेव प्रकारान्तरमन्यग्रन्थो [illegible] क्तमाह * अपरेति
*उपादायेति । स्थापयित्वेत्यर्थः । *सुशोधितामिति । भ्रमा
निरासायेति भावः । सुशोभितामिति पाठान्तरम् । *धौतां,
क्षालिता । * [illegible] । भ्रमन्ती वाक् शब्दो यस्मिन्नि
र्थः । तरङ्गैर्वीचिभिः पूर्णे । न नखस्पर्शस्यापि विषये [illegible] * चु
कारामिति। तला [illegible] चुर इति शब्देन भण्यते
रणमिदं ध्वनेः । तत्रापि सुघोषकं महाशब्दयुक्त [illegible] कार्य
षणमिदं द्वयम् । * अनेन, वक्ष्यमाणेन । प्रा [illegible] ज-
सुतत्त्वा पवित्रत्वाद्याह * पावकेति । * प्रदेशिनी
*यस्य, कर्त्तुः । तस्यामिति शेषः । घृता [illegible] मन्त्रणाविति
युक्तमित्यर्थः । अत एवाह *त्वमसो इति । प्राग्वदाह *अन्य

ति । मा... *मदाविनीमिति । इति तम्माषकविधिः ।

६। चोऽप्यर्थे । *तथाचेति । स आहेति शेषः । वचने न्यूनतां परिहरति * इ... णामित्यादि । ...तिवचनसमाप्तौ । इतराश्रमा- याह * प्रतिमेति । एकार्थत्वा...। * सीसकं वेति । अर्श्रआ- ...जन्तामिति भावः । कनन्तं वा । आहेति शेष एवेति भावः ।

७। *अभ्युक्ष्य, प्रोक्ष्य । ।सत...प इति बहुव्रीहिः । *पुष्प धृत् इति । धृञः क्विबन्तस्य रूपम् । धृगिति पाठे धृष्णोतेस्तद- न्तस्य रूपम् । भृदिति पाठे भृञस्तस्य । एवंविधायत्य य व्या ख्या *उपलिख्येति । एवंविधावुपलिख्येति पाठान्तरं सुगमम् । एवंविधायोपलिप्येति पाठे तु एवं संलिख्य चन्दनेनोपलिप्येत्य- र्थः । समं यथा स्यात् तथा कार्यौ इत्यर्थः । तत इत्यग्रिमान्वयि । * अनुपहते, अभग्नादौ । अनुपलक्षितावित्यनेन पिधानं तस्य सूचितम् । मध्ये चूर्णिकामाह * तत इति । * तयो...कमिति । ततश्चैकमिति द्वितीयः पाठः । अविलम्बित इति । *अविलम्बि- तमिति पाठे क्रियाविशेषणम् । * समासतः, संक्षेपतः ।

हस्पतिरपि,

पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ ।
जीवदानादिकैर्मन्त्रैर्गायत्राद्यैश्च सामभिः ॥
...मन्त्र्य पूजयेत् गन्धैः कुसुमैश्च सितासितैः ।
...त् ताव्भ्युक्ष्य पञ्चगव्येन ...त्पिण्डान्तरितौ ततः ॥
...मौ कृत्वा नवे कुम्भे स्थाप्यौ ...पलक्षितौ ।
...वीनं, ...कं कुम्भात्पिण्डमेकं प्रगृह्णीताविलम्बितः ॥
३। ...धर्मे गृहीते शुद्धः स्यात्संपूज्यश्च परीक्षकैः । इति ।
...कवेणेतेवदानादिकैः ताःप्रजामिथुनीत्यादिभिरिति कल्प- ...र्भि। माणप्रतिष्ठापूर्वमित्यन्ये । इति धर्माधर्मविधिः ॥

८। कात्यायनिः इत्यत्रिलोकः,

आयसं द्वादशपलं घटितं फाल व्यत।
अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तृतम् ॥
अग्निवर्णं तु तच्चौरो जिह्वया लेलिहत्सकृत् ।
न दग्धश्चेद्विशुद्धिमियादन्यथा तु स हीयते ॥ इति ।

मन्वादिभिरिति आदिना नारदादिपरिग्रहः ।
तथाच नारदः, (व्य० पृ० १।२४३।२४४)

शपथा अपि देवानामृषीणां च महात्मनाम् ।
वसिष्ठः शपथं शेपे यम-थानन शङ्कितः ॥
स चपस्त्वथेन्द्रेण ...करार्थेन शङ्किताः ।
शेपुः शपथमव्यग्राः परस्परविशुद्धये च ॥ इति ।
महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः ।
वसिष्ठश्चापि शपथं शेपे वै यवने नृपे ॥

इति मनुरपि।(८।११०) *सत्यवचनं, सत्यमिति कथनम्। *...व्यमिति। पुण्यमिति पाठान्तरम्। आद्यविषयं ...का द्वितीयमाह * सत्येनेति। * अत्र च, शपथविषये । आर्तिः पीडा सा च नान्यत्या *आर्तिरपीति। पूर्वोक्तैवेति भावः। एवं काल नियमोऽपि प्रागुक्त एवेत्याह * कालेति।

कात्यायनः,

आ... दशकादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स ज्ञेयः शपथे शुचिः ॥

अत्राह मर्यादा... ।

मनुः, (८।१११।११२)

न ...जानत्... ... नरो बुधः ।

वृथा हि शपथं ः न्मेत्य चेह च नश्यति ॥
कामिनी विवाहेषु गवांभक्ष्ये तथेन्धने ।
ाणास्युपपत्तौ च शपथे नास्ति पातकम् ॥

यमः,

कृत्वा मृषा तु शपथं कीटस्य वधसंयुतम् ।
अनृतेन तु युज्येत वधेन च तथा नरः ॥
तस्मान्न ि्व्यार्थं नरः कुर्याद्बुधेप्सितम् । इति ।

संवादि्व्येष्वाह * एवमिति । *शुद्धं, पुरुषम् । *तम्, अशुद्धसंबन्धिनम् । *आहेति । कात्यायन एवेति भावः । तुलेति समाहा न्द्वः । कल्पनामेव । * ि । पट्शताविति बहुव्रीहिः । दण्डो विशेष्यः । च रिति समाहारद्वन्द्वः । क्रमविवक्षया न दोषः । अग्रेऽपि आतिदिशन्नाह * एवंचहीनमिति । उक्तप्रकारेण कल्पनायाश्चाग्रेऽपि उत्तरोत्तरन्यूनमित्यर्थः ।

९। विरोधं परि रति * निह्नवे इति । मूलमिदं सर्वसाधारणम् । अतएव न विकल्पः । अतएवाह * अयं दिव्येति । क ि्व्यमात्रविषय इत्यर्थः। एवञ्च ाग्निसलिलविषकोशत लतप्तमाषधर्माधर्मशपथद् ्व्यैर्विधिरिमदं महा ि्व्यप्रकरणं संप मिति बोध्यम्।तदाह* तिदिव्याति॥

इति ि्व्यप्रकरणं संपूर्णम् ॥